# शमानशिक्षा

प्रणम्य प्रणताभीष्टप्रदातारं  पतिं श्रियः
बह्वृचानां सुबोधाय शमानं क्रियते लघु

विसर्जनीय आकारपूर्वको घोषवत्परः
व्यञ्जनस्पृक् शसपरो लुप्यते संहिताक्षरे

एषु वर्णक्रमात्तानि प्रवक्ष्यामि पदान्यहम्
इङ्ग्यं पृथक्पदं चात्र निमित्तत्वं पदस्य च

नानापदत्वमिङ्ग्यानां पूर्विभागस्त्ववग्रहः
निमित्तं गृह्यते यत्तत्पदमेवात्र लक्षणे

प्रथमांश्च द्वितीयांश्च हित्वा वर्ग्यास्त्रयस्त्रयः
अन्तस्थाश्च हकारश्च घोषवन्तः प्रकीर्तिताः

परिभाषा शमानस्य संग्रहेणैवमीरितम्
गजडाद्यास्त्रयो वर्णा दादयश्चैव बादयः
यादिवान्तो हकारश्च शसौ तावन्यसंयुतौ
इति परिभाषा

अजोषा अवा अस्या अयच्छथा अवाता अप्रा अप्सा अमित्रा
अपश्या अदृष्टा अयना अस्तभ्ना अन्यस्या अभ्रिया अस्मेरा

अपा अपृणा अगा अदधा अर्का अघ्न्याया अदब्धा अवीता अरिष्टा अमा अकवा अरेपा अग्रा अप्या अधृष्टा अन्तमा अवीरा असमना अज्ञाता अगोपा अनागा अयक्ष्मा अन्ता अनेना अनीका अरात्या अपवथा अजा अनूपा अपरस्या अक्रा अङ्गिरा अपुष्पा अरथा अनाधृष्या अस्थिता अनूधा अप्सरा अजायथा यस्यानूनास्तस्थुरत्या जवेष्वसमा अपप्तन्नरुणा ये मखा अमिता युवोरच्छिद्रास्समन्या ध्रुवं पर्ययास्सद्मन्वामरुषा ओजोऽमर्त्यास्समुद्रार्था ईं व्यक्ता अमीवा निःपरोऽमृता न प्रिया धामानिपूर्वोऽश्वा न विनयशसागिरोवातस्यपरोऽर्णा न धीरापरोऽजुर्या नेवपूर्वोऽरिप्रा हिन्वन्तिपर एकसप्ततिः १

आस्क्रा आहना आशुषाणा जा आर्या आदित्या न कृतमुताशातेपूर्व आयुधा इङ्ग्यान्तष्षट् २

इच्छमाना इन्वा इतरा इधाना इष्टा इषिरा दुस्पार्हाःपरः प्रेषिता वीरा इयाना धानारुद्रायविशोबृहस्पतेर्हि त्वां हि त्वाजरित्रेयावांगिरोवाजयन्नारीर्गावोविश्वाःपर इमा हन्पूर्वश्च नव ३

ईराणा ईषमाणा न ईशानास्त्रयः ४

उषा उस्रिया उखाया उक्षमाणा उक्षिता उर्वश्या उहानाः
पीतये नश्चिद्यच्छतूग्राश्चितयन्ते क्षपो वस्त इदुस्रा नव ५

ऊमा ऊता ऊर्णा ऊर्ध्वा नद्योभवन्तिपरश्चत्वारि ६

ऋक्षा ऋभुक्षा ऋष्वा ऋज्रा वातपरश्चत्वारि ७

एकस्या एवाः क्षम्यहमिन्मह्यमेता विननिपरश्चैना
अनन्तोदात्तश्चत्वारि ८

ओजा ओका द्वे ९

ऐभिर्जघन्वान्द्यौर्वस्संवत्सरं गोमायुरत्यास्सूर्यस्येव
सुष्वाणासो वि मृज्यमानः क्राणा रुद्रा उप ब्रह्माण्येतेषु
सर्वत्र ना त्वा नमसा वृषा त्रा वावग्रहश्च नित्यं नव्या स्था
इति वर्जयित्वा स्थुस्थभवन्तुपरः सर्वत्र १०

किरणाः क्रीळाः केताः कुल्याः कुमाराः कनायाः काष्ठाया
दक्षिणातस्कपर्दा एषां कशास्सोमःकृता वाजी काष्ठास्सत्यं
क्षेमं कृण्वानाः काण्वायनाः कामा न देवपूर्वः क्षाः क्षया
व्रताः क्षत्रियास्सप्तदश ११

गणा गोतमा गर्भा ग्रामा गृभ्णा गूर्ता ग्ना ग्वा गृभीता गभीरा
नो गुह्या गा न दुः सुपूर्वो गोपा न मिथुनास्यातंमासोदेवा-
परो गृणाना श्रवसेदेवपरश्चतुर्दश १२

नुदन्त घोरा एका १३

चन्द्रमाश्चेताश्चक्षाश्चक्राणाश्चक्षाणा मतौ
चनिष्ठाश्चित्रा रोधस्वतीर्यामेभिः परोऽश्वापश्चन्द्रा रिशादसः-
परश्च चक्रमाणा रिहन्तिपरो नव १४

छिन्ना एका १५

जुष्टा जोषा जुगुर्या ज्ञेया जज्ञाना ज्याया जुह्वाना जीवा ज्या
जेहमाना ज्ञा जिह्वाया जा जोहुवाना इन्द्रज्येष्ठा अग्नि न
सुजिह्वा जना न द्वापूर्वो मरुतोयुगागोभिर्देवेभ्योमहिनापरो
जाता जुषाणा यूयंपर एकोनविंशतिः १६

तिष्ठास्तृप्तास्तुस्तुवानास्तन्वानास्तस्थाना वरुणस्तुरा मातृ-
दीर्घसुकृत्तमा येगिरः परश्च तता न वसानं परस्त्या हरितो-
बृहतीः परोऽस्मान्त्स्वम्बयस्सुरुक्मे हि तोको हिते वायो
शुक्रः क्व स्वित्सम्यग्घयो ना गाव एषास्या न आपो हि
मध्या यद्यदिमाभिगोत्राण्येतेषु ता नः कणूकपरश्च दश १७

द्रप्सा दध्या दमूना दत्ता दिष्टा दीना दुग्धा दस्मा दुध्रा दग्धा देष्णा अयने दूर्वा दधाना न यूयंनियांगूढ्वीपरो दा न वाजपूर्वो यन् गिरयश्च दृळ्हास्तमा दासाश्शश्रमाणा दोषा भवन्ति दर्शताः प्र यासि दुच्छुना घृतं दुहाना हूतिर्दैव्या दुघा न विश्वाजातयस्यपरो दक्षा विनपरो दिव्या नवनपरो दाना स्मत्परो दीध्याना न प्रपूर्वो दुष्टरा यस्यपरो देवा नोभापूर्वः एषो उषा अश्विना वर्तिस्ता वामिन्द्रापर्वता प्र वो मित्राय कूष्ठः प्र नु यं युवमिमा उ वां महे शुल्कायौ त्यं ता वां दस्त्रा हीन्द्र सोममेतेषु देवा नाष्टाविंशतिः १८

धृषिता धारावरा धीरा धाया न धेना धा अनपपूर्वो धाना न विपूर्वो धारा न प्रच्युतःपूर्वो धिष्णया येपरो नव १९

नव्या नवेदा निदाया नीळा नग्ना उन्नीतास्सुनीथा हस्ते नर्या नवा नःपरो नव २०

पतङ्गाः पर्जन्याः प्रजाः प्राः पापाः पन्थाः पुनानाः पृश्न्याः पृतनाः पर्वताः पाजाः पार्याः प्रयाः प्रस्त्रवणाः पवमानाः पज्रायाः पिन्वानाः पूताः पेशाः प्रावेपाः परस्याः प्रसूताः प्रशिष्टाः प्रावृताः पत्ना वरेण्यो रयीणां प्रिया अस्य पादा इन्द्रस्य प्रेष्ठा ग्वा जायेमहि सोमायन्भिरवदन् किल प्रथमा धेनवः पिन्वमाना जग्मिरे रोदसी पथ्यास्सन्तिपुत्रा मा

प्रपीताः शतपवित्रा ओषधीः पूर्वाः पार्थिवा येपरः पा नाक्रविहास्ता प्रमित्रयोर्यातमेतेषु पृथिव्या न को अस्येमां मे वातस्येत्येतेषु पर्णा निमधुवाचंपर एकोनचत्वारिंशत् २१

फाला एका २२

बर्हा ब्राह्मणा बुबुधाना बुधाना बद्बधाना बिभीषथाष्षट् २३

भिक्षमाणा भामा भरा भरता भिन्दाना भ्रमा भोजा बृहद्धा भृता येषुपरस्त्वया वयं यदक्रन्दोऽबुध्रमुत्य एतेषु भद्रा दश २४

मूरास्सुमेधा मृगा म्रदा मोदमाना मदा मन्द्रा मर्ता मृज्यमाना मित्रा मर्या मृथा मदिता मन्वाना वध्रिमत्या वां भृमयो मन्यमाना न मासाः स गोमघा अच्छ शुचयो मनीषा विन्मिमाना भरन्मानुषास्ते मरुतो मन्दसाना मथ्रा नेमिंपरो मना इङ्ग्यान्तो मनुष्या न युगानिपरो माया न माययापूर्वः षड्विंशतिः २५

यजत्रा यस्या यतमाना यजमाना युजाना यज्ञिया योधया यूया यात्या यक्ष्मास्त्वेष यामा आरोहत्सु यमा यज्ञा अनिङ्ग्यान्तो युता यत्परो युक्ता न मातारथेनवह्निःपरः

क्षत्रायोदीर्ध्वं सुरुक्मे हि त्वं नो गोपा न दक्षिणाञ्जन्ति
त्वामयं सो अग्निर्भूयामो षु वायो शुक्रस्तं प्रत्नथा भात्यग्निरा
गावस्सुसन्दृक्के समुद्रज्येष्ठाः कुविदङ्ग पिबा सुतस्येमानि
वां वज्रेण घर्मा समन्ता मयो भूरभीवर्तेन प्रनूनमेतेषु याः प्र
मे यदिन्द्राग्नी एतयोर्द्वितीयया ऋणपूर्वश्च षोडश २६

रेषणा रेता रभिष्ठा रंहा रणा ररीथा रेजमाना रक्षमाणास्सु
रुक्माश्शुचन्न विद्युत्त्वा सु रथाः पितो रसा स्वानिनो
रुद्रिया देवो रोचमाना ऋतौ रणवा रुद्रा न वर्ति युवं ते पूर्व
एक यास्स रूपा स्थातुर्घृतस्यदिवःपरश्च षोडश २७

लोका एका २८

वसाना वर्चा विष्पुलिङ्गका वच्यमाना वल्शा विवस्वत्या
वर्धमाना वरत्रा वाजा वया वृजना वसिष्ठा वित्का व्रा
वेना विश्वस्या वचा वासा वशा वृकाश्शातव्रजाः प्र
वाता वृणाना न विपरो विप्रा न श्रयेतामसमानीयंवन्ता-
पूर्वो विदा न चकृमपूर्व इङ्ग्यान्तश्च वीरा न विट्सुपूर्वो
वावशाना अनभिपूर्वो व्यचा न वरिमतापरो वारा
होतारोयतमानाःपरो वृता द्वारःपरो वेदा न सुपूर्वो वीता
महत्परो वक्वा ध्वस्राःपरो योहि मायाभुवोविस्पृधोमती-
र्धियोनियुतोनमन्तयदजयोमृधःपरो विश्वा नेन्द्रःपूर्वश्

चतुस्त्रिंशत् २९

शुष्माश्शविष्ठा श्रवा श्रीताः शिप्राश्शोका श्रायाश्शाकाश्
शयाश्शोभिष्ठाश्शिशूलाश्शपथा श्रथ्नास्तमास्सोमास्तव
शुक्रा गृभ्नाति वि श्रिता मा श्यावाः कवि शस्तास्
त्रिशतास्सुशंसा ऊर्मिश्शम्याश्शूरा न मंहिष्ठापरश्शिवा न
नःपरश्शुभ्रा न यातंविश्वनपरस्त्रयोविंशतिः ३०

सौधन्वनास्सेना स्तोकास्सिंहास्स्नास्सर्गास्सुसंशितास्
सोमा स्वा स्तोमास्सुवाना स्वना निषत्तास्सस्त्रास्सूर्यायास्
सूभर्वास्सुरायाः प्र सूनृता नरः प्र स्पन्द्रा न भि स्थिरा
भवन्तु तास्त्वा सर्वाश्च स्या अद्रुहो नो मनीषा स्पार्हास्सृष्टा
देवपर स्था न प्रतिघर्म्यैपूर्वस्सध्रीचीना निपर स्तोम्या न
भूत्परस्सत्या न सन्ति चाकूतिर्युयुधुःपूर्वस्सुता स्तुतास्सहा
इत्येते अनिङ्ग्यान्तस्सा इङ्ग्यान्तस्त्रयस्त्रिंशत् ३१

हिमा हवमाना हूयमाना हिन्वाना हर्या हुवाना ह्वृता हाया
हेत्या वीर हव्याश्च हा दीयद्रश्मानो हिरण्यया वि होत्रा
हिता अनिङ्ग्यान्तो वृष्णोनमसावातापर्जन्यापरो हस्ताः
पञ्चदश ३२

इति शमानशिक्षामूलं समाप्तम्

Śrī Veṅkaṭarāmaśāstri, K.S., *Ṛgvedīyaṁ Śamānalakṣaṇam Upalekhasūtraṁ ca*, (Śrīraṅgam: Śrī Vāṇīvilāsa Press, 1967).
*Ṛksarva-Ṣhamāna of Nāgadeva*, son of Yajñanārāyaṇa, #239, in Aithal, K.P., *Veda-Lakṣaṇa: Vedic Ancillary Literature: A descriptive bibliography*, Delhi: MLBP, 1993, p. 174.
Vira, Raghu, and Chandra, L., *Sanskrit texts on phonetics*, (New Delhi: Satapitaka Series, 1981), pp. 280–286.
Eichler, Detlef, *shamana-shiksha-with-commentary-T.pdf*, in "Detlef's Sanskrit Documents," http://www.detlef108.de/DetlefsSanskritDocuments.htm

# शौनकशिक्षा

सर्वज्ञं सर्वकर्तारं सर्वात्मानं शिवं गुरुम्
प्रणम्यर्क्षु प्रवक्ष्यामि वर्णोच्चारणलक्षणम् १
वेदस्य लक्षणं सम्यग्बालानां बुद्धिवर्धनम्
यथोक्तं पूर्वशास्त्रेषु तथा संक्षिप्तमर्थवत् २
द्विविधं वर्णजातं हि स्वरो व्यञ्जनमेव च
अकारादिस्वरो ज्ञेयः कादि व्यञ्जनमुच्यते ३
द्विविधश्च स्वरो ज्ञेयो नासिक्यस्सानुनासिकः
उदात्तश्चानुदात्तश्च स्वरितः प्रचयस्तथा ४
कादीनां पञ्च वर्गाश्च स्पर्शा इति हि संज्ञिताः
दुस्पृष्टश्चेति विज्ञेयो डढयोस्स्वरमध्ययोः ५
वर्गाणां प्रथमा वर्णा द्वितीया ऊष्मसंज्ञिताः
हकारवर्ज्याश्चाघोषाः शिष्टं घोषवदुच्यते ६
नासिक्याः पञ्चमा वर्णा अनुस्वारस्तथैव च
चत्वारश्च यमाः प्रोक्ता अव्यक्तास्सानुनासिकाः ७
चतस्रो यादयोऽन्तस्था नासिक्या अप्यरेफिकाः
ऊष्माणश्शादयश्चैव चत्वारश्चेति कीर्तिताः ८
जिह्वामूलीय इत्युक्त उपध्मानीय एव च
कपाश्रितौ चोष्मजातौ विसर्गस्य च सम्भवौ ९
ह्रस्वो दीर्घः प्लुत इति स्वराः कालेन संज्ञिताः
सन्ध्यक्षराणां कालश्च दीर्घप्लुतौ न मात्रिकः १०
व्यञ्जनानान्त्वर्धमात्रा स्वरभक्तेस्तथैव च
संयोगे पादमात्रा स्यात्स्वरभक्तिः प्रकीर्त्यते ११

ह्रस्वात्परस्त्वनुस्वारास्त्रिपादः परिकीर्तितः
स च ह्रस्वस्त्रिपादः स्यात् द्वावेतौ सममात्रकौ १२
दीर्घात्परस्त्वनुस्वारः पादमात्रः प्रकीर्तितः
स च दीर्घस्सपादः स्याद्वर्णकालो निगद्यते १३
अकुहाः कण्ठजाः प्रोक्ता विसर्गश्चापि कण्ठजः
तालाविचुयशा जाता मूर्धन्यृटुरषा स्मृताः १४
दन्त्या लृतुलसाः प्रोक्ता उपध्मानीय ओष्ठजः
उपू ओष्ठ्यौ विजानीयात् वो दन्त्योष्ठस्तथैव च १५
ए ऐ तु कण्ठतालव्यौ ओ औ कण्ठोष्ठजौ स्मृतौ
स्पर्शानां करणं स्पृष्टं अन्तस्थास्वीषदुच्यते १६
स्वराणामूष्मणाञ्चैव विवृतं करणं स्मृतम्
संवृतञ्चेत्यकारस्य सर्ववर्णो निगद्यते १७
ओ औ उवर्ण इत्येषामनेकस्य च सङ्गमे
सकृदोष्ठ्यौ विजानीयान्नान्यश्चेन्मध्यगः स्वरः १८
उषो न ओषूणो अग्ने द्विषो युयोतु यूयुविः
विरामे च विवृत्तौ च मध्ये चेत् व्यञ्जनद्वयम् १९
द्विरोष्ठौ तु विगृह्णीयाद्वकारे त्वधरं तथा
यन्मयोभु उदीरय ताभिरूषु ऊतिभिः २०
भ्रातुः पुत्रान्धेनुं सोमस्सुष्टुतिर्मोषु वो अस्मत्
कुतुप्वो यत्र दृश्यन्ते सन्धिस्थानेषु नित्यशः २१
स्ववर्गेण नियुक्ताश्चेत् वीरं तत्रैव कारयेत्
ज्योक्करुत्तराहमुत्तर इमम्म इति च २२

नकारस्य पदान्तस्य रेफोऽन्तस्थास्वरोष्मसु
लोपस्त्वाकारपूर्वस्य सशौ तु तचयोः परे २३
पूर्वस्वरश्च नासिक्यस्स च रंगः प्रकीर्तितः
पूर्वकालो यथा तस्य रज्यमाने स एव च २४
दस्यूँ र्योनौ पणीँ र्हतं कवीँ रिछाम्यवराँ इन्दो
ताँ स्त्रायस्वावदँ स्त्वञ्च ताँश्च पाहि पुत्राँश्चेति २५
नॄन्पे च स्वतवान् पायौ विसर्गश्च विधीयते
अवर्णस्यानकारस्य स्वरे रङ्गः क्वचिद्भवेत् २६
नॄँः पात्रं स्वतवाँः पायुस्सवायँ एव स चाँ इन्द्रः
उः पदे रज्यते दीर्घः पदान्तः प्लुत एव च २७
पदान्तस्य विधिः प्रोक्तः पदमध्येऽपि दृश्यते
अभूदुपारमुभा उनूनं विन्दतीति २८
माँस्पचन्या माँश्चत्वे ह्रस्वत्वे च मँश्चतोः
मकारस्य पदान्तस्य रेफोष्मसु परेषु च २९
अनुस्वारो भवत्येव पदमध्यगतेष्वपि
त्वं रथं तं हिन्वन्ति त्वं शुक्रस्य तां सुते कीर्तिम् ३०
समानोदर्कं षष्ठेऽहनि मांसमेकः पिंशति
स्ववर्गपञ्चमश्चैव स्पर्शेषु विषयेषु च ३१
अन्तस्थासु च ता एव मकारस्य विधिः स्मृतः
इदङ्कवेः तङ्गीर्भिर्नकिष्टङ्घ्नन्ति जङ्घ्नतः ३२
सञ्चोदय सञ्ज्ञानानास्तन्त्वातन्देवाश्शन्नः
त्वम्पवित्रे प्रतरँल्लायन्तय्यत् संवर्धतेति च ३३

परस्परस्तु संयोगः स्पर्शानां संभवेद्यदि
तत्पूर्वस्य श्रुतिर्नास्ति विरामे व्यञ्जनस्य च ३४
वाक्पूता वाग्देवी विट्कुला द्विभ्राट्बृहत् तत्पुनः
जङ्घ्नन्ति त्रिष्टुब्गायत्र्यर्वाग्वितदनुष्टुप् ३५
स्पर्शानां पञ्चमैर्योगे भवन्तो हि यमाः स्मृताः
अयःपिण्डेन तत्तुल्यं घनबन्धाः प्रकीर्तिताः ३६
पलिक्नीर्यज्ञरत्नानि विद्माप्नानं ररभ्मा च
स्पर्शाश्च पञ्चमाश्चैवमन्तस्थाभिश्च संयुताः ३७
दारुपिण्डेन तत्तुल्यं घनबन्धाः प्रकीर्तिताः
शक्यं सख्यं कृच्छ्रं वज्रं राष्ट्र्यत्येतीड्यं सम्राट् ३८
मीढ्वान्रथ्यं वाध्र्यश्चोतापम्लुक्तं विभ्वीरुच्यते
ऊष्माणः पञ्चमैर्युक्ता अन्तस्थाभिश्च संयुताः ३९
ऊर्णापिण्डेन तत्तुल्यं श्लथबन्धाः प्रकीर्तिताः
अश्नोतु विष्णुर्घृतस्नु अस्मे युष्मे इति स्नुषे ४०
अस्य वामस्याजुष्रन्नश्वस्सम्मिश्ल इत्यपि
वकारस्तु नकारेण णकारेण च संयुतः
श्लथबन्धस्स विज्ञेयो दुस्पृष्टश्चात्र चोच्यते ४१
विसर्जनीयस्य यदा कपयोः परतः स्थितिः
न संहितायां भवतः ऊष्मजातौ परिग्रहे ४२
रलस्वरौ यत्र पूर्वौ ऊष्मसंज्ञे परे स्थिते
पूर्वस्वरस्य संभाक् स्यात्स्वरभक्तिः प्रकीर्त्यते ४३
हकारं पञ्चमैर्युक्तं अन्तस्थाभिश्च संयुतम्

उरस्यं तं विजानीयात्परं चेत् पृथगुच्चरेत् ४४
प्रथमात्तु हकारो यस्तच्चतुर्थमवाप्यते
स्वतृतीयमवाप्नोति पूर्ववर्णस्तदा हि सः ४५
अनुस्वारस्वराभ्यां तु संयोगादिर्द्विरुच्यते
ऊष्मणः प्रथमौ ज्ञेयौ लात् स्पर्शो रपरस्तथा ४६
ह्रस्वपूर्वौ नङौ द्वित्वमापद्येते स्वरोदयौ
प्रथमाच्च नकाराद्वा शकारश्छत्वमेव च ४७
ह्रस्वात्तु द्विछकारोऽत्र यो दीर्घादपि दृश्यते
पवमान सह यस्य तनेचाति हायवर्जिताः ४८
नटाभ्यां से परे मध्ये तकारः संप्रजायते
नतयोर्लचवर्गे च सवर्णः स्यात्परस्य तु ४९
पदान्ताः प्रथमा वर्णाः घोषसंज्ञे स्वरे परे
स्वतृतीयानवाप्यन्ते पञ्चमे पञ्चमांस्तथा ५०
अपदान्ताः प्रथमा वर्णा ऊष्मसंज्ञे परे स्थिते
वर्णा द्वितीया विज्ञेया उच्यन्ते वर्णवेदिभिः ५१
यकाररेफावित्येतौ ऋकारेण च संयुतौ
ओष्ठौ तत्र न कम्प्येत क्षिप्रमेतत् प्रचक्षते ५२
नादस्तु श्रूयते घोषात् विरामाद्द्वित्वतस्तथा
अनासिक्योऽथ नासिक्यो जायते वर्णरूपतः ५३
नीचैः स्वरोऽनुदात्तस्स्यादुच्चैश्चोदात्त उच्यते
स्वरितस्तत्समाहारस्तदैक्यं प्रचयः स्मृतः ५४
अनुदात्तो हृदि ज्ञेयो मूर्ध्न्युदात्त उदाहृतः

स्वरितः कण्ठमूलीयस्सर्वस्मिन् प्रचयः स्मृतः ५५
मध्ये तु कम्पयेत्कम्पं उभौ नीचौ समौ भवेत्
द्विगुणं वर्णकालाच्च पादः कम्पार्थमिष्यते ५६
अनुदात्तमुपादाय स्वरितं ह्यवलम्बयेत्
पुनर्निहतमागछेदेष कम्पविधिः स्मृतः ५७
उदात्तः पूर्वभागस्तु परभागो निहन्यते
उदात्तकम्प इत्युक्तः कुत्रचिच्चापि दृश्यते ५८
स्थानं कालो विकारश्च संवृतं विवृतागमौ
ईषत्स्पृष्टमघोषत्वं स्वरः कम्पस्तथोष्मता ५९
घोषानासिक्यनासिक्याः वर्णधर्मास्त्विमे मताः
यावन्तो यत्र ये धर्मास्तावन्तस्तत्र तान् विदुः ६०
चतुर्मात्रश्च षण्मात्रः प्रणवः कीर्त्यते बुधैः
पूर्वस्वरः परो नादस्सममात्रः प्रकीर्तितः ६१
अनुदात्तः स्वरो ज्ञेय उदात्तो नाद उच्यते
लक्षणं प्रणवस्येदं प्रणवो ब्रह्म कीर्त्यते ६२
तैलधारामिवाछिन्नं दीर्घघण्टानिनादवत्
अवाग्जं प्रणवस्याग्रं यस्तं वेद स वेदवित् ६३
त्रिस्थानञ्च त्रिमात्रञ्च त्रिब्रह्मञ्च त्रियक्षरम्
त्रिमात्रादर्धमात्रन्तु यस्तं वेद स वेदवित् ६४
वेदो हि वर्णसंघातो वेदो ब्रह्मेति कीर्त्यते
तस्मात्तद्वेदवर्णज्ञो ब्रह्मलोके महीयते ६५
एतत्पुण्यं पापहरं वाङ्मलस्य विशोधनम्

भक्त्या ज्ञात्वा च संगृह्य ब्रह्मलोकं स गच्छति ६६
अनेन विधिना वेदं योऽधीते श्रद्धयान्वितः
सर्वपापैर्विमुक्तस्सन् ब्रह्मलोके महीयते ६७

इति शौनक शिक्षा समाप्ता

K.N.M. Divakara Dvijendra, ed., *Śaunaka Śikshā with Sanskrit and Malayalam Commentaries*, Tripunithura: Mangalodaya Press, 1962, pp. 1-40.

# स्वरव्यञ्जनशिक्षा

रेफानुलोमे नियते प्रश्रिताकामयोः क्रमे
रलोष्मोपहितोर्ह्रस्वो ङ्नवर्जं परिपन्नगे १
अभ्यासे त्रीति संख्यायास्तृतीयतिसृवर्जितः
रिणच्छ्रितो रिपुः क्रिमिः क्रिविः व्रिशो रिशादसः २
त्रिविष्टित्रिष्टुजातस्य त्रिपद्यस्त्रिस्त्रिधा त्रितः
श्रीस्त्रीप्रयोक्तव्यस्त्रिंशत्क्रिविरादिषु सोपधा ३
रिषोऽथ रिषतो रिष्यश्श्रितः सप्तकवर्जितः
यकारे च रिशोक्तौ च आदौ चानुपधा रिपुः ४
रिणग्रिष्टं रिरिक्षांसो रिहतेऽथ रिशादसः
इत्युक्तं व्यंजनं सर्वमिदानीमुच्यते स्वरः ५

इति प्रथमो वर्गः

विवृत्तिक्षैप्रभुग्नानि पुरा रेकोऽपिवा यदि
विक्रमो नाप्यनुस्वार ऋकारः स स्फुटस्वरः १
संयोगाच्च परः पूर्वः संयोगे व्यञ्जनोपधः
व्यञ्जनं वर्जयित्वैकं हसनामुपमन्त्रिणः २
व्यञ्जनान्तं पदं पूर्वे सोमधे पुरतः स्थिते
यकारोदयसंख्यानात् क्लिविवर्जं स्वरो भवेत् ३
आस्वमद्येति पटिता तृष्विति द्वादशस्वराः
ये चान्ये व्यंजनपराः संदिग्धास्ते स्वराः ४

इति द्वितीयो वर्गः २

रिवर्णोऽनुलोमादौ विवृत्त्यादिप्रसंगतः
नाभ्यासे क्षैप्रता प्राप्तेति शब्दत्रय इत्युत १
रिणन्तिरेक इत्यादौ वृणक्ते रेफनिश्चयात्
अरिमृधश्चनरिपुर्दौर्णां मात्क्रिमिरश्विना २
क्रिविं दशव्रिशोदेवं देवौ मर्त रिशादसः
मर्त्यं रिषो रीषतो नरिष्येद्गौरी अधिश्रितः ३
प्रवोभ्रियन्त इत्यादौ रिङ्शयग्लिङ्क्ष्विति स्मृतेः
बुध्न्यो रिषे रेषणं नेत्रेछादे रिच्यते क्विप ४
सावेकाचस्तृतीयादिरित्येकार उदात्तभाक्
रिहते ककुभो रेफो रलयोरेकतास्मृतेः ५
इति तृतीयो वर्गः

विवृत्त्यादौ स्वरे रेफोऽनुलोमादिप्रसंगतः संयोगाश्च परो
व्याप्तेर्वंगृदस्य स्तृभिर्यथा १
गर्मेति गर्दते सिद्धः प्रकृत्यनुपपत्तितः
गृदेतीतरयामेच्चोरणं गर्ददवंश्रृदः २
स्तृभिः स्तृणातेस्तृणोतेर्णास्तृतेत्यकृतेतिवत्
संयोगे वृद्धमित्यादिवर्धन्यादिषु निश्चयात् ३
तृष्विति क्षिप्रनामेदतृष्येतरुपमावलात्
वृकादयश्च विवृता ज्योतिष्कादिनिरेचनात् ४
इति चतुर्थो वर्गः

सर्वोपधश्च स्वरघोषवत्परो रेफं रेफी ते पुना रेफसंधयः १
रेफोदयो लुप्यते द्राघितोपधा
ह्रस्वस्याकामनियतावुभाविमौ
विसर्जनीय आकारमरेफी घोषवत्परः
ओकारं ह्रस्वपूर्वः तौ सन्धी नियतप्रश्रितौ २
निर्ऋतिः न क्रमतः तदृतं
नाप्यनुस्वारः समृतुभिः ३
संयोगश्च परः वङ्गृदस्य संस्कृतः
पूर्वसंय्योगे व्यञ्जनोपध इति कस्मान्न रिष्येम कदा चन ४
इति पञ्चमो वर्गः

आस्वमद्म तृषु यदग्ने प्राचाजिह्वं ध्वसयन्तं तृषु यदन्नेति
त्रीणि त्विषीमन्तो अध्वरस्येव
वियस्यते पृथिव्यां यो अस्मा अन्नं १
वातोपधूतो रद्धं वृत्रं वाजिन्तमायेति द्वादशतृष्वः स्वरेण
यथा मेधमर्धं वीरस्यातप्तत्नूर्यन्ते राजन् मैनमग्ने शृतं यदा २
दर्शन्वत्रेति सप्त शृत स्वरेण यथा कवर्गे वृका मृगः ३
ऋघायमाणोऽवित्रेकेऽग्निगुरिति
प्रसादसंधियं व्यञ्जनम् ४
चवर्गे ऋचा ऋच्छन्ति ऋजुरिञ्जसेरिति चाथ ५
इत्यभ्याससंदिग्धं व्यञ्जनं
टवर्गे मृळ ऋणानि रिरिगिति संचितो रेफः

तवर्गे ऋतं वृथादद्रूदरेण
ऋषक् त्रित इति संचितो रेफः ६
अन्तस्थास्वजागृजागृविं त्रिविष्टिधात्विति रेफः
संख्यार्थत्वात् ७
ऊष्मासु ऋश्यः
रिशादस इति संचितो रेफः
ऋष्टयो रिषमिति रेफः
बृसयस्य बृहत् बृहस्पतिः ८
ककारादिः पकारादिश्चकारादिश्च यो भवति
अन्तस्था यरलवाः ककारादि व्यञ्जनं वहिः ९

इति षष्ठो वर्गः

स्वरव्यञ्जनशिक्षासमाप्ता

The Bhandakar Oriental Research Institute describes this manuscript: "Svaravyañjana Śikṣā" a Śikṣā of Ṛig Veda. Author: Unknown; Date: Unknown;
Structure: 6 numbered paragraphs; Length: 3 pages, a total of 25 lines, each line containing approximately 46 syllables.
P.G. Navathe, ed., Descriptive catalogue of manuscripts in the Government Manuscripts Library deposited at the Bhandarkar Oriental Research Institute, (Poona: Bhandarkar Oriental Research Institute, 1990).

Eichler, Detlef, *Commentary on Svara-vyañjana Śikṣā*, http://www.detlef108.de/svaravyanjana-shiksha-with-commentary.pdf

# शैशिरीयशिक्षा

हरिः श्रीगणपतये नमः अविघ्नमस्तु
गजाननाय श्रीशाय सर्वविघ्नप्रणाशिने
नमो गणेशरूपाय विष्णवे दशबाहवे १
जगत्संभूतिसंरक्षासंहारैकविनोदिने
नमो भगवते तस्मै चिदानन्दाय विष्णवे २
मुद्गलो गालवो गार्ग्यः शाकल्यः शैशिरस्तथा
पञ्चैते शौनकाः शिष्याः शाखाभेदप्रवर्तकाः ३
शैशिरस्य तु शिष्यस्य शाकटायन एव च
सर्वज्ञं सर्वकर्तारमाचार्यं तु प्रणम्य च ४
शैशिरोऽहं प्रवक्ष्यामि शाखाया लक्षणं विधिम्
त्रिषष्टिश्चतुःषष्टिर्वा वर्णाः संभवतो मताः ५
प्राकृते संस्कृते वापि स्वयं प्रोक्ताः स्वयंभुवा
स्वरा विंशतिरेकश्च स्पर्शानां पञ्चविंशतिः ६
यादयश्च स्मृता ह्यष्टौ चत्वारस्तु यमाः स्मृताः
अनुस्वारो विसर्गश्च ळकारश्च तथैव च ७
दुस्पृष्टश्चेति विज्ञेयो नासिक्यं रङ्गमुच्यते
उच्चारणविशेषेणात्राक्षराश्रयमुच्यते ८
द्विविधं वर्णजातं हि स्वरो व्यञ्जनमेव च
अकारादिः स्वरो ज्ञेयः कादि व्यञ्जनमुच्यते ९
द्विविधश्च स्वरो ज्ञेयोऽनासिक्यः सानुनासिकः
उदात्तश्चानुदात्तश्च स्वरितः प्रचयस्तथा १०
कादीनां पञ्चवर्गाश्च स्पर्शा इति हि संज्ञिताः

दुस्पृष्टश्चेति विज्ञेयो डढयोः स्वरमध्ययोः ११
वर्गाणां प्रथमा वर्णा द्वितीया ऊष्मसंज्ञिताः
हकारवर्ज्याश्चाघोषाः शिष्टं घोषवदुच्यते १२
नासिक्याः पञ्चमा वर्णा अनुस्वारस्तथैव च
चत्वारस्तु यमाः प्रोक्ता अव्यक्ताः सानुनासिकाः १३
चतस्रो यादयोऽन्तस्था नासिक्या अप्यरेफिकाः
ऊष्माणः शादयश्चैव चत्वार इति कीर्तिताः १४
जिह्वामूलीय इत्युक्त उपध्मानीय एव च
कपाश्रितोष्मजातौ च विसर्गस्य च संभवौ १५
ह्रस्वो दीर्घः प्लुत इति स्वराः कालेन संज्ञिताः
सन्ध्यक्षराणां कालश्च दीर्घः प्लुतो न मात्रिकः १६
उच्चारणविशेषेणात्राक्षराश्रयमुच्यते १७
व्यञ्जनं त्वर्धमात्रं स्यात् स्वरभक्तिस्तथैव च
संयोगे पादमात्रा स्यात् स्वरभक्तिः प्रकीर्त्यते १८
ह्रस्वात् परस्त्वनुस्वारस्त्रिपादः परिकीर्तितः
स च ह्रस्वस्त्रिपादः स्याद् द्वावेतौ सममात्रिकौ १९
दीर्घात् परस्त्वनुस्वारः पादमात्रः प्रकीर्तितः
स च दीर्घः सपादः स्याद्वर्णकालो निगद्यते २०
अष्टौ स्थानानि वर्णानामुरः कण्ठः शिरस्तथा
जिह्वामूलं च दन्ताश्च नासिकोष्ठौ च तालु च २१
अकुहाः कण्ठजाः प्रोक्ता उपध्मानीय ओष्ठजः
उपू ओष्ट्यौ विजानीयाद्वो दन्त्योष्ट्यस्तथैव च

ए ऐ तु कराठतालव्यौ ओ औ कराठोष्ठजौ स्मृतौ २२
स्पर्शानां करणं स्पृष्टमन्तस्थास्वीषदुच्यते
स्वराणामूष्मणां चैव विवृतं करणं स्मृतम् २३
संवृतं चेत्यकारस्य सर्ववर्णो निगद्यते
उच्चारणविशेषेणात्राक्षराश्रयमुच्यते २४
अनुस्वारे विवृत्यन्ते विरामे चाक्षरद्वये
ओवर्णे च उवर्णे च पवर्गे च पृथक् पृथक् २५
ओ औ उवर्ण इत्येषामनुस्वारपवर्गयोः
विरामे च विवृत्तौ च मध्ये च व्यञ्जनद्वये
द्विरोष्ठौ तु विगृह्णीयाद्वकारे त्वधरं तथा २६
सुऊतयो भ्रातुः पुत्रान्धेनुं सोमः
प्र सुष्टुतिः यन्मयोभु उदीरय पुपुष्वान्
मोष्ठवो असमा बभूवुः श्वो वोचेमहीत्येतादृशं निदर्शनम्
२७
ओ औ उवर्ण इत्येषां व्यञ्जनस्य च संगतौ
सकृदोष्टौ विगृह्णीयान्नान्यश्चेन्मध्यगः स्वरः २८
द्विषो युयोतु यूयुविरित्येतत्तन्निदर्शनम् २९
कतवा यत्र दृश्यन्ते सन्धिस्थानेषु नित्यशः
स्ववर्गेण नियुक्ताश्च वीरन्तत्रैव कारयेत् ३०
हिङ्करावती तत्ते भद्रं गां भजन्त निदर्शनम् ३१
स्पर्शानां पञ्चमैर्योगे भवन्तीह यमाः स्मृताः
अयःपिराडेन तत्तुल्यं घनबन्धाः प्रकीर्तिताः ३२

सः पलिक्नीरग्निर्यज्ञं पत्निर्विघ्न दध्मात्मानं
पाप्माजगृभ्मागृभ्णामित्येतन्निदर्शनम् ३३
स्पर्शास्त्वपञ्चमाश्चैवमन्तस्थाभिश्च संयुताः
दारुपिण्डेन तत्तुल्यं श्लथबन्धाः प्रकीर्तिताः ३४
शत्रुं सख्यमग्र्यं कृच्छ्रं क्व वज्रं यज्वा राष्ट्रियति
प्लायोगिर्विद्धिर्मेढ्रंवाध्र्यश्चेति निदर्शनम् ३५
वकारस्तु नकारेण णकारेण च संयुतः
श्लथबन्धः स विज्ञेयो दुस्पृष्टश्चात्र चोच्यते ३६
भूरिदाव्नः एवयाव्नः प्रातर्याव्णः दधिक्राव्णः
ईळे द्यावापृथिवीमीळ्हे सप्तिरित्यत्र तु निदर्शनम् ३७
संयोगे शषसाः पूर्वे परं चेदनुनासिकम्
ऊर्णापिण्डेन तत्तुल्यं श्लथबन्धाः प्रकीर्तिताः ३८
अश्नोतु विष्णुर्घृतस्नूकार्ष्मेवेति निदर्शनम् ३९
परस्परस्तु संयोगः स्पर्शानां संभवेद्यदि
तत्पूर्वस्य श्रुतिर्नास्ति विरामे व्यञ्जनस्य च ४०
वाग्देवीविट् कुलाद्भिभ्राड् बृहदारैक् पन्थाम्
यद्घ्नन् त्रिष्टुब्गायत्री अस्मादनुष्टुबिति निदर्शनम् ४१
नकारान्तं पदं पूर्वं यवकारे परे पदे
असंयुतं तु विज्ञेयमुभयोर्व्यक्तिरिष्यते ४२
संयुतौ यवकारौ चेदृकारः परतो यदि
संयुतं त्वत्र विज्ञेयं नोभयोर्व्यक्तिरिष्यते ४३
अनुस्वारस्वराद्यस्तु संयोगादिर्द्विरुच्यते

ऊष्मा चेत्प्रथमौ ज्ञेयौ लात् स्पर्शौ रपरस्तथा
त्वं श्रद्धाभीरथं स्वस्ति वज्रमग्रमात्वारथम् ४४
आद्वाभ्यामीध्यस्व विभ्वीस्सहस्कृत
कश्छन्दसां पश्चात् सुष्टुभस्तिष्ठन्ति शुल्काकस्तदस्ता ४५
दिवस्परि शुल्का उल्कामिव गल्दयामर्च्चतिवर्ध-
न्तान्दितं पुनर्यन्ध पूर्वमैर्थश्च तदत्र तु निदर्शनम् ४६
यद्यूष्मानुपधो युक्तः स चेदन्तस्थया पुनः
तस्यैव क्रमणं कार्यं श्यावाः स्वाहा श्रिये ह्वये ४७
नटाभ्यां से परे मध्ये तकारः संप्रजायते
नतयोर्ले चवर्गे च सवर्णः स्यात् परस्य तु ४८
त एवादुकहेमञ्च वृत्तश्चाकारः श्रूयते
आपः क्षिप्तं च यच्छब्दं प्रथमोच्चारणलक्षणम् ४९
ससवान्त्सन्त्स्तूयसे विराट्त्सम्राट् यस्मिँल्लोके
नृञ्जातैरिति तल्लोकमस्माच्चेति निदर्शनम् ५०
अनन्त्याः प्रथमा वर्णा घोषसंज्ञे परे स्थिते
वर्णा द्वितीयानुच्यन्ते उच्यन्ते वर्णवेदिभिः ५१
द्वयोः पादुकहेमञ्च वृत्तश्चाकार श्रूयते
आपः क्षिप्तं च यच्छब्दं द्वितीयोच्चारणलक्षणम् ५२
वृख्षे वृख्षे संवथ्सरं त्वान्थ्सारि तमफ्सन्त च मथ्सरः
मथ्स्यपायीत्येतत्तु निदर्शनम् ५३
यथासौ मत्तमातङ्गः पदात्पदमवक्रमी
एवं पदं पदस्यान्ते दर्शनीयं पृथक् पृथक् ५४

रलौ स्वराद् यत्र पूर्वा ऊष्मसंज्ञे परे स्थिते
पूर्वस्वरस्य संभाव्या स्वरभक्तिः प्रकीर्त्यते ५५
अदर्शि शीर्षा अग्निर्होता सर्सृते च न जळ्हवः
शतवल्शोऽर्षा गोऽर्षन्नेतदत्र निदर्शनम् ५६
व्यञ्जनान्तेषु युक्तेषु सैव स्यात् पादमात्रिका
शीर्ष्णः शीर्ष्णः प्रसर्स्राणः तर्ह्यैवैतन्निदर्शनम् ५७
स्वरभक्तिं प्रयुञ्जानस्त्रीन् दोषान् परिवर्जयेत्
इकारं चाप्युकारं च ग्रस्तदोषं तथैव च ५८
यकाररेफावित्येतावृकारेण च संयुतौ
ओष्ठौ तत्र न कम्प्येते क्षिप्रमेतत्प्रचक्षते ५९
प्र कृतान्यृजीषिणः वज्र्यृचीषमः शम्यृक्वाणः
निर्ऋृथन् निर्ऋृतेश्चापि निदर्शनमितीदृशम् ६०
विसर्जनीयस्य यदा कपयोः परतः स्थितिः
न संहितायां भवत ऊष्मजातौ परिग्रहे ६१
ज्योतिष्कृद्यातं छर्दिष्पाविममञ्जस्पामुभये
हविष्कृतं पथस्पथ इत्यत्र तु निदर्शनम् ६२
नीचैः स्वरोऽनुदात्तः स्यादुच्चैश्चोदात्त उच्यते
स्वरितं तत्समाहारस्तदैक्यं प्रचयः स्मृतः ६३
अनुदात्तो हृदि ज्ञेयो मूर्ध्न्युदात्त उच्यते
स्वरितः कण्ठमूलीयः सर्वस्मिन् प्रचयस्तथा ६४
इमं मे गङ्गे यमुने सरस्वति निदर्शनम् ६५
उदात्तश्चानुदात्तश्च स्वरितश्च तथैव च

लक्षणं वर्णयिष्यामि दैवतं स्थानमेव च ६६
शुक्लमुच्चं विजानीयान्नीचं लोहितमुच्यते
श्यामं तु स्वरितं विद्यादग्निरुच्चस्य देवता ६७
नीचे सोमं विजानीयात् स्वरिते सविता तथा
उदात्तं ब्राह्मणं विद्यान्नीचं क्षत्रियमुच्यते ६८
वैश्यं तु स्वरितं विद्यादुदात्तं तु भरद्वसुः
नीचं गौतममित्याहुर्गार्ग्यं तु स्वरितं विदुः ६९
विद्यादुदात्तं गायत्रं नीचं त्रैष्टुभमुच्यते
जागतं स्वरितं विद्यादेतदेव नियोगतः ७०
मध्ये तु कम्पयेत् कम्पमुभौ पार्श्वौ समौ भवेत्
द्विगुणं वर्णकालाच्च पादः कम्पार्थ इष्यते ७१
अनुदात्तमुपादाय स्वरितं ह्यवलम्बयेत्
पुनर्निहतमागच्छेद् एष कम्पविधिः स्मृतः ७२
क्व१वोऽश्वा युजानो३ऽस्माभिस्त्वां ही३न्द्रेति निदर्शनम्
सरङ्गं कम्पयेत् कम्पं रथीवेति निदर्शनम् ७३
उदात्तः पूर्वभागस्तु परभागो निहन्यते
उदात्तकम्प इत्युक्तः कुत्रचिच्चापि दृश्यते ७४
शची३पतिन्तनू३नपात्स्थानान्न निदर्शनम् ७५
क्रमकाले स्थानान्न संहितावन्न कम्पयेत्
नीचस्वरितमेवात्र एष कम्पविधिः स्मृतः ७६
स्वस्थः प्रशान्तो निर्भीतो वर्णानुच्चारयेद्बुधः
नाभ्याहन्यान्न निर्हन्यान्न गायेन्न च कम्पयेत् ७७

यथैवोच्चारयेद्वर्णास्तथैवैतान् समापयेत्
निवेश्य दृष्टिं हस्ताग्रे शास्त्रार्थमनुचिन्तयन् ७८
सममुच्चारयेद्वर्णान् हस्तेन च मुखेन च
स्वरश्चैव तु हस्तश्च द्वयं तु युगपद् भवेत् ७९
हस्ताद् भ्रष्टः स्वराद् भ्रष्टो न वेदफलमश्नुते ८०
न करालो न लम्बोष्ठो नाव्यक्तोनानुनासिकः
गद्गदो बद्धजिह्वश्च न वर्णान् वक्तुमर्हति ८१
प्रकृतिर्यस्य कल्याणी दन्तोष्ठौ यस्य शोभनौ
प्रगल्भश्च विनीतश्च स वर्णान् वक्तुमर्हति ८२
यथा व्याघ्री हरेत् पुत्रान् दंष्ट्राभिर्न च पीडयेत्
भीता पतनभेदाभ्यां तद्वद्वर्णान् प्रयोजयेत् ८३
संहिता नयते सूर्यं पदानि शशिनः पदम्
क्रमो विनयते सूर्यं यत्तत्पदमनामयम् ८४
हस्तहीनं तु योऽधीते स्वरवर्णविवर्जितम्
ऋग्यजुःसामभिर्दग्धो वियोनिमधिगच्छति ८५
हस्तेनाधीयमानश्च स्वरवर्णान् प्रयोजयेत्
ऋग्यजुःसामभिः पूतो ब्रह्मलोकं समश्नुते ८६
यथा वाणी तथा पाणी रिक्तं तु परिवर्जयेत्
यत्र यत्र स्थिता वाणी पाणिस्तत्रैव तिष्ठति ८७
उच्चौ निषादगन्धारौ नीचावृषभधैवतौ
शेषास्तु स्वरिता ज्ञेयाः षड्जमध्यमपञ्चमाः ८८
उदात्तमाख्याति वृषोऽङ्गुलीनां प्रदेशिनीमूलनिविष्टमूर्धा

अन्त्ये च मध्ये च स्वरितं धृतञ्च कनिष्ठिकायामनुदात्तमेव ८९
आकाशस्था यथा विद्युत्स्फटिके मणिसूत्रवत्
एष छेदो विवृत्तीनां यथामात्रविचक्षणः ९०
वत्सानुसृतार्धमात्रा तथा वत्सानुसारिणी
पाकवत्युभयोर्ह्रस्वा दीर्घमध्या पिपीलिका ९१
प्र व एकोऽर्वाञ्चो अद्यरथं हिरण्यप्रउगम्
धृतव्रता आदित्याश्चैतत्तत्र निदर्शनम् ९२
स्वरभक्तिं प्रयुञ्जानस्त्रीन् दोषान् परिवर्जयेत्
इकारं चाप्युकारं च ग्रस्तदोषं तथैव च ९३
न च स्वरति पूर्वाङ्गे नापराङ्गे कथं चन
न स्वरे न च मात्रायां कथं स्वारो विधीयते ९४
पराङ्गस्य तु यत्पूर्वं पूर्वाङ्गस्य तु यत् परम्
उभयार्धार्धसंयोगे स्वारं कुर्याद्विचक्षणः ९५
दुर्बलस्य यथा राष्ट्रं हरेत्तद् बलवान्नृपः
दुर्बलं व्यञ्जनं तद्वद्धरेद् बलवान् स्वरः ९६
मात्रिकं वा द्विमात्रं वा स्वर्यते यदिहाक्षरम्
तस्यान्ततोऽर्धमात्रां वै मात्राधिक्यं तथैव सा ९७
ओभावश्च विवृत्तिश्च शषसा रेफ एव च
जिह्वामूलमुपध्मा च गतिरष्टविधोष्मणः ९८
यद्योभावप्रसंधानमुकारादि परं पदम्
स्वरान्तं तादृशं विद्याद्यदन्यद्व्यक्तमूष्मणः ९९
स्वराः कम्पाश्च रङ्गाश्च ये यत्कालाः स्वभावतः

वर्धन्ते प्रोच्यमानास्ते क्षिप्रयत्ने विवक्तरि १००
यकारस्त्रिविधः प्रोक्तो गुरुर्लघुर्लघूतरः
आदौ गुरुर्लघुर्मध्ये पदान्ते च लघूतरः १०१
पादादौ च पदादौ च संयोगावग्रहेषु च
जः शब्द इति विज्ञेयो अन्यत्र य इति स्मृतः
एकमक्षरमेतच्च च . . . . . . . . .पदान्तवत् १०२
माधुर्यं च न चाव्यक्तं व्यक्तं च न च पिण्डयेत्
सनाथस्येव देशस्य न वर्णास्संकरं गताः १०३
गीती शीघ्री शिरःकम्पी तथा लिखितपाठकः
अनर्थज्ञोऽल्पकण्ठश्च षडेते पाठकाधमाः १०४
माधुर्यमक्षरव्यक्तं पदव्यक्तं तु सुस्वरम्
धैर्यं लघुसमायुक्तं षडेते पाठके गुणाः १०५
राक्षेति प्रथमो ज्ञेयः ख्ना इत्यपरो भवेत्
यमास्तत्र निवर्तन्ते श्मशानादिव बान्धवाः १०६
प्रथमोत्तमवर्गीये वर्ग्यान्त्यैस्सह संगते
नासिक्यं गुरुमुच्चार्यं यमस्थानगतं वदेत् १०७
नादस्तु श्रूयते घोषाद्विरामाद् द्वित्वतस्तथा
अनासिक्योऽथ नासिक्यो जायते वर्णरूपतः १०७
दध्यङ् ह परमे व्योमन् वीर्यं चेति निदर्शनम्
नकारस्य पदान्तस्य स्वरे रेफो विधीयते
लोपस्त्वाकारपूर्वस्य सशौ तु तचयोः परे १०८
सखीँर्यान् उत् पणीँर्हतम् १०९

तादृशं रञ्जयेदङ्गं सर्वं नासिक्यसंगतम्
लाक्षारक्तं यथा तोयं नकाराङ्गस्वरं तथा
सर्वरङ्गं विजानीयाद्वन्धूँ रिति निदर्शनम् ११०
हृदयादुत्थितं रङ्गं कांस्येन समसुस्वरम्
मात्रिकं च द्विमात्रं च जघन्वाँ इति निदर्शनम् १११
यथा सौराष्ट्रिका नारी तक्राँ इत्यभिधीयते
एवं रङ्गाः प्रयोक्तव्याः खे अराँ इव खेदया ११२
लुप्ते नकारे यत् स्वरं रञ्जन्ति शौनकादयः
आदिरङ्गमिति प्रोक्तं न त्वा भीरिव विन्दतीँ३ ११३
सप्त स्वरान् प्रवक्ष्यामि तेषामेव तु लक्षणम्
जात्यः क्षैप्रोऽभिनिहितस्तैरोव्यञ्जन एव च ११४
जात्यः स्वरः सजात्येन श्रुष्ट्यग्ने क्षैप्र उच्यते
तेऽवर्धन्ताभिनिहितस्तैरोव्यञ्जन ऊतये ११५
तिरोविरामो विष्कभिते प्रश्लिष्टो हीन्द्र गिर्वणः
पादवृत्तः क ईं वेद स्वरास्सप्तैवमादयः ११६
जात्यादिः पादवृत्तान्तः स्वरितश्च स्वरास्त्रयः
उदात्तः पूर्वसन्धे यो नीचैरभिपदे स्थितः ११७
अनुदात्तः परः शेषः शाकलाद्यैः प्रचोदितः
तस्यैवोदात्तश्रवणं कम्पस्थानेऽर्धमात्रकम् ११८
कृत्रिमे तु पदान्ताद्योर्बहुधा ऋक्षु भिद्यते
लोपागमविकारादि विशेषेण त्वृचि क्रमात् ११९
यत्र त्रिंशत् समाम्नातास्संयोग उपयोगिनः

वर्णा ऋग्वेद आचार्यैः स्पर्शान्तस्थोष्मभेदतः १२०
त्रीणि त्रिषु त्रिधातूनि यत् किञ्चिदुपरि श्रुतम्
अन्तरिक्षं पुरीष्यं च एतद्विवृतलक्षणम् १२१
बहिःश्रितः पृथग्दृशश्वृकदृषिर्वृषबः बृहन्त्रिषु
वर्षाण्येतत् संवृतलक्षणम् १२२
स्पर्शाणां तु सह स्पर्शैः संयोगो यो भवेन्मिथः
पूर्वस्य संधृतिर्वक्त्रे न तु तस्येष्यते श्रुतिः १२३
परस्परं तु संयोगः स्पर्शानां संभवेद्यदि
तत्पूर्वस्य श्रुतिर्नास्ति विरामे व्यञ्जनस्य च १२४
ककुद्मान् यद्घ्नन्भिनद्मीत्यत्र दार्णस्य सन्धृतिः १२५
अग्निः पलिक्नीः श्वघ्नीव ध्रियन्ते गकघाक्षराः
वाग्देवी वाक्पूता विट्कुलाद्विभ्राड्बृहदारैक् १२६
पन्थां यद्घ्नन् त्रिष्टुब्गायत्र्यर्वाक् षळस्मादनुष्टुबिति
निदर्शनम्
स्पर्शास्त्वपञ्चमाश्चैवं स्पर्शानां संभवेद्यदि
स्वतृतीयानवाप्यन्ते पञ्चमे पञ्चमस्तथा १२७
वर्गादिर्यत्पदान्तः स्यात् परयोस्त्रिचतुर्थयोः
स्वतृतीयमवाप्नोति अन्तस्थाभिश्च संयुतः १२८
वर्गाणां प्रथमो वर्णः पञ्चमे सार्ववर्णिके
उदये पञ्चमस्थ स्यान्न चकारः पदान्तगः १२९
अर्वाग्देवा विभ्राड्बृहत् बृहद्भिर्वाजैस्त्रिष्टुब्भिः
अर्वाग्रथं सम्राड्विभ्वीर्गोमद्यूयमुद्रेभश्च १३०

अर्वाङ् नराविराण् मित्रावरुणयोः श्रमन्नोत
त्रिककुम्निवर्वदिति चाप्यत्र तु निदर्शनम् १३१
पदान्तीयाच्च वर्गादेर्हकारो यः परो भवेत्
पूर्वस्यैव चतुर्थो यो हकारस्तं समाप्नुयात् १३२
प्रथमं तु हकारश्च तच्चतुर्थमवाप्यते
स्वतृतीयमवाप्नोति पूर्ववर्णस्तथा हि सः १३३
ऋधग्घुवेम सम्राड्ढन्ता कद्धनूनं त्रिष्टुब्भिताः
चकारो न पदान्तोऽस्ति अतोऽसौ नोपदिश्यते १३४
मकारस्य पदान्तस्य रेफोष्मसु परेषु च
अनुस्वारो भवत्येव पदमध्यगतेष्वपि १३५
त्वं रथं तं हिन्वन्ति त्वं शुक्रस्य तां सु ते कीर्तिम्
समानोदयोदर्कं षष्ठेऽहनि मांसमेकः पिंशति
चक्षूंषि मंहिष्ठो मत्सदेतदत्र निदर्शनम् १३६
स्ववर्गपञ्चमश्चैव स्पर्शेषु विषयेषु च
अन्तस्थासु च ता एव मकारस्य विधिः स्मृतः १३७
अन्त्यस्थाने मकारोऽयं पूर्वः स्पर्शे पदान्तगः
उदये तत्सवर्णः स्यात् सर्वस्मिन्ननुनासिकः १३८
इदं कवेरिमाङ्कनामि तङ्गीर्भिर्नकिष्टङ्घ्नन्ति
य ईञ्चकार तं जानंस्तन्त्वा तान्देवास् तां धेनुम्
शन्नस्त्वं पवित्रे वामं बृहस्पते चिद्यम्भगम् १३९
अन्तस्थासु परास्वेवमन्तस्थां सानुनासिकाम्
रेफं विना समाप्नोति तामेव या परा ततः १४०

यँ युजमिमल्ँलोगन्तव इति निदर्शनम् १४१
नकारोऽपि लकारे तं लकारं सानुनासिकम्
यो जिगीवाल्ँलक्षमाददित्यत्र तु निदर्शनम् १४२
तकारस्तु पदान्तीयस्तावेव लजयोर्भवेत्
अङ्गादङ्गाल्लोम्नोलोम्नः यज्जातवेद इति च १४३
ङनौ यौ तौ पदान्तीयौ हषकारे परे पदे
हषौ शुद्धौ ततो ब्रूयाच्छुद्धार्याकौ ङनौ. . . १४५
दध्यङ्हार्वाङ्हवामहे देवान् हुवेम महान् ह्यस्य
वातान् ह्यश्वान् दन् षळक्षमित्यत्र तु निदर्शनम् १४५
नकारोपधहकारो यत्र यत्र विभाव्यते
नकारश्रवणं कृत्वा हकारं संधयेत् पुनः १४६
नकारोपधषकारो यत्र यत्र च दृश्यते
नकारश्रवणं कृत्वा षकारं सन्धयेत् पुनः १४७
ङकारान्तं पदं पूर्वं हकारे परतः स्थिते
ङकारश्रवणं कृत्वा हकारं संधयेत् पुनः १४८
कृत्रिमे तु पदान्ताद्योः बहुधा ऋक्षु भिद्यते
लोपागमविकारादि विशेषेण त्वृचि क्रमात् १४९
यत्र त्रिंशत् समाम्नाताः संयोग उपजीविनः
वर्णा ऋग्वेद आचार्यैः स्पर्शान्तस्थोष्मभेदतः १५०
टकारान्तान्नकारान्तात्सकारादि परं पदम्
तत्रान्तरे तथौ स्यातां विराट्त्सम्राट् ससवान्त्सन् १५१
चञजेषु नकारस्य ञकारः प्रतिजायते

मित्रेरूञ्चोदप्रवृद्धो जहि शूर शत्रूञ्जामिम् १५२
ङकारान्तं पदं पूर्वं सकाराद्युत्तरं यदि
पतेत्तत्र ककारोऽन्तः प्रत्यङ् स विश्वेति यथा १५३
ङशयोस्तु पदान्ताद्योः ककारस्त्वन्तरे भवेत्
अर्वाङ्क्शश्वत्तमन्नच्छत्वं पृथग्भावमिवोच्चरेत् १५४
पदाद्वर्गप्रथमान्ताद्यदि शादि परं पदम्
शकारश्छत्वमाप्नोति अर्वाक्छफाविव तच्छंयोः १५५
विपाट्छुतुद्री त्रिष्टुप्छेष इत्यत्र तु निदर्शनम्
नकारान्तं पदं पूर्वं शकाराद्युत्तरं यदि १५६
स नकारो ञकारः स्याच्चकारश्चान्तरा भवेत्
घनेव वज्रिञ्छ्नथिह्यमित्रानिति निदर्शनम् १५७
पदान्तस्य विसर्गस्य शषसेषूदयेषु च
ततः स्वद्वित्वमाप्नोति प्रकृतिश्च विधीयते १५८
करवयोः परयोस्य क्वचिदूष्मा भवेत्ततः १५९
ते तु पिण्डकृताः स्पर्शा ये कण्ठ्याः स्वरसंयुताः
सर्वेषां चोदाहरणं पूर्वोक्तं श्रूयतामिदम् १६०
यथा योक्त्रेण संवेष्ट्य तृणं बध्नन्ति वाहकाः
एवं वेष्ट्य यकारेण वैदिकं पिण्डमुच्यते १६१
वाध्र्यश्च सुपित्र्य वध्र्यश्वस्य सुमित्र्याः रान्द्र्या
त्र्यम्बकं कृतान्यृजीषिणः सध्र्यग्ध्यृतूंश्च १६२
तौग्र्यः वज्र्यचीषमैष्ट्यृक्वाद्र्वन्नः
अशात्व१र्योरात्र्युषसेऽस्यृषिकृत् १६३

जिह्वाग्रीयफलितमृकारद्वयसंयुतम्
एकीकृत्योच्चारणीयन्निस्सन्धिं वर्त्तिवर्त्तुलम् १६४
प्रान्तर्ऋषयो निर्ऋत्या निर्ऋतिं निर्ऋथं सचन्ताम्
अग्निः पूर्वेभिर्ऋषिभिराविर्ऋजीक ऋतूँ ऋतुपते गीर्भिर्ऋणो
१६५
दुर्हणायूञ्जर्हषाणो जर्हषन्त मतिर्हृदः
पत्नीर्हषितं ज्योतिर्हृदयं च निदर्शनम् १६६
हकारं पञ्चमैर्युक्तमन्तस्थाभिश्च संयुतम्
उच्चारणीयमौरस्यमेवमीप्सन्ति बह्वृचाः १६७
ह्नादुनीञ्च ह्वयाम्यग्निं ह्लादिके ह्लादिकावति
महान्ह्यस्य ब्रह्मब्रह्माह्नाह्नेति निदर्शनम् १६८
स्थानं कालो विकारश्च संवृतं विवृतागमौ
ईषत् स्पृष्टमघोषत्वं स्वरः कम्पस्तथोष्मता १६९
घोषानासिक्यनासिक्या वर्णधर्मास्तु देवताः
यावन्तो यत्र ये धर्मास्तावन्तस्तत्र तान् विदुः १७०
चतुर्मात्रस्तु षण्मात्रः प्रणवः कीर्त्यते बुधैः
पूर्वे स्वरो परो नादः सममात्रः प्रकीर्तितः १७१
अनुदात्तः स्वरो ज्ञेय उदात्तो नाद उच्यते
लक्षणं प्रणवस्येदं प्रणवो ब्रह्म कीर्त्यते १७२
तैलधारामिवाच्छिन्नां दीर्घघण्टानिनादवत्
अवाग्जं प्रणवस्याग्रं यस्तं वेद स वेदवित् १७३
त्रिस्थानं च त्रिमात्रं च त्रिब्रह्म च त्र्यक्षरम्

त्रिमात्रादर्धमात्राच्च यस्तं वेद स वेदवित् १७४
वेदो हि वर्णसंघातो वेदो ब्रह्मेति कीर्त्यते
तस्मात्तद्वेदवर्णज्ञो ब्रह्मलोके महीयते १७५
छन्दः पादौ ज्योतिषं नेत्रयुग्मं
हस्तौ कल्पः श्रोत्रयुग्मं निरुक्तम् १७६
शिक्षा घ्राणं व्याकरणं तथास्यं
वेदात्मने विष्णवेऽस्मै नमोऽस्तु १७७
विष्णुं षडङ्गेन्द्रियमादिदेवं
वेदात्मानं पुरुषं विश्वरूपम् १७८
संचिन्त्य देवं पठते द्विजो यः
स याति विष्णोः परमं पदं तत् ओं १७९

इति शैशिरीयशिक्षा समाप्ता

Śaiśirīya-Śikṣā, Tarapada Chowdhury, M.A., Ph.D., 1981, in: *Vedic Studies: A collection of the research papers of Prof. Dr. Raghu Vira*, pp. 403-422 (New Delhi: Śatapiṭaka Series, Vol. 272, 1981).

# वासिष्ठशिक्षा

अष्टषष्टिं वदन्त्येके चतुःषष्टिमथापरे
त्रिषष्टिमितरे वर्णानष्टपञ्चाशतं परे १
स्वराः षड्विंशतिः प्रोक्ताः स्पर्शाः स्युः पञ्चविंशतिः
चत्वारश्च तथान्तस्थाः षडूष्माणः प्रकीर्तिताः २
अनुस्वारो विसर्गश्च चत्वारश्च यमाः स्मृताः
उत्सृष्टश्चेति वर्णानामष्टषष्टिरुदाहृता ३
विना सन्ध्यक्षरह्रस्वैश्चतुःषष्टिः प्रकीर्तिता
त्रिषष्टिस्तैर्विना ज्ञेया लृवर्णेन प्लुतेन च ४
सन्ध्यक्षरप्लुतानां च ऋकारप्लुतमेव च
वर्जयित्वा परे वर्णा अष्टपञ्चाशदीरिताः ५
मनो वक्तुर्विवक्षायामावहन्ति जरानलम्
स वायुं प्रेरयत्यूर्ध्वं स च मूर्धानमुत्थितः ६
तत्र प्रतिहतो वक्त्रे विशीर्णो वर्णतां व्रजेत्
स्थानैः प्रयत्नैः करणैः बहुरूपत्वमश्नुते ७
यत्र निष्पाद्यते वर्णः तत्स्थानमभिधीयते
अष्टौ स्थानानि वर्णानामुरः कण्ठः शिरस्तथा
जिह्वामूलं च दन्ताश्च नासिकोष्ठौ च तालु च ८
अकुहाः सविसर्गाः स्युः कण्ठ्या इचुयशाः पुनः
तालव्याः स्युः सदुत्स्पृष्टा उपूपध्माः स्युरोष्ठजाः
जाता मूर्धन्यृटुरषा दन्त्या लृतुलसाः स्मृताः ९
एदैतौ कण्ठतालव्यावोष्ठ्यौ कण्ठ्यौ परावुभौ
जिह्वामूलोद्भवं जिह्वामूलं दन्तोष्ठणस्तु वः १०

पञ्चमानां यमानां च नासिका स्थानमुच्यते
विसर्गविहितं च स्यादनुस्वारश्च नासिकाम् ११
अन्तस्थापञ्चमेषु स्यादौरस्यो हस्तु नान्यथा
पञ्चमः पृथगुच्चा मध्या हकारे परतः स्थिते १२
न वायुं हमसंयोगे नासिकाभ्यां समुत्सृजेत् १३
न नदे दुः प्रयोक्तुर्यत् प्रयत्नः स पुनर्द्विधा १४
बाह्य आभ्यन्तरश्चेति चतुर्थाभ्यन्तराः स्मृताः
दुःस्पृष्टमीषत्स्पृष्टत्वं विवृतं संवृतं तथा १५
यथा कण्ठबिलस्थानपर्यन्तास्तु परस्परम्
स्पृशन्ति स्पृष्टता नाम अगुण आविर्भवेत्तदा १६
ईषत्स्पृशन्त्यभि यदा तदेषत्स्पृष्टता भवेत्
यदा स्पृशन्ति दूरेण तदा विवृतता स्मृता १७
यदा स्पृशन्ति सामीप्यं तदा संवृतता भवेत्
स्पृष्टाः स्पर्शाः स्युरन्तस्था दुःस्पृष्टसहिताः पुनः १८
ईषत्स्पृष्टास्तथोष्माणः सानुस्वारविसर्गकाः
स्वराश्च विवृतास्तेभ्य एतावदधिकं पुनः १९
विवृतादधिकं ताभ्यामैदौतौ तु द्वयावपि
आकारः संवृतोऽकारः प्रयत्ना अन्तरा इमे २०
संवारश्च विवारश्च स संवारविवारकाः
अनुप्रदानसंज्ञाश्च नादश्वासहकारकाः २१
घोषाघोषौ महाप्राण ऊष्माल्पप्राण एव च
कालस्वरा इमे बाह्याः प्रयत्नाः परिकीर्तिताः २२

वर्णोच्चारणकालेषु कण्ठाकाशस्य संवृतौ
संवारस्तस्य विवृतौ विवारो जायते तथा २३
नादः स्यात्संवृते कार्यः प्रयत्नः परिकीर्तितः २४
नादः स्यात्संवृते कण्ठे बिलेऽस्मिन्विवृते पुनः
श्वासो हकारस्तमन्त्ये स तस्यादुभयात्मनः २५
यदा नादो हकारो वा तदा घोषस्तु जायते
स्वरघोषवतामुक्तः संवारो नाद एव च २६
अघोषेषु विवारश्च श्वासश्चापि व्यवस्थितौ
अन्तस्था ह तृतीयाश्च चतुर्थाः पञ्चमास्तथा
अनुस्वारश्च दुःस्पृष्टो घोषवन्त इमे मताः २७
ऊष्माण आदितः पञ्च विसर्गः प्रथमास्तथा
द्वितीया अप्यमी वर्णा अघोषाः समुदीरिताः २८
विसर्जनीया दुःस्पृष्टा द्वितीयाः सचतुर्थकाः
अनुस्वारस्तथोष्माणो महाप्राणाश्च सोष्मकाः २९
अन्तस्थाः प्रथमाश्चैव तृतीयाः पञ्चमास्तथा
वर्गाणां मुनिभिः प्राज्ञैः अल्पप्राणाः प्रकीर्तिताः ३०
यमानां प्रथमादीनां वर्गादीनां प्रथमादिवत्
स्पृष्टताद्या वर्णभावा भवन्तीति निबोधत ३१
एकं मात्रो भवेद्ध्रस्वो द्विमात्रो दीर्घ उच्यते
त्रिमात्रस्तु प्लुतो ज्ञेयो व्यञ्जनस्त्वर्धमात्रिकम् ३२
ह्रस्वस्य रूपं जानीयाच्चतुर्भिरणुभिस्तथा
दीर्घस्य द्विगुणं विद्यात्त्रिगुणं तत्प्लुतस्य च ३३

अणुस्त्रादिरिति प्राज्ञैः
मत विवर्त्मणाः ३४
मनोऽवस्थमणु विन्द्याद्वागवस्थं द्विराणवम्
त्रिराणवं तु जिह्वाग्रे निसृतो मात्रिकः स्मृताः ३५
स्वस्थे नरे सुखासीने यावत्स्पन्दति लोचनम्
तावन्मात्रं विजानीयादिह कालः स पञ्चसु ३६
अङ्गुलिस्फोटनं यावत्तावन्नित्यं परे विदुः
ह्रस्वदीर्घप्लुताख्यानामचां मात्रा विगृह्यते ३७
चाषकाकमायूराणां रणितानि निदर्शनम् ३८
अनुदात्त उदात्तश्च स्वरितप्रचयौ तथा
एकश्रुतिश्च पञ्चैते स्वरा वर्णसमाश्रयाः ३९
उच्चैरुदात्तो विज्ञेयो नीचैः स्यादनुदात्तता
स्वरितश्च समाहारः स्यादुदात्तानुदात्तयोः ४०
तथैव प्रचयस्तेषां समाहार उदाहृतः
ततोऽप्युच्चैस्तरामर्धैत्येवमनवस्थितः ४१
उत्तरेणोत्तरेणैषामुदात्तं प्रत्युदीरितम्
पूर्वपूर्वप्रयुक्तस्य तस्य स्यादनुदात्तता ४२
उत्तरोत्तरसंबन्धे अनुदात्तताम्
आपद्येतानुदात्तस्तु पूर्वपूर्वोदितं प्रति ४३
कण्ठाकाशस्य सूक्ष्मत्वमङ्गानां दृढता तथा
स्वरस्य रौक्ष्यं गात्रस्य प्रसारस्तस्थता तथा
दन्तस्य दैर्घ्यमिति षष्ठिगुणा उच्चैष्ट्वकारकाः ४४

गात्रसंश्रृतरङ्गानां शैथिल्यं स्निग्धता ध्वनेः
कण्ठस्य ह्रस्वता स्थौल्यं खस्य नीचैष्ट्वकारकाः ४५
उच्चानामपि नीचानां संहिता वृत्तरोत्तरम्
उच्चादुच्चतरं नीचं नीचान्नीचतरं व्रजेत् ४६
द्रव्ययोर्भिन्नगुणयोरन्योन्यानुप्रविष्टयोः
अविचिन्त्यपृथग् भावो यथान्यो गृह्यते गुणः ४७
अन्यो विषमश्रुत्योस्तथोदात्तानुदात्तयोः
संसर्गरूपस्वरिते श्रुतिरन्योपलभ्यते ४८
अणुमात्रमुपादाय शिष्टं निघ्नन्ति के चन
तदा सर्वत्र कम्पः स्यात्तन्वमिति पदे यथा ४९
नैवमुच्चपरत्वेन शेषमेकश्रुतिर्भवेत्
व्यतिरेकेण नीचः स्यादिति तत्र व्यवस्थितिः ५०
उच्चकम्पेषु पुटता पारिशेष्येषु पाटवः
स्वरेषूदात्तभागस्येत्येवं विषयकल्पना ५१
नित्यः क्षैप्रोऽभिनिहितस्तैरोव्यञ्जन एव च
तिरोविरामः प्रश्लिष्टः पादवृत्तश्च सप्तमः ५२
स्वर्यते यद्यकारेण वकारेणापि वाक्षरम्
स नित्यः स्यात् पदस्यादावनादौ निहतात्परः ५३
क्व वीर्यं
सज्यावस्य निघातस्य निवृत्तावपि नित्यता ५४-१
नाव्यं प्रतिगृह्णाति
इवर्णोकारयोर्यत्वे वत्वे वा क्षैप्र उच्चयोः ५४-२

ऊत्यश्याम दिक्ष्वृध्नुवन्ति
अकारादेश ओकार एकारो स्वरितः कृतः
नीचलुप्तोऽन्तराकारः प्रोक्ताऽभिनिहतो बुधैः ५५
सोऽब्रवीत्
उदात्तादुत्तरः स्वारस्तैरोव्यञ्जनमुच्यते ५६-१
अवग्रहात्परं यत्र स्वरितं स्यादनन्तरम् ५६
प्रजात्यै
तस्य प्रतिनिहतत्वं केचिदिच्छन्ति सूरयः ५७-१
याज्यैवैनम्
यस्तु स्वरित ऊभावे प्रश्लिष्टः स उदाहृतः ५७-२
मासूत्तिष्ठन्
विवृतौ पदयोः स्वारः पादवृत्तः प्रकीर्तितः ५८
तिरोविरामं तं विद्यादुदात्तो यद्यवग्रहः
यः पदाध्ययने नीचः स्वर्यते संहिता विधौ ५९
तिरोविराममाहुस्तं केचित्प्रातिहतं परे ६०-१
इषे त्वा
स्वरितस्य पदान्तस्य सन्धाने यदुदात्तता ६०-२
सप्तस्वारानतिक्रम्य स्वरितो वर्तते क्वचित् ६०-३
अल्पवायुस्तु तस्य स्यात्पादवृत्त इति स्मृतः ६१-१
प्रयुज्येत्याहुः
द्वौ मासौ ६१-२
नित्यक्षैप्रौ दृढतरौ दृढोऽभिनिहतः स्मृतः

तिरोविरामप्रश्लिष्टौ प्रोक्तौ मृदुतरावुभौ
चतुर्थः पादवृत्तश्च तस्मादल्पतरौ स्मृतौ ६२
दृढस्वरस्य विद्वद्भिः प्रयत्नोऽधिक्यमिष्यते
मृदुमल्पतरं चैवं मध्यमेन तु कारयेत् ६३
त्रयाणामादितोऽन्योऽन्यं सन्निपातेऽणुमात्रया
निहन्यमानः स्वरितः अणुमात्रक उच्यते
एष एव बुधैः स्वारः कम्प इत्यभिधीयते ६४
उच्चानुदात्तस्वाराणामेकीभावेन यः स्वरः
प्रचयश्च धृतश्चासावुदात्तसदृशः श्रुतिः ६५
मध्यप्रयत्ननिर्वर्त्यमुक्तं स्वरविलक्षणम्
स्वरमेकश्रुतिं प्राहुर्गुणाघोषसमश्रुतिम्
केचित्प्रचयमेवाहुः स्वरमेकश्रुतिं बुधाः ६६
अचामेव स्वरैर्योगो हलान्तदुपरागतः
स्वराभिधानमेकेषामचां तेन विदुर्बुधाः ६७
उच्चान्निषादगान्धारौ नीचादृषभधैवतौ
उद्भूतात् स्वरितात् षड्जमध्यमपञ्चमाः ६८
उदात्तो ब्राह्मणो ज्ञेयोऽनुदात्तः क्षत्रियस्तथा
विन्द्याच्च स्वरितं वैश्यं धृतः शूद्र इति स्मृतः ६९
तस्मात्सर्वस्वरो मध्ये आत्मनः श्रेय उच्यता ७०
नित्यस्वरोच्चयोरेकं विना नीचः पदे स्वरः
वैदेह्यः आग्नेयम्
क्वचिद्द्वौ वा त्रयो वोच्चा नीचमन्यत्पदं स्मृतम् ७१

नक्तोषासा यज्ञपता३उ
नं प्रणक्तु स्यात्
लाही नीचात्परः स्वारो --- न चेत् ७२
इन्द्रियं वीर्यमयुवत
अग्ने यं यज्ञमध्वरम्
स्वरात्परान्नयेन्नीचान् प्रचयत्वं बहूनपि ७३
अग्ने दुध्र गह्य किंशिल वन्य या
उदात्तस्वारयोः पूर्वं धृतं नीचतरं वदेत् ७४
तया नो मृड तस्याः
पाक्या चिद्वसवो धीर्या चित्
उच्चैकादेश उच्चन्तु स्वारो
ऊभावः पूर्वरूपश्च दिग्भ्यो हीत्यादिना विना ७५
प्रातरनुवाकमुपाकुर्यात्
दशसु मासूत्तिष्ठन् ७६
सोऽब्रवीत्
तेऽब्रुवन्
दिग्भ्यो हि समीरियन्ति
स्वारो नीचोदयोऽप्येवं नीचश्चान्योन्यापास्पदात् ७७
याज्यैषा वै । ऊत्यश्याम । दिक्ष्वृध्नुवन्ति
अन्यस्वारस्त्रयः कम्पस्तेष्वेव स्वरितेषु च
अणुमात्रं निहत्यान्ते स्वकं प्रथममेव वा
द्वितीयं वा तुरीयं वा भागमित्यपरे विदुः ७८

वीर्यं व्यभजन्त
सोऽ३पोऽ३भ्यम्रियत
तेऽ३न्योऽन्यमुपाधावन् ७९
स्वाध्यायब्राह्मणेऽप्येवमुदात्ते परतः स्थिते ८०
तेन योऽ१स्मत्
उच्चोदय उदात्तस्तु स्वरितः स्वरितोदये
कम्पेषु पूर्वभागः स्यादिति तत्र व्यवस्थितिः ८१
वीर्यं ३ व्यभजन्त
अदीर्घं दीर्घवत्कुर्याद्विस्वरं यत्प्रदृश्यते
कम्पोत्स्वरिताभिगीताद्ध्रस्वाकर्षणमेव तु ८२
वीर्यं ३ व्यभजन्त
इत्येते कथिता बाह्याः प्रयत्ना वर्णसंश्रयाः ८३
येन निर्वर्त्यन्ते वर्णाः करणं तदुदीरितम् ८४
जिह्वामूलमवर्णस्याप्यनुस्वारविसर्गयोः
तस्याधो भाग उद्दिष्ट उत्स्पृष्टश्च मनीषिभिः ८५
जिह्वामध्यमिवर्णस्य स्याच्चवर्गशकारयोः
तस्यादौ तु अकारस्याप्येकारैकारयोस्तथा ८६
ऋवर्णस्य लृवर्णस्य जिह्वाग्रं सतवर्गयोः
काठकोऽन्तस्य मध्यं तु भवेद्रेफलकारयोः ८७
षकारस्य टवर्गस्य जिह्वाग्रं वेष्टितं मतम्
शेषाः स्वस्थानकरणा विशेषस्त्वत्र कथ्यते ८८
ओकारौकारयोरोष्ठे द्वयं करणमिष्यते

पुवोरुपध्मानीयस्याप्यधरोष्ठ उदाहृतः ८९
इह कीर्तिमवाप्नोति ब्रह्मलोके महीयते ९०
इति वासिष्ठशिक्षा समाप्ता

Aithal, K. Parameswara, *Veda Lakṣaṇa: Vedic Ancillary Literature: A Descriptive Bibliography*, Motilal Banarsidass (Delhi, 1993). No. 1136.

Tirupati SVUORI: An alphabetical index of Sanskrit, Telugu and Tamil Manuscripts [Palm-leaf and Paper], in the Sri Venkateswara [University] Oriental Research Institute Library, Tirupati. Tirupati: Sri Vnkateswware Oriental Research Institute, 1956, iv, 369 pp.

3503 (1143h). Palm Leaves. Grantha script; 6 folios.

# पाणिनीयशिक्षा

अथ शिक्षां प्रवक्ष्यामि पाणिनीयं मतं यथा
शास्त्रानुपूर्व्यं तद्विद्याद्यथोक्तं लोकवेदयोः १
प्रसिद्धमपि शब्दार्थमविज्ञातमबुद्धिभिः
पुनर्व्यक्तीकरिष्यामि वाच उच्चारणे विधिम् २
त्रिषष्टिश्चतुःषष्टिर्वा वर्णाः सम्भवतो मताः
प्राकृते संस्कृते चापि स्वयं प्रोक्ताः स्वयम्भुवा ३
स्वरा विंशतिरेकश्च स्पर्शानां पञ्चविंशतिः
यादयश्च स्मृता ह्यष्टौ चत्वारश्च यमः स्मृताः ४
अनुस्वारो विसर्गश्च≍क≍पौ चापि पराश्रितौ
दुःस्पृष्टश्चेति विज्ञेयो लृकारः प्लुत एव च ५
आत्मा बुद्ध्या समेत्यार्थान् मनो युङ्क्ते विवक्षया
मनः कायाग्निमाहन्ति स प्रेरयति मारुतम् ६
मारुतस्तूरसि चरन्मन्द्रं जनयति स्वरम्
प्रातःसवनयोगं तं छन्दोगायत्रमाश्रितम् ७
कण्ठे माध्यन्दिनयुगं मध्यमं त्रैष्टुभानुगम्
तारं तार्तीयसवनं शीर्षण्यं जागतानुगम् ८
सोदीर्णो मूर्ध्न्यभिहतो वक्त्रमापद्य मारुतः
वर्णाञ्जनयते तेषां विभागः पञ्चधा स्मृतः ९
स्वरतः कालतः स्थानात्प्रयत्नानुप्रदानतः
इति वर्णविदः प्राहुर्निपुणं तं निबोधत १०
उदात्तश्चानुदात्तश्च स्वरितश्च स्वरास्त्रयः
ह्रस्वो दीर्घः प्लुत इति कालतो नियमा अचि ११

उदात्ते निषादगान्धारावनुदात्त ऋषभधैवतौ
स्वरितप्रभवा ह्येते षड्जमध्यमपञ्चमाः १२
अष्टौ स्थानानि वर्णानामुरः कण्ठः शिरस्तथा
जिह्वामूलं च दन्ताश्च नासिकोष्ठौ च तालु च १३
ओभावश्च विवृत्तिश्च शषसा रेफ एव च
जिह्वामूलमुपध्मा च गतिरष्टविधोष्मणः १४
यद्योभावप्रसन्धानमुकारादिपरं पदम्
स्वरान्तं तादृशं विद्याद्यदन्यद्व्यक्तमूष्मणः १५
हकारं पञ्चमैर्युक्तमन्तःस्थाभिश्च संयुतम्
औरस्यं तं विजानीयात्कण्ठ्यमाहुरसंयुतम् १६
कण्ठ्यावहाविचुयशास्तालव्या ओष्ठजावुपू
स्युर्मूर्धन्या ऋटुरषा दन्त्या लृतुलसाः स्मृताः १७
जिह्वामूले तु कुः प्रोक्तो दन्त्योष्ठ्यो वः स्मृतो बुधैः
ए ऐ तु कण्ठतालव्या ओ औ कण्ठोष्ठजौ स्मृतौ १८
अर्धमात्रा तु कण्ठ्यस्य ह्येकारौकारयोर्भवेत्
ऐकारौकारयोर्मात्रा तयोर्विवृतसंवृतम् १९
संवृतं मात्रिकं ज्ञेयं विवृतं तु द्विमात्रिकम्
घोषा वा संवृताः सर्वे अघोषा विवृताः स्मृताः २०
स्वराणामूष्मणां चैव विवृतं करणं स्मृतम्
तेभ्योऽपि विवृतावेङौ ताभ्यामयुजौ तथैव च २१
अनुस्वारयमानां च नासिका स्थानमुच्यते
उपध्मानीय ऊष्मा च जिह्वामूलीयनासिके

अयोगवाहा विज्ञेया आश्रयस्थानभागिनः २२
अलाबुवीणानिर्घोषोऽदन्तमूल्यः स्वराननु
अनुस्वारस्तु कर्तव्यो नित्यं ह्रोः शषसेषु च २३
अनुस्वारे विवृत्त्यां तु विरामे चाक्षरद्वये
द्विरोष्ठौ तु विगृह्णीयाद्यत्रौकारवकारयोः २४
व्याघ्री यथा हरेत्पुत्रान्दंष्ट्राभ्यां न च पीडयेत्
भीता पतनभेदाभ्यां तद्वद्वर्णान्प्रयोजयेत् २५
यथा सौराष्ट्रिका नारी तक्राँ इत्यभिभाषते
एवं रङ्गाः प्रयोक्तव्याः खे अराँ इव खेदया २६
रङ्गवर्णं प्रयुञ्जीयान्नो ग्रसेत्पूर्वमक्षरम्
दीर्घस्वरं प्रयुञ्जीयात्पश्चान्नासिक्यमाचरेत् २७
हृदये चैकमात्रस्तु अर्धमात्रस्तु मूर्धनि
नासिकायां त्वथार्धं च रङ्गस्यैव द्विमात्रिकम् २८
हृदयादुत्कटे तिष्ठन्कांस्येन स्वमनुस्वरन्
मार्दवं च द्विमात्रं च जघन्वाँ२ इति दर्शनम् २९
मध्ये तु कम्पयेत्कम्पमुभौ पार्श्वौ समो भवेत्
सरङ्गं कम्पयेत्कम्पं रथीवेति निदर्शनम् ३०
एवं वर्णाः प्रयोक्तव्या नाव्यक्ता न च पीडिताः
सम्यग्वर्णप्रयोगेण ब्रह्मलोके महीयते ३१
गीती शीघ्री शिरःकम्पी तथा लिखितपाठकः
अनर्थज्ञोऽल्पकण्ठश्च षडेते पाठकाधमाः ३२
माधुर्यमक्षरव्यक्तिः पदच्छेदस्तु सुस्वरः

धैर्यं लयसमर्थं च षडेते पाठका गुणाः ३३
शङ्कितं भीतमुद्धृष्टमव्यक्तमनुनासिकम्
काकस्वरं शिरसिगं तथा स्थानविवर्जितम् ३४
उपांशु दष्टं त्वरितं निरस्तं विलम्बितं गद्गदितं प्रगीतम्
निष्पीडितं ग्रस्तपदाक्षरं च वदेन्न दीनं न तु सानुनास्यम् ३५
प्रातः पठेन्नित्यमुरःस्थितेन स्वरेण शार्दूलरुतोपमेन
मध्यन्दिने कण्ठगतेन चैव चक्राह्वसंकूजितसन्निभेन ३६
तारं तु विद्यात्सवने तृतीये शिरोगतं तच्च सदा प्रयोज्यम्
मयूरहंसान्यभृतस्वराणां तुल्येन नादेन शिरःस्थितेन ३७
अचोऽस्पृष्टा यणस्त्वीषन्नेमस्पृष्टाः शलः स्मृताः
शेषाः स्पृष्टा हलः प्रोक्ता निबोधानुप्रदानतः ३८
ञमोऽनुनासिका नह्रो नादिनो हझषः स्मृताः
ईषन्नादा यणो जश्च श्वासिनस्तु खफादयः
ईषच्छ्वासांश्चरो विद्याद्गोर्धामैतत्प्रचक्षते ३९
दाक्षीपुत्रपाणिनिना येनेदं व्याहृतं भुवि
रत्नभूतमिदं शास्त्रं पृथिव्यां संप्रकाशितम् ४०
छन्दः पादौ तु वेदस्य हस्तौ कल्पोऽथ पठ्यते
ज्योतिषामयनं चक्षुर्निरुक्तं श्रोत्रमुच्यते ४१
शिक्षा घ्राणं तु वेदस्य मुखं व्याकरणं स्मृतम्
तस्मात्साङ्गमधीत्यैव ब्रह्मलोके महीयते ४२
उदात्तमाख्याति वृषोऽङ्गुलीनां प्रदेशिनीमूलनिविष्टमूर्धा
उपान्तमध्ये स्वरितं धृतं च कनिष्ठिकायामनुदात्तमेव ४३

उदात्तं प्रदेशिनीं विद्यात् प्रचयं मध्यतोऽङ्गुलिम्
निहतं तु कनिष्ठिक्यां स्वरितोपकनिष्ठिकाम् ४४
अन्तोदात्तमाद्युदात्तमुदात्तमनुदात्तं नीचस्वरितम्
मध्योदात्तं स्वरितं द्व्युदात्तं त्र्युदात्तमिति नवपदशय्या ४५
अग्निः सोमः प्र वो वीर्यं हविषां
स्वर्बृहस्पतिरिन्द्राबृहस्पती
अग्निरित्यन्तोदात्तं सोम इत्याद्युदात्तं प्रेत्युदात्तं व इत्यनुदात्तं
वीर्यं नीचस्वरितम् ४६
हविषां मध्योदात्तं स्वरिति स्वरितं बृहस्पतिरिति
द्व्युदात्तमिन्द्राबृहस्पती
इति त्र्युदात्तम् ४७
अनुदात्तो हृदि ज्ञेयो मूर्ध्न्युदात्त उदाहृतः
स्वरितः कण्ठमूलीयः सर्वास्ये प्रचयः स्मृतः ४८
चाषस्तु वदते मात्रां द्विमात्रं चैव वायसः
शिखी रौति त्रिमात्रं तु नकुलस्त्वर्धमात्रकम् ४९
कुतीर्थादागतं दग्धमपवर्णं च भक्षितम्
न तस्य पाठे मोक्षोऽस्ति पापाहेरिव किल्विषात् ५०
सुतीर्थादागतं व्यक्तं स्वाम्नाय्यं सुव्यवस्थितम्
सुस्वरेण सुवक्त्रेण प्रयुक्तं ब्रह्म राजते ५१
मन्त्रो हीनः स्वरतो वर्णतो वा मिथ्या प्रयुक्तो न तमर्थमाह
स वाग्वज्रो यजमानं हिनस्ति यथेन्द्रशत्रुः स्वरतोऽपराधात्
५२

अनक्षरमनायुष्यं विस्वरं व्याधिपीडितम्
अक्षरः शस्त्ररूपेण वज्रं पतति मस्तके ५३
हस्तहीनं तु योऽधीते स्वरवर्णविवर्जितम्
ऋग्यजुःसामभिर्दग्धो वियोनिमधिगच्छति ५४
हस्तेन वेदं योऽधीते स्वरवर्णार्थसंयुतम्
ऋग्यजुःसामभिः पूतो ब्रह्मलोके महीयते ५५
शङ्करः शाङ्करीं प्रादाद्दाक्षीपुत्राय धीमते
वाङ्मयेभ्यः समाहृत्य देवीं वाचमिति स्थितिः ५६
येनाक्षरसमाम्नायमधिगम्य महेष्वरात्
कृत्स्नं व्याकरणं प्रोक्तं तस्मै पाणिनये नमः ५७
येन धौता गिरः पुंसां विमलैः शब्दवारिभिः
तमश्चाज्ञानजं भिन्नं तस्मै पाणिनये नमः ५८
अज्ञानान्धस्य लोकस्य ज्ञानाञ्जनशलाकया
चक्षुरुन्मीलितं येन तस्मै पाणिनये नमः ५९
त्रिणयनमुखनिःसृतामिमां य इह पठेत्प्रयतः सदा द्विजः
स भवति पशुपुत्रकीर्तिमान्सुखमतुलं च समश्नुते दिवि
दिवीति ६०

इति परिभाषा

इति पाणिनीय शिक्षा

Freund, Peter F., *Pāṇinīya Śikṣā in the Ṛg Veda Recension*, Golden Meteor Press, (Fairfield, Iowa, USA, 2017).

# लक्ष्मीकान्तशिक्षा

प्रणम्य नारायणपादपङ्कजे
समस्तलोकत्रितयार्तिहारिणी
करिष्यते वेदपदानि पाठतो
निरुप्य चोच्चस्वर निर्णयो मया १
अन्तोदात्तं पदं चेदमाद्युच्चमिदमीदृशम्
नियमो न कृतः कैश्चित्कस्मिंश्चित्स्वरलक्षणे २
एकादेशो यवादेश उदात्तस्संहितागमे
ओदेदलोप्युपात्तो यो विषयो लक्षणस्य सः ३
अन्तोदात्तं पदं यत्स्यादाद्युदात्तं तथैव च
एवं द्वैथं पदं ज्ञातुमिदं शास्त्रं प्रणीयते ४
अत्रान्तोच्चस्वरं पूर्वमकारादिक्रमेण तु
आद्युच्चं च ततो नेत्रक्रमेणैव च गृह्यते ५
नानात्वमिङ्ग्यभूतानां पदानामत्र चेष्यते
व्यस्तान्यभिविनिप्रैतान्यन्तोदात्तपदानि तु ६
अद्यान्योऽश्वतरोऽस्यर्कोऽश्नुवीताङ्गांश्वपोऽप्रति
अभिप्रीता उखापूर्वोऽस्योशानेदीश्वरः परः ७
असामा त्वन्तराजामाचार्यमाकवाक्षणयावमा
अन्याधिचरणार्ध्यस्तास्थ्नाष्टमेऽष्टाष्टका तथा ८
आमयाव्याङ्गिरस्यैतोराप्त्वाप्तात्मैतुमार्तवः
आर्तोरालिखिताग्नेय्यापयितारम्भआश्विन ९
आदित्याग्रयणीतृष्णोष्ट्वेतावग्रहवर्ति च
इषेषित इहेध्मे स्स्युइति ईशान ईश्वरः १०

ईर्मौस्त्रोरवोक्षचोतोत्याप्यूर्जा चोर्ध्वर्च्यृचा तथा
एवैचैकादशी चैष एग्येतैनैत ऐन्द्रिया ११
ऐन्द्रवायव कुर्वीतदत्तं पूर्वं  कथा कृता
कृत्वा कृष्णाकृशक्रोडः कर्ताक्रूरा तथैव च १२
कुम्भ्या काव्यः क्षुधा गत्वा गृहीत्वा गर्दभोगिरा
गायत्रिया गायत्री च गाता घोरा घृताप्यथ १३
चन्द्रचन्द्रा चतुर्थे तु चनचित्र चतुर्थ्यपि
चित्वान्तरिक्षे चिन्वीत चिनुते पूर्वमिङ्ग्यतः १४
छाया च छादयित्वा च ह्यतिष्ठत परं जहि
जाजित्वा जनिता जिह्वा जुषाणा जात स्त्वेङ्ग्यतः १५
तेमधुः प्रतिवित्तायुरम्बेसन्त्वा बृहस्पतिः
त्रातमीतीक्ष्णतृप्तश्च त्सारीदध्नादिवादिशि १६
द्रूणानो दक्षिणा दीक्ष्या दशमे दशमीदिवः
दीक्षयित्वा दिशो देवी देव्या दक्षिणानो दिशः १७
देवावग्रहवर्ति स्याद्वापरोदिविदिक्षु च
धित्वाधर्ता ध्रुवा धाता धा धिया नवमे ननु १८
नाराशंसोऽथ नावा च नेता पूषा पथा पुरा
पोषयित्नुपरः पुत्रः पृथिव्या पृथिवी पिता १९
परमेष्ठी प्रियः पर्णः पर्यारि परमा पृणे
प्रस्थाता प्रथमा पङ्क्या पावकः परमः पदा २०
पत्यः प्रेणा पिशाङ्गश्च पवयित्वा पिशाङ्गिला
प्रोक्षिता इषिता इद्ध आप्नुमुक्षित अक्षितम् २१

उतेतिरशितं चेति परेष्वेतेषु पञ्चमे ॥ २२
पित्रा पश्चा ततः पृष्ठा पिङ्गला बृहती तथा
बृहत्या बार्हस्पत्या च ब्रह्मा ब्राह्मण एव च २३
बद्धाभूत्वा तथाभित्वा भक्षयित्वा च भिन्धि च
भागो भूता तथाभासा भृत्वा भूम्ना मना मृधा २४
महिना महिमा मन्द्रा मनीषा मध्यतो मृदा
मिन्दा मात्रे तु मित्रो हर्मैत्रावरुणमानवी २५
मार्जयित्वा तथा मातामायामूर्धा च गुञ्चवै
माधा याजयतं यज्ञे समीची इहि वर्चसम् २६
पुनः स्योना सदा शेवाचैशरत्रे अथ यज्ञिया
हिरण्यमुपरात्रश्चास्यैते पूर्वेषु नेष्यते २७
मासीयन्तायतायाच्छा यज्ञो यज्ञे यदा यमः
यूष्णा येयमयुक्तश्च याजी यो योजनेऽथ या २८
रोके च रजता रात्रो रुद्रा रय्याथ रुद्र च
रूपी रुद्रस्तथा राका रूपा रक्त्वा तदोच्यते २९
लोके लेशे वशा वस्नाविदानो विश्ववास्तु च
वरिणा वाव वर्तन्या वावृथाना वृथा विशा ३०
वारुण्या वरुणी विष्टो विष्टा वक्ता वपाविशि
वेतसे वत्सरो वज्री वाचो विंशस्तु वि ३१
इति लक्ष्मीकान्त शिक्षा समाप्ता

इति लक्ष्मीकान्तशिक्षा

From "Lakṣmīkāntaśikṣāvyākhyā" in Lokesh Chandra and Raghu Vira, *Sanskrit texts on phonetics: A collection of Śikṣā texts*, International Academy of Indian Culture, 1981, pp. 290-307.

# कौहलीयशिक्षा

अथ शीक्षां प्रवक्ष्यामि कौहलीयमतानुगाम्
स्वरादिनिर्णयस्तत्र क्रियते तन्निबोधत १
उदात्तश्चानुदात्तश्च स्वरितः प्रचयस्तथा
इति चत्वारभागे हि स्वराः प्रोक्ता मनीषिभिः २
उच्चैरुच्चार्यते यस्तु स उदात्त उदाहृतः
आयामे दृढता सौक्ष्म्यं गात्रेऽङ्ग्येषु तथा गले ३
उच्चत्वकारकानेतानाहुः प्रज्ञा विशेषतः
नीचैरुच्चार्यते यस्तु सोऽनुदात्तोऽभिधीयते ४
प्रसृता मृदुता स्थौल्यं गात्रादेः कारकं विदुः
नीचत्वे स्वरितः प्रोक्तस्तयोस्संधान इष्यते ५
तस्य तु स्वरितस्यार्धमर्धमुच्चैस्तरां विदुः
शेषस्यार्धस्य नीचत्वं किंचित्त्वाद् भृशमिष्यते ६
केचिदस्यादिमं भागमुदात्तसदृशं विदुः
अनुदात्तसमश्शेष एतावन्तो द्विधा स्मृतम् ७
प्रचयः कथ्यते सद्भिरुदात्तसदृशश्रुतिः
स्वरास्सप्तविधा ज्ञेया वक्ष्यन्ते ते विशेषतः ८
नित्यः क्षैप्रोऽभिनिहतः प्रश्लिष्टः प्रातिहतस्तथा
पादवृत्तस्तथा तैरोव्यञ्जनस्वरितोऽपि च ८
अणुमात्रिक इत्येके स्वरमन्यं प्रचक्षते
उदात्तादुत्तरो नीचस्संधाने स्वरितस्स्मृतः ९
स्वारोदात्तपरश्चेत् स्यात् तदा निहत इष्यते
स्वरितस्यास्य मन्यन्ते प्रज्ञानं प्राकृतस्त्विति १०

स्वरितादुत्तरो नीचस्संधौ प्रचय इष्यते
बहुत्वेऽथ तथा ते स्युस्स्वारोदात्तपरो न तु ११
इवर्णोकारयोस्संधौ यवभाव उदात्तयोः
तत्र यस्स्वर्यते स्वारः क्षैप्र एष उदाहृतः १२
अविकारस्त्वसावेव नित्य इत्यभिधीयते १३
ओकारो य उदात्तस्स्यादेकारश्च पदान्तगः
तयोर्यस्स्वरिते संधौ निहतेनोत्तरेण तु
एषोऽभिनिहताख्यस्तु स्वरः प्रोक्तो मनीषिभिः १४
एकादिष्ट उदात्तेन नित्यः प्रातिहताभिधः १५
द्वयोरुकारयोस्संधावुदात्तं परयोः क्रमात्
तत्र यस्स्वर्यते स्वारः प्रश्लिष्टस्सोऽभिधीयते १६
तृतीयो वा चतुर्थो वा भागो निहत उच्यते
पादवृत्ताभिधस्स्वारो विवृत्तौ यः पदस्य तु १७
कम्पेषु प्रथमस्स्वारो अणुमात्रिक इष्यते
त्रयाणामादितस्तेषु संनिपातो मिथो यदि
अपरः प्रथमस्यार्धं निहतं तु विधीयते १८
तृतीयो वा चतुर्थो वा भागो निहत इष्यते
प्रश्लिष्टस्य च संयोगस्तेषामन्यतमेन चेत् १९
स्वेच्छाप्रयोग इच्छन्ति कम्पं तत्रापि केचन
अदीर्घं दीर्घवत् कार्यं तत्र ह्रस्वस्य कर्षणात् २०
अथ स्वायंभुवे काण्डे कम्पाः केचिदुदाहृताः
तत्रोदात्ताः प्रयोक्तव्या निहतांशस्तु पूर्ववत् २१

वीर्यं बलमिति ह्यत्र ह्रस्वः कम्प उदीरितः
तन्वां स्वायामितीत्यादि दीर्घः कम्पो विधीयते २२
ते येऽस्मदिति वाक्यांशे कैश्चित् कम्पो न पठ्यते
लक्षणं प्रातिकूलं तद् ब्रुवते केऽपि सूरयः २३
ये पदं निहतं कस्मात् स्यादानर्थक्यमस्य तु
एवं बहुविधा दोषाः प्रदृश्यन्ते मनीषिभिः २४
अविनीते तु पाठेऽस्मिन् व्यक्तयस्साधुरिष्यते
व्यक्तयो बहुला वेदे दृश्यन्ते स्वरवर्णयोः २५
उच्यन्ते विक्रमास्तेऽपि विज्ञेयाष्षड्विधा बुधैः
उभयं स्वरितः कश्चिदुभयोदात्तकः परः
उदात्तपूर्वकः स्वारः पर एकस्तु विद्यते २६
एकस्य विपरीतोऽन्यस्तथा प्रचयपूर्वकः
परोदात्तस्तथा स्वारपर एवं निबोधत २७
उभयोस्स्वारयोर्मध्ये निहतो यत्र दृश्यते
उच्यते विक्रमस्त्वेष उभयस्वरिताभिधः २८
इतरे विक्रमा एवमूहनीया मनीषिभिः
प्रयत्नस्स्याद् दृढतरो विक्रमेष्वेषु सम्मतः २९
उदात्तान्यनुदात्तानि बहुलानि प्रतान्यपि
निरन्तराणि दृश्यन्ते स्वरितस्य न संहतिः ३०
उदात्तास्सहका यत्र दृश्यन्ते च निरन्तराः
उच्चादुच्चतरं तेषु क्रमात् तत्राविधीयते ३१
समतावनुदात्तानां नीचान्नीचतरं विदुः

स्वरितस्य संनिपाते कम्पस्त्वभिहितः पुरा ३२
प्रथमान् विक्रमान् बुद्ध्वा सम्यगुच्चारयेदृषिम्
यस्तु विप्रो विशेषेण श्रेयो नित्यमभीप्सति ३३
नवप्रकारं विज्ञेयं पदानां स्वरलक्षणम्
अन्तोदात्तमथोदात्तमाद्युदात्तं त्र्युदात्तकम् ३४
मध्योदात्तं द्व्युदात्तं च निहतस्वरितं तथा
एकस्वरितमित्येताः पदशब्दनवस्मृताः ३५
स्वरान् हस्तेन विन्यस्येद् विपश्चिद् दक्षिणेन तु
श्रेयो विपुलमन्विच्छन् न सव्येन कदा चन ३६
तेन चेन्निष्फलं तस्य ब्रुवते ते विपश्चितः
अविदोषस्तथा कार्यस्तत एतद् विजानता ३७
कनिष्ठिकानामिका च मध्यमा च प्रदेशिनी
नीचस्वारधृतोदात्तानङ्गुष्ठाग्रेण निर्दिशेत् ३८
विन्यस्य द्विस्वरं सौम्यं मध्यमे पर्वणि स्पृशेत्
इह कीर्त्तिमवाप्नोति प्रेत्य स्वर्गे महीयते ३९
अतोऽन्यथा तु यो मर्त्यो निर्दिशेदिति मोहितः
स गच्छेन्नरकं घोरं पापयोनिषु जायते ४०
स्वरविन्यासशीलस्तु हस्तेन वेदवित्तमः
यस्तस्य गुणदोषौ यौ तत्र तौ फलदौ स्फुटम् ४१
ईजानस्य यथा तेन दाक्षायणसवो मुखः
तस्मात् तत्रावधातव्यं श्रेयो विपुलमिच्छता ४२
अधीत्य विधिवत् पूर्वमृषिमाचार्यतश्शुभात्

अनन्तरं पदाध्यायः कर्तव्यो धीमता ध्रुवम् ४३
ततः क्रममधीयीत स्वरसंस्कारसंयुतम्
एवं त्ववधानस्य श्रेयो भवति नित्यदा ४४
यस्यां पदक्रमात्रेयो वृत्तिकारस्तु कर्णिनः
तां विद्वांसो महाशाखां भद्रमश्नुवते महत् ४५
क्रमो द्वाभ्यामनुक्रम्य प्रत्यादायोत्तरं तयोः
उत्तरेणैव संदध्यादर्धर्चान्तं समापयेत् ४६
यथालक्षणमव्यग्रं यथान्यायं समाचरेत्
संहितावत्पदं पूर्वं  तयोः पदवदुत्तरम् ४७
आवृत्तिरवसानस्य प्रग्रहस्य च नेष्यते
आत्रेयेण तथाप्यत्र सा तयोस्त्ववधीयते ४८
आकारान्तमुदात्तान्तमाङ्परं यत्र दृश्यते
त्रिक्रमं तं विजानीयान्मोषूण ऊषुणस्तथा ४९
त्रिक्रमे वक्ष्यमाणे तु प्रथमे त्रिपदक्रमः
मध्यान्ताभ्यां ततस्तेषु न विशेषस्ततः परम् ५०
समस्तानि पदानि स्युर्यानि प्राप्तानि तस्य तु
विभज्यो मरणं तेषां पूर्वां शत्वे क्रमस्य तु
पुनस्सुवरकर्होतरन्तराविर्विवश्च कः
अजीगरिति रेफेण सहाज्यत्ता पदावलिः ५१
एवं क्रममधीयानस्सर्वदोषविवर्जितः
श्रेयः परमवाप्नोति दैवत्वमधिगच्छति ५२
य इच्छति जटां वक्तुं स विप्रो वेदवित्तमः

तस्य कीर्त्तिर्विवर्धेत स वेदफलमश्नुते ५३
पदद्वयमनुक्रम्य व्युत्क्रम्योत्क्रम्य संधिमत्
यथावत् स्वरसंयुक्तं प्रयुञ्ज्यात् सा जटा मता ५४
संहिता प्रकृतिः प्रोक्ता पदस्यैतत् क्रमस्य तु
जटायाः प्रकृतिस्त्वेष एवं नित्यं निबोधत ५५
जटायां वक्ष्यमाणायां कम्पसंधिस्वरादयः
अवधाय प्रयोक्तव्या निपुणं तदुदीरितम् ५६
प्रातिशाख्यादिशास्त्रोक्तं सशीक्षाञ्च विशारदः
बुद्धिशक्तिसमेतो यस्स जटां वक्तुमर्हति ५७
यदाधीतमपि ज्ञातं निगदेनैव शक्यते
अनश्नाविविशुष्केन्धस्ततो ज्वलति कस्यचित् ५८
तिस्रस्तु वृत्तयो वाचो द्रुतमध्यविलम्बिताः
प्रयोज्या नियतं वेद एवं प्रज्ञाः प्रचक्षते ५९
अन्यत्त्वं यदि वृत्तीनां कर्मणामत्र भिन्नता
वृत्तिं प्रति विशेषस्तु मात्रया भिद्यते ध्रुवम् ६०
अभ्यासार्थे द्रुतां वृत्तिं प्रयोगार्थे तु मध्यमाम्
शिष्याणामुपदेशार्थे कुर्याद् वृत्तिं विलम्बिताम् ६१
वेदक्रमो द्रुतां वृत्तिं बुद्धिकामस्तु मध्यमाम्
कुर्वीत वेदविवृतिं स्वर्गकामो विलम्बिताम् ६२
आसुरादिप्रमाद्यांश्चेद् दुर्गतिं विपरीतकः
यद्यन्यान्नियतं याति विद्यादेव ततो द्विजः ६३
अत्रैवं मन्यते केचित् सर्वशास्त्रविशारदाः

मध्यमैव प्रयोक्तव्यं निपुणं तदुदीरितम् ६४
स्वराक्षरसमानानां वृत्तिवेदप्रवृत्तिनाम्
मात्रायाः कथनं कर्तुं कैरम्मप्येण शक्यते ६५
तस्माद् वृत्तिः प्रयोक्तव्या मध्यमा वेदवित्तमैः
एवं सुसंस्कृतं नित्यं प्रयुक्तं ब्रह्म राजते ६६
क्रमविक्रमसंपन्नामद्रुतामविलम्बिताम्
नीचोच्चस्वारसंपन्नां वदेद् धृतवतीं समाम् ६७
बहुशो मन्यते मात्रालक्षणं तन्मनीषिभिः
तेषु तेष्वेवकाशेषु प्रग्राह्यामुरतम् ६८
एकद्वित्रिक्रमेणैव मात्राकालं मनीषिणाम्
शब्दैर्निदर्शयन्त्यत्र चाषकाककलापिनाम् ६९
एवं बहुविधं मात्रां लक्षणं ब्रुवते बुधाः
तत्र तत्र प्रबोद्धव्यमात्मनश्श्रेय इच्छता ७०
ब्रह्मणः प्रणवं कुर्यादादावन्ते च सर्वदा
स्रवत्यनोंकृतं पूर्वं परस्ताच्च विशीर्यते ७१
प्रणवाद्यास्सर्ववेदाः प्रणवोपर्य च स्थिताः
प्रणवस्तु सदा कार्यो वेदारम्भे मनीषिभिः ७२
अध्यर्धस्त्र तयो योऽस्य तन्नादस्त्वेकमात्रिकः
त्रास्युरध्यर्धं वा द्वयं तथा ७३
वेदस्थः प्रणवे तु स्यात् समकारो द्विमात्रिकः
स्वरमात्रा द्विमात्रं वा व्यञ्जनं त्वणुमात्रिकम् ७४
काण्डप्रश्नानुवाकानां समाप्तौ काल इष्यते

दशाष्टपञ्चमात्रास्स्युस्तन्त्राणां च त्र्यहं भवेत् ७५
विश्रमो न समासस्य
मध्ये तु पदवाक्यो वा अदृष्टार्थौ निषिध्यते ७६
रेफस्य ऊष्मसंयोग एष याति स्वरात्मताम्
समानकरणरूपभाक् ७७
ऋकार आदिरणुर्मात्रम्मध्ये रेफोऽर्धमात्रिकः
अणुमात्रस्तथान्त्यांशो मध्ये भक्तिर्विधीयते ७८
ओष्ठ्ययोः स्वरयोर्मध्ये संयोगादिर्यदि स्थितः
ओष्ठ्यस्वरान्ते चाप्येवं निपुणं तन्निबोधत ७९
अत्र धीर्विद्यते यस्य तद्विदां प्रय
शास्त्रमेतत्ततः सर्वमृषिरस्य प्रसीदति ८०
शिक्षामिमां तु योऽधीते वेदतत्त्वप्रकाशिकाम्
अतुलामश्नुते कीर्त्तिं परे ब्रह्मणि लीयते ८१

कौहलीयशिक्षा समाप्ता

Aithal, K. Parameswara, *Veda Lakṣaṇa: Vedic Ancillary Literature: A Descriptive Bibliography*, Motilal Banarsidass (Delhi, 1993). No. 479.
"Kauhalīya Śikṣā," in Hamburg Staats-Universitaet Bibliothek, cod. Palmblaetter III 8/133.
"Kauhalīya Śikṣā," in Rani, Sharada, ed., *Vedic Studies, A Collection of the Research Papers of Prof. Raghuvira*, (New Delhi: Śatapiṭaka Series, Vol. 272, 1981) pp. 394–402.

# शम्भुशिक्षा

प्रणम्य शिरसा लक्ष्मीं कालकां च सरस्वतीम्
गणेशं च तथा शम्भुं शिक्षां वक्ष्यामि शङ्करीम् १
काण्डोऽग्निसंज्ञो विज्ञेयश्चतुर्थस्तैत्तिरीयके
ग्रह इत्याददे प्रश्नः सजोषान्तो विधीयते
उख्यमित्यग्निकाण्डस्य प्रश्नद्वितयमादिकम् २
अन्त्यानुवाकसहितं वेदविद्भिरुदाहृतम्
इषे प्रभृत्यपामन्तं प्रश्नानां युक्ष्वसंयुतम् ३
अन्त्यानुवाका याज्याख्यास्त्रयोविंशतिरीरिताः
देवसवितरारभ्य उपयामान्तसंज्ञिकम् ४
वाजपेयाभिधानं षडनुवाकं विपश्चितः
समिद्दिशां समिद्धोऽग्नेर्मन्वे स्यात्प्रष्ठ्यसंज्ञिकम् ५
जीमूतादि चतुष्कं च गायत्री द्वितयं तथा
यत्तत्पञ्चमकाण्डे चानुवाकत्रितयं विना ६
प्रष्ट्यमेव महाप्रष्ठ्यमिति वेदविदो विदुः
पञ्चानुवाकमाश्मन्नित्यस्य प्रश्नस्य चादिकम् ७
विकर्षसंज्ञमित्याहुर्ऋषयो वेदवादिनः
विहव्यसंज्ञा वाजोनः प्रभृतीनां विधीयते ८
त्रयाणामनुवाकानां वेदलक्षणवेदिभिः
दशमादि त्रयः प्रश्ना इष्टयोनाम संज्ञकाः ९
ग्रहणं त्वेकमुद्दिश्य पदं वै क्रियते यतः
तदन्यत्र तु न ग्राह्यं यज्ञटाभिमतैरिति १०
त्रिपदप्रभृतिष्वेव बलीयस्त्वन्ययोगतः

अलोप एव कण्ठोक्तेरन्ययोगेऽपि सर्वदा ११
अवर्णान्तोपसर्गाश्च आरमापद्यते क्वचित्
ओष्ठशब्दादि परश्चेदकारो लुप्यतेऽनुदा १२
ऋकारोत्तररेफं च पूर्वतः स्वरभाक् स्थितः
स्वर्ये तेऽस्मात्परो रेफो दीर्घात्परो भवेद्यदि १३
रेफः करेणुश्च हकार ऊर्ध्वे लःकर्विणीति स्वरभक्तिरुक्ता
लोहारिता शेहरिणी च रेफेसेहस्तिनी हंसपदापिषोर्ध्वे १४
टवर्गे वक्रमध्ये ळे जिह्वाग्रेण तथा स्पृशेत्
उदात्तादनुदात्तस्य स्वरितो यत्र दृश्यते १५
पिपीलिकेति विज्ञेया सवर्णत्वं यदा भवेत्
दीर्घात् पिपीलिकादीर्घा मध्यमा च सवर्णयोः १६
पदैक्ये पाकवत्युक्ता प्यन्यावत्सानुसारिणी
द्वन्द्वे होरात्परे ओत्वं यातिरोर्ध्वे सुवस्त्वपि १७
यस्तामविद्वानित्यत्र नानुस्वारागमो भवेत्
अनार्षेणैव विज्ञेयो ह्यप्यकारादि संग्रहः १८
स्वरान्यौ तु व्यानोदान शब्दयोश्च सुबन्तयोः
नित्यादिनो यमात्पूर्वमिदूत्पूर्वोन्त एतिरयेत १९
सवर्णा यत्र दृश्यन्ते विसर्गो नैव दृश्यते
पिपीलिकेति विज्ञेया तदन्यो दीर्घ उच्यते २०
पृक्तादपृक्तो दीर्घश्च गुणो वर्णाद्भवेद्यतः
उभावादेश ऊभावस्तत्तस्मात्सांहितावपि २१
अनुशब्दो ह्युकारस्य वकारे वैकृते स्थिते

जटायां नैव लोपः स्यादकारश्चेति निर्णयः २२
काण्डानुक्रमतो ह्यादौ जटायां दृश्यते यथा
अलोपालोपकार्याणि त्रिपदादौ तथोत्तरम् २३
उक्तः प्रथमतो मन्त्रः पुनर्यदि स उच्यते
तत्तत्कार्यं यथापूर्वं कर्तव्यं वेदवित्तमैः २४
षत्वणत्वस्वभावेषु पदुक्तमुपदेशतः
ग्रहणं तत्करोम्यत्र कार्यं सर्वत्र नान्यथा २५
तथेयातां ब्राह्मणायेत्योपेत्यक्षरसंहिता
तत्रापि पूर्व प्रबल्यादैकारो नात्र संभवेत् २६
यथा पुनस्कृधि बलान्न सत्वविधिरिष्यते
प्राधान्यात्पुनरित्यस्य निमित्तत्वात्कृधेरिति २७
अङ्गुलीस्वरनिर्देशे व्यङ्गमङ्गो न निर्दिशेत्
अङ्गे त्वन्यांशं नादानुस्वारजं स्वरितं न्यसेत् २८
स्वरोदयेत्वनुस्वारो भवेदध्यणुमात्रिकः
विरामश्च तयोर्मध्ये वैशेषिकाविदीर्घयोः २९
उदात्तात्परतो नास्ति प्रचयः पूर्वतोऽपि वा
स्वरितः प्रचयादूर्ध्वं निहतात् प्रचयः परम्
दीर्घात्पूर्वो विसर्गो यो दीर्घान्तो यत्र दृश्यते ३०-१
मध्यमेति विजानीयादेकमात्रं प्रयुज्यते
वैशेषिकाख्या च विदीर्घयोश्चेत्
पिपीलिका दीर्घयुगे च मध्यमा
दृष्टा च वत्सानुसृति स्वसाम्ये

मध्येणमुख्यस्तु विरामकालाः
कनिष्ठिकानामिका च मध्यमा च प्रदेशिनी ३०-२
नीचस्वारधृतोदात्तानङ्गुष्ठाग्रेण निर्दिशेत्
अनुदात्तः कनिष्ठादौ अनाम्यन्ते स्वरितः स्मृतः ३१
प्रचयो मध्यमा मध्ये तर्जन्यादावुदात्तकः
अनुदात्तो हृदिज्ञेयो मूर्ध्न्युदात्त उदाहृतः ३२
स्वरितः कण्ठमूलीयः सर्वाङ्गे प्रचयः स्मृतः
न रेफे वा हकारे वा द्विर्भावो जायते क्वचित् ३३
न च वर्गद्वितीयो वा न चतुर्थे कथंचन
नङौ यत्र पदान्ते तु यवहेषु परेषु च ३४
द्वित्वं नैवाभिगच्छेतां नङौ व्यद्रपरौ विना
ये च स्वारात्परो रेफो ह्रस्वस्वारात्परस्थितः ३५
उच्चाच्च ऋपरो रेफः स्वरितः प्रचयोच्चकाः
पदादौ प्रचयो नास्ति स्वरादेकपदे ततः ३६
नास्त्युदात्तोऽपि विज्ञेयो हस्तविन्यासकर्मणि
पदकाले पदान्मात्रात् पवर्गे परतः स्थिते ३७
पुनः प्रयत्नमित्याहुर्ऋषयो वेदवादिनः
एवं क्रमजटायां च ऋषिवाक्येऽपि विश्रुतिः ३८
ओमः पवर्ग संयोगे प्रयत्नो नेष्यते पृथक्
मकाराच्च पवर्गोर्ध्वे वेष्टने नाप्नुयात्तदा ३९
मनः कायाग्निमाहन्ति स प्रेरयति मारुतम्
मारुतस्तुरसि चरन्मन्द्रं जनयति स्वरम् ४०

प्रश्नानुवाकाद्यारम्भे सविसर्गोच्चको हरिः
असन्धिः प्रणवस्यादौ विरामे स्वरितो भवेत् ४१
विधेर्मध्यस्थनासिक्यो न विरोधो भवेत्स्मृतः
तस्मात्कुर्वन्ति कार्याणि वर्णानां धर्म एव तु ४२
इन्द्रिया विषयो योऽसावणुरित्युच्यते बुधैः
चतुर्भिरणुभिर्मात्रा परिमाणमिति स्मृतम् ४३
रङ्गप्लुतश्चतुर्मात्रः शुद्धप्लुतस्त्रिमात्रिकः
दीर्घ उच्चद्विमात्रः स्याद्ध्रस्वः स्यादेकमात्रिकः ४४
परस्परस्य संयोगः स्पर्शानां संभवेद्यदि
तयोरादि श्रुतिर्नास्ति विरामव्यञ्जनस्य च ४५
अनन्त्यं च भवेत्पूर्वमन्त्यं च परतो यदि
तयोर्मध्ये यमस्तिष्ठन्नासिकास्थानमुच्यते ४६
नासिक्यत्वमुरस्यत्वं पञ्चमैर्हस्य योगतः
अन्तस्थाभिरुरस्यत्वं कण्ठ्यत्वं केवलस्य तु ४७
पदादौ पदमध्ये वा स्थितस्योष्म परस्य वै
प्रथमस्य द्वितीयत्वं पूर्वं कुर्वीत पण्डितः
धूङ्क्ष्णा दङ्क्ष्णव इत्यत्राप्यनुस्वारो विधर्मतः ४८

शम्भुशिक्षासमाप्ता

Aithal, K. Parameswara, *Veda Lakṣaṇa: Vedic Ancillary Literature: A Descriptive Bibliography*, Motilal Banarsidass (Delhi, 1993). No. 1264.
"Śambhu Śikṣā," in Hamburg Staats-Universitaet Bibliothek, cod. Palmblaetter III 8/133.
"Śambhu Śikṣā," in Chandra, L., ed., *Sanskrit Texts on Phonetics: A Collection of Śikṣā Texts from the papers of the late Prof. Raghu Vira*, Śatapitaka Series, Indo-Asian Literatures 282, New Delhi: 1981, pp. 531-535.

# पाराशरीशिक्षा

अथ शिक्षां प्रवक्ष्यामि पाराशरमतं यथा
यथा देवेषु विश्वात्मा यथा तीर्थेषु पुष्करम् १
तथा पाराशरी शिक्षा सर्वशास्त्रेषु गीयते
प्रणवं तु प्रवक्ष्यामि तिस्रो मात्रास्त्रिदैवतम् २
त्रिरूपं च त्रिवर्णं च त्रिस्थानं त्रिगुणं तथा
अक्षराशीतिरेकश्च प्रथमा कण्डिका स्मृता ३
लक्षणोक्तप्रकारैस्तु इषे त्वेति निदर्शनम्
त्रीणि त्रीणि च चत्वारि दश पञ्चाष्टमं स्मृतम् ४
एकादशाक्षरं तद्वदुभयोरपि दृश्यते
सप्तमं पञ्चमं चैव पुनश्चैकादशाक्षरम् ५
नवाक्षरं विजानीयाद्वाक्यं चैकादशाक्षरम्
अन्त्यावसानाः षट् चैव पञ्चैतास्त्रिभिरर्द्धकाः ६
एका चतुर्थता ज्ञेया शेषा युग्मार्द्धकाः स्मृताः
उच्चादुच्चतरं नास्ति नीचान्नीचतरं तथा ७
एवं वर्णाः प्रयोक्तव्याः इषेत्वेति निदर्शनम्
सप्त त्रीणि चतुष्कं च वसुवर्णाः प्रकीर्त्तिताः ८
षट्द्व्यष्टौ च प्रपद्यन्ते द्वितीया कण्डिका स्मृता
प्रथमं रुद्रसङ्ख्या वै सप्त सङ्ख्या द्वितीयकम् ९
निधिसङ्ख्या तृतीयं स्याद्वसुसंख्या चतुर्थकम्
पञ्चम वेदसंख्या च तृतीया कण्डका स्मृता १०
अष्टौ वाक्यं तथा पञ्च द्वितीया च तृतीयका
चत्वारिंशत्तथा सप्त चत्वारिंशत्तथा नव ११

अक्षराणां प्रमाणं च वसोऽर्द्धौ च विभाषया
चतुस्त्रिंशच्च नवतिरक्षराणां प्रमाणतः १२
चतुर्थी करिडका प्रोक्ता मुनिः पाराशरोऽब्रवीत्
सप्तमं नवमं चैव अष्टमं तु तथैव च १३
एवं वर्णाः प्रयोक्तव्याः वीतिहोत्रं निदर्शनम्
उभयोः करिडकामध्ये न चोष्ठयं विद्यते क्वचित् १४
अग्निश्चैव यजुश्चैव अर्द्धा त्रीणि चतुष्टयम्
दशाक्षराणि पञ्चैव अग्निर्ज्योतिर्निदर्शनम् १५
सप्ताक्षराणि चत्वारि यमदग्नेरितिस्मृतः
दशाक्षरं च चत्वारि दशाक्षरं द्वादशाक्षरम् १६
अन्ते युग्माक्षरं वाक्यमाकूत्यै च निदर्शनम्
नवाक्षरं त्रयश्चैव त्रयश्चैव षडक्षरम् १७
इति वाक्यानि विद्यन्ते सिंह्यसीति निदर्शनम्
यम्परिधिमत्र पितरो अयं तै च इडे तथा १८
सकारेण विना चैव यो देवेभ्यः पञ्चकरिडका
अकाराद्या हकारान्ताश्चतुर्विंशतिरक्षराः १९
गायत्रीसदृशी प्रोक्ता पवित्रा यज्ञमध्यगा
अग्निन्दूतं वसन्ताय कपिञ्जलानां प्रजापतये च द्वये २०
ऊष्मान्ता प्रथमा शेषा स्वरान्ता वर्तिका परा
शुद्धा च प्रथमाध्यक्षा पीडयाध्यक्षा द्वितीयया २१
चिदसि प्रथमा ज्ञेया अर्म्मेभ्योऽथ पराभवेत्
ध्यक्षा ध्यक्षान्तयोः सम्यगुभयोः करिडकाद्वयी २२

वकारे केवलो यत्र तत्र रेफोऽप्यधः स्थितः
दन्त्यश्चोपरि विज्ञेयं यूपव्रस्केति निदर्शनम् २३
नानुस्वारं न संयोगं विसर्गं नैव दीर्घता
केवलस्तत्र विज्ञेय एकारात्परतो हि यः २४
मात्रा सह भवेद्दीर्घं ह्रस्वं मात्रा विना भवेत्
इत्यक्षरं विजानीयात्क्षिप्रं दीर्घं भवेदिति २५
क्षिप्रं दीर्घं समाख्यातं अङ्गुल्यामेकमन्तरम्
दीर्घस्यार्द्धं भवेत्क्षिप्रं नास्ति दीर्घस्य दीर्घता २६
यथा सङ्ख्या तु दीर्घस्य तथा चोष्मा प्रकीर्त्तिता
ऊष्मा दीर्घं समत्वं च क्षिप्रं कुर्यात्तदर्धकम् २७
अनुस्वारस्योपरिष्टात्संयोगो दृश्यते यदि
ह्रस्वत्वं विजानीयात्संसवभागास्थेति निदर्शनम् २८
अनुस्वारस्योपरिष्टात्संवृतं तत्र दृश्यते
दीर्घं तं तु विजानीयाच्छ्रोता ग्रावाणेति निदर्शनम् २९
अनुस्वारस्तु यो दीर्घादक्षराच्च भवेत्ततः
स तु ह्रस्व इति प्रोक्तो मन्त्रेष्वेव विभाषया ३०
अनुस्वारो द्विमात्रः स्याद्वर्णव्यञ्जनादिषु
दीर्घं तं तु विजानीयाद्देवानां हृदयेभ्य इति निदर्शनम् ३१
अनुस्वाराच्च संयोगः परतो दृश्यते यदि
ह्रस्वं तं तु विजानीयान्मन्त्रेषु ब्राह्मणेषु च ३२
ह्रस्वादग्रे भवेद्दीर्घो दीर्घादग्रे भवेल्लघुः ३३
अदीर्घो दीर्घतां याति नास्ति दीर्घस्य दीर्घता

संयोगादिपरो नास्ति ह्रस्वो दीर्घस्य दीर्घता ३४
संयोगादिपरो यत्र तत्र ह्रस्वं भवेद्ध्रुवम्
अभिनीतं निपातं वा जात्यं वा स्वरितं विदुः ३५
वाक्यकाले भवत्येव पाठकाले यथाक्रमम्
षडङ्गुलं तु जात्यस्य हस्तस्यानुपथस्य च ३६
चतुर्थभागमात्रं स्याद्भूयस्तेनैव वर्त्तयेत्
निपातं चाभिनीतं च शेषं नीचतरं क्रमात् ३७
त्रिस्वरं तं विजानीयादाज्येनेति निदर्शनम्
नीचान्नीचतरं चैव पुनर्नीचं प्रयोजयेत् ३८
एवं वर्णाः प्रयोक्तव्या ओजोनेति निदर्शनम्
नादसंज्ञा भवन्तीमे ङञणनमाश्चानुनासिकाः ३९
भवन्ति प्रत्यये येषामन्तस्थाः संयुतास्तथा
हकारं चैव वर्गाणां तृतीयं च चतुर्थकम् ४०
अथ दीर्घविसर्गान्ता अष्टौ ते नादसञ्ज्ञकाः
नमौ गुरू नादसञ्ज्ञौ लघू चैवानुनासिकौ ४१
संयोगौ च विसर्गौ च नादावेतौ प्रकीर्त्तितौ
पञ्चमा यत्र दृश्यन्ते पञ्चमे परतः स्थिते ४२
नासिकं तत्र कुर्वीत मात्रैकत्वे न संशयः
संयुक्ताग्रे विरामस्तु विवृत्तिस्तु विशेषतः ४३
संयुक्ताग्रे ह्यघोषस्तु नासिकं तु विधीयते
प्रत्यये च स्थिता ये च अघोषाः पञ्चमाः स्वराः ४४
पदान्ते संयुता ह्रस्वाः पञ्चैवेतेऽनुनासिकाः

विवृतौ चावसाने च ऋगर्द्धे च तथापरे ४५
पदे च पादसंस्थाने नासिकं तु विधीयते
हकारो रेफसंयुक्तो नादो भवति नित्यशः ४६
द्वितयेन पदाक्रान्तो न तु नादः कदाचन
आद्यन्तस्थौ सकारौ द्वौ हकारो यत्र मध्यगः ४७
उभौ नादौ प्रयुज्येताम् अग्ने व्रतपते निदर्शनम्
नकारस्य मकारस्य अनुस्वारो यदा भवेत् ४८
तदानुनासिके विद्यादुभयोर्ह्रस्वदीर्घयोः
नकारस्य मकारस्य अन्तःस्थाश्च समीपगाः ४९
नासिको नावमन्तव्यस्तत्र नादः प्रकीर्त्तितः
तवर्गान्ते पवर्गान्ते व्यञ्जनान्ते पदे परे ५०
तत्र नादं प्रकर्त्तव्यं नान्तिमं क्षिप्रकीर्त्तितम्
पूर्वतः परतो वापि हकारो यत्र दृश्यते ५१
तत्र नादो भवत्येव न विकल्पः कदाचन
नकारात्परतो यत्र मकारात्परतस्तथा ५२
हकारो यत्र दृश्येत तत्र नादो भवेद् ध्रुवम्
नमौ गुरु यत्र दृश्येते अघोषाः परतः स्थिताः ५३
नादं कुर्वीत यत्नेन तत्र घोषबलं न हि
एकाक्षरं नकारस्य चोभयोः स्वरयोर्द्वयोः ५४
अर्द्धचन्द्रं तदुपरि ह्यघोषाः पुरतः स्थिताः
पञ्चमं चार्द्धचन्द्रं च ऊष्मान्तस्वरयोर्द्वयोः ५५
नासिकं तु भवत्येव नृःऽपाहीति निदर्शनम्

विंशतिर्घोषास्ते गजडदबा ङञणनमा यरलवहाश्चेति ५६
त्रयोदशाघोषास्ते कचटतपाश्च खछठथफाः शषसाश्चेति
मुखनासिकाभ्यामुच्चार्यमाणोऽनुनासिकः ५७
जकारौ द्वौ मकारश्च रेफस्तदुपरिस्थितः
अशरीरं यमं विद्यात्सम्माज्र्मीति निदर्शनम् ५८
शून्यालये पिशाचोऽपि गर्ज्जते न च दृश्यते
एवं वर्णाः प्रयोक्तव्याः उपज्ज्मन्निति निदर्शनम् ५९
एकाक्षरं वकारस्य निपातस्थो यदा भवेत्
संहितायां लघुर्ज्ञातः पदकाले गुरुर्भवेत् ६०
वकारस्त्रिविधः प्रोक्तो गुरुर्लघुर्लघूतरः
आदौ गुरुर्लघुर्मध्ये पदान्ते तु लघूतरः ६१
पदान्ते पदमध्ये च वकारो दृश्यते यदा
लघुरेव स मन्यव्यो ह्यन्यत्रापि लघूतरः ६२
औकारान्ते पदे पूर्वे अकारे परतः स्थिते
लघूतरः विजानीयादग्नावग्निश्चेति निदर्शनम् ६३
यथा पुत्रवती स्नेहाच्चुम्बतीति पुनः पुनः
एवं वर्णाः प्रयोक्तव्या युञ्जान इति निदर्शनम् ६४
मूत्रं कुर्वीत वडवा योनिं करोति यादृशीम्
तन्मुखं कुरुते प्राज्ञः स दुन्दुभे निदर्शनम् ६५
उकारान्ते उकारे च दृश्यते चोभयोर्यदि
द्विरौष्ठ्यं तु विजानीयाद्भूर्भुवः स्वर्न्निदर्शनम् ६६
एकपद्ये भवेद्यस्तु सकृदौष्ठ्यं तदुच्यते

द्वित्रिभिश्च चतुष्कं चतुरौष्ठ्यं ततः परम् ६७
यथा मर्कटयोर्युद्धं कुर्वन्मुखेन धावति
एवं वर्णाः प्रयोक्तव्याः किकिदीवेति निदर्शनम् ६८
कुक्कुटः कामलुब्धोऽपि ककारद्वयमुच्चरेत्
एवं वर्णाः प्रयोक्तव्याः कुक्कुटोऽसि निदर्शनम् ६९
चतुर्दशाक्षरं वाक्यं पुनश्चैकादशाक्षरम्
पुनर्दशाक्षरं वाक्यमष्टाक्षरमतः परम् ७०
लक्षणैर्वा विहीनं तु भुक्तमव्यञ्जनं तथा
तच्छब्दं कुरुते प्राज्ञः सिंह्यसि निदर्शनम् ७१
हस्तहीनं तु योऽधीते वेदं वेदविदो विदुः
तल्लक्षणविहीनस्तु भुक्तमव्यञ्जनं यथा ७२
एवं चतुष्टयं वाक्यं श्रीश्च तेतिनिदर्शनम्
वसुसंख्याक्षरं वाक्यं त्रिपदा वा चतुष्पदा ७३
सप्ताक्षरं तु गायत्री अग्निन्दूतं निदर्शनम्
उभौ सप्ताक्षरं वाक्यं पुनश्चैव नवाक्षरम् ७४
अष्टाक्षरं विजानीयाद्यत्पुरुषेणेति निदर्शनम्
अष्टाक्षरं चतुष्पादं तदेवादि ऋचं त्रयम् ७५
अन्ते पूर्वा ऋचः सम्यक्स्वाहाकारं पृथक् पृथक्
तदेव लक्षणं सम्यक् पाराशरमतं यथा ७६
याज्ञवल्की तु वासिष्ठी शिक्षा कात्यायनी तथा
पाराशरी गौतमी तु माण्डव्यामोघनन्दिनी ७७
पाणिन्या सर्ववेदेषु सर्वशास्त्रेषु गीयते

वाजसनेयशाखायां तत्र माध्यन्दिनी स्मृता ७८
एकादशाक्षरं वाक्यं द्वितीयं च नवाक्षरम्
रुद्रसङ्ख्यं तृतीयं स्यान्निधिसंख्यं चतुर्थकम् ७९
चत्वारिंशच्चाक्षराणां वाक्यं स्यात्तु चतुष्टयम्
एवं वर्णाः प्रयोक्तव्याः एष वस्तोमेति निदर्शनम् ८०
आद्यन्तह्रस्वयोर्म्मन्त्रे वकारो यत्र दृश्यते
स तु ह्रस्व इति प्रोक्तोऽभियुध्येति निदर्शनम् ८१
अकारात्परतो यश्च नैव दीर्घं प्रयुज्यते
अभिविध्येति विज्ञेयो मन्त्रब्राह्मणयोर्द्वयोः ८२
वनेषु व्यन्तरिक्षं च ह्यष्टौ व्यख्यत्तथैव च
नामग्रहणकालेषु गुरुरेव न संशयः ८३
पूर्वा तु कण्डिका दृष्टा अपराभिस्तु संयुता
तदेव नामग्रहणं न विकल्पः कदाचन ८४
पूर्वा विद्धा परा चाथ कण्डिका यत्र दृश्यते
चापलानीति सा ज्ञेया आच्छच्छन्दो निदर्शनम् ८५
यथा भारभराक्रान्तो निश्श्वसेल्लघुचेतसः
एवं वर्णाः प्रयोक्तव्या होता यक्षन्निदर्शनम् ८६
वाक्यौ द्वौ च समुद्भूतौ अक्षरा ऊनविंशतिः
त्रयोविंशतिश्चाक्षराणाँ होता मित्रा पृथिव्यया ८७
हंसः शुचिषच्चैतद्द्वादशाक्षरसञ्ज्ञकः
ऊनाशीतिश्चाक्षराणाम् अथैताँश्च प्रकीर्तिताः ८८
अकारादीनि वाक्यानि द्वादशैतानि सङ्ख्यया

द्वादशाक्षरं प्रथमं पञ्चमं चेति सप्त वै ८९
षडक्षरं ततो वाक्यं पुनर्द्वादशकं स्मृतम्
एकादशाक्षरं चैव अन्ते च द्वादशाक्षरम् ९०
एवं वर्णाः प्रयोक्तव्या अथैतानि निदर्शनम्
तिस्रोऽर्द्धा अभित्यञ्च तिस्रो अर्द्धा प्रजापतिः ९१
पुनन्तु मेति चत्वारि वायुः पञ्च ततः परम्
अनाधृष्टात्र पञ्चैव एधोऽस्यर्द्धचतुष्टयम् ९२
संवत्सरोऽसि चत्वारि द्यौः शान्तिश्चार्द्धयोर्द्वयोः
क्वचित्स्वाहा पृथक्कुर्यात् क्वचिद्युक्तं तु कारयेत् ९३
क्वचिच्चादौ विजानीयात्क्वचिच्चान्ते विधीयते
पुनन्तु मा पितरो वायुरनिलं प्रजापतये त्वा ९४
वाक्यकालेऽवसाने च स्वाहान्ते चाहुतिं क्षिपेत्
मन्त्रभागं पृथक्कुर्यात्स्वाहाकारं पृथक् पृथक् ९५
स्वाहादौ च भवेद् वाक्यं अग्निन्दूतं मनस्तथा
अन्ते चादौ पुनश्चान्ते काय स्वाहेति दर्शनम् ९६
मकारादौ भवेद् वाक्यं ऊर्णाम्रदसं प्रकाश्यते
आविर्म्मर्त्या अकारादौ स्वरान्तं प्रथमान्तरम् ९७
रससंख्या भवेद् वाक्यं वेदवाणौ पुनः पुनः
युग्मवाणान्तयोः सप्त अन्ते चैव चतुर्दश ९८
पञ्चाशतं च वर्णानाम् अक्षराणां प्रमाणतः
इदमित्येव विज्ञेयं वाक्यं तस्माद् भवेन्न च ९९
अब्भिरसि । अग्ने तमद्य । सहस्रस्य प्प्रमा । अग्निर्देवता

। इयमुपरि मरवस्यशिरः अश्वस्य त्वा । प्रथमा वाम् ।
अन्तरामित्रावरुणा । होता यक्षदग्निं स्वाहा । स्वाहा यज्ञम्-
बर्हिरूर्णम्म्रदाः । एकाक्षरं पदं वाक्यं नचार्द्धायुग्मयोरपि ।
मध्ये चैकाक्षरं वाक्यं द्वे द्वे चार्द्धावसानयोः १००
एवं वर्णाः प्रयोक्तव्या लोकतश्च प्रकीर्त्तिताः
विभक्त्यन्तं विजानीयाद् गुरुतः शास्त्रतोऽपि वा १०१
लोपागमविकाराभ्यां वाक्यानामेष निर्णयः
द्वादशैतानि वाक्यानि द्वादशैतानि शान्तिके १०२
देवादीनां भवन्त्येते द्वादशैतानि संख्यया
छाया छिद्द्रा तथा छन्दश्छकारा लघुसङ्ख्यया १०३
ह्रस्वो वा यदि वा दीर्घः शेषा द्वित्वे प्रतिष्ठिताः
दीर्घादग्रे छकारोऽपि ह्रस्वादग्रे तथैव च १०४
द्वित्वाक्षरं विजानीयादिति शास्त्रविधानतः
दीर्घादग्रे तु यो दीर्घो गिरिशा वर्म्मणा तथा १०५
द्वित्वाक्षरं विजानीयाच्छादयामि निदर्शनम्
वकारस्य भकाराभ्यां छकारस्य चकारयोः १०६
धकारस्य दकाराभ्यां थकारस्य मकारयोः
कवर्गस्य चवर्गस्य खवर्गस्य पवर्गयोः १०७
द्वित्वं चैव यमं चैव भवत्येव न संशयः
ओष्ठ्यं चैव वकारस्य मकारेण सहायवान् १०८
तम्बधान तथा चाम्बे संयोगोऽप्यतिदुर्लभः
तँवश्चैव शतँवश्च सँयोगोऽत्यन्तदुर्लभः १०९

अनुस्वारं पृथक्कुर्यादसंप्राहुर्विचक्षणाः
वकारस्य यकारस्य मध्ये बिन्दुः प्रतिष्ठितः ११०
अन्त्यबिन्दुं विना ये च शेषान्तस्थाः प्रकीर्त्तिताः
शृङ्गवद् बालवत्सस्य कुमार्यास्तनयुग्मवत् १११
नेत्रवत्कृष्णसर्पस्य स विसर्ग इति स्मृतः
विस्फुलिङ्गा इव स्फोटा वेदस्याङ्गानि सन्ति हि ११२
अशुद्धपठनाच्चैव नैव मोक्षं प्रपेदिरे
तस्मात्सर्वप्रयत्नेन शुद्धपाठी भवेद्द्विजः ११३
अन्यथा निरय यान्ति कुम्भीपाकं च दारुणम्
सप्ताक्षरं च चत्वारि पुनरष्टाक्षरं तथा ११४
ऋचँ वाचमिति ज्ञेया अन्ते चैव चतुष्टयम्
एकादशाक्षरं वाक्यं पुनरेव चतुष्टयम् ११५
त्रयोदशं द्वादशं च यन्मे इति निदर्शनम्
व्याहृत्या सह गायत्री तिस्र अर्द्धा भवेदिह ११६
प्रणवाश्चैव चत्वारो भवन्त्येव न संशयः
ऋचँवाचं त्रयश्चैव प्रारम्भे च चतुष्टयम् ११७
इति पाराशरेणोक्तं प्रमाणं वेदसम्मितम्
पूर्वा चतुर्दशास्तिस्रो ह्यर्द्धायुग्मार्द्धषड्दश ११८
एवं वर्णाः प्रयोक्तव्या अग्निश्चेति निदर्शनम्
पूर्वमष्टाक्षरं वाक्यं परतो द्वादशाक्षरम् ११९
द्विपादान् वा विनिश्चित्य इन्द्रो विश्वस्य राजति
अहानि शं त्रयश्चैव त्रयश्चैव यथापरे १२०

अन्त्यावसाना दुर्मित्त्रा शेषा द्वे द्वे प्रकीर्त्तिताः
कण्डकापञ्चयुग्मार्द्धं चतुःपञ्च नवं नवम् १२१
पुनश्चतुस्त्रयश्चैव त्रयश्चैव पुनः पुनः
शेषा युग्मार्द्धकं विद्याद्देवस्य निदर्शनम् १२२
एवं ज्ञात्वा पठेद्यस्तु स गच्छेद्वैष्णवं पदम्
त्रयश्चैव त्रयश्चैव त्रयश्चैव चतुष्टयम् १२३
षडर्द्धं च त्रयश्चैव द्विपञ्चान्त्यावसानयोः
शेषाश्च कण्डिकाः सर्वा द्वे द्वे अर्द्धे प्रकीर्तिताः १२४
न मे प्रियो द्विजः कश्चिच्छ्रद्धावानतिथिप्रियः
इति पाराशरेणोक्तं विप्राणां हितकाम्यया १२५
शिष्याणामुपकाराय परलोकहिताय वै
स्वाहा प्राणेभ्यस्त्रयश्च लोमभ्यश्च त्रयस्तथा १२६
शेषाश्च कण्डिकाः सर्वा द्वे द्वे अर्द्धे प्रकीर्त्तिताः
अष्टौ वाक्यं तयोः सप्त पञ्च द्वादश वै पुनः १२७
चतुर्थं दश एका च अष्टादश ततः परम्
नवमं चाष्टमं चैव सप्तमं च ततः परम् १२८
इति वाक्यविधिं सम्यक् प्राणेभ्यश्च निदर्शनम्
वायुः पञ्च भवेदर्द्धा अर्द्धे द्वे च हिरण्मये १२९
ईशावास्यं तु मन्त्रस्य शेषा द्वे द्वे प्रकीर्त्तिताः
अष्टादशाक्षरं वाक्यं नाकपृष्ठे तु पञ्च वै १३०
सप्तदशाक्षरं चैतद् वैश्वदेवं विनिर्दिशेत्
सप्तदशाक्षरं वाक्यं पुनरष्टादशाक्षरम्

एवं वर्णाः प्रयोक्तव्या ग्रामण्यौ तु सुपञ्चयोः १३१
उभौ सप्ताक्षरं वाक्यमष्टाक्षरमतः परम्
नवाक्षरं विजानीयाद्यार्म्भिषुं चेति निदर्शनम् १३३
एकैकस्य नमस्काराः शङ्कराय महात्मने
श्वब्म्यश्चादौ च वर्णान्ते वाक्यकाले भवेदिति १३४
नमकं चमकं चैव पुरुषसूक्तं तु नित्यशः
प्रविश्यते महादेवो गृहे गृहपतिर्यथा १३५
रुद्राध्यायः स्वरेणैव कण्डिकादशकेन तु
ततो वाक्यं प्रकुर्वीत ऋचान्ते षोडशाक्षरम् १३६
अष्टादशाक्षरं वाक्यं पुनः षोडशकैः शुभैः
एवं वर्णाः प्रयोक्तव्या अश्मन्नूर्जं विनिर्दिशेत् १३७
पुँश्चलूँ पुँश्चली चेति संख्या यत्र यत्र च
दङ्क्ष्णवश्च विज्ञेया अर्द्धचन्द्रस्तु षट्सु च १३८
मकाराग्रे छकारादावनुस्वारेण सँयुतौ
तन्द्रञ्छन्दो विजानीयादग्निः पशुर्न्निदर्शनम् १३९
तकारान्ते पदे पूर्वे शकारे परतः स्थिते
क्षणिकं तं विजानीयात्तच्छकेयं निदर्शनम् १४०
पाठकाले भवेध्रस्वो वाक्यकाले तु दीर्घता
एवं वर्णाः प्रयोक्तव्या नक्षत्रेब्भ्यः स्वाहेति निदर्शनम् १४१
शर्म्म च स्त्थ स्तथो पप्प्रागात्समुद्रस्य त्वेति च
स्वरितो वाक्यकालेऽपि उदात्तं नोपपद्यते १४२
एह्यूषु ऋजीते अभित्त्वा गोमदूषुणा सत्या

स्वरितो वाक्यकाले तु न चोर्द्ध्वं नीयते करम् १४३
सद्यो जातः समुद्रोऽसि प्रथमार्च्यस्य तु द्वया
एवं वर्णाः प्रयोक्तव्या गुरुरेव न संशयः १४४
अन्तस्थैः सह सँयोगे स्पर्शो वा दृश्यते क्वचित्
ऋवर्णेन तदा ग्रस्तो न लघुर्न्न लघूतरः १४५
ऋकारो गुरुतां यातः संयुक्तो हरयैः सह
ऋवर्णेन परस्यैव व्यृद्ध्या इति निदर्शनम् १४६
क्रतून् जहि शत्रून् वन स्प्पतीन् परिधींश्चेति
चतुर्वेदोऽपि यो विप्रो यावद्ब्रह्म न विन्दति १४७
तावद्भ्रमति संसारे ह्यसारे दुरतिक्रमे
पठित्वा चतुरो वेदान्त्सर्वशास्त्रमनेकधा १४८
यो हि ब्रह्म न जानाति मूर्खः पाठे शठो यथा
ज्ञात्वैव ब्रह्मसायुज्यं लभते नात्र संशयः १४९
यथा खरश्चन्दनभारवाही भारस्य वेत्ता न तु चन्दनस्य
तथाहि विप्राः स्मृतिवेदपूर्णा ज्ञानेन हीनाः खरवद्वहन्ति
१४०
आहारनिद्राभयमैथुनं च समानमेतत्पशुभिर्नराणाम्
ज्ञानं हि तेषामधिको विशेषो ज्ञानेन हीनाः पशुभिः
समानाः १५१
प्रातर्मूत्रपुरीषाभ्यां मध्याह्ने क्षुत्पिपासया
तृप्ताः कामेन बध्यन्ते जन्तवो निशि तद्वशाः १५२
नादबिन्दुसहस्राणि तथा कोटिशतानि च

सवाता रश्मयो यान्ति यत्र वेदो निरामयः १५३
गवामनेकवर्णानां क्षीरं स्यादेकवर्णकम्
क्षीरं यथा तथा ज्ञानं लिङ्गनस्य गवां यथा १५४
द्वे पदे चैव मोक्षाय न ममेति ममेति च
स ममेति क्षिणन्ती च शत्रूँरनपव्ययन्तः १५५
अरञ्जनाः पञ्च अर्द्धा अर्द्धमात्रा भवन्ति च
पूषा मित्रो वसुश्चैव अञ्जनाश्च प्रकीर्त्तिताः १५६
पूषा मित्रो वसून्पञ्चानुरञ्जनाः प्रकीर्तिताः
एकार्द्धमात्रिकाश्चैव पञ्चैते चानुरञ्जनाः १५७
वक्ष्ययक्ष्यकक्ष्यभक्ष्यमाणा इत्येवमादयः
इमे वर्णास्तु तालव्याः परा मूर्धन्यजाः स्मृताः १५८
एवं ज्ञात्वा पठेद्यस्तु स गच्छेद् वैष्णवं पदम्
न मे प्रियो द्विजः कश्चिच्छुद्धपाठी त्वतिप्रियः १५९
इति पाराशरेणोक्तं विप्राणां हितकाम्यया
शिष्याणामुपकाराय परलोकहिताय च १६०

इति पाराशरीशिक्षा समाप्ता

Tripāthī, Śrī Rāma Prasāda, ed., *Śikṣhāsaṁgrahaḥ*, (Vārānasi: Sampurnand Sanksrit University, 1989), pp. 43-61.

# अमरेशशिक्षा

श्रेयो दिशन्तु नः कृष्णः कंसमातङ्गकेसरी
राधाकेलिकलाभिज्ञो गोपीवादकुतूहली १
उत्पन्नो यः स्तुते वंशे बुद्धिमान्कृतनिश्चयः
अमरेश इति ख्यातो भारद्वाजकुलोद्वहः २
सोऽहं शिक्षां प्रवक्ष्यामि प्रातिशाख्यानुसारिणीम्
बालानां पाठशुद्ध्यर्थं वर्णज्ञानादिहेतवे ३
जपादिशुभकार्येषु पुमान्नाधिकृतो भवेत्
सम्यक्पाठं विना यस्मात्तं निमित्तं वदाम्यहम् ४
स्वरसंस्कारयोर्वेदे नियमः कथितो यतः
ततो विचार्य वक्तव्यो वर्णसंघात उत्तमः ५
मन्त्रो यः स्वरतो हीनो वर्णतो वापि कुत्रचित्
निष्फलं तं विजानीयात्तथैवाशुभसूचकम् ६
वेदस्याध्ययनाद्धर्मः सम्प्रदानात्तथा श्रुतेः
वर्णशोऽक्षरशो ज्ञानाद् विभक्तिपदशोऽपि च ७
स्वरो वर्णोऽक्षरं मात्रा तत्प्रयोगोऽर्थ एव च
मन्त्रं जिज्ञासमानेन वेदितव्यं पदे पदे ८
स्थानं च करणं मात्रां सम्यगुच्चारणं तथा
यो न वेद स निर्लज्जः पठामीति कथं वदेत् ९
अथ प्रथमतो वर्णसञ्ज्ञाधिक्रियते मया
यया विना न सिद्ध्यन्ति व्यवहारा नृणामिह १०
एकविंशतिरुच्यन्ते स्वराः शब्दार्थचिन्तकैः
द्विगुणानि व्यञ्जनानि ह्येतावान्वर्णसङ्ग्रहः ११

ऋपर्यन्ताः स्वरास्त्रेधा लृकारो ह्रस्व एव च
सन्ध्यक्षराण्यह्रस्वानि ते चैवमेकविंशतिः १२
ककारादिमकारान्ताः स्पर्शाः स्युः पञ्चविंशतिः
चतस्रो यादयोऽन्तस्था ऊष्माणः शषसाः सहाः १३
स्पर्शानां पञ्चमैर्योगे चत्वारश्च यमाः स्मृताः
अनुस्वारो विसर्गश्च जिह्वामूलीय एव च १४
उपध्मानीय इति च द्विस्स्पृष्टश्च तथापरः
द्विस्पृष्टता च विज्ञेया डढयोः स्वरमध्ययोः १५
पदकाले वियुज्येत द्विस्पृष्टो न भवेत्तदा
सव्यञ्जनः सानुस्वारः शुद्धो वापि स्वरोऽक्षरम् १६
चतुर्णां पञ्चमैर्योगे उत्पद्यन्ते यमाश्च ये
कुँ खुँ गुँ घुँ इति च ते चत्वारो नात्र पञ्चमः १७
वर्गाणां प्रथमौ द्वौ द्वावूष्माणश्च हवर्जिताः
जित्सञ्ज्ञका भवन्त्येते शेषाधिसञ्ज्ञकाः स्मृताः १८
शषसामुत्समाख्याता अवर्णः कण्ठ्यसञ्ज्ञकः
सिंसञ्ज्ञका ऋपर्यन्ता भावी स्यात्कण्ठ्यवर्जितः १९
अन्त्याद्वर्णाद्भवेद्वर्णः पूर्वः स उपधाभिधः
एताः सञ्ज्ञा बुधैर्ज्ञेया व्यवहारप्रसिद्धये २०
लल्हजिह्वामूलभवोपध्मानीयस्तथैव च
नासिक्याश्च तथा चास्मिन्वर्णा वर्ज्याः सदैव हि २१
एकमात्रो भवेद्ध्रस्वो द्विमात्रो दीर्घ उच्यते
त्रिमात्रस्तु प्लुतो ज्ञेयो व्यञ्जनं चार्द्धमात्रिकम् २२

तदर्द्धमणु तस्यार्द्धं परमाणवभिधीयते
वर्णग्रहे सवर्णोऽपि सङ्ख्या स्पर्शेषु कीर्त्तिताः २३
अथ वर्णसमाम्नाये स्थानं करणसंयुतम्
आत्मशक्त्या प्रवक्ष्येऽहं तत्क्षन्तव्यमघं बुधैः २४
अष्टौ स्थानानि वर्णानामुरः कण्ठशिरस्तथा
जिह्वामूलं च दन्ताश्च नासिकोष्ठौ च तालु च २५
हकारः पञ्चमैर्युक्तो योऽन्तस्थाभिरथापि वा
औरस्यं तं विदुः प्राज्ञाः कण्ठ्यं शुद्धं प्रचक्षते २६
ऋवर्णोऽथ कवर्गश्च जिह्वामूलीय एव वा
जिह्वामूले भवत्येषां जिह्वामध्यं तु कारणम् २७
इवर्णोऽथ चवर्गश्च ए ऐ कारौ यशैः सह
तालुस्थाना भवन्त्येषां जिह्वामध्यं तु कारणम् २८
षकारोऽथ टवर्गश्च मूर्धन्याः परिकीर्तिताः
जिह्वायाः प्रतिवेष्ट्याग्रमेतेषां कारणं स्मृतम् २९
लृलसिताः स्मृता दन्त्या जिह्वाग्रकरणा हि ते
रेफश्च दन्तमूलोत्त्थो जिह्वाग्रेण विधीयते ३०
उवर्णोऽथ पवर्गश्च ओ औ कारौ तथा च वः
ओष्ठ्या एते स्मृता वर्णा उपध्मानीय एव च ३१
समानस्थानकरणा नासिक्यौष्ठ्याः प्रकीर्तिताः
वकार ओष्ठसम्भूतो दन्ताग्रकरणः स्मृतः ३२
अवर्णश्च विसर्गश्च हकारश्चापि केवलः
कण्ठ्या वर्णाः स्मृता ह्येषां हनुमध्यं तु कारणम् ३३

यमानुस्वारनासिक्या नासामूलभवा दशा
मुखनासिकाकरणोऽनुनासिक इति स्मृतः ३४
पूर्वा मात्रा तु कण्ठ्यस्य एकारौकारयोर्भवेत्
तालव्यस्य तथौष्ठ्यस्य परा प्रोक्ता यथाक्रमम् ३५
ऐकारौकारयोश्चैवं तत्त्वं ज्ञेयं विचक्षणैः
ए ऐ तु कण्ठतालव्यौ ओ औ कण्ठोष्ठजौ स्मृतौ ३६
एतद्वर्णसमाम्नायस्थानं करणसंयुतम्
ज्ञातव्यं तन्मया प्रोक्तं शास्त्रतत्त्वार्थदर्शनम् ३७
यद्यद्यस्य भवेत् स्थानं करणं वा विशेषणम्
सवर्णत्वेन सङ्ग्राह्य आस्ययत्नस्तु भिद्यते ३८
संवृतं विवृतं तद्वदस्पृष्टं स्पृष्टमेव च
ईषत्स्पृष्टं चार्द्धस्पृष्टमास्ययत्नस्तु षड्विधः ३९
अकारः संवृतो ज्ञेयो विवृताश्चेतरे स्वराः
अस्पृष्टास्यप्रयत्नाश्च स्वराः सर्वे भवन्ति हि ४०
स्पृष्टाः स्पर्शास्तु विज्ञेया अन्तस्था ईषदुत्स्पृशः
अर्द्धस्पृष्टाश्च विज्ञेया ऊष्माणो वर्णवेदिभिः ४१
ऋलोर्मध्ये भवत्यर्द्धे मात्रा रेफलकारयोः
तस्मादस्पृष्टता न स्यात्सम्भवे ऋलृकारयोः ४२
द्विमात्रस्यैकमात्रस्य संवृतादि प्रयत्नतः
भिन्नस्याप्यस्तु सावर्ण्यं तदर्थमिदमुच्यते ४३
अथातोऽवरतो वच्मि चर्चा पूर्वपराङ्गयोः
स्वारप्रयोजना चासौ वेदितव्या विचक्षणैः ४४

संयोगस्यादिभूतो यः स पूर्वाङ्गं भवेद्यथा
अश्वः शशवसंयोगे शः पूर्वाङ्गं शवोऽन्यतः ४५
यमश्च पूर्वस्याङ्गं स्याच्चकारात्पूर्वसंयुतः
रुक्क्मः पूर्वस्य कयमावुत्तरस्य तु मः स्मृतः ४६
संयोगादिपरद्वित्वे पूर्वाङ्गं क्रमजं यथा
पार्श्वं रशौ तु पूर्वस्य परस्य शवयात्मकम् ४७
क्रमजाच्चोत्तरं स्पर्शे परे पूर्वाङ्गकं यथा
पाष्र्ण्या पूर्वस्य रषाः परस्याङ्गं णयात्मकम् ४८
यद् व्यञ्जनं च यस्याङ्गं तत्तेन सस्वरं भवेत्
एतदर्थमिदं प्रोक्तं स्वारसन्देहभेदकम् ४९
अनुस्वारो विसर्गश्च नासिक्योऽथ यमास्तथा
जिह्वामूलमुपध्मा च नवैते स्युः पराश्रयाः ५०
सँयोगवाहा एवैते निजस्वरविवर्जिताः
पूर्वस्याङ्गं भवन्त्येते स्वर एतेषु पूर्ववत् ५१
स्वरभक्तिश्च पूर्वाङ्गं देवम्बर्हिरुदाहृतिः
इकारे च तथोकारे तां यत्नेन विवर्जयेत् ५२
रेफो वाथ लकारो वा यत्रोष्मणि स्वरोदये
स्वरभक्तिर्भवेत्तत्र पूर्वमाक्रम्य पठ्यते ५३
ऊष्मणामुपरिष्टात्तु रेफो याति ऋवर्णताम्
रेफत्वं पुनरायाति यद्यूष्माणोऽन्यसँयुताः ५४
ऊष्मणां स्वरभक्तिस्तु द्विर्भावं बाधते यथा
वर्षो वर्षाय सिह्वार्षीच्छतवल्शोऽपि सिद्धयति ५५

अष्टौ स्वरान्प्रवक्ष्यामि तेषामेव च लक्षणम्
जात्योऽभिनिहितः क्षैप्रः प्रश्लिष्टस्तदनन्तरम् ५६
तैरोव्यञ्जन एवाथ तैरोविराम एव च
पादवृत्तस्ततस्तद्वत्ताथाभाव्यस्तथाष्टमः ५७
एकपदे निपूर्वस्तु सयवो जात्य इष्यते
अपूर्वोऽपि स्वरस्तद्वद्धान्यं कन्या स्वरित्यपि ५८
सप्तोदात्तादयो ज्ञेयाः परेऽभिनिहितादयः
त्रयो नीचपरास्तत्र प्रश्लिष्टात्ता यथाक्रमम् ५९
ए ओ आभ्यामुदात्ताभ्यामकारो नीच एव च
लुप्यते सन्धिकार्ये यत्तं चाभिनिहितं विदुः ६०
तेऽप्सरसां च तेऽवन्तु वेदोऽसीति तुथोऽस्यपि
इ उ वर्णावुदात्तौ चेदनुदात्तस्वरोदयौ ६१
यवाभ्यां चैव सँयुक्तौ तदा क्षैप्रः स्वरो भवेत्
वाज्यर्वं त्र्यम्बकँयद्वद्द्रवन्नो योजान्विन्द्रेति च ६२
उच्चः पूर्वः परा नीच इकारोऽन्योऽन्यसङ्गतः
प्रश्लिष्टः स स्वरो ज्ञेयः स्रुचीवाभीन्धताँ यथा ६३
उदात्तपूर्वो यत्र स्यान्नीचो व्यञ्जनसँयुतः
स तैरोव्यञ्जन इति स्वरो भवति तद्यथा ६४
इडेरन्ते हव्ये काम्ये चन्द्रे ज्योते निदर्शनम्
उदात्तावग्रहो यत्र स तु तैरोविरामकः ६५
स्वरो ज्ञेयः पदेऽन्यत्र तैरोव्यञ्जन एव तु
यथा गोपताविति गोपतौ यज्ञपतिस्तथा ६६

स्वरयोरन्तरे यत्र विवृत्तिर्यदि दृश्यते
स पादवृत्त इत्याख्यः काईमरे निदर्शनम् ६७
उदात्तादिरुदात्तान्तो नीचोऽवग्रह एव च
ताथाभाव्यो भवेत्कम्पस्तनूनप्त्रे निदर्शनम् ६८
माध्यन्दिनविरोधी स्यात् ताथाभाव्यस्तु यः स्वरः
भिन्नो यतोऽत्र दृश्येते तावुदात्तानुदात्तकौ ६९
तस्मान्माध्यन्दिनीयानां पदे कम्पो विधीयते
तथोक्तमौञ्जिहायनकैर्माध्यन्दिनानुसारिभिः ७०
अवग्रहो यदा नीचप्रोच्चयोर्म्मध्यतः क्वचित्
तथाभाव्यो भवेत्कम्पस्तनूनप्त्रे निदर्शनम् ७१
जात्याभिनिहितक्षैप्रप्रश्लिष्टाः स्वरिता इमे
नीचपूर्वा यदा त्वेते तिर्यक्स्वारस्तदा भवेत् ७२
जात्योऽभिनिहितः क्षैप्रः प्रश्लिष्टश्च चतुर्थकः
एते स्वराः प्रकम्पन्ते दृष्ट्वोदात्तं पुरः स्थितम् ७३
यथा वरुणः पस्त्या स्वा युद्ध्योऽस्माकन्तथापरम्
परमेष्ठ्यभिधीतोऽभीममित्यादि निदर्शनम् ७४
नीचपूर्वोदात्तपरः स्वरोऽसौ प्रणिहन्यते
अन्यथा नीचवर्ण एव स्यात्स्वर्णघर्मादिकं यथा ७५
स्वरितादनुदात्तं यत्तत्सर्वं प्रचयाह्वयम्
स्यादुदात्तमयं चैव त्वामद्येत्यादिकँयथा ७६
तिर्यक्स्थानगते हस्तेऽनुदात्तो दृश्यतेऽपरः
प्रचितं तँ विजानीयादुदात्तं स्वरमाप्नुयात् ७७

जात्यं कृत्वा ततः पश्चात्प्रचितो दृश्यते यदि
तन्तु तत्रैव निर्वर्त्य पश्चाद्धस्तं प्रचालयेत् ७८
नोदात्तस्वरितात्पूर्वं प्रचितं स्यादुदात्तवत्
कृत्वानुदात्तमथ तमुदात्तस्वरमाचरेत् ७९
यथा स्यात्स्वरितात्स्वारो वाजे वाजेऽवतेति च
स्वरितोदये सेनानीग्रामरायौ सहस्याय च ८०
तैरोव्यञ्जनवज्ज्ञेयो जात्योऽभिनिहितः प्रचः
यथा धान्यं कन्या इव वेदोऽसीति तुथोऽस्यपि ८१
वत्सरोऽसि भवेत्तद्वद्वार्ज्यवं च स्रुची वच
उदात्तस्वरितपरप्रचितस्यापि नित्यशः ८२
भवेन्नीचतरादेशो वैयाकरणसम्मतः
स्वरिताद्वानुदात्ताद्वा उदात्तो दृश्यते यदि ८३
शून्यं प्रचालयेद्धस्तं स्वरितात्स्वरितेऽपि च
शून्यं प्रचालयेद्धस्तं यदुक्तं केनचित्क्वचित् ८४
तत्कातीयविरोधी स्यात्सम्प्रदायविरोधकृत्
उक्तं च याज्ञवल्क्येन मन्त्रे वाजसनेयके ८५
स्वर उच्चः स्वरो नीचः स्वरः स्वरित एव च
स्वरप्रधाने त्रैस्वर्यं व्यञ्जनं तेन सस्वरम् ८६
मणिवद् व्यञ्जनान्याहुः सूत्रवत्स्वर इष्यते
व्यञ्जनान्यनुवर्तन्ते यत्र तिष्ठति स स्वरः ८७
वर्णेषूच्चार्यमाणेषु विकाराः स्युस्त्रयस्तनोः
आयाममार्दवौ चोभौ तृतीयश्चाभिघातकः ८८

गात्रस्योच्चमधस्तिर्यग्गमनं स्याद्यतः क्रमात्
तच्चोदात्तेऽनुदात्ते च स्वरिते च प्रकीर्तितम् ८९
उभयवाँश्च स्वरित एकीभावेऽन्ययोर्भवेत्
यथा पथ्येव चम्वीव ब्रह्मासृज्यत मृत्यवे ९०
अथोदात्तोनुदात्तस्य स्वरितस्यापि सङ्गमे
उदात्त एकीभवति षट् प्रकारः स नान्यथा ९१
द्वयोस्तु स्वरयोस्सन्धावेकीभावो यदा भवेत्
तदा नीचोऽप्युदात्तस्य वशं गच्छति सान्वयः ९२
उदात्तयोरथैकत्वे भवेदुदात्त एव च
स पुरस्तात्परस्ताद्वा यथा स्यात्प्रार्पयत्विति ९३
एमे तन्नौ ज्ञतिपरं विश्वाभ्यस्त्वा पुनस्तथा
नाभिरस्याथ मेऽङ्गानि जयन्तन्त्वां तथैव च ९४
पाशिनोऽति देवागात्पूर्वागाद्बर्हिरासदत्
आरुहा मादधुरास्थाद्विद्यादेवं निदर्शनम् ९५
अस्यापवादरूपं यदुदाहरणमुच्यते
आख्यातानां प्रयोगेषु पूर्वं पदमुपस्थितम् ९६
षोडशाक्षरपर्यन्तं तद्योगि स्वरमुद्धरेत् याँ२
आ वहो यदा बध्नन्यो नः पिता तथापरम् ९७
यत्पुरुषँ व्यदधुश्च विद्यादेवं निदर्शनम्
जात्यपूर्वोदात्तपरो ह्युच्चो भवति नित्यशः ९८
यथाद्यूत्त्वेऽवसेऽपि स्याज्ज्ञातव्यं स्वरवेदिभिः
सूर्व्याय स्वरितपरोदात्तपूर्वो यथा भवेत् ९९

स्वरितोदात्तयोः सन्धावुदात्तो बलवान्स्मृतः
हित्वाभिनिहितक्षैप्रप्रश्लिष्टांस्त्रीनिमान्स्वरान् १००
वीद्ध्यानुदात्तपूर्वोदात्तपरो यथा भवेत्
सून्व्याय स्वरितपरोदात्तपूर्वः पदे यथा १०१
सर्वतीक्ष्णोऽभिनिहतः प्रश्लिष्टस्तदनन्तरम्
ततो मृदुतरौ स्वारौ जात्यक्षैप्रावुभौ स्मृतौ १०२
ततो मृदुतरः स्वारस्तैरोव्यञ्जन उच्यते
पादवृत्तो मृदुतरस्त्वेतत्स्वारबलाबलम् १०३
द्वयोस्तु स्वरयोस्सन्धौ स्वरितः स्यात्परो यदि
उदात्तस्यान्तस्थीभावे प्रोच्यते त्र्यम्बकं यथा १०४
योषान्विन्द्र वीड्वङ्गो द्र्वन्नः सर्पिस्तथापरः
नियमः स्वरसन्धेस्तु समाप्तो विदुषां प्रियः १०५
अथातः संस्कारविधिः कथ्यते यो मयाधुना
लोपागमौ विकारश्च प्रकृत्या भवनं तथा १०६
ज्ञातव्यो निपुणैरेवं संस्कारोऽसौ चतुर्विधः
स्वरयोर्वा हलोर्वापि स्वरव्यञ्जनयोरुत १०७
ते नोऽवन्त्वथ देवासू एत्तदमापोऽपान्नपात्
देवान आयुः प्राङ्क्सोमस्तन्नश्चिकित्वान्त्वँ यथा १०८
प्रथमात्तु हकारोऽयं तच्चतुर्थत्वमाप्नुयात्
उद्धर्षयावाङ्ख्यानि ज्ञेयमेवं निदर्शनम् १०९
आद्यः स्वरे तृतीयत्वं घोषवत्सु त्वपञ्चमः
अघोषे प्रथमत्वं वा उदेनं यद्ग्रामे अपि ११०

पदान्ताः प्रथमा वर्णाः परयोः स्वरघोषिणोः
भजन्ते स्वतृतीयत्वं स्वोत्तमत्त्वं यथोत्तमे ११११
आद्योत्तमाः पदान्तीयाश्चवर्गं परिहाय च
स्युर्वर्गमहाँस्तन्मित्रस्य विन्द्यादेवं निदर्शनम् ११२
कखयोः परयोर्नित्यं पफयोः परयोरपि
विसर्गस्य यदुक्तन्तल्लक्षणन्नात्र सिध्यति ११३
मयि वः कामधरणं ततः खनेम चाप्यथ
अग्निः पशुर्याः फलिनीर्विद्यादेवं निदर्शनम् ११४
अम्ब निष्परसमरीद्यौष्पिता च वसुष्कविः
आविष्कृणुष्वेव तथा पर्णे वो वसतिष्कृता ११५
एवमादौ विसर्गस्य षत्वमिच्छन्ति सूरयः
पूर्वोक्तस्यापवादोऽयं ज्ञातव्यः कृतबुद्धिभिः ११६
कण्ठ्योपधः सकारः स्याद्धाव्युधः ष एव च
अघोषे घोषवति तु लोपो रेफो यथाक्रमम् ११७
इडस्पदे इडायास्पदं ज्योतिष्कृदिष्कृतिस्तथा
तन्न इन्द्रोऽप्ययक्ष्मा मा हविर्होतर्न्निदर्शनम् ११८
भाव्युपधः षत्वमेति वर्जयित्वा कृषीस्कृधिम्
प्रत्ययस्य सवर्णत्वं यातीति शाकटायनः ११९
अविकारं च शाकल्यो मन्यते शषसेषु च
आशुः शिशानो वृषभो देवो वः सविता तथा १२०
अदितिः षोडशेत्यादिर्विज्ञेयोदाहृतिर्विदा
पदान्ताः प्रथमा वर्णाः शषसेषु परेषु तान् १२१

शौनको द्वितीयानिच्छेत्प्रकृत्या शाकटायनः
असमानस्थलस्थाश्चेच्छौनकोऽपि वदेत्तदा १२२
सम्यक्स्रवन्तीवट्सूर्यानुष्टुप्शारद्यथापरम्
तत्सवितुश्च तत्सत्यन्द्वितीयं नात्र कर्हिचित् १२३
असस्थानस्थितत्वाच्च तैत्राणां तु न तन्मतम्
पदान्तस्य तवर्गस्य चवर्गे परतः स्थिते १२४
चवर्गः स्यात्तकारस्य चछयोः शागमः स्मृतः
शकारश्छत्वमाप्नोति तवर्गात्स्पर्शवर्जितः १२५
तच्चक्षुरुज्जिहानाश्च तच्छकेयमतः परम्
बृहच्छोचा यविष्ठ्येति वाजाञ्जयत्त्वथापरम् १२६
तकारस्य पदान्तस्य शकारे परतः स्थिते
चवर्गपञ्चमत्वं स्यान्नच्छादेशे तु शागमः १२७
स्वधावाञ्छुक्रः पिशङ्गाञ्छिशिरायेति वै तथा
आदित्याञ् श्मश्रुभिर्नात्र छत्वं स्यात्स्पर्शशङ्कया १२८
दधन्वान्स्ववान्यकारे नकारो लोपमाप्नुयात्
पीवोऽन्नान् रयिवृधे परे वापि तथा पुनः १२९
स्वराणामानुनासिक्यं प्रतिजानन्ति सर्वतः
वर्जयित्वा तमाकारं मकारो यत्र लुप्यते १३०
उपधारञ्जनं कुर्यात्स्वरे विकरणे सति
लोपे प्रकृतिभावे च नोपधारञ्जनं भवेत् १३१
पदान्तस्थो नकारो यः सोऽनुनासिकपूर्वकः
लकारे लत्वमाप्नोति शसत्वं चतकारयोः १३२

यथास्मिँल्लोके त्रिँल्लोकानहीँश्च सर्वानप्युत
गवयाँस्त्वष्ट्रे पशूँस्ताँश्चक्रे चैव निदर्शनम् १३३
स्पर्शे परे नकारस्य विकारो नोपलभ्यते
चतौ विहाय तत्रापि प्रकृत्त्या भवनं क्वचित् १३४
यथास्मिन्गोष्ठेऽक्रन्कर्म देवान्दिवमथापरम्
पशून्पाहीतिजानीयान्नकारस्यैकरूपताम् १३५
धामन्ते पतयिष्णवर्वन् शत्रून्ताढि तथापरम्
मित्र महश्चिकित्त्वान्त्वम्पूषन्तव व्रते तथा १३६
मदिन्तमानां च मधुन्तमानां तद्धिते तमे
निर्जगन्वान्तमसि च न विकारो भवेदिह १३७
एते निपातसिद्धत्वान्न विकारमवाप्नुयुः
नॄन्पकारे विसर्गत्वमुपधारञ्जनं लभेत् १३८
शत्रून्क्रतून्वनस्प्पतीन्परिधींश्च चतुर्थकम्
स्वरे रेफत्वमाप्नोति नासिक्यं चोपधा तथा १३९
अनुस्वारश्चरोष्मसु मकारस्येति यो विधिः
पदयोरन्तरे सः स्यात्पदमध्ये तु नस्य च १४०
यथापाँ रसं चैव त्वाँ शश्वन्त एव च
यजूँषि तपूँषि उरूहीति निदर्शनम् १४१
पदान्तीयमकारस्य त्वन्तस्थाः परतो यदि
नासिक्यमुपधापूर्वं सोऽन्तस्थात्वमवाप्नुयात् १४२
सँयौमि सँवपामीति तँल्लोकं च यथा भवेत्
अपदान्तस्य रेफे न यद्वम्रोऽतिसर्पति १४३

एकमात्रो द्विमात्रः स्यात्त्रिमात्रान्मात्रिको यथा
त्वं सोम हवीँषि सँस्रष्टा न संयुजि १४४
अनुस्वारो द्विमात्रः स्यादृवर्णव्यञ्जनोदयः
ह्रस्वाद्वा यदि वा दीर्घाद्देवानां हृदये यथा १४५
मकारः प्रत्यये स्पर्शे भवेत्तद्वर्गपञ्चमः
व्रजङ्गच्छ व्रतञ्चरिष्यामि शण्डस्तथा पुनः १४६
एतन्तेदम्पितृब्भ्यश्च यच्छन्ताम्पञ्च वै यथा
संयोगादिः स्वराद् द्वित्वं प्राप्नोतीति विदुर्बुधाः १४७
तत्पदान्तपदाद्योर्वा पदमध्येऽपि सर्वतः
सम्यक्स्रवन्ति सरितः सन्धौ तु पदयोर्यथा १४८
अनुष्टुप् शारदी तद्वत्प्रथमस्तु द्विरुक्तिजः
मध्येऽश्वस्तूपरो यद्वदश्वस्य त्त्वा तथापरम् १४९
अस्वरान्न भवत्येतत् श्रुधि श्रुत्कर्णवद्यथा
परं रेफहकाराभ्यां व्यञ्जनं तूष्मवर्जितम् १५०
द्वित्वमापद्यते रेफहकारौ तु न कुत्रचित्
यथा सूर्योऽथ सर्वेभ्यो बाह्वोर्गृहणामि चैव हि १५१
ऊष्माणो रेफसङ्क्रान्ता न द्विः स्युश्चेत्स्वरोदयाः
यथार्शसदुपचितां वर्षो वर्षीयसीति च १५२
सहस्रशीर्षा पुरुषो देवम्बर्हिर्यथा स्मृतम्
अन्तस्थाभिर्यदा युक्ता ऊष्माणो रेफपूर्वकाः १५३
वर्ष्याय चान्तः पार्श्वञ्च रेफाद्द्वित्वं भजन्ति ते
ऊष्मान्तस्थापरः स्पर्शो द्वित्वमापद्यते यथा १५४

अश्मन्नूर्जं सस्नितमं धिष्णाया राष्ट्रं च गृह्णते
यकारात्स्पर्शसँयोगो नोपलभ्येत कुत्रचित् १५५
शल्मलिश्च दधिक्क्राव्णः पुरुराव्णास्तथैव च
यदि चास्वरपूर्वाः स्युरूष्मान्तस्था न तत्परः १५६
स्पर्शो द्वित्वमाप्नोति स्थालीभिर्दिवः स्कम्भनीः
यत्र चोभयतः स्पर्शैः सँयुक्ताः शषसाः सहाः १५७
तत्र नाद्यः क्रमो ज्ञेयो नापरो बोधितो बुधैः
पक्ष्माणि वाथ सूक्ष्मा च विश्वप्स्न्या च तथा पुनः १५८
नेदृशेषु द्विरुक्तिः स्यादिति प्राहुर्मनीषिणः
जिह्वामूलीयतः स्पर्शे उपध्मानीयतस्तथा १५९
स इधानो वसुष्क्कविद्यौष्पितेत्यादिकँयथा
विसर्जनीयाच्च परो यः स्पर्शो व्यञ्जनोदयः १६०
सोऽपि द्वित्वमवाप्नोति युञ्जानः प्प्रथमँयथा
सकारस्य द्विरुक्तिः या सा द्वयोरेव नान्यतः १६१
आ च सास्वा च रास्वेयत्सकारोऽत्र द्विरुक्तितः
ह्रस्वपूर्वौ ङनौ स्यातां पदान्तौ द्विः स्वरोदयौ १६२
युङ्ङसीति तथा चाश्मन्नूर्जमित्यादिकँ यथा
प्रथमैश्च स्ववर्गीयैर्द्वितीया द्विर्भवन्ति हि १६३
तृतीयैस्तु चतुर्थाश्च विकख्याजिघ्रकँयथा
उख्यं संख्यं च मुख्यं च वर्जयित्वा पदत्रयम् १६४
ख्याधातोः खययोः स्यातां कशौ गार्ग्यमते यथा
विक्श्याक्शातमित्येतन्माध्यन्दिनविरोधकृत् १६५

विख्याय कखया युक्ताश्चछया आच्छ्यतीतिवत्
गोष्ठानं षटठा एवं पात्थ्यं तथयसँयुतम् १६६
विष्प्फुरन्ती च षपफा युक्ताश्चैवं चतुर्थकाः
आजिग्घ्र गघरायुक्ता मीड्ढ्वश्च डढवास्तथा १६७
अद्ध्वनो दधवाश्चैवं विब्भ्राड्बभरसँयुतम्
ऋवर्णे न द्विरुक्तिः स्यात् ङनकारो विहाय च १६८
लृवर्णेऽपि तथैव स्यात् क्लृप्तं चानिष्ट्टतँयथा
अवसानस्थितं चापि व्यञ्जनं न द्विरुच्यते १६९
ऊक्क्क्सूनृता पदे एवं संहितायां न वार्यते
स्वरात्परश्छकारस्तु सर्वत्र द्वित्वमाप्नुयात् १७०
यस्यातिहाय सहेति पदत्रयपरं विना
द्विरुक्तिं वर्जयेन्नित्यं यमेऽपि परतः स्थिते १७१
सक्थ्ना देदिश्यते नारी ककारोऽत्रैक एव हि
यमे परे निषेधस्तु पुनर्द्वित्वनिवारकः १७२
ये रुक्मपाप्मप्रभृति प्राहुस्तेषां मनीषिणाम्
संयोगादिश्च पूर्वाङ्गं यमश्चेति विरोधकृत् १७३
तस्माद्यदुक्तं तत्साधु नत्वन्यत्कल्पनाक्षमम्
अपञ्चमात्पदे नित्यं पञ्चमेषु परेषु च १७४
यमोत्पत्तिर्भवेत्तत्र रुक्मः पाप्मा निदर्शनम्
स्वरात्संयोगपूर्वस्य द्वित्वाज्जातो द्वितीयकः १७५
तस्यैव यमसञ्ज्ञा स्यात्पञ्चमैरन्वितो यदि
स्पर्शानां पञ्चमैर्योगे चत्वारो ये यमाः स्मृताः १७६

अयस्पिण्डेन ते तुल्या घनबन्धाः प्रकीर्तिताः
यमास्तदा निवर्तन्ते ऊष्मा मध्ये भवेद्यदि १७७
ऊर्णापिण्डेन ते तुल्याः पाशैस्त्मन्न्या निदर्शनम्
स्पर्शा अपञ्चमा ये च अन्तस्थाभिश्च सँयुताः १७८
दारुपिण्डेन ते तुल्याः श्लथबन्धाः प्रकीर्तिताः
अपञ्चमे स्ववर्गीये न प्राग्वर्णो द्विरुक्तिभाक् १७९
तद्देवानां च यद्देवा अन्तरिक्षम्पुरीतता
ईद्ध्र्यवाद्ध्रीनसावेतावुद्रश्चापि तथैव च १८०
चरद्द्रव्यस्य वचनो द्वित्वं नैवात्र विद्यते
क्षत्रवृत्रस्तथा श्वित्र चित्र सत्र तथैव च १८१
यत्र तत्र पदेष्वेषु व्यञ्जनं न द्विरुच्यते
उपोत्थितमुत्तम्भनमुत्तभानोत्थिताय च १८२
उत्त्थाय बृहती चैषु त्रयः स्पर्शा भवन्ति हि
वर्णं द्विवर्णसंयोगे एकवर्णवदुच्यते १८३
स्वरमध्ये सजातीये विजातीये द्वयोः श्रुतिः
कुक्कुटोऽसि तथा तन्नाज्ज्यं भुज्ज्युः श्रुतिर्द्वयोः १८४
स्पर्शात्परककारस्य स्फोटनं दोषकृन्न वा
अत्राचार्याशयाद्वित्वं स्फोटनं द्वित्वनाशनम् १८५
अयस्पिण्डेन तत्तुल्यं तस्मादुच्चारणं तथा
काण्डात्काण्डाद्वषट् कृतं यकृत्त्क्लोमादिकँयथा १८६
स्ववर्गीयैस्तु सँयोगः स्पर्शानां सम्भवेद्यदि
तत्पूर्वस्य श्रुतिर्नास्ति विरामव्यञ्जनस्य च १८७

द्वितीयाश्च चतुर्थाश्च वर्णाः सोष्माण एव हि
यदैते पञ्चमैर्युक्ता वायुः सम्यगृते मुखात् १८८
तं धारयेत् प्रयत्नेन घनबन्धं समुच्चरेत्
सक्थ्ना दध्मस्तथा अग्घ्न्या इति निदर्शनम् १८९
स्वराः संयोगपूर्वा ये व्यञ्जनान्तास्तथान्तगाः
एषां कालो द्विमात्रः स्यान्न तु दीर्घा हि ते स्मृताः १९०
यथाग्निर्द्धूर्यथा विष्णुः प्रत्यङ् दध्यङ् ऋषिस्तुतम्
याहि पाहि रक्ष मधु विद्यादेवं निदर्शनम् १९१
व्यञ्जनान्तस्य मोक्षः स्यात्करणस्थानतः पदे
अन्यदन्यप्रयत्नेन पदमारभ्यते बुधैः १९२
अन्यथा तु पदादौ च द्वित्वमापद्यते ध्रुवम्
सँयौमि सँवपामीति इमम्मेति निदर्शनम् १९३
अर्द्धर्चादिः समाप्तौ च मोक्षणं तु विधीयते
पादश्छन्दोऽनुरोधेन एकद्वित्रि चतुष्पदः १९४
अप्यनेकपदैः क्वापि दृश्यते पादपूरणम्
हृदि स्पृशं यथैकस्मिन्पदे स्यात्पादपूरणम् १९५
क्रतोर्भद्रस्य द्विपदं क्रतुन्न भद्रमित्यतः
अग्ने त्वन्नोऽन्तमश्च विद्यात्पादचतुर्विधम् १९६
विधूममग्नेऽनेकपदमेवमादिनिदर्शनम्
ङनकारौ पदान्तीयौ मकारे परतः स्थितेः १९७
कताभ्यां व्यवधीयेते प्राङ्क्सोमश्च यथा तथा
प्रत्यङ्क्सोमस्त्रीन्त्समुद्रानस्मान्त्सीते निदर्शनम् १९८

ऋकारे प्रत्यये कण्ठ्यः पाठे ह्रस्वत्त्वमाप्नुयात्
स्वाह ऋषभमिन्द्रोऽथ विश्वकर्म्म ऋषिस्तथा १९९
येन ऋषय इत्यत्र यत्र ऋषय इत्यपि
ह्रस्वे ह्रस्वविधानँयत्तत्सन्धिविनिवर्तकम् २००
ए ओ ऐ औ तु चत्वारः क्रमादेव स्वरे परे
अयवायावतां यान्ति इड एहि कृशानुवत् २०१
सरस्वत्या अग्रजिह्वं ता उभौ च यथाक्रमम्
यवयोरत्र लोपः स्यात्स्वरमध्ये पदान्तयोः २०२
अयादौ यवयोर्लोपे न पुनः सन्धिरिष्यते
असस्थाने वकारस्य लोपन्नेच्छन्ति सूरयः २०३
पादादौ च पदादौ च सँयोगावग्रहेषु च
यः शब्द इति विज्ञेयो योऽन्यः स य इति स्मृतः २०४
युक्तेन मनसा यद्धत्तत्त्वा यामि तथापरम्
अनूकाशेन बाह्यञ्च योगे योगे निदर्शनम् २०५
उपसर्गपरो यः स पदादिरपि दृश्यते
ईषत्स्पृष्टो यथा वियत्पदच्छेदे परो भवेत् २०६
यदेव लक्षणं यस्य वकारस्यापि तद्भवेत्
यत्र यत्र विशेषः स्यादिदानीं स तु कथ्यते २०७
वकारस्त्रिविधः प्रोक्तो गुरुर्ल्लघुलघूतरः
आदौ गुरुर्लघुर्मध्ये पदस्यान्ते लघूतरः २०८
उपसर्गपरौ यत्र यवकारौ पदादिगौ
ईषत्स्पृष्टौ ततो ज्ञेयावभियुध्य उपा यथा २०९

परि वाजपतिः कविः प्रवोचं च निदर्शनम्
अनुयोजान्विन्द्र ते तु उप यज्ञँ विना तथा २१०
त्वदर्थवाचिनौ वो वाँवा वै यदि निपातजौ
आदेशाश्च विकल्पास्स्युरीषत्स्पृष्टा हि ते स्मृताः २११
देवो वः सविता या वाँवातो वाथ तथा न वै
तव वायवृतस्पतेऽस्ति वान्वा निदर्शनम् २१२
द्वेधीभावे समुत्पन्ने लक्षणान्निर्णयो भवेत्
लक्षणँवाविनाशि स्यात्सम्प्रदायोऽविनाशवान् २१३
प्रमाणानुगतं वाक्यं यो मोहाद्धातुमिच्छति
प्रतिवातं स मूढात्मा पांसुं प्रक्षिपति स्वयम् २१४
कण्ठ्या वर्णाग्निदेवत्यास्तालव्याः सोमदेवताः
जिह्वामूलीया नैर्ऋत्या रौद्रा दन्त्याः प्रकीर्तिताः २१५
ओष्ठ्याश्चैवाश्विना ज्ञेया वायव्या मूर्द्धसम्भवाः
शेषास्तु वैश्वदेवाः स्युरिति कात्यायनोऽब्रवीत् २१६
क्रियावाचकमाख्यातमुपसर्गो विशेषकृत्
सत्त्वाभिधायकं नाम निपातः पादपूरणः २१७
भारद्वाजकमाख्यातं भार्गवं नाम शिष्यते
वासिष्ठमुपसर्गस्तु निपातः काश्यपः स्मृतः ११८
सर्वन्तु सौम्यमाख्यातं नाम वायव्यमिष्यते
आग्नेयस्तूपसर्गः स्यान्निपातो वारुणः स्मृतः २१९
स्वरास्तु ब्राह्मणा ज्ञेया वर्गाणां प्रथमाश्च ये
द्वितीयाश्च तृतीयाश्च चतुर्थाश्चापि भूमिपाः २२०

उदात्तं ब्राह्मणं विद्याद्भारद्वाज ऋषिस्ततः
गायत्रं च भवेच्छन्दो नियोगो ब्रह्मसाधने २२१
नीचं तु क्षत्रियं प्राहुर्गौतमोऽस्य च देवता
छन्दस्त्रैष्टुभमेवास्य विनियोगोऽघनाशने २२२
स्वरितं वैश्यमेवाहुर्मुनिर्गार्ग्योऽस्य कीर्त्तितम्
जागतं तु भवेच्छन्दो नियोगः शत्रुनाशने २२३
एषा मन्त्ररहस्यस्य मञ्जूषोद्घाटिता मया
एतत्सर्वं विदित्वा तु ब्रह्मलोके महीयते ११४
अनेन विधिना वेदं योऽधीते श्रद्धया द्विजः
सोऽश्वमेधसहस्रस्य फलं प्राप्नोति पुष्कलम् २२५
रहस्यं यो न जानाति लक्षणं चार्षकादिकम्
सोऽध्यापने न योग्यः स्याज्जपहोमादिकर्मसु २२६
अमरेशकृतामेतां शिक्षां यो धारयेत्सुधीः
विद्वज्जनसभामध्ये जयं स लभते ध्रुवम् २२७

इत्यमरेशकृता वर्णरत्नप्रदीपिका शिक्षा समाप्ता

Tripāthī, Śrī Rāma Prasāda, ed., *Śikṣhāsaṁgrahaḥ*, (Vārānasi: Sampurnand Sanksrit University, 1989), pp. 96-115.
"Amara Śikṣā." Lucknow manuscript, #912, 42 folios.

# कात्यायनशिक्षा

यदुदात्तात्परं नीचं स्वार्यं तत्परतो न चेत्
उदात्तात्स्वरितं वा स्याद्यत्र स्यात्स्वरितं वदेत् १
एकीभूतमुदात्तेन स्यादुदात्तमतः परम्
नीचं स्वार्यं यथोक्तं चेद्यच्च स्यात्स्वरितान्वितम् २
यदुदात्त इकारः स्यादनुदात्तेन संयुतः
इकारेण तदा स्वार्य्योऽभीन्धतामित्ययं यथा ३
पदकाले य एकार उदात्तः संहितोद्भवः
ओकारः स्वरसंयुक्तोऽयं न च स्वार्य्य एव सः ४
स्वरितं पदमध्यस्थमुदात्तेन समन्वितम्
पदकाले न पूर्वेण ततः स्वार्यन्तु यत्परम् ५
एकीभूताविकारौ चेदुदात्तस्वरितौ पदे
एकस्मिन्नेव तौ स्वार्य्यौ दीर्घपूर्वे तयोः परम् ६
पदस्य स्वरितस्थाने व्यञ्जनं जायते यदि
सन्धिकाले तदा नीचः स्वार्य्यः स्यात्तत्पुरः स्थितः ७
पदकाले यदा नादः स्वरितः स च इष्यते
सन्धिकाले तदा तस्मात्स्वार्य्यः पूर्वपदे तु यः ८
व्यञ्जनं स्वरितात्पूर्वं पञ्चमेनान्वितं यदि
स्वरितादुत्तरं तस्मात्स्वार्य्यो नादस्त्वनन्तरः ९
तच्च नीचमिति ज्ञेयं यद्येकस्मिन्पदे भवेत्
प्रचयं स्वरितादूर्ध्वमुपोपेदित्ययं यथा १०
नीचात्प्रचयतस्तस्मात्स्वरिता संहिता भवेत्
परेषां यत्तु पूर्वं स्यात्स्वरोच्चं नीचमेव तत् ११

उदात्तं पदकाले यत्संहितायां तथैव च
तस्मात्पूर्वं तु यत्किञ्चिदनुदात्तं तदुच्यते १२
यन्नीचं पदकाले तत्संहितायां तथैव च
उक्तं वा नीचहीनं चेत्पितृश्रवणं तद्भवेत् १३

इति महर्षिकात्यायनप्रणीता शिक्षा समाप्ता

Tripāthī, Śrī Rāma Prasāda, ed., *Śikṣhāsaṁgrahaḥ*, (Vārānasi: Sampurnand Sanksrit University, 1989), pp. 40-45.

# लघुमाध्यन्दिनीयाशिक्षा

ग्रथ शिक्षां प्रवक्ष्यामि माध्यन्दिनमतँय्यथा
षकारस्य खकारः स्याट्टुकयोगे तु नो भवेत् १
इषे लक्ष्यं कृष्णाऽउक्षा समुद्रः प्रत्युदाहृतिः
पदादौ विद्यमानस्य ह्यसँयुक्तस्य यस्य च २
ग्रादेशो हि जकारः स्याद्युक्तः सन्हरणेन तु
यज्ञेन यज्ञं वैलक्ष्यं मयूरे प्रत्युदाहृतिः ३
तस्माद्यज्ज्ञात्त्सर्व्वहुतः समस्म्माद्यत्तथैव च
रेफेणाथ हकारेण युक्तस्य सर्वथा भवेत् ४
सूर्यो बाह्यन्तु वैलक्ष्यं शष्प्याय प्रत्युदाहृतिः
यकारर्कारयुक्तस्य जकारः सर्वथा भवेत् ५
सहरय्या तथा व्यृद्ध्या चोपसर्गपरस्य न
उपयज्ञम्मानुषाणामपि यन्तीत्युदाहृतिः ६
गुरुर्वकारो विज्ञेयः पदादौ पठितो भवेत्
विभ्राडुदाहृतिर्ज्ञेया सवितान्तर्लघुः स्मृतः ७
पदान्ते वै लघुतरस्तव व्वायवृतस्पते
उपसर्गपरो यस्तु सवकारो लघुर्मतः ८
वो वां वा वै मन्त्रपाठे लघवो गुरवः पदे
प्रवायुमच्छा बृहती वातो वेति निदर्शनम् ९
रेफो रेफत्वमाप्नोति शषहेषु परेषु च
ददर्श वर्षो ग्रर्हाञ्च संय्योगे नैव कारयेत् १०
व्वर्ष्म्मन्वर्ष्यायान्तर्हृदा तत्र तावदुदाहृतिः
लकारोऽपि च सावर्ण्यादिकारसदृशो भवेत् ११

शतवल्शा च वल्हा च तत्र तावदुदाहृतिः
अनुस्वारो यत्र कुत्र ठं॰कारो भवति ध्रुवम् १२
ह्रस्वो दीर्घो गुरुश्चेति त्रिविधः परिकीर्तितः
ह्रस्वात्परो भवेद्दीर्घो हठं॰सऽइति दर्शनम् १३
दीर्घात्परो भवेद्ध्रस्वो मांसेभ्यऽइति दर्शनम्
गुरौ परे ह्यनुस्वारो गुरुरेव हि स स्मृतः १४
सिंह्यसीति तत्र तावदृकारे दीर्घऽएव सः
देवानां हृदये तद्वत्तस्कराणां तथा सृके १५
अथायोगवाहानाह—
अवर्णाच्च ऋकाराच्च विसर्गः कण्ठ्य एव सः
इवर्णाच्च तथोवर्णात्तथा चैकारपूर्वकः १६
औकारपूर्वकश्चैव तालव्यो भवति ध्रुवम्
एकाराच्च कण्ठतालुर्विसर्गो भवति ध्रुवम् १७
कण्ठ्योष्ठ्यस्तु तथौकाराद् विसर्गो भवति ध्रुवम्
देवो वः सविता चात्र हकारसदृशो भवेत् १८
देवीस्तिस्रो विसर्गस्तु हिकारसदृशो भवेत्
आखुस्ते पशुरित्यादौ हुकारसदृशो भवेत् १९
विसर्गश्चाग्नेरित्यादौ हेकारसदृशो भवेत्
विसर्गो बाह्वोरित्यादौ होकारसदृशो भवेत् २०
अथ स्वैर्दक्षैरित्यादौ हिकारसदृशो भवेत्
विसर्गो द्यौष्पितेत्यादौ हुकारसदृशो भवेत् २१
हकारो नैव मन्तव्य इति शास्त्रव्यवस्थितिः

फणिनिश्वाससदृशो विसर्गो भवति ध्रुवम् २२
कनिष्ठिकामोचनं तु नीचे च प्रचये सति
नमः कूप्याय प्रथमो द्वितीयो जाग्रतस्तथा २३
तर्जनीमोचनं कुर्यादुदात्ते तु विसर्गके
देवो धर्मस्तथा ह्रस्वे स्वरिते तूभयं क्षिपेत् २४
अश्वो मर्त्यो भवेल्लक्ष्यं स्वारे दीर्घे कनिष्ठिकाम्
उभयोरपि ह्रस्वे च वकारे स्वरिते सति २५
दीर्घेऽपि चोभयोः क्षेपऽइति शास्त्रव्यवस्थितिः
यथा स्फटिकदण्डादिरुपाधिवशतो भवेत् २६
तद्वदूष्मा प्रयोक्तव्यो हिहुहेहो निदर्शनम्
व्वसोः पवित्रं वै तत्र ह्युदाहरणमुच्यते २७
ऋकारः खलु सर्वत्र ह्येकारसदृशो भवेत्
हृदे मृगस्तृतीया च ऋचं व्वाचमथापरम् २८

इति लघुमाध्यन्दिनीया शिक्षा समाप्ता

"Laghumādhandinīyā Śikṣā with translation and commentary" by Detlef Eichler, http://www.detlef108.de/Laghumadhyandiniya-shiksa-with-commentary-T.pdf

Tripāthī, Śrī Rāma Prasāda, ed., *Śikṣhāsaṁgrahaḥ*, (Vārānasi: Sampurnand Sanksrit University, 1989), pp. 93-95.

# याज्ञवल्क्यशिक्षा

अथ याज्ञवल्क्यकृता यजुःशाखीयोपयोगिनी शिक्षा
मूलमात्रं किञ्चिट्टिप्पणीयुतारभ्यते ।
अथातस्त्रैस्वर्यलक्षणं व्याख्यास्यामः ।
उदात्तश्चानुदात्तश्च स्वरितश्च तथैव तत्
लक्षणं वर्णयिष्यामि दैवतं स्थानमेव च १
शुक्लमुच्चं विजानीयान्नीचं लोहितमुच्यते
श्यामं तु स्वरितं विद्यादग्निरुच्चस्य दैवतम् २
नीचं सोमं विजानीयात्स्वरिते सविता भवेत्
उदात्तं ब्राह्मणं विद्यान्नीचं क्षत्रियमेव च ३
वैश्यं तु स्वरितं विद्याद्भारद्वाजमुदात्तकम्
नीचं गौतममित्याहुर्गार्ग्यं तु स्वरितं विदुः ४
विद्यादुदात्तं गायत्रं नीचं त्रैष्टुभमेव च
जागतं स्वरितं विद्यादेवमेव नियोगतः ५
गान्धर्ववेदे ये प्रोक्ताः सप्त षड्जादयः स्वराः
त एव वेदे विज्ञेयास्त्रय उच्चादयः स्वराः ६
उच्चौ निषादगान्धारौ नीचावृषभधैवतौ
शेषास्तु स्वरिता ज्ञेयाः षड्जमध्यमपञ्चमाः ७
निमेषो मात्राकालः स्याद् विद्युत्कालेति चापरे
अक्षरातुल्ययोगत्वान् मतिः स्यात् सोमशर्मणः ८
सूर्य्यरश्मिप्रतीकाशात् कणिका यत्र दृश्यते
आणवस्य तु सा मात्रा मात्रा तु चतुराणवी ९
मानसे चाणवं विद्यात् कण्ठे विद्याद् द्विराणवम्

त्रिराणवं तु जिह्वाग्रे निस्सृतं मात्रिकं विदुः १०
अवग्रहे तु यः कालस्त्वर्धमात्रा विधीयते
पदयोरन्तरे काले एकमात्रा विधीयते ११
ऋचोऽर्धे तु द्विमात्रः स्यात्त्रिमात्रः स्यादृगन्तके
रिक्तं तु पाणिमुत्क्षिप्य द्विमात्रे धारयेद्बुधः १२
एकमात्रो भवेद्ध्रस्वो द्विमात्रो दीर्घ उच्यते
त्रिमात्रस्तु प्लुतो ज्ञेयो व्यञ्जनं चार्धमात्रिकम् १३
विवृत्तौ चावसाने तु ऋचोऽर्धे च तथा परे
पदे च पादसंस्थाने शून्यहस्तो विधीयते १४
प्रणवं तु प्लुतं कुर्याद्व्याहृतीर्म्मात्रिका विदुः
चाषस्तु वदते मात्रां द्विमात्रां वायसोऽब्रवीत् १५
मयूरस्तु त्रिमात्रां वै मात्राणामिति संस्थितिः
वर्णो जातिश्च मात्रा च गोत्रं छन्दश्च दैवतम् १६
एतत्सर्वं समाख्यातं याज्ञवल्क्येन धीमता
प्रणवं प्राक् प्रयुञ्जीत व्याहृतीस्तदनन्तरम् १७
सावित्रीं चानुपूर्व्येण ततो वेदान्समारभेत्
हस्तौ तु संय्यतौ धार्य्यौ जान्वोरुपरि संस्थितौ १८
गुरोरनुमतिं कुर्यात्पठन्नान्यमतिर्भवेत्
ऊरुभागे तृतीयेऽधः करं न्यस्याथ दक्षिणम् १९
प्रसन्नमानसो भूत्वा किञ्चिन्नम्रमधोमुखः
कूर्म्मोऽङ्गानीव संहृत्य हस्तदृष्टिर्दृढं मनः २०
स्वस्थः प्रशान्तो निर्भीतो वर्णानुच्चारयेद्बुधः

नाभ्या हन्यान्न निर्हन्यान्न गायेन्न च कम्पयेत् २१
यथादावुच्चरयेद्वर्णां स्तथैवैतान्समापयेत्
निवेश्य दृष्टिं हस्ताग्रे शास्त्रार्थमनुचिन्तयेत् २२
सममुच्चारयेद्वर्णान्हस्तेन च मुखेन च
स्वरश्चैवाथ हस्तश्च द्वावेतौ युगपत्स्थितौ २३
हस्ताद्भ्रष्टः स्वराद्भ्रष्टो न वेदफलमश्नुते
न करालो न लम्बोष्ठो नाव्यक्तो नानुनासिकः २४
गद्गदो बद्धजिह्वश्च न वर्णान्वक्तुमर्हति
प्रकृतिर्यस्य कल्याणी दन्तोष्ठौ यस्य शोभनौ २५
प्रगल्भश्च विनीतश्च स वर्णान्वक्तुमर्हति
शङ्कितं भीतमुद्घुष्टमव्यक्तं सानुनासिकम् २६
काकस्वरं शीर्षगतं तथा स्थानविवर्जितम्
विस्वरं विरसं चैव विश्लिष्टं विषमाहतम् २७
व्याकुलं तालुहीनं च पाठदोषाश्चतुर्दश
संहिता स्वारबहुला पदसंज्ञाभिराकुला २८
क्रमसन्धिसमाकीर्णो दुस्तरो मन्त्रसागरः
ऋक्संहितां त्रिरभ्यस्य यजुषां वा समाहितः २९
साम्नां वा सरहस्यां च सर्वपापैः प्रमुच्यते
संहिता नयते सूर्यं पदानि शशिनः पदम् ३०
क्रमोऽपि नयते सूक्ष्मं यत्तत्पदमनामयम्
कालिन्दी संहिता ज्ञेया पदयुक्ता सरस्वती ३१
क्रमेणावर्तयेद्गङ्गा शम्भोर्वाणी तु नान्यथा

यथा महाह्रदं प्राप्य क्षिप्तो लोष्टो विनश्यति ३२
एवं दुश्चरितं सर्वं वेदे त्रिवृत्तिमज्चति
आम्रपालाशबिल्वानामपामार्गशिरीषयोः ३३
वाग्यतः प्रातरुत्थाय भक्षयेद्दन्तधावनम्
खदिरश्च कदम्बश्च करवीरकरञ्जकौ ३४
एते कण्टकिनः पुण्याः क्षीरिणश्च यशस्विनः
तेनास्य करणं सूक्ष्मं माधुर्यं चोपजायते ३५
त्रिफला लवणाक्तेन भक्षयेच्छिष्यकः सदा
क्षीणमेधाजनन्येषा स्वरवर्णकरी तथा ३६
ज्ञातव्यश्च तथैवार्थो वेदानां क्रमसिद्धये
पठन्मात्रापपाठात्तु पङ्के गौरिव सीदति ३७
आगमं कुरु यत्नेन करणं हि तदात्मकम्
चुलुनौका स्फुटो दण्डी स्वस्तिको मुष्टिकाकृतिः ३८
एते वै हस्तदोषाः स्युः परशुश्चेति सप्तमः
न चासौ मुष्टिबन्धी स्यान्न चात्युत्तममाचरेत् ३९
हस्तहीनं तु योऽधीते स्वरवर्णविवर्जितम्
ऋग्यजुःसामभिर्दग्धो वियोनिमुपगच्छति ४०
स्वरहीनं तु योऽधीते मन्त्रं वेदविदो विदुः
न साधयति यजूꣳषि भुक्तमव्यञ्जनं यथा ४१
ऋचो यजूꣳषि सामानि हस्तहीनानि यः पठेत्
अनृचो ब्राह्मणस्तावद्यावत्स्वारं न विन्दति ४२
ज्ञातव्यश्च तथैवार्थो वेदानां कर्मसिद्धये

पाठमात्रावसानस्तु पङ्के गौरिव सीदति ४३
हस्तेनाधीयमानस्य स्वरवर्णान् प्रयुञ्जतः
ऋग्यजुःसामभिः पूतो ब्रह्मलोकमवाप्नुयात् ४४
न कुर्वीत पदं दीर्घं न चात्यन्तविलम्बितम्
पदस्य ग्रहणं मोक्षं यथा शीघ्रगतिर्हयः ४५
यथा वाणी तथा पाणी रिक्तं तु परिवर्जयेत्
यत्र यत्र स्थिता वाणी पाणिस्तत्रैव तिष्ठति ४६
यथा धनुष्यविततते शरे क्षिप्ते पुनर्गुणः
स्वस्थानं प्रतिपद्येत तद्वद्धस्तगतः स्वरः ४७
उत्तानं सोन्नतं किञ्चित्सुव्यक्ताङ्गुलिरञ्जितम्
स्वरविद्धं करं कुर्यात्प्रादेशोद्देशगामिनम् ४८
मनुष्यतीर्थोच्चं कृत्वा पितृतीर्थे जलं व्रजेत्
नामितं करपृष्ठे तु सुव्यक्ताङ्गुलिमोक्षणम् ४९
अङ्गुष्ठस्योत्तरं पर्वयवस्योपरि यद्भवेत्
प्रादेशस्य तु यो देशस्तन्मात्रं चालयेत्करम् ५०
उदात्तं भ्रुवि पातव्यम् प्रचं नासाग्र एव च
हृत्प्रदेशेऽनुदात्तं च तिर्यग्जात्यादिकाः स्वराः ५१
स्वरिते त्र्यङ्गुलं विन्द्यान्निपाते तु षडङ्गुलम्
उत्थाने तु जात्यस्य हस्तस्यानुपथस्य च ५२
तच्चतुर्भागमात्रं तु भूयस्तेनैव वर्तयेत् ५३
अभ्यासार्थे द्रुतां वृत्तिं प्रयोगार्थे तु मध्यमाम्
शिष्याणामुपदेशार्थे कुर्याद्वृत्तिं विलम्बिताम् ५४

ऐन्द्री तु मध्यमा वृत्तिः प्राजापत्या विलम्बिता
अग्निमारुतयोर्वृत्तिः सर्वशास्त्रेषु निन्दिता ५५
मुष्ट्याकृतिर्म्मकारे तु नकारे तु नखग्रहः
अनुस्वारेऽङ्गुलिक्षेप ऊष्मान्तेऽङ्गुलिमोक्षणम् ५६
ककारान्ते टकारान्ते ङणे चाङ्गुलिनामनम्
पञ्चाङ्गुल्यं पकारे च तकारे कुण्डलाकृतिः ५७
ऊर्ध्वक्षेपाच्चयोष्मा स्यादधःक्षेपाच्च पातयेत्
एकैकामुत्सृजेद्धीरः स्वरिते तूभयं क्षिपेत् ५८
स्वरिते समभिक्षिप्ते संयोगो यत्र दृश्यते
द्विमात्रिके क्षिपेदेकां मात्रिके तूभयं क्षिपेत् ५९
स्वरितं यद्भवेत्किञ्चिद् वकारं सह संयुतम्
त्रिरङ्गुलं ततो नीचं कृत्वा प्रासारयेद्बुधः ६०
स्वरितसञ्ज्ञे निक्षिप्ते संयोगो यत्र दृश्यते
ऊष्माणं तं विजानीयान्निःक्षेपादुभयोरपि ६१
अङ्गुष्ठाकुञ्चनं लघावनुस्वारे त्वपाँरसम्
दीर्घे रङ्गे च तर्जन्याः प्रसारः परिकीर्त्तितः ६२
ह्रस्वादग्रं भवेद् दीर्घो दीर्घादग्रे भवेल्लघुः
संयोगे च परे ह्रस्वः सिँह्यसि निदर्शनम् ६३
तर्जन्यङ्गुष्ठयोः स्पर्श उदात्तं प्रतिविद्यते
नीचं तु मध्यमां कुर्याच्छेषं नीचतरं क्रमात् ६४
अनुस्वारो द्विमात्रः स्याद् ऋवर्णव्यञ्जनोदये
ह्रस्वो वा यदि वा दीर्घ देवानाँ हृदये तथा ६५

स्वरितं यद्भवेत्किञ्चित्सवकारोष्मकं ततः
दीर्घं वा यदि वा ह्रस्वं निक्षेप उभयोरपि ६६
जात्ये च स्वरिते चैव वकारो यत्र दृश्यते
कर्तव्यस्तूभयोः क्षेमो व्वायव्यैरिति दर्शनम् ६७
शृङ्गवद्वाथ वत्सस्य कुमारीकुचयुग्मवत्
उभयक्षेपस्वरो यत्र स विसर्ग उदाहृतः ६८
विसर्गान्तः स्वरो यत्र स्वरितो यत्र दृश्यते
दीर्घश्चैव वकारश्च तत्रोभक्षेप उच्यते ६९
यथा बालस्य सर्पस्य उच्छ्वासो लघुचेतसः
एवमूष्मा प्रयोक्तव्यो हकारं परिवर्जयेत् ७०
त्रिविधा तु भवेदूष्मा प्रचिता बलका तरा
स्वरिते प्रचितां विद्यान्निपाते बलकां विदुः ७१
उत्थाने तु तथा तारा एताभिस्त्रिभिरूष्मभिः
मात्रामादौ विदित्वा तु ततः क्षेपं प्रयोजयेत् ७२
अक्षरं भजते काचित्काचिद्द्वित्वे प्रतिष्ठिता
समानजातिका काचित्काचिदूष्मप्रदायिनी ७३
विवृत्तिप्रत्ययादूष्मां प्रवदन्ति मनीषिणः
तामेव प्रतिषेधन्ति आ ई उ ए निदर्शनम् ७४
अष्टौ स्वरान्प्रवक्ष्यामि तेषामेव तु लक्षणम्
जात्योऽभिनिहितः क्षैप्रः प्रश्लिष्टश्च तथापरः ७५
तैरो व्यञ्जनसंज्ञश्च तथा तैरो विरामकः
पादवृत्तो भवेत्तद्वत्ताथाभाव्य इति स्वराः ७६

एकपदे नीचपूर्वः सयवो जात्यः इष्यते
अपूर्वोऽपि परस्तद्वद्धान्यं कन्या स्वरित्यपि ७७
एकपद इत्याह । नीचपूर्वः सयकार-
वकारो वा जात्यः स्वरो भवति ।
यथा मनुष्यानिति । सुप्वेति ।
चम्वोवेति । धान्यम् । कन्या इव ।
स्वः व्यीर्यम् । एव ँ ह्याह यानि-
चान्यानीदृग्लक्षणानि पदानि भवन्तीति ।
ए ओ आभ्यामुदात्ताभ्यामकारो रिफितश्च यः ।
अकारो लुप्यते यत्र तं चाभिनिहितं विदुः ७८
यथा कुक्कुटः । असि । कुक्कुटोऽसि ।
श्वात्रः । असि । श्वात्रोऽसि ।
ते । अप्सुरसाम् । तेऽप्सुरसाम् ।
ते । अवन्तु । तेऽवन्तु ।
व्वेदः । असि । व्वेदोऽसि ।
मारुतः । असि । मारुतोऽसि ॥
कः । असि । कोऽसि ।
भागः । असि । भागोऽसि ॥
सः । अहम् सोऽहम् ।
एव ँ ह्याह यानिचान्यानीदृग्लक्षणानि पदानि भवन्ति ॥
इ उ वर्णौ यदोदात्तावापद्येते यवौ क्वचित् ।
अनुदात्ते परे नित्यं विद्यात् क्षैप्रस्य लक्षणम् ७९

यथा त्रि । ऋम्बकम् त्र्यम्बकम् ।
द्रु । ऋन्नः । द्रुन्नः व्वीडु । ऋङ्गः ॥ व्वीड्वङ्गः ।
व्वाजी । ऋर्व्वन् । व्वाज्ज्यर्व्वन् ।
एव ँ ह्याह यानि चान्यानीदृग्लक्षणानि ॥
पदानि भवन्ति । इकारो दृश्यते
यत्र इकारेण च संय्युतः ।
उदात्तश्चानुदात्तेन प्रश्लिष्टो भवति स्वरः ८०
यथा ऋभि । इन्वताम् ऋभीन्वताम् ।
ऋभीमम् । व्वि । इहि । व्वीहि ॥
स्रुचि । इव । स्रुचीव
एव ँ ह्याह यानि चान्यानीदृग्लक्षणानि पदानि भवन्ति ॥
उदात्तपूर्वो यत्किञ्चिद्व्यञ्जनेन युतः स्वरः ।
एष सर्वबहुस्वारस्तैरोव्यञ्जन उच्यते ॥ ८१ ॥
यथा इडे । रन्ते । हव्ये । काम्ये । चन्द्रे ।
ज्योते । ऋादिति । सरस्वति । महि । व्विश्श्रुति ॥
एव ँ ह्याह यानि चान्यानीदृग्लक्षणानि पदानि भवन्ति ॥
उदात्तावग्रहाद्यस्तु स्वरितः स्यादनन्तरः
तैरोविरामं तं विद्यात्तैरोव्यञ्जमन्यथा ॥ ८२ ॥
यथा गोमदिति गो । मत् । गोपताविति गो । पतौ ।
प्रप्रेति प्र । प्र । तातेति ता । ता ।
विततेति वि । तता समिद्धऽइति सम् । ईद्धः ॥
एवं ँ ह्याह यानि चान्यानिदृग्लक्षणानि पदानि भवन्ति ॥

स्वरयोरन्तरे काले विवृत्तिर्दृश्यते यदि ।
सः स्वारः पादवृत्तः स्यात्का ईमिति निदर्शनम् ॥ ८३ ॥
यथा श्वित्रऽआदित्यनाम् । काऽईम् । पुत्रऽईधे ॥
एव ँ ह्याह यानि चान्यानीदृग्लक्षणानि पदानि भवन्ति ॥
उदात्ताक्षरयोर्म्मध्ये भवेन्नीचस्त्ववग्रहः
ताथाभाव्यो भवेत्स्वारस्तनूनप्त्रे निदर्शनम् ॥ ८४ ॥
यथा तनूनप्त्रऽइति । तनू नप्त्रे । तनूनपादिति ।
तनू । नपात् । तनूनपातमिति । तनू नपातम् ॥
एव ँ ह्याह यानि चान्यानि ईदृग्लक्षणानिपदानि भवन्ति ॥
माध्यन्दिनविरोधी स्यात्ताथाभाव्यस्तु यः स्वरः ।
स्वरौ नैवात्र दृश्येते भिन्नोदात्तानुदात्तकौ ॥ ८५ ॥
स्वरस्पर्शान्तस्थोष्माणः कण्ठ्यजिह्वामूलीयोपध्मा-
नीयतालव्यमूर्धन्यदन्त्यौष्ठ्ययमविसर्जनीयरङ्गानुना-
सिकनिपाताश्च किंवर्णदैवत्यलिङ्गाः । स्वराः शुक्ला
नाना दैवत्याः । स्पर्शाः कृष्णाः । अन्तस्थाः कपिलाः ।
ऊष्माणोऽरुणाः । यमा नीलाः । नासिक्या हरिताः ।
अनुस्वारः पीतः । जिह्वामूलीयो रक्तः । उपध्मानीयः
पीतः । विसर्जनीयः श्वेतः । रङ्गः शबलः ।
आनुनासिक्योऽतिनीलः । इत्यन्तर्मध्ययोर्नासिक्यं
विद्यात् । द्विरुदात्ताख्या इतिस्मृताः । उदमनुदनिपाते
आद्य ये चोपसर्गे नामाख्यातोपसर्गनिपाताश्चेति ।
किंदेवत्याः । अक्षराणां च के पुरुषाः । काः स्त्रियः ।

कानि नपुंसकानि इत्यत्र ब्रूमः । कण्ठ्या आग्नेयाऽ-
अकारादयः । जिह्वामूलीया नैर्ऋत्याः ककाराः ।
तालव्याः सौम्याश्चकारादयः । मूर्धन्या वायव्याष्ट-
कारादयः । दन्त्या रौद्र्यास्तकारादयः । औष्ठ्या-
आश्विनाः पकारादयः । शेषा वैश्वदेवा इत्येवमादयः ॥
स्वरास्तु ब्राह्मणा ज्ञेया वर्गाणां प्रथमाश्च ये ।
द्वितीयाश्च तृतीयाश्च चतुर्थाश्चापि भूमिपाः ८६
वर्गाणां पञ्चमा वैश्या अन्तस्थाश्च तथैव च
ऊष्माणश्च हकारश्च शूद्रा एव प्रकीर्तिताः ८७
शुक्लवर्णानि नामानि आख्याता रोहिता मताः
कपिलास्तूपसर्गाश्च कृष्णाश्चैव निपातकाः ८८
भारद्वाजकमाख्यातं भार्गवं नाम भाष्यते
वासिष्ठा उपसर्गास्तु निपाताः काश्यपाः स्मृताः ८९
सर्वं तु सौम्यमाख्यातं नाम वायव्यमिष्यते
आग्नेयस्तूपसर्गः स्यान्निपातो वारुणः स्मृतः ९०
आदित्यो मुनिभिः प्रोक्तः सर्वाक्षरगणस्य च
स्वरा विसर्जनीयाश्च यमाः पुंल्लिङ्गकाः स्मृताः ९१
पञ्चमाश्च तथान्तस्थाः स्त्रीलिङ्गाः परिकीर्त्तिताः
शेषाक्षराणि षण्ढानि प्राहुर्लिङ्गविवेचकाः ९२
सन्धिश्चतुर्विधो भवति । लोपागमविकाराः प्रकृति-
भावश्चेति । तत्र लोपो यथा अ॒य॒क्ष्माः । मा॒ ।
श॒तते॑जाः । व्वा॒युः । श॒तते॑जा व्वायुः ।

ति॒ग्मते॑जाः । द्वि॒ष॒तः । ति॒ग्मते॑जा द्वि॒ष॒तः ।
आगमो यथा प्र॒त्यङ् । सोम॑ः । प्रत्यङ्क्सोम॑ः ।
प्राङ् । सोम॑ः । प्राङ्क्सोम॑ः । अस्म्मान् । सी॒ते॒ ।
अ॒स्मान्त्सी॑ते । त्रीन् । स॒मुद्द्रान् । त्रीन्त्स॑मुद्द्रान् ।
विकारो यथा—आ इ॒दम् । एदम् । आ इ॒मे ।
एमे । आ इष्ट॑यः । एष्ट॑यः । प्र । इ॒षि॒तः ।
प्रेषि॑तः । प्रकृतिभावो यथा—आ॒शुः । शिशा॑नः ।
आ॒शुः ऽशिशा॑नः । यु॒ञ्जा॒नः । प्प्रथ॒मम् ।
यु॒ञ्जा॒नः ऽप्प्रथ॒मम् । अदि॑ति॒ः षोडशाक्षरेण । दे॒वो-
वः सवि॒ता ॥

आकाशस्था यथा विद्युत्स्फुटितामणिसूत्रवत्
एषच्छेदो विवृत्तीनां यथा बालेषु कर्तरि ९३
द्वयोस्तु स्वरयोर्मध्ये सन्धिर्यत्र न दृश्यते
विवृत्तिस्तत्र विज्ञेया यऽइशे॑ति निदर्शनम् ९४
पिपीलिका पाकवती तथा वत्सानुसारिणी
वत्सानुसृजिता चैव चतस्रस्ता विवृत्तयः ९५
पिपीलिकाद्यन्तदीर्घा नाभ्या॑सीन्निदर्शनम् ९६
पाकवत्युभयोर्ह्रस्वा व्विर्न॑ऽइन्द्र निदर्शनम्
वत्सानुसृजिता चान्ते ता नऽ आवौढमश्विना ९७
करिणी कुर्व्विणी चैव हरिणी हारिता यथा
तद्वद्धंसपदा नाम पञ्चैताः स्वरभक्तयः ९८
करिणी रहयोर्योगे कुर्विणी लशकारयोः ९९

या तु हंसपदा नाम सा तु रेफषकारयोः
देवं बर्हिरिति करिणी उर्पबल्हेति कुर्विणी १००
हरिणी दुर्शतमिति शतवल्शेति हारिता
व्वर्षो व्वर्षीयसीत्याहुस्तथा हंसपदेति च १०१
रलाभ्यां पर ऊष्माणो यत्र स्युः स्वरितोदयाः
स्वरभक्तिरसौ ज्ञेया पूर्वमाक्रम्य पठ्यते १०२
स्वरभक्तिं प्रयुञ्जानस्त्रीन्दोषान्परिवर्जयेत्
इकारं चाप्युकारं च ग्रस्तदोषं तथैव च १०३
एतल्लक्षणमाख्यातं याज्ञवल्क्येन धीमता
सम्यक्पाठस्य सिद्ध्यर्थं शिष्याणां हितकाम्यया १०४
नैतत्स्वरितपूर्वाङ्गे नापराङ्गे कथंचन
न स्वरे न च मात्रायां कथं स्वारो विधीयते १०५
पराङ्गस्य तु यत्पूर्वं पूर्वाङ्गस्य तु यत्परम्
उभयोरर्द्धसंय्योगे स्वारं कुर्याद्विचक्षणः १०६
संय्योगे तु परं स्वार्य्यं परं संय्योगनायकम्
संय्युक्तस्य तु वर्णस्य न स्वार्य्यं पूर्वमक्षरम् १०७
उदात्तादनुदात्ते तु वामाया भ्रुव आरभेत्
उदात्तात्स्वरितोदात्तौ क्रमाद्दक्षिणतो न्यसेत् १०८
स्वरितादुत्तरे ये च प्रचयाँस्तान् प्रचक्षते
एकस्वरानपि च तानाहुस्तत्त्वार्थचिन्तकाः १०९
प्रचया यत्र दृश्यन्ते तत्र हन्यात्स्वरं बुधः
स्वरितः केवलो यत्र मृदुन्तत्र निपातयेत् ११०

दुर्बलस्य यथा राष्ट्रं हरते बलवान्नृपः
एवं व्यञ्जनमासाद्य अकारो हरते स्वरम् १११
उदात्तं नानुवर्तेत नीचं न स्वरितं तथा
विस्वरं तं विजानीयाद्दीर्घह्रस्वविवर्जितम् ११२
हरिवरुणवरेरायेषु धारा हि पुरुषेषु च
वैश्वानरो नकारे च शेषास्तु स्वरिता नराः ११३
द्वौ वः स्वार्यौ च स्वरितौ उदुत्तमं त्वं वदुत्तमं वरु
धारे चैवोरुधारे तु पुरुधारे च दोहने ११४
मात्रिकं वा द्विमात्रं वा स्वर्य्यते यदिहाक्षरम्
तस्यादितोऽर्द्धमात्रा स्याच्छेषं तु परतो भवेत् ११५
उच्चस्थानगते ह्रस्वे स्वरितं नोपपद्यते
अधस्तात्तु यदागच्छेत्स्वरितं नापि तद्भवेत् ११६
उच्चादुच्चतरं नास्ति नीचान्नीचतरं तथा
अक्षराणि च तुल्यानि प्रचितान्युच्चगानि च ११७
स्वर उच्चः स्वरो नीचः स्वरः स्वरित एव च
स्वरप्रधानं त्रैस्वर्य्यं व्यञ्जनं तेन सस्वरम् ११८
मणिवद् व्यञ्जनान्याहुः सूत्रवत्स्वर इष्यते
व्यञ्जनान्यनुवर्तन्ते यत्र तिष्ठति सस्वरः ११९
आचार्या सममिच्छन्ति पदच्छेदं तु पण्दिताः
स्त्रियो मधुरमिच्छन्ति विक्रुष्टमितरे जनाः १२०
प्रथमा यत्र दृश्यन्ते सन्धिस्थानेषु पूर्वतः
स्ववर्गीयेण सँय्युक्ता मोक्षं कुर्वीत तत्र वै १२१

नकरान्ते पदे पूर्वे स्वश्रुतिः परतः स्थिते
तकारन्न प्रयुञ्जीत अत्र सन्धिं समुद्धरेत् १२२
नकारान्ते पदे पूर्वे शम्मश्श्रुभिः परतः स्थिते
छकारं न प्रयुञ्जीत ञ्शसन्धिं समुच्चरेत् १२३
ओकारः प्लुतविज्ञेयः प्लुतमग्ना द्वितीयकम्
लाजीञ्छाजीं तृतीयं च विवेशेति चतुर्थकम् १२४
अधः स्विदासीत्पञ्चमं चोपरि स्विदासीच्च षष्ठकम् १२५
सप्तमं तु क्लिबे स्मारः अष्टमं नैव विद्यते
लृकारस्य तु दीर्घत्वं नास्ति वाजसनेयिनः १२६
तकारान्ते पदे पूर्वे चकारे परतः स्थिते
मोक्षं तत्रापि कुर्वीत यच्च शेपे निदर्शनम् १२७
ककारान्ते पदे पूर्वे लकारे परतः स्थिते
खसवर्णं विजानीयाद्भिषक्सोमेन दर्शनम् १२८
ङकारान्ते पदे पूर्वे सकारे परतः स्थिते
कसवर्णं विजानीयात्प्राङ्क्सोम इति दर्शनम् १२९
तकारान्ते पदे पूर्वे सकारे परतः स्थिते
थसवर्णं विजानीयात्तत्सवितुर्निदर्शनम् १३०
नैतन्माध्यन्दिनीयानां सस्थानत्वात्तयोर्द्वयोः
सस्थानेऽपि द्वितीयं स्यादापस्तम्बस्य यन्मतम् १३१
टकारान्ते पदे पूर्वे सकारे परतः स्थिते
ठसवर्णं विजानीयात्सम्म्राट् सम्भृत इति निदर्शनम् १३२
नकारान्ते पदे पूर्वे सकारे परतः स्थिते

तसवर्णं विजानीयात्त्रीन्त्समुद्द्रान्निदर्शनम् १३३
पकारान्ते पदे पूर्वे सकारे परतः स्थिते
पसवर्णं विजानीयाद्रप्प्स्वग्नेति निदर्शनम् १३४
पकारान्ते पदे पूर्वे शकारे परतः स्थिते
पसवर्णं विजानीयादनुष्टुप्प्शारदी यथा १३५
मकारान्ते पदे पूर्वे मवर्णे परतः स्थिते
मसवर्णं विजानीयादिमम्मेति निदर्शनम् १३६
नकारान्ते पदे पूर्वे त्वंपदे परतः स्थिते
सकारं न प्रयुञ्जीत चिकित्वान्त्वमिदं यथा १३७
वर्णे तु मात्रिके पूर्वे अनुस्वारो द्विमात्रिकः
द्विमात्रे मात्रिको ज्ञेयः संय्योगाद्यश्च यो भवेत् १३८
अनुस्वारो द्विमात्रः स्याद्‌वर्णव्यञ्जनोदये
ह्रस्वाद्वा यदि वा दीर्घाद्विवानार्ठ हृदये यथा १३९
अनुस्वारस्योपरिष्टात्संवृतं यत्र दृश्यते
दीर्घं तं तु विजानीयाच्छ्रोता ग्रावाणकं यथा १४०
अनुस्वारस्योपरिष्टात्सँय्योगो यत्र दृश्यते
ह्रस्वं तं तु विजानीयात्तसु॑ऽस्त्थामिति निदर्शनम् १४१
अनुस्वारस्तु यो दीर्घादक्षराच्च भवेत्परः
स तु ह्रस्वं इति प्रोक्तो मन्त्रेष्वेव विभाषया १४२
ओभावश्च विवृतिश्च सषशा रेफ एव च
जिह्वामूलमुपध्मा च गतिरष्टविधोष्मणः १४३
यदोभावप्रसन्धानमुकारादिपरं पदम्

स्वरान्तं तादृशं विद्याद्यदन्यद्व्यक्तमूष्मणः १४४
ओभावमागता योष्मा तां तु केलिं विनिर्दिशेत्
विवृत्तिप्रत्ययादूष्मा विज्ञेया विकटाननां १४५
पादादौ च पदादौ च सँय्योगावग्रहेषु च
लीढाऽतिलीढा विद्युच्च शषसेषु प्रकीर्तिताः १४६
जिह्वामूले च रेफे च विज्ञेया चपला यथा
उपध्मानीयसहिता पुष्पिणीं तां विदुर्बुधाः १४७
अन्यत्र या भवेदूष्मा सुलभां ता विनिर्दिशेत्
ऊष्मप्राधान्यमेतस्य तस्मात्तां यत्नतोऽभ्यसेत् १४८
पादाद्यन्तं पदाद्यन्तं तथावग्रहकालिकम्
ईषत्स्पृष्टं विजानीयात्तस्मिन्काले तु कारयेत् १४९
पादादौ च पदादौ च सँय्योगावग्रहेषु च
जः शब्द इति विज्ञेयो योऽन्यः स य इति स्मृतः १५०
उपसर्गपरो यस्तु पदादिरपि दृश्यते
ईषत्स्पृष्टो यथा विद्युत्पदच्छेदात्परं भवेत् १५१
त्वदर्थवाचिनौ वोवां वा वै यदि निपातजौ
आदेशाश्च विकल्पार्था ईषत्स्पृष्टा इति स्मृताः १५२
विभाषया यकारः स्यात्तथा नेति पदात्परः
भवतीत्यपि पूर्वैव तथा च सपदादपि १५३
यदेव लक्षणं यस्य वकारस्यापि तद्भवेत्
यत्र तत्र विशेषः स्यादिदानीं स तु कथ्यते १५४
वकारस्त्रिविधः प्रोक्तो गुरुर्लघुलघूतरः

आदौ गुरुर्लघुर्म्मध्ये पदान्ते च लघूतरः १५५
यवर्णस्त्रिविधः प्रोक्तो गुरुर्लघुलघूतरः
आदौ गुरुर्लघुर्मध्ये पदान्ते तु लघूतरः १५६
सन्धिजौ तु पदान्तीयावुपसर्गपरौ लघू
अथ मा स न शब्देभ्यो विभाषाम्रेडिते यवौ १५७
पञ्चमादुत्तरो यो वो यदि चैकपदे भवेत्
संहितायां लघुः सोऽपि पदकाले गुरुर्भवेत् १५८
जात्ये च स्वरिते चैव वकारो यत्र दृश्यते
उभयोरपि कर्त्तव्यो वायव्यैरिति दर्शनम् १५९
जात्ये च स्वरिते चैव यकारो यत्र दृश्यते
कर्तव्य उभयोः क्षेपः सदस्यैरिति दर्शनम् १६०
हकाररेफसंय्युक्त ऋवर्णोदय एव वा
सुस्पृष्टं तं विजानीयाद्यकारो नान्ययुग्यदि १६१
उपांशु स्वरितं वापि योऽधीते वित्रसन्नपि
अपरूपसहस्राणां सन्देहेषु प्रवर्तते १६२
पञ्चविद्यां न गृह्णन्ति जडास्तब्धाश्च ये नराः
अलसाश्चातिरोगाश्च येषां च विस्मृतं मनः १६३
अहेरिव गणाद्भीतः सम्मानान्नरकादिव
राक्षसीभ्य इव स्त्रीभ्यः स विद्यामधिगच्छति १६४
न भोजनबिलम्बी स्यान्न च नारीनिबन्धनः
सुदूरमपि विद्यार्थं ब्रजेद् गरुडहंसवत् १६५
सुखार्थी चेत्त्यजेद्विद्यां विद्यार्थी सन्त्यजेत्सुखम्

सुखिनश्च कुतो विद्या विद्यार्थिनि कुतः सुखम् १६६
यथा खनन्खनित्रेण नरो वार्यधिगच्छति
तथा गुरुगतां विद्यां शुश्रूषुरधिगच्छति १६७
गुणिता शतशोविद्या सहस्रावर्तिता पुनः
आगमिष्यति जिह्वाग्रे स्थलान्निम्नमिवोदकम् १६८
शतेन गुणितायाति सहस्रेण च तिष्ठति
जप्त्वा शतसहस्रेण प्रेत्य चेह च तिष्ठति १६९
जलमभ्यासयोगेन शैलानां कुरुते क्षयम्
कर्कशानां मृदुस्पर्शं किमभ्यासान्न साधयेत् १७०
शुश्रूषारहिता विद्या अपि मेधागुणैर्युता
बन्ध्येव युवती तस्य न विद्या फलिनी भवेत् १७१
गुरुशुश्रूषया विद्या पुष्कलेन धनेन च
अथवा विद्यया विद्या चतुर्थं नोपलभ्यते १७२
हयानामि जात्यानामर्द्धरात्रार्द्धशायिनाम्
न हि विद्यार्थिनां निद्रा चिरं नेत्रेषु तिष्ठति १७३
यथा पिपीलिकाभिश्च क्रियते पांसुसञ्चयम्
न बलन्नात्र सामर्थ्यमुद्यमस्तत्र कारणम् १७४
अञ्जनस्य क्षयं दृष्ट्वा बल्मीकस्य च सञ्चयम्
अबन्ध्यं दिवसं कुर्याद्दानाध्ययनकर्मसु १७५
अन्नव्यञ्जनयोर्भागौ तृतीयमुदकस्य च
वायोः सञ्चरणार्थाय चतुर्थमुपकल्पयेत् १७६
हकारं पञ्चमैर्युक्तमन्तस्थाभिश्च सँय्युतम्

औरसं तं विजानीयात्कण्ठ्यमाहुरसँय्युतम् १७७
हकारो यत्र पूर्वस्थः अन्तस्थाच्च भवेत्परः
पदकाले वियुज्येत संहितायां स औरसः १७८
मेघदुन्दुभिनिर्घोषः श्रूयते पयसो ह्रदात्
एवं नादं प्रकुर्वीत सिंहस्य रुदितं यथा १७९
मासे भाद्रपदे मेघः शब्दं कुर्वीत यादृशम्
एवं गह्वरमासाद्य शुक्रं दुदुह्रे निदर्शनम् १८०
शाखायां वानरा यद्वन्निपतन्त्युत्पतन्ति च
एवं वर्णाः प्रयोक्तव्याः इहेहैषां निदर्शनम् १८१
यथा पुत्रवती स्नेहाच्चुम्बते निजमौरसम्
एवं वर्णाः प्रयोक्तव्या युञ्जान इति दर्शनम् १८२
दर्दुरोदरदेशौ तु प्रफुल्लेते पुनर्यथा
एवं वर्णाः प्रयोक्तव्या अपाम्फेनेन दर्शनम् १८३
यथा भारभराक्रान्ता निस्श्वसन्ति नरा भुवि
एवं वर्णाः प्रयोक्तव्या अद्भ्यःऽसम्भृत इत्यपि १८४
कुक्कुटः कामलुब्धोऽपि ककारद्वयमुच्चरेत्
एवं वर्णाः प्रयोक्तव्याः कुक्कुटोऽसि निदर्शनम् १८५
वडवा च हयं दृष्ट्वा योनिं विकुरुते यथा
एवं वर्णाः प्रयोक्त्व्या स दुन्दुभे निदर्शनम् १८६
यथा कामातुरा नारी शब्दं कुर्याद्दिने दिने
तच्छब्दं कुरुते प्राज्ञः सिꣳह्यसि निदर्शनम् १८७
पक्षौ वितत्य खे गृध्रो भ्रान्त्या सङ्कुच्य तिष्ठति

एवं वर्णाः प्रयोक्तव्या व्राध्रीनुसो निदर्शनम् १८८
रङ्गे चैव समुत्पन्ने न ग्राह्यं पूर्वमक्षरम्
स्वरं दीर्घं प्रयुञ्जीत पश्चान्नासिक्यमाचरेत् १८९
यथा सौराष्ट्रिका नारी अराँऽइत्यभिभाषते
एवं रङ्गः प्रयोक्तव्यो ङकारेण विवर्जितः १९०
द्विमात्रो मात्रिको वापि नासामूलं समाश्रितः
अन्ते प्रयुज्यते रङ्गः पञ्चमैः सानुनासिकः १९१
अनन्तरं मकारस्य यो रङ्गस्तत्र दृश्यते
सर्वानुनासिकं विद्यादेषा मध्योपधानिका १९२
यरलवाः शहसहा रज्यन्ते चोपधानिकाः
वर्गान्ते रङ्गते यस्तु सर्वैः सर्वानुनासिकः १९३
नासादुत्पद्यते रङ्गः कांस्येन समनिःस्वरः
मृदुश्चैव द्विमात्रः स्याद्दृष्टिमाँऽइडेति निदर्शनम् १९४
यथा व्याघ्री हरेत्पुत्रान्दंष्ट्राभिर्न च पीडयेत्
भीता पतनभेदाभ्यां तद्वद्वर्णान्प्रयोजयेत् १९५
मधुरं चापि नाव्यक्तं सुव्यक्तं न च पीडितम्
सनाथस्यैव देशस्य न वर्णाः सङ्करं गताः १९६
यथा सुमत्तनागेन्द्रः पदात्पादं निधापयेत्
एवं पदं पदाद्यन्तं दर्शनीयम् पृथक्पृथक् १९७
गीती शीघ्री शिरःकम्पी तथा लिखितपाठकः
अनर्थज्ञोऽल्पकण्ठश्च षडेते पाठकाधमाः १९८
माधुर्यमक्षरव्यक्तिः पदच्छेदस्तु सुस्वरः

धैर्यं गुरु लघुत्वं च षडेते पाठका गुणाः १९९
आवर्त्तते पदं यच्च द्विस्त्रिराम्रेडितं हि तत्
यथा च धाम्निधाम्नेति यर्जुषे यजुषेति च २००
हीयते वर्द्धते वापि पदं यत्र कृशोदरम्
उपचारः स विज्ञेय उभे सुश्चन्द्र दर्शनम् २०१
अथ सप्तविधाः संयोगपिण्डाः
अयस्पिण्डो दारुपिण्ड ऊर्णापिण्डो ज्वालापिण्डो
मृत्पिण्डो वायुपिण्डो वज्रपिण्डश्चेति
यमान्विद्यादयस्पिण्डान्त्सान्तस्थान्दारुपिण्डवत्
अन्तस्थं यमवर्जन्तु ऊर्णापिण्डं विनिर्दिशेत् २०२
अन्तस्थयमसंयोगे विशेषो नोपलभ्यते
अशरीरं यमं विद्यादन्तस्थं पिण्डनायकम् २०३
ज्वालापिण्डान्सनासिक्यान्सानुस्वारांस्तु मृण्मयान्
सोपध्मान्वायुपिण्डांस्तु जिह्वामूले तु वज्रिणः २०४
तत्रायस्पिण्डो यथा अग्नि ँ । पत्नकी ं। ।
तनच्चमीति । यक्नेति । दारुपिण्डो यथा ॥
अश्वः । सूर्य्यः । व्विल्म्मने । व्विश्श्वजनस्य ।
व्वीर्य्यम् । ऊर्णापिण्डो यथा ।
अश्मन् । कृष्णः । अस्मिन् । ॥
कुक्कुटः ं। अमुष्मिन् । यस्मिन् ।
अस्मै । इति । ज्वालापिण्डो यथा ब्रह्म ॥
व्वह्नितमम् गृह्णामीति । मृत्पिण्डो यथा ।

सु ᳡ स्थाम् । स ᳡ स्तुप् । सि ᳡ ह्यसि । ॥
उद्दिवं ᳡ स्तभानेति । वायुपिराडो यथा ।
उपहूतो द्यौष्पिता । देव सवित ं प्रसुव । ॥
युञ्जानःऽप्प्रथमम् । वज्रपिराडो यथा इष्कृतिः ।
निष्कृती ं । ऋक्क्सामयौरिति । ॥
हविष्कृदेहि । दिवः ककुत् । व्यदधु ं कुतिधेति ।
प्रथमेन षकारेण सकारेणैव संय्युतम्
एतत्स्वरं समासाद्य अग्निष्वात्तान्निदर्शनम् २०५
प्रथमेन ठकारेण षकारेण च संयुतम्
एतत्स्वरं समासाद्य अधिष्ठानं निदर्शनम् २०६
प्रथमेन णकारेण नकारेणैव संयुतम्
एतत्स्वरं समासाद्य त्रिणवत्रयस्त्रिर्ठ०शौ निदर्शनम् २०७
प्रथमेनैव रङ्गेण नकारेण च संयुतम्
एतद्रञ्जितमासाद्य वृष्टिमाँ २॥ऽ इति दर्शनम् २०८
ककारादयो मकारावसानाः पञ्चविंशतिस्पर्शाः
कृष्णाः व्याख्याताः शनैश्चरदैवत्याः ॥
चत्वारोऽन्तस्था यरलवाः कपिला अग्निदैवत्याः
चत्वार ऊष्माणः शषसहा अरुणा आदित्यदैवत्याः ॥
एवं त्रयस्त्रिर्ठ०शद् व्यञ्जनानि स्पर्शोन्तस्थोष्माणश्चेति ।
चतुर्विधं करणम् स्पृष्टमस्पृष्टं संवृतम् ॥
विवृतं चेति संवृता घोषा विवृता अघोषाः ।
विर्ठ०शतिर्घोषास्ते गजडदबा घझढधभाः-

ङञणनमा यरलवाश्चेति । त्रयोदशाघोषास्ते-
कचटतपाः खछठथफाः शषसाश्चेति । षड्विधम्-
ग्रास्यप्रयत्नम् । संवृतं विवृतमस्पृष्टम् ।
स्पृष्टमीषत्स्पृष्टं चार्द्धस्पृष्टं चेति । तत्र-
ग्रकारः संवृतो ज्ञेय इतरे विवृताः स्वराः ।
सर्वे च ते स्युरस्पृष्टाः स्पर्शाः स्पृष्टा भवन्ति हि २०९
ईषत्स्पृष्टास्तथान्तस्था ऊष्माणोऽर्द्धस्पृशः स्वराः
सामान्यं भजते वर्णः सस्थानकरणस्य हि २१०
ॠलोर्मध्ये भवत्यर्द्धमात्रारेफलकारयोः
तस्मादस्पृष्टता न स्यादृलृकारनिरूपणे २११
वर्गाणां प्रथमा द्वितीयाः शषसहाश्चाघोषाः
घोषास्त्वन्ये दशधा वर्णा भवन्ति ॥
ग्रौरस्यकण्ठ्यमूर्धन्यतालव्यदन्त्यौष्ठ्यदन्तर्मूलीय-
जिह्वामूलीयमानुस्वाराश्चेति । तत्र द्वावौरस्यौ ह्नह्य इति ।
त्रयः कण्ठ्या ग्रवर्णहकारविसर्जनीया इति ॥
षण्मूर्धन्याः षकारः टवर्गश्चेति ।
नव तालव्या इवर्णचवर्गशकारैकारयकाराः ॥
ग्रष्टौ दन्त्या लृवर्णलकारसकारतवर्गा इति
ग्रष्टावोष्ठ्या उवर्णवकारोपध्मानीयपवर्गा इति ॥
एको दन्तमूलीयो रेफः । सप्त जिह्वामूलीयाः ।
ॠ ᳲकौ कवर्ग इति ॥ चत्वारो यमाः-
कुँ खुँ गुँ घुँ इति । रुक्मेति प्रथमो ज्ञेयः ॥

सुक्थ्ना इत्यपरो भवेत् । व्विद्म्या ।
तें तु तृतीयश्च जम्भें दध्मश्चतुर्थकः २१२
अपञ्चमैश्चैकपदे संयुक्तं पञ्चमात्परम्
उत्पद्यते यमस्तत्र सोऽङ्गं पूर्वाक्षरस्य २१३
पञ्चमाः शषसैर्य्युक्ता अन्तस्थैर्वाऽपि संयुताः
यमास्तत्र निवर्त्तन्ते श्मशानादिव बान्धवाः २१४
आद्या मात्रा तु कण्ठ्यस्य एकारौकारयोर्भवेत्
तालव्यस्य तथौष्ठ्यस्य द्वितीया च यथाक्रमम् २१५
यादृशी रत्नवर्णाभा जपायाः कुसुमेऽथवा
तादृशं रञ्जयेद्वर्णं प्रान्ते नासिक्यमाचरेत् २१६
लाक्षारक्तं यथा तोयं नकारान्तं पदं तथा
सर्वरङ्गं विजानीयाच्छत्रूनिति निदर्शनम् २१७
लुप्ते नकारे यत्स्वारं रञ्जन्ति शौनकादयः
आदिरङ्गं विजानीयान्न चासीदिव विन्दति २१८
प्रथमस्थषकारेण तकारेण च संयुतम्
एतदक्षरमासाद्य त्रिष्टुभेति निदर्शनम् २१९
प्रथमस्थषकारेण थकारेण च संयुतम्
एतत्स्वरं समासाद्याधिष्ठानमिति दर्शनम् २२०
चतुर्थं च तृतीयेन द्वितीयं प्रथमेन च
आद्यं मध्यं तथान्त्यं च स्वरूपेणाभिपीडयेत् २२१
अवग्रहपदच्छेद उदात्तं दृश्यते यदि
स्वरन्तं स्वरितं प्राहुः सन्धौ तु स्वार्य्यते परम् २२२

स्वरसन्धिविधानेन नीचोच्चं तु विधीयते
व्यञ्जनाद्वा स्वराद्वापि तत्सन्धौ स्वर उच्यते २२३
उदात्तान्निहितः स्वारः स्वरितात्प्रचयो भवेत्
उदात्तात्स्वरितात्पूर्वो नान्य आपद्यते स्वरः २२४
पदकाले यः स्वरितः संहितायां तथैव च
स्वरिताच्चेद्भवेत्पश्चात्स एव निचितः स्वरः २२५
प्रथमाश्च तृतीयाः स्युः परे घोषवति स्थिते
पञ्चमाः पञ्चमे पाठे द्वितीयाः शषसेषु च २२६
उदात्तान्निहतः स्वार्यः स्वरोदात्तौ न तत्परौ
स्वरितो यस्तथाभूतो ज्ञेयः स प्रचयः सदा २२७
उच्चानुदात्तयोर्योगे स्वरितः स्वार उच्यते
ऐक्यं तत्प्रचयः प्रोक्तः सन्धिरेष मिथोऽद्भुतः २२८
बह्वीर्जिह्वा यथा गृह्णात्यह्ना वह्निस्तथैव च
ब्रह्मरूपं विजानीयाद् गुरुमेवात्मनः सदा २२९
यत्किञ्चिद् वाङ्मयं लोके सर्वमत्र प्रतिष्ठितम्
करोति तत्प्रदानं यत्तस्माद्ब्रह्ममयो गुरुः २३०
विधिनाऽप्यविधिज्ञानमविधानान्न लभ्यते
अविधानपरो नित्यं प्रायश्चित्तीयते नरः २३१
युक्तियुक्तं वचो ग्राह्यं न ग्राह्यं गुरुगौरवात्
सर्वशास्त्ररहस्यं तद् याज्ञवल्क्येन भाषितम् २३२

इति श्रीमहर्षियोगिवरयाज्ञवल्क्यप्रोक्ता शिक्षा समाप्ता

Tripāthī, Śrī Rāma Prasāda, ed., *Śikṣhāsaṁgrahaḥ*, (Vārānasi: Sampurnand Sanksrit University, 1989), pp. 1-30.

# केशवपद्यात्मिकाशिक्षा

अनुदात्तादुदात्तश्चेत्स्वरितोत्तर एव च
हृच्छिरः कर्णमूलेषु न्यसेद्धस्तमसंशयम् १
अनुदात्तादुदात्तश्चेदनुदात्तपरस्तथा
अनुदात्तं हृदि न्यस्योदात्तं वामभ्रुवि न्यसेत् २
पुनर्हृदि न्यसेन्नीचमिति शास्त्रव्यवस्थितिः
प्रचितोच्चारणे न्यासो हस्तस्य नासिकाग्रतः ३
जात्योऽभिनिहितः क्षैप्रः प्रश्लिष्टो व्यञ्जनस्तिरः
तैरोविरामः पादवृत्तस्ताथाभाव्यस्तथाष्टमः ४
एतेषां लक्षणान्याहुः कात्यायनमुनीश्वराः
तत्र जात्यादिसञ्ज्ञानां चतुर्णां दर्शने करम् ५
तिर्य्यञ्चङ्गमयेद्धीमान्पितृदानवदेव हि
मनुष्यदानमिव चेदुदात्तः प्रत्ययः स्वरः ६
आद्यान्तस्थस्य जोच्चारः पदादौ पठितस्य च
उपसर्गपरो यस्तु यस्य छन्दसि नेष्यते ७
पदस्याद्यन्तमध्ये स्यादृरहैः सँय्युतस्य च
द्विर्भावेऽप्येवमेव स्यादिति कात्यायनश्रुतिः ८
अन्तस्थानां द्वितीयस्य सैकारोच्चारणं भवेत्
अत्युक्तहल्भिः शषसैर्ऋकारेण युतस्य च ९
एवमेव तृतीयस्य शषसैः सँय्युतस्य च
सैकारोच्चारणं कुर्यादिति शास्त्रव्यवस्थितिः १०
ऋकारस्य च सँय्युक्तासँयुक्तस्यापि सर्वतः
सैकारोच्चारणं कुर्याल्लकारस्य तथा भवेत् ११

अथ चान्तस्यान्तस्त्रिविधं गुरुमध्यमलघुवृत्त्योच्चारः
वाक्यस्यादिममध्यान्त्यस्य प्रादिकपरस्य लघ्वेव स्यात् १२
वो वां वा वै मन्त्रे लघवो गुरवः पदे च विज्ञेयाः
देवो वः सवितादौ मृग्यमुदाहरणमन्येषाम् १३
असंय्युक्तस्य मूर्द्धन्योष्मणः खोच्चारणं मतम्
दुमृते संय्युक्तस्यापि कस्य योगे ष एव हि १४
छन्दसीत्येव खोच्चारो लोके प्रकृतिरिष्यते
अनुस्वारस्य ठ०कार आदेशश्छन्दसि स्मृतः १५
ऊष्मरेफेषु परतस्तस्य त्रैवध्यमुच्यते
ह्रस्वाद्दीर्घाद्दीर्घं ह्रस्वो गुरौ च परतो गुरुः १६
ऋकारपर ऊष्मान्त्ये दीर्घाद्दीर्घोऽपि जायते
परसवर्णो ह्यनुस्वारस्येषत्प्रकृतिरुच्यते १७
अणुमात्रमनुस्वारो ह्युत्तमं चाणुमात्रकम्
शषसे च कखपफे विसर्गाः सन्ति यत्र च १८
वाचो विरामः कर्त्तव्यस्तत्रेषच्छ्रुतिचोदनात्
सँय्युक्तस्य पदाद्यस्य चाकारस्य प्रतीयते १९
ईषद्दीर्घतयोच्चारः कात्यायनमुनेर्गिरा
आस्तिकस्य मुनेर्वंशे जातो दैवज्ञगोकुलः २०
तत्सुतेन केशवेन कृता सम्यक् शुभाप्तिनाम्
प्रीत्यर्थं सुधियां कारिकावली निर्म्मला शुभा २१

इति श्रिमदास्तिकमहर्षिवंशोद्भवज्ञगोकुलचन्द्रसुतदैवज्ञ-
केशवरामकृताकारिकावली सम्पूर्णा

Tripāthī, Śrī Rāma Prasāda, ed., *Śikṣhāsaṁgrahaḥ*, (Vārānasi: Sampurnand Sanksrit University, 1989), pp. 122-124.

Aithal, K. Parameswara, *Veda Lakṣaṇa: Vedic Ancillary Literature: A Descriptive Bibliography*, Motilal Banarsidass (Delhi, 1993). No. 468. "Keśava(vi) Śikṣā: Also called *Kārikāvalī* or *Padyātmika Śikṣā* of Keśava-rāma Daivajña, son of Daivajña Gokulachandra."

# अमोघानन्दिनीशिक्षा

अथ शिक्षां प्रवक्ष्यामि ह्यमोघानन्दकारिणीम्
यस्याः श्रवणमात्रेण सर्वत्र विजयी भवेत् १
ओष्ठ्या दन्त्या लघुश्चैव पुनरेव लघूत्तरः
नादनासिक्यसहिताँल्लक्षणानि पृथक् पृथक् २
ब्रह्मबाहू बृहद्बद्धो बृहती द्यौर्बधान यः
बर्हिर्बृहस्पते बिभ्राड्बिभितो बहु बोधय ३
बर्हिषा च पिब ब्रूते त्र्यम्बकं बाधबुद्धयः
बन्धुस्तब्भ्नी च बध्नीताम्बिकया बभ्लुशाय च ४
ब्रवीद्बृबासि बम्भारे अम्बश्चैव बभुर्बहुः
क्षत्रस्योल्बं तथाब्दं च शतम्बस्त्यज्यते बुधैः ५
प्रथमाक्षरन्न वर्ज्जीत द्वितीयं परिवर्ज्जयेत्
एवं बह्वीस्तथा बाह्वोः पूर्णबन्धुं परित्यजेत् ६
बिभ्रतं बिभ्रताप्स्वेनद्बिलं गृभ्भ्णातूप ब्रुवे
आवबन्धं च बीजं च बभ्रुः पड्वीशकिल्बिषात् ७
मूर्धा व्वयसि यद्बस्तो बध्नाबोध्यग्निर्बाणवान्
उद्बुध्यैलबृदा बद्धो बाहवे बिल्मिने यथा ८
कुबलं विबलं चैव स बिभेद बलं तथा
रक्षोहणं बलं त्याज्यमन्त्योष्ठो बल उच्यते ९
अन्तस्थायवकारोऽपि इत्येतैः सँय्युतो मतः
अर्बुदन्न्यर्बुदं बभ्रुः शुल्बं चोल्बं जहाति च १०
बीभत्सं च बहुर्ब्रूहि बडवा स्तंबघारयन्
प्रबोधयाम्बिकेऽम्बेऽम्बालिके बलायका ११

अम्बिके बष्किहा बाह्यं बाधध्व बर्हितः
बिभ्रतामपि वेदश्च बरश्चैते ब्रवाणि ते १२
क्लिबे विदलकारीं च बोधि बद्धं च जुम्बकः
वीभत्सायै च शाबल्यां शब्दायाडम्बरा बभूत् १३
बरामहाँश्च बडादित्य बट्सूर्यस्य सुबीरये
येषाम्बरेषु बहुलं प्रब्रवाम विभर्ति च १४
विभर्षि विभर्ष्यस्तवे संहितायां क्रमेण तु
एते ओष्ठ्याः समाख्याताः शेषा दन्त्याः प्रकीर्तिताः १५
विष्णुर्वायुस्तथा वह्निर्वरुणस्य विषूचिका
वसोर्विभाति विश्वस्य ह्यष्टौ दन्त्याः प्रकीर्त्तिताः १६
व्वाममद्य विनश्चैव व्रेशीनां वृषभस्तथा
बन्ध्यमानश्च वृत्रं च वाचः सत्यमशीय च १७
वृष्णो वम्र्यो वधोऽसीति वपा उर्व्वीं वहन्ति च
वेदो बर्च्चो वराहश्च ह्यमी दन्त्याः प्रकीर्तिताः १८
वलो वस्तिर्वलं वाहनं बुरीतं च विवब्रुः
कुबलं विबलं चापार्बाणममी दश दन्त्याः १९
वक्ष्य मुक्ष्व तथा कक्ष्यमाणं तु यद्धवेत्तदा
वक्ष्यमाणास्तु हीत्येतां पीड्यहस्तामुदाहृताः २०
व्येत्वा व्वीतां तथा व्व्यन्त उषे यह्वी तथैव च
व्विशल्यो ब्वाणी वृष्णश्च इमे दन्त्याः प्रकीर्तिताः २१
विद्मा ते विभृतेश्चेतौ प्रतद्वो चेद् वित्तस्य च
विभ्राष्टि विभ्राड्विभ्राजमाना दन्त्याः स्मृता बुधैः २२

न तद्देवीरापापो देवी तु विभृतान्तथा
रक्षोहणं बलं दन्त्यं स बिभेद बलन्तथा २३
सामवेदं जातवेदा नवाऽउऽएतन्म्रियसे
पर्णन्नवेरनुवाति प्रगर्द्धिनऽअमी दन्त्याः २४
इषुबला बलं चौष्ठ्यं न विकल्पः कदाचन
संहितायां तथा वर्णा लघवो वै भवन्ति हि २५
एकाक्षरं वकारश्च निपातस्थो यदा भवेत्
संहितायां लघुर्जातः पदकाले गुरुर्भवेत् २६
वकारस्त्रिविधः प्रोक्तो गुरुर्लघुलघूतरः
आदौ गुरुर्लघुर्मध्ये पदान्ते च लघूतरः २७
पदान्ते पदमध्ये च वकारो दृश्यते यदि
लघुरेव स मन्तव्यो ह्यन्यत्रापि लघूत्तरः २८
औकारे च पदे पूर्वे अकारे परतः स्थिते
लघूतरं विजानीयादग्नावग्निनिदर्शनम् २९
नादसञ्ज्ञा भवन्तीमे ङञणनमाश्चानुनासिकाः
भवन्ति प्रत्यये येषामन्तस्थासंयुताः स्वराः ३०
हकारं चैव वर्गाणां तृतीयं च चतुर्थकम्
अथ दीर्घा विसर्गान्ता अष्टौ ते नादसंज्ञकाः ३१
आद्यन्तयोर्म्मकारौ द्वौ हकारो यत्र मध्यतः
तत्र नादं प्रकुर्वीत अग्ने व्रतपते निदर्शनम् ३२
मकारान्ते पदे पूर्वे अकारे परतः स्थिते
तत्र नादं प्रकुर्वीत मुक्षिकेति निदर्शनम् ३३

नमौ गुरू नादसञ्ज्ञौ लघू चैवानुनासिकौ
संयुक्तौ च विसर्गौ च नादावेतौ प्रकीर्तितौ ३४
पञ्चमा यत्र दृश्यन्ते पञ्चमे परतः स्थिते
नासिकं तत्र कुर्वीत मात्रिकत्वेन संशयः ३५
संय्युक्ताग्रे विरामस्तु विवृत्तिस्तु विशेषतः
प्रत्यये च स्थिता ये च अघोषाः पञ्चमाः स्वराः ३६
पदान्ते सँय्युता ह्रस्वाः पञ्चैते ह्यनुनासिकाः
विवृत्तौ चावसाने वा ऋचार्द्धे तु तथापरे ३७
क्षिप्रे दीर्घे च संयुक्ते यकारो यत्र दृश्यते
पदे च पादसंस्थाने नासिकं तु विधीयते ३८
ककारान्ते पदे पूर्वे ऋवर्णे परतः स्थिते
नासिकन्तु विजानीयात्तर्मुत्त्वेति निदर्शनम् ३९
हकारो रेफसँय्युक्तो नादिर्भवति नित्यशः
द्वितीयेन पदाक्रान्तो न तु नादः कदाचन ४०
जहि शत्रून् क्रतून् वनस्पतीन् परिधीन् क्षिणन्ति शत्रूँ
ररनपव्ययन्तः
अनुरङ्गाः पञ्चैकार्द्धमात्रिका भवन्ति ४१
पूषा मित्रो वसुश्चैव अञ्जनाः परिकीर्तिताः
एकार्द्धमात्रिकां स्थित्वा पञ्चैते चानुनासिकाः ४२
पञ्च रङ्गाः प्रवर्तन्ते घातनिर्घातवज्रिणः
अहिणः प्रहिणो ज्ञेयो यथा आ ई ऊ ऋ निदर्शनम् ४३
दे॒वाँ २ । ऽआसा॑दयेति घातः । देवाँ २ । इदे॑षीति निर्घातः

। देवाँ २
ऽउपागा इति वज्रिणः ४। देवाँ २।। ऽऋतुभिंरिति अहिणः
। अमित्राँ २ ऽ ।। ओषतादिति प्राहिणः ।
द्विमात्रो मात्रिको वापि नासामूलं समाश्रितः ।
अन्ते प्रयुज्यते रङ्गः पञ्चमैः सर्वनासिकैः ४४
बरामहाँश्च बडादित्यो ह्यद्धा देवमहाँ २ ।। ऽअसि
बट्सूर्यस्य तु सत्रातो महारङ्गाः प्रकीर्तिताः ४५
परिते परिमाग्ने च अर्द्दृश्रं परिकीर्तिताः
यस्याद्वयं प्रदृश्यन्ते अतिरङ्गाः प्रकीर्तिताः ४६
अग्ना ३ इ पत्नीवन्स्वर्ल्लाजा ३ञ्छाचीनिति द्विः
तिरश्चीनो व्विततः पृच्छामि त्वां व्वायुरनिलमिति
सप्त प्लुता भवन्ति ह्यष्टमो न विद्यते ४७
मनौ जूतिश्च वायुश्च प्लुतमेकं द्विधाकृतम्
ओकाराद्याः प्लुताः सर्वे न विकल्पः कदाचन ४८
षडङ्गुलं तु जात्यस्य हस्तस्यानुपथस्य च
चतुर्थभागमात्रं स्याद्धूयस्तेनैव वर्तते ४९
शून्ये गृहे पिशाचोऽपि गर्जते न च दृश्यते
एवं वर्णाः प्रयोक्तव्या उपज्ज्मन्निति निदर्शनम् ५०
स्फुरितं चिबुकोन्मूलं वायुना सम्प्रपूरितम्
मण्डूकस्फुरणं नाम अपाम्फेनें निदर्शनम् ५१
इडें रन्तेंऽश्विन्नं कृतस्यते पातन्नौ यस्तें युवठं० सुरामम्
इडुऽएहिं । पदकाले तु वाक्ये च ह्रस्वाः पञ्च सरस्वति ॥

जकारौ द्वौ मकारश्च रेफस्तदुपरि स्थितः
अशरीरं यमं विद्यात्सम्मांञ्ज्मीति निदर्शनम् ॥
इयन्ते द्याम्मा सुवीरान् सुप्रजाः । प्प्रजाः । रश्मिना
सत्त्याय । परो दिवा पृथिव्या इति षट्स्वरान्ताः ॥
लोहकार इवा कर्म्मं भस्मसात्कुरुते यदि ।
एवं वर्णाः प्रयोक्तव्याः संवत्सरो निदर्शनम् ५४
ऊष्माकारं पठेद्यस्तु कूर्म्मपृष्ठो विधीयते
एवं च कुरुते प्राज्ञः कल्ल्याणय इति निदर्शनम् ५५
यथा मीनार्थिनः पक्षिण ऽउत्पतन्ति पतन्ति च
एवं वर्णाः प्रयोक्तव्याः कल्ल्याणय इति दर्शनम् ५६
कूर्मपृष्ठं परित्यज्य कर्त्तव्यमश्वत्त्थपत्त्रवत्
एवं हि कुरुतेऽभिज्ञो देवस्य त्वेति दर्शनम् ५७
कुक्कुटः कामलुब्धो वा ककारद्वयमुच्चरेत्
एवं वर्णाः प्रयोक्तव्याः कुक्कुटोऽसि निदर्शनम् ५८
कुक्कुटी कामलुब्धा च कुक्कुहन्ती पुनः पुनः
तन्मुखं कुरुते प्राज्ञः कुक्कुटोऽसि निदर्शनम् ५९
यथा भारभराक्रान्तो निश्श्वासो लघुचेतसः
एवं वर्णाः प्रयोक्तव्या होता यक्षन्निदर्शनम् ६०
यथा बालस्य सर्पस्य निश्श्वासो लघुचेतसः
एवमूष्मा प्रयोक्तव्यो हकारपरिवर्जितः ६१
यथा पुत्रवती स्नेहाच्चुम्बती च पुनः पुनः
तन्मुखं कुरुते प्राज्ञो युञ्जान ऽ इति दर्शनम् ६२

यथा कामातुरा नारी शब्दं करोति यादृशम्
तच्छब्दं कुरुते प्राज्ञः सि॒ ऀ ह्यसि निदर्शनम् ६३
यथा मर्कटयोर्युद्धं रोषेण प्रतिधावति
एवं वर्णाः प्रयोक्तव्या कि॒कि॒दी॒विना॑ निदर्शनम् ६४
मूत्रं करोति बडवा योनिं कुर्वीत यादृशीम्
तन्मुखं कुरुते प्राज्ञः सर्दुन्दुभे निदर्शनम् ६५
उकारान्ते उकारे च दृश्यते चोभयोर्यदि
द्विरौष्ठ्यन्तु विजानीयाद्भूर्भुव॒ः स्वर्न्निदर्शनम् ६६
एकयत्नो भवेद्यस्तु सकृदौष्ठ्यन्तदुच्यते
द्वित्रिभिश्च चतुष्कं च चतुरौष्ठ्यं ततः परम् ६७
अथ सादृश्यविज्ञेयः समानस्वरवर्णयोः
न्यूनाधिकानि तान्येव चक्षुषीति विनिर्दिशेत् ६८
विश्वे॑देवास्तमुक्त्वा च असौ यस्तु कदाचन
ये॒ दे॒वा नम॑स्तेऽस्तु वाजौनः सप्त चक्षुषी ६९
समानाक्षरबाधे च सन्ध्येकाक्षरचक्षुषी
समानवर्णयोगं च सम्प्रधानैव चक्षुषी ७०
शन्नौ मित्रस्तथा बातो ऊर्ध्वमेनं प्रचक्षते
मान॑स्तो॒के तन॑ये तु चक्षुषी च चतुष्टयम् ७१
पूर्वायां कण्डिकां दृष्ट्वा आपरा सहसँय्युता
तदेव नामग्रहणं न विकल्पः कदाचन ७२
पूर्वा विद्धा परान्ता च कण्डिका यत्र दृश्यते
चपला चैव सा ज्ञेया आ॒च्छच्छन्दौ निदर्शनम् ७३

तिस्रो ह्यर्द्धा अ॒भित्यं च तिस्रोऽर्द्धा प्र॒जापतिः
पुनन्तु मेति चत्वारि वा॒युः पञ्च ततः परम् ७४
अनाघृष्टा त्रयश्चैव एधोस्यर्द्धचतुष्टयम्
सँ॒व्व॒त्स॒रोऽसि चत्वारि द्यौः शान्तिश्चार्द्धयोर्द्वयोः ७५
क्वचित्स्वाहा पृथक्कुर्यात् क्वचिद्युक्तं तु कारयेत्
क्वचिच्चादौ विजानीयात्क्वचिच्चान्ते विधीयते ७६
वाक्यकालेऽवसाने वा स्वाहान्ते चाहुतिं क्षिपेत्
मन्त्रभागं पृथक्कुर्यात्स्वाहाकारं पृथक्पृथक् ७७
स्वाहादौ च भवेद्वाक्यं नृ॒मणा नृमणस्तथा
अन्ते चादौ पुनश्चान्ते काय स्वाहेति दर्शनम् ७८
अक्षराशीतिरेकश्च प्रथमा कण्डिका स्मृता
लक्षणोक्तप्रकारैस्तु इ॒षे त्वेति निदर्शनम् ७९
त्रीणि त्रीणि च चत्वारि दश पञ्चाष्टमं स्मृतम्
एकादशाक्षरं तद्वदुभयोरपि दृश्यते ८०
सप्तमं पञ्चमञ्चैव पुनश्चैकादशाक्षरम्
नवाक्षरं विजानीयाद्वाक्यं चैकादशं स्मृतम् ८१
उच्चादुच्चतरन्नास्ति नीचान्नीचतरं तथा
एवं वर्णाः प्रयोक्तव्या इषे त्वेति निदर्शनम् ८२
मकारादौ भवेद्वाक्यं म्रदाऽऊर्णम्प्रशस्यते
आ॒विर्म्मर्य्याकारादौ स्वरान्ते प्रथमस्वराः ८३
रुद्रसंख्या भवेद्वाक्यं वेदसंख्या पुनः पुनः
युग्मवाणानयोः सप्त अन्ते चैव चतुर्दश ८४

पञ्चाशत्पञ्चवर्णानि अक्षराणां प्रमाणतः
इन्द्रादित्ये च विज्ञेयं वाक्यं तस्य भवेत्त्रयम् ८५
सुधा च प्रथमाध्यक्षा पीड्याध्यक्षा द्वितीयका
ऊष्मान्ता प्रथमा ज्ञेया अर्म्मेभ्योऽथ परा भवेत्
ध्यक्षाध्यक्षा तयोः सम्यगुभयोः कण्डिकाद्वयोः
अभिरग्नेश्चतस्त्रस्तु पदाद्यञ्च विधीयते
एकाक्षरं पदं वाक्यं नवाब्धियुग्ममेव च ८८
मध्ये चैकाक्षरं वाक्यं द्वे द्वेऽग्घ्न्यावसानयोः
एवं वर्णाः प्रयोक्तव्या लोकं ताश्च प्रकीर्तिताः ८९
विभक्त्यन्तं विजानीयाद् गुरुतः शास्त्रतोऽपवा
लोपागमविकाराभ्यां वाक्यानामेष निर्णयः ९०
व्वनेषु व्यृन्तरिक्षं च अ॒ष्टौ व्यख्यत्तथैवच
नामग्रहणकाले तु गुरुरेव न संशयः ९१
शर्म्म च स्थस्तथा चित्रऽउपप्रागात्समुद्द्रवः
स्वरितो वाक्यकालेषु उदात्तं नोपपद्यते ९२
एह्यूषु शुक्रा जाते च अ॒भित्त्वा गोर्मदूषुणा
स्वरितो वाक्यकालेषु न चोर्द्ध्वन्नीयते करम् ९३
अक्षन्नमीमदन्ते च अहरहश्च तथैव च
वाक्यं च स्वरितं विद्यात्पाठकाले यथाक्रमम् ९४
ऊष्माणो यत्र दृश्यन्ते ह्यन्तस्थाश्च तथैव च
गुरुस्तत्रैव विज्ञेयऽऋवर्णसहसँय्युतः ९५
अन्तस्थपदसंयोगे विशेषो नोपपद्यते

अशरीरं यमं विद्यादन्तस्थः पिण्डनायकः ९६
सद्यो जातः समुद्रोऽसि प्रथमाथ व्यृध्यया
एवं वर्णाः प्रयोक्तव्या गुरवोऽत्र न संशयः ९७
अभिनीतं निपातं वा जात्यं वा स्वरितं विदुः
पदकाले भवन्त्येवं पाठकाले यथाक्रमम् ९८
तव व्वायो महोऽअग्ने व्वृणीत्यत्रैव दृश्यते
प्रथमोऽत्र लघुर्ज्ञेयो द्वितीयश्च गुरुर्भवेत् ९९
द्वादशैतानि नामानि देवता च तथैव च
अन्यथा निरयं याति सम्यक् पाठमजानतः १००
छायां च्छिद्रा तथा छन्दश्छकारा लघुसञ्ज्ञकाः
ह्रस्वा वा यदि वा दीर्घाः शेषा द्वित्वे प्रतिष्ठिताः १०१
दीर्घादग्रे छकारोऽपि ह्रस्वादग्रे तथैव च
द्वित्वाक्षरं विजानीयादिति शास्त्रविधानतः १०२
दीर्घादग्रे तु यो दीर्घो गिरिशा वर्म्मणा तथा
गुरुरेव स मन्तव्यश्छादयामि निदर्शनम् १०३
मा त्वा यऽआक्तमुदाश्चैव सहस्तौमास्तथैव च
पाठमध्ये लघुत्रीणि पदकाले गुरुर्भवेत् १०४
पशुभिर्यजुर्भिराप्यन्तं तस्माद् यज्ञात्तथैव च
ऋचार्द्धेतु छकारो न त्रिसँय्योगं कदाचन १०५
न संयोगं न द्विर्भावमृकारो मृदुरुच्यते
अवसाने गुरुं विद्याच्छौनको वाक्यमब्रवीत् १०६
निपातं चाभिनीतं च शेषं नीचतरं क्रमात्

त्रिस्वरं तं विजानीयाद्धोता ओजो निदर्शनम् १०७
द्वौ ककारौ स्वरौ द्वौ च नैव मात्रा विधीयते
स्वरे प्रतिस्वरं दद्याद्व्रेशीनान्त्वा निदर्शनम् १०८
चतुर्दशाक्षरं चादौ पुनश्चैका दशाक्षरम्
पुनर्दशाक्षरं वाक्यमष्टाक्षरमतः परम् १०८
लक्षणैर्वा विहीनस्तु भुक्तमव्यञ्जनं यथा
एवं वर्णाः प्रयोक्तव्याः श्रीश्च ते च निदर्शनम् ११०
वसुसङ्ख्याक्षरं वाक्यं त्रिपदी वा चतुष्पदी
सप्तास्यांसन् हि गायत्री अ॒ग्निन्दू॒तं श्रु॒धी हर्वम् १११
उभौ सप्ताक्षरं वाक्यं पुनश्चैव नवाक्षरम्
अष्टाक्षरं विजानीयाद्यत्पुरुषं च निर्दिशेत् ११२
ऊनाशीतिस्तु वर्णानि अथैताश्च प्रकीर्तिताः
एकाक्षरादिवाक्यानि द्वादशैतानि सङ्ख्यया ११३
द्वादशाक्षर प्रथमं पञ्चमे पञ्च सप्त वै
षडक्षरं ततो वाक्यं पुनर्द्वादशकं स्मृतम् ११४
एकादशाक्षरम्प्राहुरन्ते च द्वादशाक्षरम्
एवं वर्णाः प्रयोक्तव्या अथैतानिति दर्शनम् ११५
अष्टादशाक्षरं वाक्यं नाकपृष्ठे च पञ्चधा
सप्तदशाक्षरं चैव वैश्वदेवी निदर्शनम् ११६
रौद्राध्यायोत्तरेणैव करिडका शतकेन तु
ततो वाक्यं प्रकुर्वीत ऋचार्द्धे षोडशाक्षरम् ११७
अष्टादशाक्षरं वाक्यं पुनः षोडशकैः शुभैः

एवं वर्णाः प्रयोक्तव्या अश्मन्नूर्जं विनिर्दिशेत् ११८
पुस्तके प्रज्ञयाधीतं नाधीतं गुरुसन्निधौ
न भ्राजन्ते सभामध्ये जारगर्भा इव स्त्रियः ११९
एकः सर्वं न जानाति सर्व एकं न विन्दति
एवं मन्त्रा न गुह्यन्ति पण्डिताः शुद्धभाविनः १२०
श्रुत्वा वेदविनाशं तु सम्यग्ब्रूयान्न वै बुधः
आहूय तं विविक्ते वै तस्य धर्मो न हीयते १२१
मन्त्रो हीनः स्वरतो वर्णतो वा मिथ्याप्रयुक्तो न तमर्थमाह
स वाग्वज्रो यजमानं हिनस्ति
यथेन्द्रशत्रुः स्वरतोऽपराधात् १२२
लक्षणं न त्यजेद्धीमान्सम्प्रदायोऽन्यथा भवेत्
लक्षणेन विना शिष्यः सम्प्रदायो विनाशवान् १२३
नासौ तत्फलमाप्नोति सम्यक्पाठमजानतः
उत्तमो लक्षणज्ञानी लक्ष्यज्ञानी तु मध्यमः १२४
लक्ष्यलक्षणयोर्ज्ञानी तद्धि मात्रं प्रचक्षते
लक्षणेन विना वाणी निर्मलापि न शुद्ध्यति १२५
प्रमदा रूपसम्पन्ना दरिद्रस्येव योषिता
स्वरहीना यथा वाणी वस्त्रहीनास्तु योषितः १२६
एवं वर्णाः न शोभन्ते प्राणहीनाः शरीरिणः
वेदपाठी सदा सम्यग् विचार्यैवं पुनः पठेत् १२७
व्विश्वारूपाण्यबोध्यग्निरेधोऽसीति तथापरः
केतुङ्कृण्वन्निति च ते षकारा मूर्द्धजाः स्मृताः १२८

अग्नेरनीकं य्युक्ष्वा हि व्विश्वे देवा द्वितीयकम्
उदग्ने चायमुत्तरा न्नमी व्वन्न्याय हीत्ययम् १२९
देवम्बर्हिर्य्यदापोऽस्ति त्वामद्य स्वस्ति नस्तथा
मानो मित्रो हि व्वक्ष्यन्ती क्षकारा ययुतास्तथा १३०

इत्यमोघानन्दिनी शिक्षा समाप्ता

Tripāthī, Śrī Rāma Prasāda, ed., *Śikṣhāsaṁgrahaḥ*, (Vārānasi: Sampurnand Sanksrit University, 1989), pp. 74-85.

# कौशिकीशिक्षा

श्री गणेशाय नमं

द्वैधा चैव समुत्पन्ने लक्षणान्निर्णयो भवेत्
लक्षणं न विनाशि स्यात्संप्रदायोऽविनाशवान् १
अग्नेरनीकं युक्ष्वा हि विश्वे देवाः द्वितीयकः
उदग्ने अयमुत्तरान्नमो वन्याय निदर्शनम् २
ककारं जिह्वामूले तु शकारः स्पृशते यदि
विप्रीतो भवेत्तेषां क्षकारं प्रयुयोजयेत् ४
उच्चादुच्चतरं नास्ति नीचान्नीचतरं तथा
अक्षरात् कल्पयोगाच्च नीच्चान्नीचतरं क्रमात् ५
द्व्यङ्गुलं त्र्यङ्गुलं वापि यदि वक्त्रं प्रसारयेत्
नश्यन्ति सर्ववर्णाश्च पतिहीना यथा स्त्रियः ६
वक्त्रमेकाङ्गुलं कृत्वा यन्त्रितश्चानुपीडयेत्
सुस्वरेण सुवक्त्रेण ततः पाठं समारभेत् ७
गुरुस्थानेष्वनुस्वारः गुरुः परतरो भवेत्
स तु ह्रस्वो भवेदेव देवानां हृदये विना ८
शषहे त्र्यक्षरे चैव संयोगो यत्र दृश्यते ।
ऋवर्णो न तु कर्तव्यः शषहेषु च १०
यथा
पुत्रत्रः कुक्कुटः कामलुब्धश्च शब्दम् ।
कुर्वन्पुनः पुनः एवं वर्णाः प्रयोक्तव्याः कुक्कुटोऽसि
निदर्शनम् ११
यथा कामातुरा नारी शब्दं कुर्वति यादृशम्

तद्वद्वर्णा प्रयोक्तव्या सि७ह्यसीति निदर्शनम् १२
यस्तेस्ताः पातन्नो युव७सुराममश्विना
इडे रन्तेऽश्विनकृतस्य ते ह्रस्वाः पञ्च सरस्वतीः १३
प्रवो गुरू पदादिस्थावग्रहां न गतो लघुः
पदमध्येऽवग्रहादौ गुरुः स्यातां यवा पुनः १४
अवक्षरमनायुष्यं विस्वरं व्याधिपीडितम्
अक्षताः शस्त्ररूपेण वज्रं पतति मस्तके १५
लक्षणेन विवर्णान्युच्यते यस्तु पाठकः
आयुर्हानिरधः पाती ब्रह्मघ्नोऽसौ न संशयः १६
लक्षणेन विना वाणी निर्मलापि न शोभते
प्रमदा रूपसंपन्ना दरिद्रस्येव योषिता १७
विश्वारूपाण्यबोध्यग्निरेधोऽसि केतुङ्कण्वन्निति
चत्वारि मूर्द्धन्यमुषा अन्यत्र मुखाः १८
ऋवर्णे यत्र दृश्यते रेफं शिरसि संयुतम्
रकारादि प्रयुञ्जीत ऋवर्णं स्तदनन्तरम् १९
न याता नीयते स्वर्गं तिर्यक्तं तु मनीषिभिः
तिर्यक्त्र्यंगुमुच्चं स्यात्सस्थानं नरे वच २०
भूत्यालये पिशाचोऽपि गर्जितोऽपि निदर्शनम्
एवं वर्णाः प्रयोक्तव्याः सम्माज्मीति निदर्शनम् २१
मा त्वा यात्मदाश्चैव सह स्तोमास्तथैव च
पदमध्ये लघुत्रीणि पादादौ च गुरुर्भवेत् २२
नीचे नीचतरानुच्चैस्तिर्यक्ता समवृत्तयः

स्वस्थाने सासा ये नित्यं हस्तेन च मुखेन च २३
स्फुरणानामपां फेने निदर्शनम् २४
माध्यन्दिनीय शाखायां ज्ञेयं प्लुतचतुष्टयम्
प्रणवो जघनो नाम स्कंदकी रुहणी तथा २५
सामानि चान्यशाखासु भिन्नकी मङ्गलध्वनिः
दीर्घं स्यान्मकारे च ॐप्लुतः प्रणवः स्मृतः २६
स्वरान्ते अग्ना३ जघनी विवेशा३ प्लुतं विदुः
स्कन्दकी च नकारान्ते लाजीं३ ञ्छाची३ निदर्शनम् २७
रुहणी च तकारान्ते असी३दुपरि स्विदासीत्
अनुदात्ते त्रिमात्रास्तु विवेशापि परिस्विदा २८
यदस्य कालो नेषा स्याल्लोपावग्रहा ह्रस्वता
प्लुतास्तु प्लुतचत्वारैर्यजुर्वेदे बुधैः स्मृताः २९
अग्रे रेफो ह्ययोति पश्चाद्रेफस्य ऊर्ध्वता
जलं तु विकान्यायः हकारो रेफसंयुक्तो नादो भवति
नित्यशः ३०
द्वितीये न समायुक्तो न तु नादी कथं च न
स जोषा इद् रेफस्य ऊर्ध्वयानृषयः पवित्रेण पुनीहिनः ३१
तीव्रान्घोषान्पञ्चरंजनः पूषा पंचा अं उं नंः ।
ओकारादि प्लुतं ज्ञेयं अग्ना द्वितीयमेव च ३२
लाजी छाची चतुर्थस्य विवेशा इति पंचमः
तिरश्चीनो द्वि षष्ठो सप्तमो ह्यष्टमो नैव विद्यते ३३
सुसंदृशं त्वा ये जनेषु अति विश्वाः भुज्युः सुपर्णः

वर्षाभिर्ऋतुनां उतनः षडेते सस्तकारे भवति ३४
पञ्च रङ्गाः प्रवर्तन्ते घातनिर्घातवज्रिणः
अहीनप्रहिणो ज्ञेयो यथा अ इ उ ऋ ॐ निदर्शनम् ३५
इयन्ते यज्ञिया सुवीरो वीरान्सुप्रजाः
रश्मिना सत्याय परो दिवा षट् पृथिव्या अन्यत्र पृथिव्याः
३६
ऊष्माणि भवन्ति आप्याय्यमानो यमो रय्यै धाय्यारूप७
श्रवाय्यं नृपाय्यं पौरुषेय्या हृदय्या सह रय्या निचाय्य
सन्नाय्य संताय्येति च ३७
प्रहिणस्तु प्रहरो श्रिः पंचरंगस्य तिष्टंति देवाँ२
आसाुदयादिहेति घातः ।
देवा२ु । इदेषीति निर्घातः ।
नान्याँ२ । उपेति वज्रिणः । देवाँ२ ऋतुभिः ।
प्रहिणः अमित्राँ२ ओषतात्तिग्महेते इति ३८
प्रहरोऽग्निस्तथैव च ३९
अरण्यस्यागते पारे शब्दं कुर्वन्ति यो नरः ।
एवं वर्णाः प्रयोक्तव्याः पृश्निरक्रमी निदर्शनम् ४०
कौरं कुंभं जलं गत्वा शब्दुं कुर्वन् क्षणद्वयम्
एवं वर्णाः प्रयोक्तव्याः नॄः पाहीति निदर्शनम् ४१
उद्ब्रेकं तु भवेत्तस्मिन्निश्वासो लघुरुच्यते
एवं वर्णाः प्रयोक्तव्याः शर्मासीति निदर्शनम् ४२
लक्षणं न त्यजेद्धीमान्संप्रदायो भवेद्यथा

लक्षणं न विनाशि स्यात्संप्रदायो भवेद्यथा ४३
स्वरहीना यथा वाणी वस्त्रहीना सथांगना
एवं वर्णा न शोभन्ते प्राणहीना यथा तनुः ४४
यथा वानरशाखायामुत्पतन्ति पतन्ति च
तद्वद्वर्णाः प्रयोक्तव्या ईहेति निदर्शनम् ४५
विरामोऽवसान विवृतिश्चावसाने क्रमाद्वच
तथा
परे पदे च पादस्थाने शून्ये ह्रस्तं विधीयते ४६
यथाघटागतं शब्दे दीर्घावाँद्य क्रमो भवेत्
तद्वद्रंगं विजानीयाद् महा२ इति निदर्शनम् ४७
यथा भारभरा क्रान्ताः शब्दं कुर्वन्ति ये नराः
एवं वर्णाः प्रयोक्तव्या होतायक्षेति दर्शनम् ४८
शृङ्गवद्बालवत्सस्य कुमार्यास्तनयुग्मवत्
नेत्रवत्कालसर्पस्य स विसर्ग इति स्मृतः ४९
उदात्तमक्षरं नास्ति स्वरितं स्वरो दृश्यते
तत्र पाणिः प्रतिष्ठेत उदात्तैः किं प्रयोजनम् ५०
अनुस्वारापूर्वयोर्हकारयोः संयोगस्य सयकारो भवति
सिꣳह्यसि षूष्णो रꣳह्या प्रथमा सꣳस्कृतिरिति ।
अनुस्वारो द्विमात्र स्यादुवर्णे व्यंजनोदयात्
ह्रस्वो वा यदि वा दीर्घो देवानाꣳ हृदयेभ्य इति ५१
प्रकृत्या संधयेद्वर्णान्पदसंकाले विभेदयत्
स समुच्चारयेद्विद्वान्ब्रह्मलोके महीयते ५२

विघ्नुर्नरं धिषः प्रोक्ष्यमाण पितरो नाराशꣳसाः
सन्त इति पादः उच्चैः अनुदात्त अयामेन ५३
ऊर्ध्वगमनेन गात्राणां यः स्वरः निष्पद्ये
स उदात्तसंज्ञो भवति नीचैरनुदात्तः समाहारः स्वरितः ५४
अनुदात्तो हृदि ज्ञेयो मूर्ध्न्युदात्त उदाहृतः
स्वरितः कर्णमूलीयः सर्वास्ये प्रचयः स्मृतः ५५
लोहकार इवा कर्म्मं भस्मसात्कुरुते यदि
एवं वर्णाः प्रयोक्तव्याः सं॒व॒त्स॒रो निदर्शनम् ५६
आसं च तथा तप्तं निक्षिपेद्वेश्म संध्यतः
तच्छब्दं कुरुते प्राज्ञ परिवत्सरो निदर्शनम् ५७
डुं रो धरदेशे च कुंपाती च पुनः पुनः
एवं वर्णाः प्रयोक्तव्या इमम्मेति निदर्शनम् ५८
यत्र यत्र तु रङ्गा स्यात् द्वे सार्द्धं योजयेद्बुधः
करेण ताडितस्याङ्गं तद्वत्कालेषु रङ्गयोः ५९
अहीनप्रहारो ज्ञो यथा अ इ उ ऋ ओ इति निदर्शनम् ६०

इति कौशिकाचार्यमतानुसारिणी शिक्षा समाप्ता

Aithal, K. Parameswara, *Veda Lakṣaṇa: Vedic Ancillary Literature: A Descriptive Bibliography*, Motilal Banarsidass (Delhi, 1993). No. 476-478. Kauśikī Śikṣā, “Also called Kauśikācārya-Śikṣā or Kauśikācārya-matānusāriṇī Śikṣā.”

Bandyopadhyay, Nabnarayan, “Phonetic Observation in the Kauśikī Śikṣā,” in *Studies on the Śikṣā-s and the Prātiśākhya-s*, Dr. Mrs. Bhagyalata Pataskar, ed., Adarsha Sanskrit Shodha Samstha: Pune, India, 2010.

Eichler, Detlef, “Kauśikī Śikṣā with Notes,” 2020.

# माराडव्यमहर्षिप्रणीता शिक्षा

अथातः संप्रवक्ष्यामि शिष्याणां हितकाम्यया
माराडव्येन यथा प्रोक्ता ओष्ठ्यसंख्या समाहृता १
इषे त्वा, बह्वीः प्रथमाक्षरम् बाहुभ्यां तिस्रः पृथुबुध्नः
बृहद्ग्रावासि ब्रह्मवनिंत्त्वा इन्द्रस्य बाहुरसि बधानदेव
तिस्रः ऊर्ज्जैत्वा दब्धेन । पञ्चदश १
कृष्णोऽसि बर्हिषे त्वा बर्हिरसि स्रुग्भ्यः बृहन्तमध्वरे
सवितुर्ब्बाहूस्त्थः बाहुभ्यां बृहस्पतये ब्रह्मणे
बृहस्पतिर्यज्ञमिमम् बर्हिषि मादयध्वम् अग्नेऽदब्धायो ।
सम्बर्हिस्त्रयोदश २
समिधाग्निं घृतैर्ब्बधयत बृहच्छो च अदब्धासः स नो बोधि
ब्रह्मद्वयम् गृहा मा बिभीत ऊर्ज्जम्बिभ्रत द्वयम् सैमनसो
बहुः मनस्तनूषु बिभ्रतः सह स्वस्राम्बिकया देवन्त्र्यम्बकम्
उर्व्वारुकमिव बन्धनात्सप्तदश ३
एदमापो देवीर्बृहतीः बृहस्पतये ब्रह्माग्निः प्रबुधे
अदब्धस्तनूपाः बध्नीताम् बृहस्पतिष्ट्वा अस्मे ते बन्धुः
चतस्रो ब्रूतात् अङ्घारे बम्भारे ब्रह्मद्वयम् पञ्चदश ४
अग्नेस्तनू, ब्बर्हिर्द्धा यज्ञाद् ब्रह्मत्रयम् विप्रस्य बृहतो
बाहुभ्यां बृहन्नासि बृहद्द्रवा बृहतीमिन्द्राय यम्मे
सबन्धुर्य्यमसबन्धुः बम्भारिरसि बुध्यो घृतयोने पिब द्वौ
षोडश ५
देवस्य त्वा बाहुभ्यान्तिस्रः ब्रह्मद्वयम् बृहस्पते धारया
रक्षोऽवबाधे पिबत द्वयम् सोमस्य पिबताम्ब निष्परेन्द्र

ब्रवीमि द्वादश ६
व्वाचस्पतये, ज्येष्ठतातिम्बर्हिषदम्बृहस्प्पतिस्तिस्त्रो
ब्रह्मद्वयम्बृहद्वते यत्त ऽइन्द्रबृहद्वयस्तृणान्ति बर्हिरपिबः
सोमम्पिब पिबा सोममुत द्विबर्हाश्चतुर्दश ७
उपयाम गृहीतोसि बृहदुक्षाय बृहस्पति सुतस्येति
सोमम्पिब ब्रह्मद्वयं सुभृतम्बिभृत सुकृतम्ब्रूताद्बृहच्छुक्रोऽष्टौ
८
देव सवितर्ब्बलवान्बलेन बृहस्पतिः षोडश ग्रीवायाम्बद्धः
पिबत मादयध्वं प्रसव आबभूव ब्रह्मद्वयं बाहुभ्यान्द्वयं
पञ्चविंशतिः ९
अपो देवाबृहस्पतिर्द्वयं बन्धुस्तपोजाः क्षत्रस्योल्बं दृबासि
ब्रह्मषडहिम्बुध्न्यम् परि ता बभूवाब्जागोजाऽऋृतम्बृहद्बाहू
ऽअभ्युपावहरामि बहुंकार श्रेयस्कर
बर्हिषे अपिबः शचीभिर्विंशतिः १०
युञ्जानः प्रथमं बृहद्दश ब्रह्मत्र्यं बाहुभ्यान्तिस्त्रो बिभ्रदभ्रिं
बहुलेऽउभे अदब्धव्रतप्रमतिर्बाधस्व द्विषः साग्निम्बिभर्त्तु
बिलङ्गृभ्णातु सुबाहुरुताम्ब धृष्णु बलद्वयं येषाम्बाहू
एकोनत्रिंशत् ११
दृशानो रुक्क्मो बृहदब्जा गोजा घृतैर्ब्बौ धयत
बिभृताप्स्वेन बोधा मे स बोधि ब्रह्मद्वयं बृहस्पतिं पञ्च
बन्धमेतं बन्धानामवसर्जनायाबबन्धेह बीजंठ
सजूरब्दौ बभ्रूणामुहमम्ब धामान्युपब्रुवे द्वयं विबाधद्ध्वं

पड्बीशात्सर्वस्माद्देव किल्बिषा द्वह्नीः प्रथमाक्षरं नाशयित्री
बलासस्य द्वात्रिंठशत् १२
मयि गृह्णामि ब्रह्मयज्ञानं सबुध्न्या अदब्धो धत्त बृहस्पते
द्विबुध्नं त्रिष्टुब्ग्रैष्मी पञ्चदश बृहत् १३
ध्रुवक्षितिर्ब्रह्म चत्वारि बृहती पञ्च बस्तो व्वयंं प्रथमं
विबाधसे बृहस्पतित्रयं ब्रध्नस्य पञ्चदश १४
अग्ने जातान्ब्रूहिद्वयं बृहत्पञ्च बृहस्पतिद्वयमबोध्यग्निः
सुब्रह्मा यज्ञो बभूथ स्तीर्णबर्हिषमुद्बुध्यस्व चतुर्दश १५
नमस्ते बाहुभ्यामुत ते बिभर्ष्यस्तवे उत बभ्रुर्बाणवान्बभूव
ते बाहुभ्यान्तव हिरण्यबाहवे बभ्लुशाय बृहते बुध्न्याय
बिल्मिने पिनाकम्बिभ्रदा गहि बाह्वोस्तव
प्रथममैलबृदाः, पिबतो जनान्पञ्चदश १६
अश्मन्नूर्जमर्बुदञ्च बर्हिषदे स्वयम्पिबन्तु ब्रह्म यत्र बाणाः,
प्रजया च बहुङ्कृधि ब्रवन्बाधमाना हस्तेषु बिभ्रतः प्रब्रवां
त्रिधा बद्धः सप्तविंठशतिः १७
व्वाजश्च मे बलं च मे बृहस्पतित्रयं बर्हिर्द्वयम्,
बृहत्त्रयम् ब्रह्मैकादश बाहुभ्यामिह बोधि ब्रध्नस्योद्बुध्यस्व
चतुर्विंठशतिः १८
स्वाद्वीन्त्वा ब्रह्म चत्वारि बर्हिर्दश बलं चत्वारि रूपम्बदरं
पिब षडारे बाधस्व बह्व्यस्तन्वंं प्रथमम्बहुलाम्मे अधि
ब्रुवन्द्वयमुल्बञ्जहाति बहुधा न बाधमानाः, सब्वन्तर्द्वदरैः,
सुकृतं बिभर्ति षट् त्रिंठशत् १९

क्षत्रस्य योनिर्बाहुभ्याम्बलं षड् बाहू मे बृहस्पति पुरोहिता
बभ्रवै मदे बृहच्चत्वारि बाहू चत्वारि बर्हिर्द्वयं स बिभेद
बाधतान्द्वेषः पिब द्वयमष्टाविंशतिः २०
इमम्मे वरुणेह बोधि ब्रह्मद्वयं प्रबाहवा पिब द्वयं बर्हिः
सप्त बृहत्त्रयं बृहस्पतिर्बलं चत्वारि बदरैर्द्वौ बध्नन्नश्विभ्यां
बहुभ्यः, सूक्ता ब्रूहि षड्विंशतिः २१
तेजोऽसि बाहुभ्यां सुतऽआ बभूव ब्रह्मत्रयं
तम्बधानबृहस्पतये प्रबुद्धाय बलाय पिबति बोधयोपब्रुवे
बृहत्यै स्वाहा त्रयोदश २२
हिरण्यगर्भःऽ सम्बभूव सप्त युञ्जन्ति ब्रध्नं बृहत्सप्त ब्रह्म
षट् पिब चत्वार्य्यम्बेऽम्बिकेऽम्बालिके बहुद्वयं ये बर्हिषः,
प्रब्रवीमि परिता बभूव त्रयस्त्रिंशत् २३
अश्वस्तूपरो बाह्लोः प्रथमो बभ्रुः सप्त बाहु चत्वारि
बार्हस्पत्या द्वयम्बृहद्द्वयम्बलं चत्वारि बाहुद्वयं बर्हिषदा
त्रैयम्बकाः सोमाय लबान्बृहस्पति द्वयमष्टाविंशतिः
२४
शार्दन्दद्भिर्मृदम्बस्वैरनूकाशेन बाह्यन्निर्बाधेन
बृहस्पतिश्चत्वार्य्यद्ध्वानम्बाहुभ्यां जाम्बीलेन बलद्वयं
जुम्बकायजगतो बभूव यस्य बाहू अदब्धद्वयं बन्धुपञ्च
पड्बीशद्वयं ब्रह्मणा सूदयामि देवबन्धोर्वङ्क्रीरश्वस्य
पञ्चविंशतिः २५
अग्निश्च ब्रह्मराजन्याभ्यां बृहस्पतित्रयं पिबत्रयं बृहदर्च्च

ब्रवाणि ते बर्हिर्द्द्वयमेकादश २६
समास्त्वा बोधयद्वयं ब्रह्मद्वयं बृहस्पते द्वयं बर्हिरिदं यद्बृहतीरष्टौ २७
होता यक्षद्बर्हिर्दश बृहतीमेकं बध्नं द्वयं बृहतीत्रयं ब्रह्माणं बिभ्रद्द्वयं बृहद्द्वयं बध्नं द्वाविर्ठ०शतिः २८
समिद्धोऽग्निञ्जन्बर्हिस्त्रयं बहोः कर्त्तारम्बाहू बन्धनानिद्वयं बृहद्द्वयं पुत्रं बिभृता बह्वीनाम्पिता प्रथमं बहुरस्य पुत्र ऽ इषुबला ब्राह्मणासः सोमोऽअधिब्रवीतु पर्य्येति बाहुम्बाधमानो द्वयं बलमोजोबभ्रुः सौम्यो बार्हस्प्पत्यो बार्हताय बृहस्पतये सप्तविर्ठ०शतिः २९
देव सवितर्ब्रह्मणे ब्राह्मणत्रयं क्लीबत्रयं बिदलकारीं बलं द्वयमुत्सादेभ्यः कुब्जमधर्माय बधिरं ब्रध्नस्य बधाय बहुवादिनर्ठ० शब्दायाडम्बराघातर्ठ० शाबल्यां क्लीब अष्टादश ३०
सहस्रशीर्षा तँय्यज्ञं बर्हिषि ब्रह्म चत्वारि द्वौ बाहू राजन्योऽबध्नन्पुरुषं, जायमानो बहुधा तदब्रुवन्दश ३१
तदेव ब्रह्मद्वयमाबभूव यद्बृहतीः स नो बन्धुः पञ्च ३२
अस्याजरासो बृहत्त्रयं बर्हिर्द्वयं पिब त्रयं बर्हिषि द्वयं बृहद्द्वयं बृहतीं पिबतु बट्त्रयमिव बीरिटे बृहस्पति ब्रह्मणो द्वयं बृहती बर्हिषि शाम्बरे बहुलाऽदब्धेभिर्द्वयं ब्रह्माणि पिबत बहुलं बाधते बृहद्भानो बृहते ब्रह्म चतुस्त्रिर्ठ०शत् ३३

यज्ञाग्रतो बाधते ब्रूहि पिबतं बृहती ब्रह्मणश्चतुर्बाधामहे
बिभर्त्य बध्नन् बध्नामि बुध्न्यो बोधि बृहत्पञ्चदश ३४
अपेतो ब्रवीमि प्रथमाक्षरं किल्बिषं बाधस्व त्रीणि ३५
ऋचंव्वाचम्बृहस्पतिर्द्वयं ब्रह्मब्रवामप्रथमाक्षरं चत्वारि ३६
देवस्यत्वा बाहुभ्यां बृहतो ब्रह्मणो बृहस्पते बोधि पञ्च ३७
देवस्यत्वा बाहुभ्यां बृहपतये पिबत ब्रह्मणे ब्रह्मोर्ध्व
बर्हिभ्यो बभूव ब्रह्मणो बृहद् ब्रह्मणा दश ३८
स्वाहा प्राणेभ्यो बृहस्पतिर्ब्बलेन ब्रह्मणे ब्रह्महत्यायै
चत्वारि ३९
ईशा व्वास्यं क्लिब एकः ४०

इति श्रीमाण्डवी शिक्षा समाप्ता

Aithal, K. Parameswara, *Veda Lakṣaṇa: Vedic Ancillary Literature: A Descriptive Bibliography*, Motilal Banarsidass (Delhi, 1993). No. 958.

Tripāthī, Śrī Rāma Prasāda, ed., *Śikṣhāsaṁgrahaḥ*, (Vārānasi: Sampurnand Sanksrit University, 1989), pp. 62-73.

Eichler, Detlef, "Mandavya-shiksha-with-commentary," posted September 6, 2016, detlef108.wordpress.com/2016/09/06/sikṣas-with-commentary/

# अथर्ववेदीया माण्डूकीशिक्षा

तिस्रो वृत्तीरनुक्रान्ता द्रुतमध्यविलम्बिताः
यथानुपूर्वं प्रथमा द्रुता वृत्तिः प्रशस्यते १
मध्यमैकान्तरावृत्तिर्द्व्यन्तरा हि विलम्बिता
नैनां बुधः प्रयुञ्जीत यदीच्छेद्वर्णसम्पदाम् २
अभ्यासार्थे द्रुता वृत्तिरुपलब्धौ विलम्बिता
मध्यमा तु प्रयोगार्थे न तद्वचनमन्यथा ३
ऐन्द्री तु मध्यमा वृत्तिः प्राजापत्या विलम्बिता
अग्निमारुतयोर्वृत्तिः सर्वशास्त्रेषु निन्दिता ४
दोषाः प्रकाशस्तु विलम्बितायां
वर्णा द्रुतायां च न सूपलक्ष्याः
तस्माद्द्रुतां चैव विलम्बितां च
त्यक्त्वा नरो मध्यमया प्रयुञ्ज्यात् ५
सर्वा एव तु निर्दोषा वृत्तयः समुदाहृताः
स्वधीतस्य सुवक्त्रस्य शिक्षकस्य विशेषतः ६
सप्तस्वरास्तु गीयन्ते सामभिः सामगैर्बुधैः
चत्वार एव छन्दोभ्यस्त्रयस्तत्र विवर्जिताः ७
षड्जऋषभगान्धारो मध्यमः पञ्चमस्तथा
धैवतश्च निषादश्च स्वराः सप्तेह सामसु ८
षड्जे वदति मयूरो गावो रम्भन्ति चर्षभे
अजा वदति गान्धारे क्रौञ्चनादस्तु मध्यमे ९
पुष्पसाधारणे काले कोकिलः पञ्चमे स्वरे
अश्वस्तु धैवते प्राह कुञ्जरस्तु निषादवान् १०

कण्ठादुत्तिष्ठते षड्ज ऋषभः शिरसस्तथा
नासिकायास्तु गान्धारः उरसो मध्यमस्तथा ११
उरः शिरोभ्यां कण्ठाच्च पञ्चमः स्वर उच्यते
धैवतश्च ललाटाद्वै निषादः सर्वरूपवान् १२
पद्मपत्रप्रभः षड्ज ऋषभः शुकपिञ्जरः
कनकाभस्तु गान्धारो मध्यमः कुन्दसप्रभः १३
पञ्चमस्तु भवेत्कृष्णः पीतवर्णस्तु धैवतः
निषादः सर्ववर्णाभः इत्येते स्वरवर्णकाः १४

इति प्रथमोऽध्यायः

द्वितीयोऽध्यायः

ब्रह्माङ्गुष्ठं तु क्रुष्टं स्यादङ्गुष्ठे मध्यमः स्वरः
प्रादेशिन्यां तु गान्धारो मध्यमायां तु पञ्चमः १५
अनामिकायां षड्जस्तु कनिष्ठायां तु धैवतः
तस्याधस्तात्तु योऽन्त्यः स्यान्निषाद इति तं विदुः १६
प्रथमावन्तिमौ चैव वर्तन्ते छन्दसि स्वराः
त्रयो मध्या निवर्तन्ते मण्डूकस्य मतं यथा १७
द्वितीयं स्वरितं प्राहुः षष्ठः प्रचित उच्यते
उच्चं विद्यान्निषादं तु नीचं षड्जमुदाहृतम् १८
उदात्तश्चानुदात्तश्च स्वरितः प्रचितस्तथा
चतुर्विधः स्वरो दृष्टः स्वरचिन्ताविशारदैः १९
स्वरे ज्ञात्वा यथा स्थानं हस्तस्य स्पन्दनं स्मृतम्
निष्कृष्य हस्तं विन्यस्तं पाणौ दृष्टिं निवेशयेत् २०

किञ्चिद्यो नभसः स्वाँसाद्बाहौ दृष्टिं निपातयेत्
प्रसार्य चाङ्गुलीः सर्वारोपयेत्करमराडलम् २१
न चाङ्गुलीभिरङ्गुष्ठमुपेयाद्दोषवित्ततः
ऊर्ध्वमायुस्तमाकुञ्चमङ्गुष्ठं स्थापयेद्बुधः २२
नाधः शिरा नावनता नाङ्गुल्यः प्रतराः स्मृताः
उत्तानं सोन्नतं किञ्चित्सुव्यक्ताङ्गुलिरञ्जितम् २३
स्वरचिह्नं करं कुर्यात्प्रादेशोद्देशगामिनम्
अङ्गुष्ठस्योत्तरे पूर्वे यस्योपरि यद्भवेत् २४
प्रादेशस्य तु तद्देशस्तन्मात्रं चालयेत्करम्
चलुर्नावा स्फुटी दराडी स्वस्तिको मुष्टिकाकृतिः २५
एते वै हस्तदोषाः स्युः परशुछेदस्तु सप्तमः
कूर्मोऽङ्गानीव संहृत्य चेष्टां दृष्टिं दृढं मनः २६
न कम्पयेच्छिरः पादौ मुखदोषाँश्च वर्जयेत्
नासिकायास्तु पूर्वेण हस्तं सञ्चालयेद् बुधः २७
सूक्ष्मान्वर्णान्प्रयुञ्जानो दक्षिणं श्रवणं प्रति
श्रुतिं वाचोऽनुगां कृत्वा वाचं कृत्वा मनोऽनुगाम्
दृष्टिं हस्तानुगां कृत्वा ततः पदमिवोच्चरेत् २८

इति द्वितीयोऽध्यायः

## तृतीयोऽध्यायः

यथा पाणी तथा वाणी रिक्तुं तु परिवर्जयेत्
यत्रैव तु स्थिता पाणी पाणिस्तत्रैव धार्यते २९
स्वरश्चैव च हस्तश्च द्वावेतौ युगपद्भवेत्

हस्ताद्भ्रष्टः स्वराद्भ्रष्टो न वेदफलमश्नुते ३०
हस्तहीनं तु योऽधीते स्वरवर्णविवर्जितम्
ऋग्यजुःसामभिर्दग्धो वियोनिमधिगच्छति ३१
ऋग्यजुःसामगादीनि हस्तहीनानि यः पठेत्
अनृतो ब्राह्मणस्तावद्यावत्स्वारं न विन्दति ३२
हस्तेनाधीयमानो यः स्वरवर्णान्प्रयोजयेत्
ऋग्यजुःसामभिः पूतो ब्रह्मलोकं स गच्छति ३३
स्वरात्स्वरं सङ्क्रमते स्वरसन्धिमनुल्बणम्
अविच्छिन्नं समं कुर्यात्सूक्ष्मं छायां तथोपमम् ३४
अक्षरज्ञो विरामज्ञः प्रत्यारम्भी तथैव च
स्वरमात्रा विभागज्ञः स विप्रो वक्तुमर्हति ३६

इति तृतीयोऽध्यायः

चतुर्थोऽध्यायः

आम्रपालाशबिल्वानामपामार्गशिरीषयोः
खदिरस्य करञ्जस्य कदम्बस्य च क्षीरिणः ३७
अर्कस्य करवीरस्य कुटजस्य विशेषतः
वाग्यतः प्रातरुत्त्थाय भक्षयेद्दन्तधावनम् ३८
तेनास्यकरणं सूक्ष्मं माधुर्यं चोपजायते
न चास्य वदतो दोषान्कश्चिदप्युपलक्षयेत् ३९
नात्युच्चैर्नाति वा नीचैर्निषण्णः सदने सुखम्
प्रब्रूयान्नातितीक्ष्णेन कण्ठेन मदुनादिना ४०
प्रातर्वदेन्नित्यमुरः स्थितेन स्वरेण शार्दूलरुतोपमेन

माध्यन्दिने कण्ठगतेन चैव चक्राह्वयैः कूजितसन्निभेन ४१
तारं तु विद्यात्सवनं तृतीयं शिखण्डिना तच्च सदा प्रयोज्यम्
मयूरहंसादिमृदुस्वराणां तुल्येन नादेन शिरःसुखेन ४२
यथा व्याघ्री हरेत्पुत्रान्दंष्ट्राभिर्न च पीडयेत्
भीतापतनभेदाभ्यां तद्वद्वर्णान् प्रयोजयेत् ४३
एवं वर्णाः प्रयोक्तव्या न मुक्ता न च पीडिताः
सम्यग्वर्णप्रयोगेण ब्रह्मलोके महीयते ४४
शनैरध्वसु वक्त्रेण न परं योजनाद् व्रजेत्
न हि पार्ष्णिहता वाणी प्रयोगान्वक्तुमर्हति ४५
मान्ते मुष्ट्याकृतिं कुर्यात् तकारान्ते विलोपयेत्
नखस्य दक्षिणे पार्श्वे नकारान्ते प्रयोजयेत् ४६
कटान्तयोस्तु कर्त्तव्यमङ्गुल्यग्रप्रकुञ्चनम्
ङणनान्ते तथैव स्यात्पान्ते त्वङ्गुलिपीडनम् ४७
ऊर्ध्वक्षेपाच्च या मात्रा अधःक्षेपापि या भवेत्
एकैकामुत्सृजेद्धीरः प्रचिते तूभयं तथा ४८
ह्रस्वानुस्वारकरणे त्वङ्गुल्याश्च प्रकुञ्चनम्
दीर्घे तु सूरयः प्राहुः देशिन्याः सुप्रसारणम् ४९
पदान्तरं न कुर्वीत संहितायां प्रयोगवित्
मांसे मांसं विजानीयात् पांसे पांसं विनिर्दिशेत् ५०
यथा नौ स्रोतसां मध्ये समं गच्छति संयुता
तैलधारेण वा वक्त्रं तद्वद्वर्णान्प्रयोजयेत् ५१

इति चतुर्थोऽध्यायः

## पञ्चमोऽध्यायः

उदात्ताच्च न कर्त्तव्यमुदात्तं स्वरितं तथा
नीचान्नीचतरन्नास्ति उच्चादुच्चं न विद्यते ५२
उच्चादुच्चतरन्नास्ति नीचान्नीचतरं कुतः
स्वरितात् स्वरितन्नास्ति कम्पिताच्चैव कम्पितम् ५३
यदुदात्तमुदात्तं तद्यत्स्वरितं तत्पदे भवति नीचम्
यन्नीचं नीचमेव तद्यत्प्रचयस्थं तदपि नीचम् ५४
स्वरितानामनह्लादमुदात्तानामताडनम्
अनुदात्तमनाधिष्ठम् शषसानामरोमशम् ५५
षड्धातुस्वरितादेशे उदात्तश्च चतुर्विधः
द्विविधश्चानुदात्तश्च ह्येतच्छास्त्रेण चोदितम् ५६
स्वरितप्रभवं प्रचितात्स्वरितमेव उदात्तं वा
अनुदात्तमेव तं विद्यादृतं च तद्विद्धि यत्प्रचितम् ५७
स्वरितात्पराणि यानि स्युरनुदात्तान्युदात्तवत्
सर्वाणि प्रचयं यान्ति ह्युपोदात्तं न विद्यते ५८
स्वरितावधृत उदात्ते परस्त्रिपूर्वो विक्रमोच्यते
स्वरितावधृत उदात्ते पादः स्यात्स हि विक्रमः ५९
ननु धारयेत् वृत्तमुपस्पर्शमुपोदात्तं निपातयेत्
एकाक्षरे धारयेन्न च धृतमुच्चारयेत् स्वरे वापि ६०
न्यासमेवादितः कुर्यान्नियतेषु बहुष्वपि
शेषमाद्यवदुक्ता तु तत्पदेषु समेषु च ६१
स्वरः उच्चः स्वरो नीचः स्वरः स्वरित उच्यते

व्यञ्जनान्यनुवर्त्तन्ते यत्रासौ तिष्ठति स्वरः ६२

इति पञ्चमोऽध्यायः

षष्ठोऽध्यायः

स्वरः उच्चः स्वरो नीचः स्वरः स्वरित एव तु
स्वरप्रधानं त्रैस्वर्य्यमाहुरक्षरचिन्तकाः ६३
द्वयोस्तु स्वरयोः सन्धावेकीभावो यदा भवेत्
उदात्तोऽथप्यनुदात्तस्य वशं गच्छति सन्धिषु ६४
दुर्बलस्य यथा राष्ट्रं हरते बलवान्नृपः
स्वरो व्यञ्जनमासाद्य हरते नात्र संशयः ६५
आख्यातानां प्रयोगेषु पूर्वस्वरमुपस्थितम्
षोडशाक्षरमर्यादं यद्योगे स्वरमुद्धरेत् ६६
नीचं तु स्वरपूर्वं  तु नीचावग्रहमेव च
हन्तव्यं तद्विजानीयादुच्चावग्रहवर्जितम् ६७
नाभिहन्यान्न निर्हन्यान्न प्रगायेन्न कम्पयेत्
एतौ द्वौ युगपत्साध्यावेतच्छास्त्रेण चोदितम् ६८
अष्टौ स्थानानि वर्णानामुरः कण्ठः शिरस्तथा
जिह्वामूलं च दन्ताश्च नासिकोष्ठौ च तालु च ६९
वर्णानां तु प्रयोगेषु करणं स्याच्चतुर्विधम्
संवृतं विवृतं चैव स्पृष्टमस्पृष्टमेव च ७०
स्पर्शानां करणं स्पृष्टमन्तस्थानामतोऽन्यथा
यमानां संवृतं प्राहुर्विवृतं च स्वरोष्मणाम् ७१

इति षष्ठोऽध्यायः

सप्तमोऽध्यायः

सप्त स्वरान् प्रवक्ष्यामि तेषां चैव बलाबलम्
लक्षणानि च सर्वेषां युक्तास्तानि निबोध मे ७२
अभिनिहितः प्राश्लिष्टो जात्यः क्षैप्रश्च पादवृत्तश्च
तैरोव्यञ्जनः षष्ठस्तिरोविरामश्च सप्तमः ७२
ए ओ अभ्यामुदात्ताभ्यामकारो रेफितश्च यः
अकारं यत्र लुम्पन्ति तमभिनिहितं विदुः ७४
इकारं यत्र पश्येयुरिकारेणैव संयुतम्
उदात्तोऽप्यनुदात्तस्य प्राश्लिष्टोऽभीन्धतामपि ७५
सयकारं समं वाप्यक्षरं स्वरितं भवेत्
न चोदात्तं पुरस्तात्स्याज्जात्यः स्वर्दूत्य एव तु ७६
इउवर्णौ यदोदात्तावापद्येते यवौ क्वचित्
अनुदात्तप्रत्यये स्याद्विद्धि क्षैप्रस्य लक्षणम् ७७
स्वरिते स्वरितं यत्र विवृत्या यत्र संहिताः
तं पादवृत्तं जानीयात्ते त्वस्मिन्यवमादधुः ७८
उदात्तपूर्वे सार्द्धे तु द्वितीये अक्षरे तु यः
तैरोव्यञ्जन इत्येष सारः स्याद्दधिमध्विति ७९
अवग्रहात्परं यत्र स्वरितं स्यादनन्तरम्
तिरोविरामं जानीयात्प्रजापतेर्निदर्शनम् ८०
द्वयोरुदात्तयोर्मध्ये नीचो यस्स्यादवग्रहः
तथाभाव्यो भवेत्कम्पस्तनूनपान्निदर्शनम् ८१

इति सप्तमोऽध्यायः

# अष्टमोऽध्यायः

तथाभाव्यस्तु तालव्यो न कम्पः स्वरसंज्ञकः
स तालव्यो भवेत्कम्प एजातीति निदर्शनम् ८२
सर्वतीक्ष्णोऽभिनिहितस्ततः प्राश्लिष्ट उच्यते
ततो मृदुतरौ स्वारौ जात्यः क्षैप्रश्च तावुभौ ८३
ततो मृदुतरः स्वारस्तैरोव्यञ्जन उच्यते
पादवृत्तो मृदुतर इति स्वारबलाबलम् ८४
उपन्यासस्तु कर्त्तव्यः कण्ठे निक्षेपसञ्ज्ञकः
उपन्यासात्परं हन्याद् भूमौ शङ्कुपदं यथा ८५
प्राश्लिष्टजात्यक्षैप्राणान् यश्चाभिनिहितश्च यः
उदात्तोपस्थिते तेषामेकदेशं प्रकल्पयेत् ८६
हलन्तादुत्तरो यस्तु पदादवग्रहेषु च
मिश्रस्तस्माद्य इत्येषो योऽन्यः स य इति स्मृतः ८७
पादादौ च पदादौ च संयोगावग्रहेषु च
यः शब्द इति विज्ञेयो योऽन्यः स य इति स्मृतः ८८
पुनरन्तश्च सवितश्च प्रातर्या रेफिता च संहिता यत्र
रेफवन्ति पदान्यत्र रेफे तद्रेफितं पदम् ८९
अन्तः शब्दस्तु यः कश्चिदाद्युदात्तो भवेद्यदि
न तत्र रेफमिच्छन्ति संहितायां पदेषु च ९०
अनुस्वारं हि दोषास्तु हकारादिषु वर्जितः
अंहोमुचो वातरंहा दृँहश्चेति निदर्शनम् ९१
अनुस्वारश्च कर्त्तव्या ह्रस्वदीर्घप्लुतास्त्रयः

अयँ राजा यशोमाँसं क्षत्रियाणां धनूँषि च ९२

इत्यष्टमोऽध्यायः

नवमोऽध्यायः

विवृत्तयस्तु विज्ञेयाश्चतस्रस्त्वनुपूर्वशः
नामभिस्तु पृथग्ज्ञेयास्तासां वक्ष्यामि लक्षणम् ९३
पिपीलिका पाकवती तथा वत्सानुसारिणी
अनुसृतवत्सा चैव चतस्रो हि विवृत्तयः ९४
वत्सानुसृता ह्रस्वा जघने वत्सानुसारिणी चाग्रे
पाकवती चोभयतः पिपीलिकमध्याप्युभयदीर्घा ९५
पूर्वं ह्रस्वं परं दीर्घमक्षरं यत्र दृश्यते
सा वत्सानुसृता ज्ञेया व्यत्यासेत्यनुसारिणी ९६
उभाभ्यामेव ह्रस्वाभ्यां यवमध्यां विनिर्द्दिशेत्
ताभ्यामेव तु दीर्घाभ्यां विज्ञेया सा पिपीलिका ९६
अभ्रमध्ये यथा विद्युद्दृश्यते मणिसूत्रवत्
एषच्छेदो विवृत्तीनां यथा बालेषु कर्त्तरि ९७
आपद्यते मकारो यरवोष्मसु प्रत्ययेष्वनुस्वारम्
न भवति लकारे परसवर्णं स्पर्शेषु चोत्तमापत्तिः ९८
उष्मस्थौ यत्र दृश्येते स्वरवर्णौ स्वरोदयौ
ऋ लृ वर्णौ तथा ज्ञेयौ स्वरभक्तीति संस्थितौ ९९
तां ह्रस्वां प्रतिजानीयाद्यथा मात्रा भवेद्यदि
सम्यगेनां विजानीयाद् द्वौ दोषौ परिवर्जयेत् १००
सम्यगेनां यदा पश्येच्छतबलिशेति निदर्शनम्

अकारं चाप्युकारं च विच्छिन्नं विवृतं तथा १०१
करिणी कुर्विणी चैव हरिणी हारितेति च
तथा हंसपदा नाम पञ्च ताः स्वरभक्तयः १०२
करिणीं रहयोर्विद्यात्कुर्विणीं लहकारयोः
हरिणीं रषयोर्वद्याद्धारितां लशकारयोः १०३
या तु हंसपदा नाम सा तु रेफसकारयोः
या तु रेफशकारौ स्यात् काकिनीं तां विनिर्दिशेत् १०४

इति नवमोऽध्यायः

दशमोऽध्यायः

ऋकारप्रत्ययो रेफः संयुक्तः शषसैः सह
आद्यस्तत्र क्रमो ज्ञेयो न परो बोधितो बुधैः १०५
रेफोष्मणां संयोगे स्वरभक्तिरक्रमश्चैव
तत्रोदाहरणानि प्रदर्शनं वर्षबर्हिश्च १०६
रेफं स्वरोदये विद्यादृकारं व्यञ्जनोदये
स्वरव्यञ्जनयोर्मध्ये रेफमेव विनिर्दिशेत् १०७
ओभावश्च विवृत्तिश्च शषसा रेफ एव व
जिह्वामूलमुपध्मा च गतिरष्टविधोष्मणः १०८
यद्योभाव प्रसंधानमुकारादि परं पदम्
स्वरान्तं तादृशं विद्याद्यदन्यद्व्यक्तमूष्मणः १०९
षत्वणत्वमुपाचारो दीर्घीभावस्तथैव च
यस्मिन् पदे निष्पद्यन्ते तत्समासाद्य लक्षणम् ११०
नकारान्ते पदे पूर्वे स्वरे च परसंस्थिते

रक्तं वर्णं विजानीयान्न ग्रसेत्पूर्वमक्षरम् १११
रक्तं वर्णं यदा पश्येद्विवृत्या सह संस्थितम्
व्यञ्जनान्तं विजानीयाद्गोमाँ इति निदर्शनम् ११२
यथा सौराष्ट्रिका नारी अराँ इत्यभिभाषते
एवं रङ्गाः प्रयोक्तव्या ङकारपरिवर्जिताः ११३
नासादुत्पद्यते रङ्गः कांसेन समनिस्वनः
मृदुश्चैव द्विमात्रं स्याद्वृष्टिमाँ इति निदर्शनम् ११४
संयुक्तस्य तु यत्पूर्वं तद्ध्रस्वं लघु विजानीयात्
तत्संयोगोत्तरं विद्यात् गुर्वन्यत्र नियोगतः ११५

इति दशमोऽध्यायः

एकादशोऽध्यायः

मात्रैकं लघु विज्ञेयं तत्संयोगपरं गुरुम्
स परं व्यञ्जनान्तं च दीर्घस्तु प्लुत एव च ११६
स्पर्शानामुत्तमैः स्पर्शैः संयोगश्चेदनुक्रमात्
आनुपूर्व्या यमांस्तत्र जानीयाच्चतुरस्तथा ११७
रुक्मेति प्रथमं विद्याच्चख्नथुरित्यपरं विदुः
तृतीयं पद्ममित्याहुः शङ्ध्नमिति चोत्तमम् ११८
वर्गान्ता श ष स प्रथमाः संयुक्ता यदा स्युरभिधेयाः
लघुशास्त्रदोषतत्त्वज्ञैर्यमदोषास्तथा हि परिहार्याः ११८अ
वर्गान्ता यत्र दृश्यन्ते शषसैः सह संयुताः
यमास्तत्र निवर्त्तन्ते श्मशानादिव बान्धवाः ११९
संयोगस्य परं स्वार्यं परं संयोगनायकम्

संयुक्तस्य तु वर्णस्य न स्वरं पूर्वमिष्यते १२०
स्वरणं पतनं चैव वोत्थानेषु समेषु च
एकमेव पदे दृष्टं न पूर्वाङ्गं क्वचिद्भवेत् १२१
दारुसंघातवच्छ्लिष्टं संयोगवशवर्त्तिनाम्
वर्णानां युगसम्पन्नमेकं वर्णमिवोत्सृजेत् १२२ (१०६?)
वर्णा विंशतिरेकश्च येषां द्विर्भाव इष्यते
प्रथमा मध्यमा चान्त्या यलवाः शषसास्तथा १२३
न रेफे वा हकारे वा द्विर्भावो ज्ञायते क्वचित्
न च वर्गद्वितीयेषु न चतुर्थे कदा चन १२४
चतुर्थं तु तृतीयेन द्वितीयं प्रथमेन न तु
आद्यमन्त्यं तृतीयं च स्वाक्षरेणैव पीडयेत् १२५

इत्येकादशोऽध्यायः

द्वादशोऽध्यायः

दृप्सोऽप्सरायामप्शब्दे विश्वप्स्न्या च विरप्शिने
काश्यपोऽभिनिधानानामागमं प्रतिषेधते १२६
यत्र चोभयतः स्पर्शाः संयुक्ताः शषसैः सह
आद्यस्तत्र क्रमो ज्ञेयो न परो बोधितो बुधैः १२७
ऋवर्णो रेफसंयुक्तं स्वरितं स्यादनन्तरम्
ऋकाररेफसंयुक्तं यत्पूर्वं व्यञ्जनोदये १२८
ऋकारे लघु तद्विद्याद्रेफे तद्गुरुसञ्ज्ञकम्
न क्रमते स्वरयमयोर्न च वर्गसवर्णयोर्न च विरामे
न च रेफानुस्वारे विसर्जनीये तु सर्वत्र १३०

ब्रुवन् भ्रुवौकर्णललाटनासिका
न कम्पयेदोष्ठचलुर्न निर्भुजेत्
मुखं न विक्लिश्य न नम्रवक्त्रजो
न चापि सन्दृष्टहनुर्न बाह्यवाक् १३१
न रुक्षवाक्स्यान्न च उत्स्वरं वदेन्
न चानिमेषो न च गर्वमाचरेत्
गजव्यवेषी बलवानतन्द्रितो
व्यपेत रोषश्रमशोकहर्षभीः १३२
न चानुकूजेत्पदमादितो बुवन्
न नासिका नित्यमनुष्ठितं वदेत्
न चापदान्ते श्रमपीडितः श्वसेन्
न चोच्छ्वसेदुक्तपदोऽप्यभीक्ष्णशः १३३
नातिनिष्पीडयेद्वर्णान्न चाव्यक्तानुदाहरेत्
समान् श्लक्ष्णानसन्दिग्धान्वर्णानुच्चारयेद् बुधः १३४
प्रथमानूष्मसम्पन्नान् द्वितीयानिव दर्शयेत्
तथैतान्प्रतिजानीयाद्यथा मत्स्यान् क्षुरोऽप्सरान् १३५
तथैव पञ्चमानाहुरागमो यत्र दृश्यते
द्वितीयानेव तान्कुर्याद्यस्मिन्सीतेति निदर्शनम् १३६

इति द्वादशोऽध्यायः

त्रयोदशोऽध्यायः

अक्ष्णोर्निमेषमात्रेण यो वर्णः समुदीर्यते
स एकमात्रो द्विस्तावान्दीर्घस्त्रि प्लुत उच्यते १३७

अवग्रहेऽर्द्धमात्रं स्मात् कालो मात्रा पदान्तरे
अर्द्धर्चे द्वे तथा पादे त्रिमात्रं स्यादृगन्तरम् १३८
चाषस्तु वदते मात्रं द्विमात्रं वायसोऽब्रवीत्
शिखी त्रिमात्रं विज्ञेय एष मात्रापरिग्रिहः १३९
क्वचित्पादविभागेन क्वचिदर्द्धे क्वचित्पदे
क्वचिदर्थे क्वचिच्छब्दे विरामः पञ्चधा स्मृतः १४०
छन्दस्येते प्रयुज्यन्ते क्रमेण क्षेपसञ्ज्ञकाः
स विरामं प्रयोक्तव्या येन वृत्तिर्न विद्यते १४१
सञ्ज्ञाने भूयसो दोषान्प्रवक्ष्यामि निबोधत
स्वरस्य सन्दर्शनमनुस्वारयमावपि १४२
विच्छिन्नत्वं विक्षणत्त्वं सुशीमं सोमसत्सरु
ईकारेणावगृह्णीयात् प्रतिशुक्लेति पञ्चमम् १४३
विश्वानामूष्मसन्देहे अर्द्धर्चे स्यान्नपुंसकम्
पुरस्तादुपरिष्टाद्वा सर्वे विश्वा निरूष्मकाः १४४
नकारान्ते पदे पूर्वे स्वरे च परसंस्थिते
ह्रस्वोदात्तः प्रयोक्तव्यः शषसैः प्रत्ययेषु च १४५

इति त्रयोदशोऽध्यायः

चतुर्दशोऽध्यायः

द्वौ तकारौ थकारौ च यमो नेति च पञ्चमः
कृत्स्ना इति च संयोगमाहुरक्षरचिन्तकाः १४६
ककारान्ते पदे पूर्वे ङकारे प्रत्यये परे
ङकारस्यागमं कुर्याद्वाङ्क्म इति निदर्शनम् १४७

टकारान्ते पदे पूर्वे णकारे प्रत्यये परे
णकारस्यागमं कुर्याद्वण्महाँ इति निदर्शनम् १४८
तकारान्ते पदे पूर्वे नकारे प्रत्यये परे
नकारस्यागमं कुर्याद् यन्न इति निदर्शनम् १४९
पकारान्ते पदे पूर्वे मकारे प्रत्यये परे
मकारस्यागमं कुर्यात्त्रिष्टुम्म इति निदर्शनम् १५०
अन्त्यं कटतपं दृष्ट्वा परं ङणनमं तथा
आत्मपञ्चमसंयोगमाहुरक्षरचिन्तकाः १५१
आम्नायात् प्रपदो भवति प्रपदो भवति निर्भयः
निर्भयो मधुरो भवति माधुर्यात्सिद्धिमाप्नुयात् १५२
आम्नायकरणं श्रेष्ठं वर्णानां चावधारणम्
अप्रमत्तश्च स्वार्येत एतदाचार्यशासनम् १५३
आम्नायशास्त्रसम्पन्नं शास्त्रमाम्नायसारवित्
पयः शङ्खे यथा तद्विच्छिरः छन्दसि सारिथः १५४
दन्त्योष्ठ्यकरणं सूक्ष्मं माधुर्यं तरुणं वचः
स्वभावं शिक्षकस्याहुरन्यद्गुरुकृतं भवेत् १५५

इति चतुर्दशोऽध्यायः

पञ्चदशोऽध्यायः

तरुणं शिक्षकं प्राहुर्वृद्धमक्षरचिन्तकम्
नैयायिकं परिश्रुतं बहुधा यन्ति याचकम् १५६
न करालो न लम्बोष्ठो न च सर्वानुनासिकः
गद्गदो बद्धजिह्वश्च प्रयोगान्वक्तुमर्हति १५७

प्रकृतिर्यस्य कल्याणी दन्तोष्ठौ यस्य शोभनौ
अधीतं येन तत्त्वेन स शिक्षां पारयिष्यति १५८
आगमैरधिकाः केचिद्विज्ञानैरपरेऽधिकाः
प्रयोगसौष्ठवादन्ये नाहमस्मीति विस्मयः १५९
सुतीर्थादागतं जग्धं स्वाम्नातं सुव्यवस्थितम्
सुस्वरेण सुवक्त्रेण प्रयुक्तं ब्रह्म राजते १६०
कुतीर्थादागतं दग्धमपवर्णैश्च भक्षितम्
न तस्य परिमोक्षोऽस्ति पापाहेरिव किल्विषात् १६१
येषां तीर्थागता विद्या नित्यमभ्यासनिर्जिता
ते भवन्ति दुराधर्षाः ससिंहा इव पर्वताः १६२
न भोजनविलम्बी स्यान्न च स्यात् स्त्रीनिबन्धनः
स दूरमपि विद्यार्थी व्रजेद् गरुडहंसवत् १६३
हयानामिव जात्यानामहोरात्रार्द्धशायिनाम्
न विशेषार्थिनां निद्रा चिरं नेत्रेषु तिष्ठति १६४
अहेरिव जनाद्भीतः स्त्रीभ्यश्च नरकादिव
मिष्टाच्च विषवद्भीतः स विद्यां पारयिष्यति १६५

इति पञ्चदशोऽध्यायः

षोडशोऽध्यायः

सहस्रगुणिता विद्या शतशः परिवर्त्तिता
आगमिष्यति जिह्वाग्रे स्थलान्निम्नमिवोदकम् १६६
शतेन गुणिता भवति सहस्रेण तु धारिता
शतानां तु सहस्रेण प्रेत्य चेह च तिष्ठति १६७

उपांशु त्वरितं चैव योऽधीतेऽत्रसन्निव
अपि रूपसहस्त्रैस्तु संशयेष्वेव वर्तते १६८
येषां च न ग्रहणशक्तिरतिप्रचण्डा
लब्ध्वाश्च ये न शतशः परिवर्त्तयन्ति
निद्रां च ये प्रियसखीमिव न त्वजन्ति
ते तादृशा गुरुकुलेषु जरां व्रजन्ति १६९
पञ्च विद्यां न गृह्णन्ति लुब्धाश्चण्डाश्च ये नराः
अलसाश्चानुरोगाश्च येषां च विकृतं मनः १७०
ऊर्द्ध्वं सहस्त्रादाम्नातं सततं चान्ववेक्षणम्
आप्तैस्तु सह सम्पाठस्त्रिविधा धारणा स्मृता १७१
यथा खनन् खनित्रेण भूतले वारि विन्दति
एवं गुरुगतां विद्यां शुश्रूषुरधिगच्छति १७२
योजनानां सहस्त्रं तु शनैर्याति पिपीलिका
अगच्छन्वैनतेयोऽपि पदमेकं न गच्छति १७३
पदेनैकेन मेधावी पदानां विन्दते शतम्
मूर्खः पदसहस्त्रेण पदमेकं न विन्दति १७४
पदं पादं तथार्द्धर्चं सेवितव्यं प्रयत्नतः
अप्राज्ञः प्राज्ञतां याति सरिद्भिः सागरो यथा १७५
अनिर्वेदी श्रियोमूलं लोहबद्धं कमण्डलुम्
अहोरात्राणि दीर्घाणि कः समुद्रं न शोषयेत् १७६
जलमभ्यासयोगेन शैलानां कुरुते क्षयम्
कर्कशानां मृदुस्पर्शं किमभ्यासो न साधयेत् १७७

आचार्याः सममिच्छन्ति पदच्छेदन्तु पण्डिताः
स्त्रियो मधुरमिच्छन्ति विक्रुष्टमितरे जनाः १७८
आचार्योपासनाद्योगात् तपसा प्राज्ञसेवनात्
विगृह्य कथनात्कामाद् षड्भिर्विद्या प्रपद्यते १७९
आलस्यान्मूर्खसंयोगाद् भयाद्रोगनिपीडनात्
अत्याशक्याच्च मानाच्च षड्भिर्विद्या विनश्यति १८०
मण्डूकेन कृतां शिक्षां विदुषां बुद्धिदीपिनीम्
यो हि तत्त्वेन जानाति ब्रह्मलोकं स गच्छति १८१
इत्यथर्वणवेदीया माण्डूकीशिक्षा समाप्ता

J. Pāṭhak and Dānapati Tivārī, *Atharvavedīyā Māṇḍūkī Śikṣā*, (Vārānasi: Chaukhambā Kṛṣṇadās Academy, 2021) 112 pp.

D. Mishra, *ŚrīMaṇḍūkaṚṣiPraṇītā Atharvavedīyā Māṇḍūkī Śikṣā, with the "Jñānadā" Sanskrit Commentary and the "Vedaprabhā" Hindi Commentary,* (Jaipur: Jagadīś Sanskrit Library, 2014) 174 pp.

Tripāthī, Śrī Rāma Prasāda, ed., *Śikṣhāsaṁgrahaḥ*, (Vārānasi: Sampurnand Sanksrit University, 1989), pp. 382-396.

# नारदीयाशिक्षा

## प्रथमः प्रपाठकः

### प्रथमा कण्डिका

अथातः स्वरशास्त्राणां सर्वेषां वेदनिश्चयम्
उच्चनीचविशेषाद्धि स्वरान्यत्वं प्रवर्तते १
आर्चिकं गाथिकं चैव सामिकं च स्वरान्तरम्
कृतान्ते स्वरशास्त्राणां प्रयोक्तव्यं विशेषतः २
एकान्तरा स्वरो ह्यृक्षु गाथासु द्व्यन्तरः स्वरः
सामसु त्र्यन्तरं विद्यादेतावत्स्वरतोऽन्तरम् ३
ऋक्सामयजुरङ्गानि ये यज्ञेषु प्रयुञ्जते
अविज्ञानाद्धि शास्त्राणां तेषां भवति विस्वरः ४
मन्त्रो हीनः स्वरतो वर्णतो वा मिथ्या प्रयुक्तो न तमर्थमाह
स वाग्वज्रो यजमानं हिनस्ति यथेन्द्रशत्रुः स्वरतोऽपराधात्
५
प्रहीणः स्वरवर्णाभ्यां यो वै मन्त्रः प्रयुज्यते
यज्ञेषु यजमानस्य रुषत्यायुः प्रजां पशून् ६
उरः कण्ठः शिरश्चैव स्थानानि त्रीणि वाङ्मये
सवनान्याहुरेतानि साम वाप्यर्थतोऽन्तरम् ७
उरः सप्तविचारं स्यात्तथा कण्ठस्तथा शिरः
न च सप्तोरसि व्यक्तास्तथा प्रावचनो विधिः ८
कठकालापवृत्तेषु तैत्तिरीयाह्वरकेषु च
ऋग्वेदे सामवेदे च वक्तव्यः प्रथमः स्वरः ९
ऋग्वेदस्तु द्वितीयेन तृतीयेन च वर्तते

उच्चमध्यमसंघातः स्वरो भवति पार्थिवः १०
तृतीयप्रथमक्रुष्टान् कुर्वन्त्याह्वरकाः स्वरान्
द्वितीयाद्यांस्तु मन्द्रान्तांस्तैत्तिरीयाश्चतुरः स्वरान् ११
प्रथमश्च द्वितीयश्च तृतीयश्च चतुर्थकः
मन्द्रः क्रुष्टो ह्यतिस्वार एतान्कुर्वन्ति सामगाः १२
द्वितीयप्रथमावेतौ तांडिभाल्लविनां स्वरौ
तथाशातपथावेतौ स्वरौ वाजसनेयिनाम् १३
एतेविशेषतः प्रोक्ताः स्वरा वै सार्ववैदिकाः
इत्येतच्चरितं सर्वं स्वराणां सार्ववैदिकम् १४
इति प्रथमा कण्डिका

## कण्डिका २

सामवेदे तु वक्ष्यामि स्वराणां चरितं यथा
अल्पग्रन्थं प्रभूतार्थं श्रव्यं वेदाङ्गमुत्तमम् १
तानरागस्वरग्राममूर्छनानां तु लक्षणम्
पवित्रं पावनं पुण्यं नारदेन प्रकीर्तितम् २
शिक्षामाहुर्द्विजातीनामृग्यजुःसामलक्षणम्
नारदीयमशेषेण निरुक्तमनुपूर्वशः ३
सप्तस्वरास्त्रयो ग्रामा मूर्छनास्त्वेकविंशतिः
ताना एकोनपञ्चाशदित्येतत्स्वरमण्डलम् ४
षड्जश्च ऋषभश्चैव गान्धारो मध्यमस्तथा
पञ्चमो धैवतश्चैव निषादः सप्तमः स्वरः ५

षड्जमध्यमगान्धारास्त्रयो ग्रामाः प्रकीर्तिताः
भूर्लोकाज्जायते षड्जो भुवर्लोकाच्च मध्यमः ६
स्वर्गान्नान्यत्र गान्धारो नारदस्य मतं यथा
स्वररागविशेषेण ग्रामरागा इति स्मृताः ७
विंशतिर्मध्यमग्रामे षड्जग्रामे चतुर्दश
तानान् पञ्चदशेच्छन्ति गान्धारग्राममाश्रितान् ८
नन्दी विशाला सुमुखी चित्रा चित्रवती मुखा
बला या चाथ विज्ञेया देवानां सप्त मूर्छनाः ९
आप्यायनी विश्वभृता चन्द्रा हेमा कपर्दिनी
मैत्री वार्हती चैव पितृणां सप्त मूर्छनाः १०
षड्जे तूत्तरमन्द्रा स्यादृषभे चाभिरुद्गता
अश्वक्रान्ता तु गान्धारे तृतीया मूर्च्छना स्मृता ११
मध्यमे खलु सौवीरा हृष्यका पञ्चमे स्वरे
धैवते चापि विज्ञेया मूर्च्छना तूत्तरायता १२
निषादाद्रजनी विद्यादृषीणां सप्त मूर्च्छनाः
उपजीवन्ति गन्धर्वा देवानां सप्तमूर्च्छनाः १३
पितृणां मूर्छनाः सप्त तथा यक्षा न संशयः
ऋषीणां मूर्च्छनाः सप्त यास्त्विमा लौकिकाः स्मृताः १४
षड्जः प्रीणाति वै देवानृषीन् प्रीणाति चर्षभः
पितृन्प्रीणाति गान्धारो गन्धर्वान्मध्यमः स्वरः १५
देवान पितृन्नृषींश्चैव स्वरः प्रीणाति पञ्चमः
यक्षान् निषादः प्रीणाति भूतग्रामं च धैवतः १६

## इति प्रथमे द्वितीया कण्डिका

## कण्डिका ३

गानस्य तु दशविधा गुणवृत्तिस्तद्यथा
रक्तं पूर्णमलङ्कृतं प्रसन्नं व्यक्तं विक्रुष्टं श्लक्ष्णं समं सुकुमारं मधुरमिति गुणाः १
तत्र रक्तं नाम वेणुवीणास्वराणामेकीभावे रक्तमित्युच्यते २
पूर्णं नाम स्वरश्रुतिपूर्णाच्छन्दः पादाक्षर संयोगात्पूर्णमित्युच्यते ३
अलङ्कृतं नामोरसि शिरसि कण्ठयुक्तमित्यलङ्कृतम् ४
प्रसन्नं नामापगतगद्गदनिर्विशङ्कं प्रसन्नमित्युच्यते ५
व्यक्तं नाम पदपदार्थप्रकृतिविकारागमलोपकृत्तद्धितसमास धातुनिपातोपसर्गस्वरलिङ्गवृत्तिवार्त्तिकविभक्त्यर्थवचनानां सम्यगुपपादने व्यक्तमित्युच्यते ६
विक्रुष्टं नामोच्चैरुच्चारितं व्यक्तपदाक्षरमिति विक्रुष्टम् ७
श्लक्ष्णं नामाद्रुतमविलम्बितमुच्चनीचप्लुतसमाहारं हेलतालोपनयानादिभिरुपपादनादिभिः श्लक्ष्णमित्युच्यते ८
समं नामावापनिर्वापप्रदेशे प्रत्यन्तरस्थानानां समासः सममित्युच्यते ९
असुकुमारं नाम मृदुपदवर्णस्वरकुहरणयुक्तं सुकुमारमित्युच्यते १०
मधुरं नाम स्वभावोपनीतललितपदाक्षर गुणसमृद्धं

मधुरमित्युच्यते ११
शङ्कितं भीतमुद्धुष्टमव्यक्तमनुनासिकम्
काकस्वरं शिरसिगतं तथास्थान विवर्जितम् १२
विस्वरं विरसं चैव विश्लिष्टं विषमाहतम्
व्याकुलं तालुहीनं च गीतिदोषाश्चतुर्दश १३
आचार्याः सममिच्छन्ति पदच्छेदन्तु पण्डिताः
स्त्रियो मधुरमिच्छन्ति विक्रुष्टमितरे जनाः १४
इति तृतीया कण्डिका

कण्डिका ४

पद्मपत्रप्रभः षड्जऋषभः शुकपिञ्जरः
कनकाभस्तु गान्धारो मध्यमः कुन्दसप्रभः १
पञ्चमस्तु भवेत्कृष्णः पीतकं धैवतं विदुः
निषादः सर्ववर्णः स्यादित्येताः स्वरवर्णताः २
पञ्चमो मध्यमः षड्ज इत्येते ब्राह्मणाः स्मृताः
ऋषभो धैवतश्चापि इत्येतौ क्षत्रियावुभौ ३
गान्धारश्च निषादश्च वैश्यावर्धेन वै स्मृतौ
शूद्रत्वं विद्धि चार्धेन पतितत्वान्न संशयः ४
ऋषभोत्थितः षड्जहतो धैवतसहितश्च पञ्चमो यत्र
निपतति मध्यमरागे तन्निषादं षाडवं विद्यात् ५
यदि पञ्चमो विरमते गान्धारश्चान्तरस्वरो भवति
ऋषभो निषादसहितस्तं पञ्चममीदृशं विद्यात् ६

गान्धारस्याधिपत्येन निषादस्य गतागतैः
धैवतस्य च दौर्वल्यान् मध्यमग्राममुच्यते ७
ईषत्स्पृष्टो निषादस्तु गान्धारश्चाधिको भवेत्
धैवतः कम्पितो यत्र षड्जग्रामं तु निर्द्दिशेत् ८
अन्तरस्वरसंयुक्ता काकलिर्यत्र दृश्यते
तं तु साधारितं विद्यात्पञ्चमस्थं तु कैशिकम् ९
कैशिकं भावयित्वा तु स्वरैः सर्वैः समन्ततः
यस्मात्तु मध्यमे न्यासस्तस्मात्कैशिकमध्यमः १०
काकलिर्दृश्यते यत्र प्राधान्यं पञ्चमस्य तु
कश्यपः कैशिकं प्राह मध्यमग्रामसम्भवम् ११
गेति गेयं विदुः प्राज्ञा धेतिकारुप्रवादनम्
वेति वाद्यस्य विज्ञेयं गान्धर्वस्य विरोचनम् १२

इति चतुर्थी कण्डिका

## कण्डिका ५

यः सामगानां प्रथमः स वेणोर्मध्यमः स्वरः
यो द्वितीयः स गान्धारस्तृतीयस्त्वृषभः स्मृतः १
चतुर्थः षड्ज इत्याहुः पञ्चमो धैवतो भवेत्
षष्ठो निषादो विज्ञेयः सप्तमः पञ्चमः स्मृतः २
षड्जं वदति मयूरो गावो रम्भन्ति चर्षभम्
अजाविके तु गान्धारं क्रौञ्चो वदति मध्यमम् ३
पुष्पसाधारणे काले कोकिला वक्ति पञ्चमम्

अश्वस्तु धैवतं वक्ति निषादं वक्ति कुञ्जरः ४
कण्ठादुत्तिष्ठते षड्जः शिरसस्त्वृषभः स्मृतः
गान्धारस्त्वानुनासिक्य उरसो मध्यमः स्वरः ५
उरसः शिरसः कण्ठादुत्थितः पञ्चमः स्वरः
ललाटाद्धैवतं विद्यान्निषादं सर्वसन्धिजम् ६
नासां कण्ठमुरस्तालुजिह्वादन्तांश्च संश्रितः
षड्भिः सञ्जायते यस्मात्तस्मात् षड्ज इति स्मृतः ७
वायुः समुत्थितो नाभेः कण्ठशीर्षसमाहतः
नर्दत्यृषभवद्यस्मात्तस्मादृषभ उच्यते ८
वायुः समुत्थितो नाभेः कण्ठशीर्षसमाहतः
नासागन्धावहः पुण्यो गान्धारस्तेन हेतुना ९
वायुः समुत्थितो नाभेरुरो हृदि समाहतः
नाभिं प्राप्तो महानादो मध्यमत्वं समश्नुते १०
वायुः समुत्थितो नाभेरुरो हृत्कण्ठशिरो हतः
पञ्चस्थानोत्थितस्यास्य पञ्चमत्वं विधीयते ११
धैवतं च निषादं च वर्जयित्वा स्वरद्वयम्
शेषान्पञ्चस्वरांस्त्वन्यान्पञ्चस्थानोत्थितान्विदुः १२
पञ्चस्थानस्थितत्वेन सर्वस्थानानि धार्यति
अग्निगीतः स्वरः षड्ज ऋषभो ब्रह्मणोच्यते
सोमेन गीतो गान्धारो विष्णुना मध्यमः स्वरः १३
पञ्चमस्तु स्वरो गीतो नारदेन महात्मना
धैवतश्च निषादश्च गीतौ तुम्बुरुणा स्वरौ १४

आद्यस्य दैवतं ब्रह्मा षड्जस्याप्युच्यते बुधैः
तीक्ष्णदीप्तिप्रकाशत्वाद् ऋषभस्य हुताशनः १५
गावः प्रगीते तुष्यन्ति गान्धारस्तेन हेतुना
श्रुत्वा चैवोपतिष्ठन्ति सौरभेया न संशयः १६
सोमस्तु पञ्चमस्यापि दैवतं ब्रह्मराट्स्मृतम्
निर्ह्रासो यस्य वृद्धिश्च ग्राममासाद्य सोमवत् १७
अतिसन्धीयते यस्मादेतान् पूर्वोत्थितान् स्वरान्
तस्मादस्य स्वरस्यापि धैवतत्वं विधीयते १८
निषीदन्ति स्वरा यस्मान्निषादस्तेन हेतुना
सर्वां श्चाभिभवत्येष यदादित्योऽस्य दैवतम् १९
इति पञ्चमी कण्डिका

## कण्डिका ६

दारवी गात्रवीणा च द्वे वीणे गानजातिषु
सामिकी गात्रवीणा तु तस्याः शृणुत लक्षणम् १
गात्रवीणा तु सा प्रोक्ता यस्यां गायन्ति सामगाः
स्वरव्यञ्जनसंयुक्ता अङ्गुल्यङ्गुष्ठरञ्जिता २
हस्तौ सुसंयुतै धार्यौ जानुभ्यामुपरिस्थितौ
गुरोरनुकृतिं कुर्याद्यथा ज्ञानमतिर्भवेत् ३
प्रणवं प्राक् प्रयुञ्जीत व्याहृतीस्तदनन्तरम्
सावित्रीं चानुवचनं ततो वृत्तान्तमारभेत् ४
प्रसार्य चाङ्गुलीः सर्वा रोपयेत्स्वरमण्डलम्

न चाङ्गुलिभिरङ्गुष्ठमङ्गुष्ठेनाङ्गुलीः स्पृशेत् ५
विरला नाङ्गुलीः कुर्यान्मूले चैनां न संस्पृशेत्
अङ्गुष्ठाग्रेण ता नित्यं मध्यमे पर्वणि स्पृशेत् ६
मात्रद्विमात्रवृद्धानां विभागार्थं विभागवित्
अङ्गुलीभिर्द्विमात्रं तु पाणेः सव्यस्य दर्शयेत् ७
त्रिरेखा यत्र दृश्येत सन्धिं तत्र विनिर्दिशेत्
स पर्व इति विज्ञेयः शेषमन्तरमन्तरम् ८
यवान्तरं तु सामस्त्वृक्षु कुर्यात्तिलान्तरम्
स्वरान्मध्यमपर्वसु सुनिविष्टान्निवेशयेत् ९
न चात्र कम्पयेत्किञ्चिदङ्गस्यावयवं बुधः
अधस्तनं मृदुन्यस्य हस्तमास्ते यथाक्रमम् १०
अभ्रमध्ये यथा विद्युद्दृश्यते मणिसूत्रवत्
एष च्छेदो विवृत्तीनां यथा बालेषु कर्तरि ११
कूर्मोऽङ्गानीव संहृत्य चेष्टां दृष्टिं दिशन्मनः
स्वस्थः प्रशान्तो निर्भीतो वर्णानुच्चारयेद्बुधः १२
नासिकायास्तु पूर्वेण हस्तं गोकर्णवद्धरेत्
निवेश्य दृष्टिं हस्ताग्रे शास्त्रार्थमनुचिन्तयेत् १३
सममुच्चारयेद्वाक्यं हस्तेन च मुखेन च
यथैवोच्चारयेद्वर्णा स्तथैवैनान् समापयेत् १४
नात्याहन्यान्न निर्हण्यान्न प्रगायेन्न कम्पयेत्
समं सामानि गायेत व्योम्नि श्येनगतिर्यथा १५
यथाप्सु चरतां मार्गो मीनानां नोपलभ्यते

आकाशे वा विहङ्गानां तद्वत्स्वरगता श्रुतिः १६
यथा दधनि सर्पिः स्यात्काष्ठस्थो वा यथानलः
प्रयत्नेनोपलभ्येत तद्वत्स्वरगता श्रुतिः १७
स्वरात्स्वरं संक्रमस्तु स्वरसन्धिमनुल्बणम्
अविच्छिन्नं समं कुर्यात्सूक्ष्मं छायातपोपमम् १८
अनागतमतिक्रान्तं विच्छिन्नं विषमाहतम्
तन्वन्तमस्थितान्तं च वर्जयेत्कर्षणं बुधः १९
स्वरः स्थानाच्च्युतो यस्तु स्वं स्थानमतिवर्तते
विस्वरं सामगा कुर्युविरक्तमिति वीणिनः २०
आभ्यासार्थे द्रुतां वृत्तिं प्रयोगार्थे तु मध्यमाम्
शिष्याणामुपदेशार्थे कुर्याद्वृत्तिं विलम्बिताम् २१
गृहीतग्रन्थ एवं तु ग्रन्थोच्चारणशिक्षकान्
हस्तेनाध्यापयेच्छिष्यान् शैक्षेण विधिना द्विजः २२

इति षष्ठी कण्डिका

## कण्डिका ७

क्रुष्टस्य मूर्द्धनि स्थानं ललाटे प्रथमस्य तु
भ्रुवोर्मध्ये द्वितीयस्य तृतीयस्य च कर्णयोः १
कण्ठस्थानं चतुर्थस्य मन्द्रस्योरसि तूच्यते
अतिस्वारस्य नीचस्य हृदि स्थानं विधीयते २
अङ्गुष्ठस्योत्तमे क्रुष्टोऽङ्गुष्ठे तु प्रथमः स्वरः
प्रादेशिन्यां तु गान्धार ऋषभस्तदनन्तरम् ३

अनामिकायां षड्जस्तु कनिष्ठायां च धैवतः
तस्याधस्ताच्च योन्यास्तु निषादं तत्र विन्यसेत् ४
अपर्वत्वादसञ्ज्ञत्वादव्ययत्वाच्च नित्यशः
मन्द्रो हि नहि भूतस्तु परिस्वार इति स्मृतः ५
क्रुष्टेन देवा जीवन्ति प्रथमेन तु मानुषाः
पशवस्तु द्वितीयेन गन्धर्वाप्सरसस्त्वनु ६
आण्डजाः पितरश्चैव चतुर्थस्वरजीविनः
मन्द्रं चैवोपजीवन्ति पिशाचासुरराक्षसाः ७
अतिस्वारेण नीचेन गत्स्थावरजङ्गमम्
सर्वाणि खलु भूतानि धार्यन्ते सामिकैः स्वरैः ८
दीप्तायतता करुणानां मृदुमध्यमयोस्तथा
श्रुतीनां योऽविशेषज्ञो न स आचार्य उच्यते ९
दीप्ता मन्द्रे द्वितीये च प्र चतुर्थे तथैव तु
अतिस्वारे तृतीये च क्रुष्टे तु करुणा श्रुतिः १०
श्रुतयोऽन्या द्वितीयस्य मृदुमध्यायताः स्मृताः
तासामपि तु वक्ष्यामि लक्षणानि पृथक् पृथक् ११
आयतात्वं भवेन्नीचे मृदुत्वं तु विपर्यये
स्वे स्वरे मध्यमत्वं तु तत्समीक्ष्य प्रयोजयेत् १२
द्वितीये विरताया तु क्रुष्टश्च परतो भवेत्
दीप्तां तां तु विजानीयात्प्रथमेन मृदुः स्मृता १३
अत्रैव विरता या तु चतुर्थेन प्रवर्तते
तथा मन्द्रे भवेद्दीप्ता साम्नश्चैव समापने १४

नाविरते श्रुतिं कुर्यात्स्वरयोर्नापि चान्तरे
न च ह्रस्वे च दीर्घे च न चापि घुटसञ्ज्ञिके १५
द्विविधा गतिः पदान्तः स्थितसन्धिः सहोष्मभिः
पञ्चस्वेतेषु स्थानेषु विज्ञेयं घुटसञ्ज्ञतम् १६
स्वरान्तरा विरतानि ह्रस्वदीर्घघुटानि च
श्रुतिस्थानेष्वशेषाणि श्रुतिवत् स्वरतो भवेत् १७
दीप्तामुदात्ते जानीयाद्दीप्तां च स्वरिते विदुः
अनुदात्ते मृदुर्ज्ञेया गन्धर्वा श्रुतिसम्पदः १८
उदात्तश्चानुदात्तश्च स्वरितप्रचिते तथा
निघातश्चेति विज्ञेयः स्वरभेदस्तु पञ्चधा १९
इति सप्तमी कण्डिका

कण्डिका ८

अत ऊर्ध्वं प्रवक्ष्याम्यार्चिकस्य स्वरत्रयम्
उदात्तश्चानुदात्तश्च तृतीयः स्वरितः स्वरः १
य एवोदात्त इत्युक्तः स एव स्वरितात्परः
प्रचयः प्रोच्यते तज्ज्ञैर्न चात्रान्यत्स्वरान्तरम् २
वर्णस्वारोऽतीतस्वारः स्वरितो द्विविधः स्मृतः
मात्रिको वर्ण एवं तु दीर्घस्तूच्चरितादनु ३
स तु सप्तविधो ज्ञेयः स्वरः प्रत्ययदर्शनात्
पदेन तु स विज्ञेयो भवेद्यो यत्र यादृशः ४
सप्तस्वरान्प्रयुञ्जीत दक्षिणं श्रवणं प्रति

आचार्यैर्विहितं शास्त्रं पुत्रशिष्यहितैषिभिः ५
उच्चादुच्चतरं नास्ति नीचान्नीचतरं तथा
वैस्वर्ये स्वारसंज्ञायां किं स्थानं स्वार उच्यते ६
उच्चनीचस्य यन्मध्ये साधारणमिति श्रुतिः
तं स्वारं स्वारसञ्ज्ञायां प्रतिजानन्ति शैक्षिकाः ७
उदात्ते निषादगान्धारावनुदात्त ऋृषभधैवतौ
स्वरितप्रभवा ह्येते षड्जमध्यमपञ्चमाः ८
यत्र कखपरा ऊष्मा जिह्वामूलप्रयोजनाः
तामथाज्ञापयेन्मात्रां प्रकृत्यैव तु सा कला ९
जात्यः क्षैप्रोऽभिनिहितस्तैरव्यञ्जन एव च
तिरोविरामः प्रश्लिष्टः पादवृत्तश्च सप्तमः १०
स्वाराणामहमेतेषां पृथग्वक्ष्यामि लक्षणम्
उद्दिष्टानां यथान्यायमुदाहरणमेव च ११

इति प्रथमस्याष्टमी कण्डिका

प्रथमः प्रपाठकः समाप्तः

## द्वितीयः प्रपाठकः

### कण्डिका १

सयकारं सर्वं वाप्यक्षरं स्वरितं भवेत्
न चोदात्तं पुरस्तस्य जात्यः स्वारः स उच्यते १
इ उ वर्णौ यदोदात्तावापद्येते यवौ क्वचित्
अनुदात्ते प्रत्यये नित्यं विद्यात्क्षैप्रस्य लक्षणम् २

ए ओ आभ्यामुदात्ताभ्यामकारो निहितश्च यः
अकारं यत्र लुम्पति तमभिनिहितं विदुः ३
उदात्तपूर्वं यात्किञ्चिच्छन्दसि स्वरितं भवेत्
एव सर्वबहुस्वारस्तैरव्यञ्जन उच्यते ४
अवग्रहात्परं यत्र स्वरितं स्यादनन्तरम्
तिरोविरामं तं विद्यादुदात्तो यद्यवग्रहः ५
इकारं यत्र पश्येयुरिकारेणैव संयुतम्
उदात्तमनुदात्तेन प्रश्लिष्टं तं निबोधत ६
स्वरे चेत् स्वरितं यत्र विवृत्ता यत्र संहिता
एतत्पादान्तवृत्तस्य लक्षणं शास्त्रचोदितम् ७
जात्यः स्वारः स जात्येन श्रुष्ट्यग्रे क्षैप्र उच्यते
ते मन्वताभिनिहितस्तैरव्यञ्जन ऊतये ८
तिरोविरामो विष्कभिते प्राश्लिष्टो हीन्द्रगिर्वणः
पादवृत्तः क ईं वेद स्वाराः सप्तैवमादयः ९
उच्चादेकाक्षरात्पूर्वात्स्वर्यते यदिहाक्षरम्
स्वाराणां जात्यवर्ज्ञानामेषा प्रकृतिरुच्यते १०
चत्वारस्त्वादितः स्वाराः कम्पं पुष्यन्ति शास्त्रतः
उदात्ते वैकनीचे वा जुह्वोग्निस्तत्र दर्शनम् ११

इति प्रथमा कण्डिका

## कण्डिका २

इकारान्ते पदे पूर्व उकारे परतः स्थिते

ह्रस्वं कम्पं विजानीयान्मेधावी नात्र संशयः १
इकारान्ते पदे चैवोकारद्वयपदे परे
दीर्घं कम्पं विजानीयाच्छग्ध्यूष्विति निदर्शनम् २
त्रयो दीर्घास्तु विज्ञेया ये च सन्ध्यक्षरेषु वै
मन्या पथ्या न इन्द्राभ्यां शेषा ह्रस्वाः प्रकीर्तिताः ३
अनेकानामुदात्तानामनुदात्तः प्रत्ययो यदि
शिवकम्पं विजानीयादुदात्तः प्रत्ययो यदि ४
यत्र द्विप्रभृतीनि स्युरुदात्तान्यक्षराणि तु
नीचं चोच्चं च परतस्तत्रोदात्तं विदुर्बुधाः ५
न रेफे वा हकारे वा द्विर्भावो जायते क्वचित्
न च वर्गद्वितीयेषु न चतुर्थे कदा चन ६
न चतुर्थं तृतीयेन द्वितीयं प्रथमेन तु
आद्यमन्त्यं च मध्यं च स्वाक्षरेणैव पीडयेत् ७
अनन्त्यश्च भवेत् पूर्वोऽन्त्यश्च परतो यदि
तत्र मध्ये यमस्तिष्ठेत् सवर्णः पूर्ववर्णयोः ८
वर्गान्त्याञ्छषसैः सार्द्धमन्तस्थैर्वापि संयुतम्
दृष्ट्वा यमा निवर्तन्ते आदेशिकमिवाध्वगाः ९
तृतीयश्च चतुर्थश्च चतुर्थादिपरं पदम्
द्वौ तृतीयौ हकारश्च हकारादि परं पदम् १०
अनुस्वारोपध्ममूलानां न क्वचित् क्रमते परम्
रहपूर्वं संयुते चाप्युत्तरं क्रमतेऽक्षरम् ११
संयोगे स्वरितं यत्र चोद्घाते पतने यथा

पूर्वाङ्गमादितः कृत्वा पराङ्गादौ निवेशयेत् १२
संयोगे यत्र दृश्येत व्यञ्जनं विरते पदे
पूर्वाङ्गं तद्विजानीयाद्येनारम्भस्तत्पराङ्गम् १३
संयोगात्तु परं स्वर्यं परं संयोगनायकम्
संयुक्तस्य तु वर्णस्य स्वरितं पूर्वमक्षरम् १४
अनुस्वारः पदान्तश्च क्रमजः प्रत्यये स्वके
स्वरभक्तिस्तथा रेफः सर्वं पूर्वाङ्गमुच्यते १५
पादादौ च पदादौ च संयोगावग्रहेषु च
यः शब्द इति विज्ञेयो योऽन्यः स य इति स्मृतः १६
पादादावप्यविच्छेदे संयोगान्ते च तिष्ठताम्
वर्जयित्वा रहर्याणामयादेशः प्रदृश्यते १७
स्वसंयुक्तो गुरुर्ज्ञेयः सानुस्वाराग्रिमः स्फुटः
अणुशेषोऽध्रिगोर्वापि युगलादिरविस्फुटः १८

इति द्वितीया कण्डिका

## कण्डिका ३

यदुदात्तमुदात्तं तद्यत्स्वरितं तत्पदे भवति नीचम्
यन्नीचन्नीचमेव तद्यत्प्रचयस्थं तदपि नीचम् १
अयमग्निः सुतो मित्रमिदं वयमयावहाः
प्रियं दूतं घृतं चित्तमभिशब्दश्च नीचतः २
अर्केष्वेव सुतेष्वेव यज्ञेषु कलशेषु च
शतेषु सपवित्रेषु नीचादुच्चार्यते श्रुतिः ३

हरिवरुणावरुण्येषु धारा पुरुषेषु च स्वरति रेफः
विश्वानरो नकारेषु शेषा रस्वरितानराः ४
द्वौ वरुणावस्वरितावुदुत्तमं त्वं वरुण
धाकारे चोरुधारायामुरुधारेव दोहने ५
मात्रिकं वा द्विमात्रं वा स्वर्यते यदिहाक्षरम्
तस्यादितोऽर्द्धमात्रा वै शेषं तु परतो भवेत् ६
अदीर्घं  दीर्घवत्कुर्याद् द्विस्वरं यत्प्रयुज्यते
कम्पोत्स्वरिताभिगीतं ह्रस्वकर्षणमेव च ७
निमेषकाला मात्रा स्याद्द्विद्युत्कालेति चापरे
ऋक्स्वरा तुल्ययोगा वा मतिः स्यात्सोमशर्मणः ८
समासेऽवग्रहं कुर्यात्पदं चात्रानुसंहितम्
यतोऽक्षरादितिकरणं पदान्तं तस्य तं विदुः ९
सर्वत्र मित्रपुत्रसखिशब्दा अद्रिशतक्रतोरवग्राह्याः
आदित्यविप्रजातवेदाश्च सत्पतिगोपतिवृत्रहा समुद्राश्च १०
स्वर्युवो देवयवश्चारतिं देवतातये
चिकितिश्चुक्रुधं चैव नावगृह्णन्ति पण्डिताः ११

इति तृतीया कण्डिका

## कण्डिका ४

विवृत्तयश्चतस्रो वै विज्ञेया इति मे मतम्
अक्षराणां नियोगेन तासां नामानि मे शृणु १
ह्रस्वादिर्वत्सानुसृता वत्सानुसारिणी चाग्रे

पाकवत्युभयोर्ह्रस्वा दीर्घवृद्धा पिपीलिका २
चतसृणां विवृत्तीनामन्तरं मात्रिकं भवेत्
अर्धमात्रिकमन्येषामन्येषामणुमात्रिकम् ३
आपद्यते मकारो रेफोष्मसु प्रत्ययेष्वनुस्वारम्
यलवेषु परसवर्णं स्पर्शेषु चोत्तमापत्तिम् ४
नकारान्ते पदे पूर्वे स्वरे च परतः स्थिते
आकारं रक्तमित्याहुर्नकारेण तु रज्यते ५
नकारान्ते पदे पूर्वे व्यञ्जनैश्च यवो हिषु
अर्धमात्रा तु पूर्वस्य रज्यते त्वणुमात्रया ६
नकारः स्वरसंयुक्तश्चतुर्युक्तो विधीयते
रेफो रङ्गश्च लोपश्चानुस्वारोऽपि वा क्वचित् ७
हृदयादुत्तिष्ठते रङ्गः कांस्येन समनिःस्वरः
मृदुश्चैव द्विमात्रश्च दधन्वाँ इति दर्शनम् ८
यथा सौराष्ट्रिका नारी तक्रँ इत्यभिभाषते
एवं रङ्गः प्रयोक्तव्यो नारदस्य मतं यथा ९
इति चतुर्थी कण्डिका

कण्डिका ५

स्वरा गडदबाश्चैव ङणनमाः सहोष्मभिः
चतुर्णां पदजातीनां पदान्ता दश कीर्तिताः १
स्वर उच्चः स्वरो नीचः स्वरः स्वरित एव च
व्यञ्जनान्यनुवर्तन्ते यत्र तिष्ठति स स्वरः २

स्वरप्रधानं त्रैस्वर्यमाचार्याः प्रतिजानते
मणिवद्व्यञ्जनं विद्यात्सूत्रवच्च स्वरं विदुः ३
दुर्बलस्य यथा राष्ट्रं हरते बलवान्नृपः
दुर्बलं व्यञ्जनं तद्वद्धरते बलवान्स्वरः ४
ओभावश्च विवृत्तिश्च शषसा रेफ एव च
जिह्वामूलमुपध्मा च गतिरष्टविधोष्मणः ५
स्वरप्रत्यया विवृत्तिः संहितायां तु या भवेत्
विसर्गस्तत्र मन्तव्यस्तालव्यो वात्र जायते ६
सन्ध्यक्षरोपधे सन्धौ प्राप्तलुप्तौ यवौ यदि
व्यञ्जनाख्या विवृत्तिस्तु स्वराख्या प्रतिसंहिता ७
ऊष्मान्तं विरते यत्र सन्धावो भवते च यत्
विवृत्तिर्या भवेत्तत्र स्वराख्यां तां विनिर्दिशेत् ८
यद्योभावप्रसन्धानमुकारादि परं पदम्
स्वरान्तं तादृशं विद्याद्यदन्यद्व्ययक्तमूष्मणः ९
प्रथमा उत्तमाश्चैव पदान्तेषु यदि स्थिताः
द्वितीयं स्थानमापन्नाः शषसप्रत्यया यदि १०
प्रथमानूष्मसंयुक्तान् द्वितीयानिव दर्शयेत्
न चैनान्प्रतिजानीयाद्यथा मत्स्यः क्षुरोऽप्सराः ११

इति पञ्चमी कण्डिका

## कण्डिका ६

छन्दोमानं न वृत्तं च पादस्थानं त्रिकारणम्

ऋचः स्वच्छन्दवृत्तास्तु पादास्त्वक्षरमानसः १
ऋवर्णं स्वरभक्तिं च छन्दोमानेन निर्दिशेत्
प्रत्ययेन सहारेफं मिमीत स्वरभक्तिषु २
ऋवर्णे तु पृथग्रेफः प्रत्ययस्तु पृथग्भवेत्
विद्याल्लघुमृकारं तु यदि तूष्माणसंयुतः ३
ऊष्मणैव हि संयुक्त ऋकारो यत्र पीड्यते
गुरुर्वर्णः स विज्ञेयस्तृचं चात्रानुदर्शनम् ४
ऋषभं च गृहीतं च बृहस्पतिं पृथिव्यां च
निरृर्तिः पञ्चमा ह्यत्र ऋकारा नात्र संशयः ५
शषसहरादौ रेफः स्वरभक्तिर्जायते द्विपदा सन्धौ
इउवर्णाभ्यां हीना क्वचिदेकपदा क्रमवियुक्ता ६
स्वरभक्तिस्तु द्विविधा ऋकारो रेफ एव च
स्वरोदा व्यञ्जनोदा च विहिताक्षरचिन्तकैः ७
शषसेषु स्वरोदायां हकारे व्यञ्जनोदयाम्
शषसेषु विवृत्तां तु हकारे संवृतां विदुः ८
स्वरभक्तिं प्रयुञ्जानस्त्रीन्दोषान् परिवर्जयेत्
इकारं चाप्युकारं च ग्रस्तदोषं तथैव च ९
संयोगपरं छपरं विसर्जनीयं द्विमात्रिकं चैव
आसानिकं च न लघु सानुस्वारं घुटान्तं च १०

इति षष्ठी कण्डिका

## कण्डिका ७

पथ्यापादः प्रथमो द्वादशमात्रस्तथा तृतीयोऽपि
अष्टादशो द्वितीयः समापनः पञ्चदशमात्रः १
पथ्यालक्षणमुक्तं या त्वन्या सा स्मृता विपुला २
अक्षराणां लघुह्रस्वमसंयोगपरं यदि
तत् संयोगोत्तरं विद्याद् गुरुर्दीर्घाक्षराणि तु ३
विवृत्तिर्यत्र दृश्येत स्वारस्यैवाग्रतः स्थिता
गुरुः स्वारः स विज्ञेयः क्षैप्रस्तत्र न विद्यते ४
अष्टप्रकारं विज्ञेयं पदानां स्वरलक्षणम्
अन्तोदात्तमाद्युदात्तमुदात्तमनुदातं नीचस्वरितम् ५
मध्योदात्तं स्वरितं द्विरुदात्तमित्यष्टौ पदसंज्ञाः
अग्निः सोमः प्र वो वीर्यं हविषा स्वर्वनस्पतिः ६
अन्तर्मध्यमयोर्नाम्युदमनुदनिपाते
आद्यात् स्वरितमुपसर्गे द्विर्नीचमाख्यात इति ७
स्वरितात्पराणि यानि स्युर्धार्याण्यक्षराणि तु
सर्वाणि प्रचयस्थान्युपोदात्तं निहन्यते ८
प्रचयो यत्र दृश्येत तत्र हन्यात् स्वरं बुधः
स्वरितः केवलो यत्र मृदुं तत्र निपातयेत् ९
पञ्चविधमाचार्यकं नाम मुखन्यासः करणं प्रतिज्ञोच्चारणा
अत्रोच्यते श्रेयः खलु वै सं प्रतिज्ञानोच्चारणा १०
यस्य कस्यचिद्वर्णस्य करणं नोपलभ्यते
प्रतिज्ञास्तत्र वोढव्याः करणं हि तदात्मकम् ११
तुम्बुरुनारदवसिष्ठविश्वावस्वादयश्च गन्धर्वाः

सामसु निभृतं करणं स्वरसौक्ष्म्यात्तेऽपि हि न कुर्युः १२
इति सप्तमी कण्डिका

## कण्डिका ८

कौक्षेयाग्निं सदा रक्षेदश्नीयादशनं हितम्
जीर्णाहारः प्रबुद्धः सन्नुषसि ब्रह्म चिन्तयेत् १
शरद्विषुवतोऽतीतादुषस्युत्थानमिष्यते
यावद्वासन्तिकी रात्रिर्मध्यमा पर्युपस्थिता २
आम्रपालाशबिल्वानामपामार्गशिरीषयोः
वाग्यतः प्रातरुत्थाय भक्षयेद् दन्तधावनम् ३
खदिरश्च कदम्बश्च करवीरकरञ्जयोः
सर्वे कण्टकिनः पुण्याः क्षीरिणश्च यशस्विनः ४
तेनास्य करणं सौक्ष्म्यं माधुर्यं चोपजायते
वर्णां श्च कुरुते सम्यक्प्राचीनौदव्रजिर्यथा ५
त्रिफला लवणाख्येन भक्षयेच्छिष्यकः सदा
अग्निमेधाजनन्येषा स्वरवर्णकरी तथा ६
कृत्वा चावश्यकान् धर्मान् जाठरं पर्युपास्य च
पीत्वा धूमं घृतं चैव शुचिर्भूत्वा ततो वदेत् ७
मन्द्रेणोपक्रमेत् पूर्वं सर्वशाखास्वयं विधिः
सप्तमन्त्रानतिक्रम्य यथेष्टां वाचमुत्सृजेत् ८
न तां समीरयेद् वाचं या प्राणमुपरोधयेत् ८अ
प्राणानामुपरोधेन वैस्वर्यं चोपजायते

स्वरव्यञ्जनमाधुर्यं लुप्यते नात्र संशयः ९
कुतीर्थादागतं दग्धमपवर्णैश्च भक्षितम्
न तस्य परिमोक्षोऽस्ति पापाहेरिव किल्बिषात् १०
सुतीर्थादागतं व्यक्तं स्वाम्नातं सुप्रतिष्ठितम्
सुस्वरेण सुवक्त्रेण प्रयुक्तं ब्रह्म राजते ११
न करालो न लम्बोष्ठो न च सर्वानुनासिकः
गद्गदो बद्धजिह्वश्च प्रयोगान्वक्तुमर्हति १२
एकचित्तो निरुद्भ्रान्तस्तान्तगानविवर्जितः
स तु वर्णान्प्रयुञ्जीत दन्तोष्ठं यस्य शोभनम् १३
पञ्च विद्यां न गृह्णन्ति चण्डा स्तब्धाश्च ये नराः
अलसाश्चानरोगाश्च येषां च विसृतं मनः १४
शनैर्विद्यां शनैरर्थानारोहेत् पर्वतं शनैः
शनैरध्वसु वर्तेत योजनानां परं व्रजेत् १५
योजनानां सहस्रं तु शनैर्याति पिपीलिका
अगच्छन्वैनतेयोऽपि पदमेकं न गच्छति १६
न हि पार्ष्णिहता वाणी प्रयोगान्वक्तुमर्हति
बधिरस्येव तल्पस्था विदग्धा वामलोचना १७
उपांशु त्वरितं चैवं योऽधीते वित्रसन्निव
अपि रूपसहस्रेषु सन्देहेष्वेव वर्तते १८
पुस्तकप्रत्ययाधीतं नाधीतं गुरुसन्निधौ
राजते न सभामध्ये जारगर्भा इव स्त्रियः १९
अञ्जनस्य क्षयं दृष्ट्वा वल्मीकस्य तु संचयम्

अबन्ध्यं दिवसं कुर्याद्दानाध्ययनकर्मसु २०
योजनानां शतं साग्रं शनैर्यान्ति पिपीलिकाः
अगच्छन् वैनतेयोऽपि पदमेकं न गच्छति २१
यत्कीटैः पांसुभिः श्लक्ष्णैर्वल्मीकः क्रियते महान्
न तत्र बलसामर्थ्यमुद्योगस्तत्र कारणम् २२
सहस्रगुणिता विद्या शतशः परिकीर्तिता
आगमिष्यति जिह्वाग्रे स्थलान्निम्नमिवोदकम् २३
हयानामिव जात्यानामर्द्धरात्रार्द्धशायिनाम्
न हि विद्यार्थिनां निद्रा चिरं नेत्रेषु तिष्ठति २४
न भोजनविलम्बी स्यान्न च नारीनिबन्धनः
सुदूरमपि विद्यार्थी व्रजेद् गरुडहंसवत् २५
अहेरिव गणाद्भीतः सौहृद्यान्नरकादिव
राक्षसीभ्य इव स्त्रीभ्यः स विद्यामधिगच्छति २६
न शठाः प्राप्नुवन्त्यर्थान्न क्लीबा न च मानिनः
न च लोकरवाद्भीता न च श्वः श्वः प्रतीक्षकाः २७
यथा खनन् खनित्रेण भूतले वारि विन्दति
एवं गुरुगतां विद्यां शुश्रूषुरधिगच्छति २८
शुश्रूषारहिता विद्या यद्यपि मेधागुणैः समुपयाति
बन्ध्येव यौवनवती न तस्य विद्या फलवती भवति २९
द्यूतं पुस्तकवाद्यं च नाटकेषु च सक्तिका
स्त्रियस्तन्द्रा च निद्रा च विद्याविघ्नकराणि षट् ३०
यथा व्याघ्री हरेत्पुत्रान् दंष्ट्राभिर्न च पीडयेत्

भीता पतनभेदाभ्यांस्तद्वद्वर्णान्प्रयोजयेत् ३१
एवं वर्णाः प्रयोक्तव्या नाव्यक्ता न च पीडिताः
सम्यग् वर्णप्रयोगेण ब्रह्मलोके महीयते ३२

इति द्वितीयस्याष्टमी कण्डिका

इति द्वितीयः प्रपाठकः

इति नारदीया शिक्षा समाप्ता

Bhaṭṭaśobhākara, ed., *ŚrīNāradamuniviracitā Sāmavedīyā Nāradīyā Śikṣā, with the Śikṣāvivaraṇopetā Commentary*, (Vanakhaṇḍeśvara: Śrīpītāmbarāpīṭha-saṁskṛta-pariṣad, 1964) 90 pp.

Usha R. Bhise, tr., Nāradīyā Śikṣā with the Commentary of Bhaṭṭa Śobhā, critically edited with Translation and Explanatory Notes in English, (Poona: Bhandarkar Oriental Research Institute, 1986), 77 pages.

Tripāthī, Śrī Rāma Prasāda, ed., *Śikṣhāsaṁgrahaḥ*, (Vārānasi: Sampurnand Sanksrit University, 1989), pp. 330-371.

# सामवेदीया गौतमीशिक्षा

## प्रथमः प्रपाठके प्रथमः खराडः

अथ त्रयस्त्रिंशद्व्यञ्जनानि भवन्ति
स्पर्शान्तस्थोष्माणश्चेति
तत्र ककारादयो मकारान्ताः स्पर्शाः
पञ्चविंशतिश्चत्वारोऽन्तस्थास्ते यरलवाश्चत्वारश्चोष्माणस्ते
हशषसाश्चेति
अनेकं व्यञ्जनं यत्रोपर्युपरि संयुक्तं तत्संयोगसंज्ञं भवति ।
इत्यस्वरं च पूर्वमक्षरम्
अथ त्रिविधः संयोगपिराडो भवत्ययस्पिराडो
दारुपिराडस्तथोर्णापिराडश्चेति
यमसहितमयस्पिराडं दारुपिराडमन्तस्थैर्युक्तं
यमान्तस्थवर्जन्तूर्णापिराडमिति
अन्तस्थयमसंयोगे विशेषो नोपलभ्यत इत्यशरीरं यमं
विद्यादन्तस्थः पिराडनायकः

## द्वितीयः खराडः

अथानन्त्या विंशतिर्भवन्ति ते कचटतपाः खछठथफा
गजडदबा घझढधभाश्चेति
अथान्त्याः पञ्च ते ङञणनमाश्चेति
अथानन्त्याश्चत्वारस्ते सयमास्ते कुं खुं गुं घुं इति
अनन्त्यान्त्यसंयोगेऽनन्त्यपूर्वेऽन्त्योत्तरे व्यवधानवर्जिते तत्र
यमा वर्त्तन्ते न संशय इति

## तृतीयः खराडः

अथ सर्वेषां व्यञ्जनानां द्विर्भावो भवति द्वादशाक्षरवर्जं ते
खछठथफा घझढधभा रहयोश्चेति
हकारस्यैके मन्यन्ते यदि भवति रहयोर्मध्ये
सर्वत्र स्वरात्संयोगादिः क्रामति रेफहकारवर्जम्
ताभ्यां परं क्रामति
न क्रमते परमुपध्मानीयानुस्वारजिह्वामूलीयानां
विसर्जनीयपरं च क्षः त्सप्रत्यये क्षः त्सप्रत्यये

## चतुर्थः खराडः

अथ द्व्यक्षराणामुदाहरणं द्वौ तकारौ तस्मात्ते सत्तमाः यथा
प्रियवेत्तेव भवति
द्वौ नकारौ यन्नमस्यन्ति शन्नो देवीरुन्नयामि ।
द्वौ जकारौ यज्जायथा उज्जिहानाः अस्थिमज्जेति
द्वौ मकारौ यम्मित्रं तम्मन्ये शम्मघवन्
द्वौ चकारौ यदद्यकच्च परमाच्चित्
यथाशु भार्गवे साम्नि
उच्चाते जातमन्धा३साः
द्वौ सकारौ यस्सुक्षिती पुनानस्सोऽग्निस्समिधा
द्वौ यकारौ यथोभय्यो धानञ्जय्यः सह रय्या निवर्त्तस्वेति
द्वौ दकारौ यद्दूरे यद्दिधृक्षे मोद्दालको हारुणिः
द्वौ लकारौ स्वर्गाल्लोकादूर्द्ध्वमुल्लिखेदेभिरेवैनंल्लोकैः
द्वौ ङकारावृश्यव्रते ऋश्यास इन्द्रभुङ्ङति मघवन्निन्द्र

भुङ्ङति प्रभुङ्ङतीन्द्रस्तसरपूता २३४५ एवमादीनि ४

पञ्चमः खराडः

चकारछकाराविन्द्रमच्छेति
तकारथकारौ वेत्थाहीति
दकारधकारौ शुद्धमिति
बकारभकारावब्भक्षस्तृतीयमिति
यरावे रेफषकारौ ऋर्षा सोमद्युमत्तम एऽ२
बर्हिरिति रहौ  विह्नुतमिति हरौ  दर्शेति रशौ स्पर्शेति सपौ
दयौ देयस्थाने द्यौरक्रान्भूमिरततनत्समुद्रं समचूकुपत् इट्
इडा ऽ२३४५ एवमादीनि ५

षष्ठः खराडः

यानि चान्यानि यथा करणे सर्पसामघर्मरोचनाभीवर्त्तेषु
संयमन्नव्यायमन्वियमन्नसमायमन् उद्यल्लोकानरोचयोहो३
यि तंवो३ दा३ स्मामृतीषहो वा
यलवैर्द्विर्भावस्तैः पूर्वः सानुनासिकस्तुल्यस्थानकरणपरे
क्रमप्रतिषेधः क्रमप्रतिषेधः

सप्तमः खराडः

ऋथ त्र्यक्षराणामुदाहरणम्
ऋक्षरमिति ककषास्तमृभ्वसम्भवाः
यच्छिक्षसि चचछास्त्वामिद्धि ददधास्त्रैशोके शशवा
विश्वो३हाइ
ब्रह्मेति हहमाः

विष्णुरिति षषणाः
पृश्निरिति शशनाः
सृप्रकरः स्नमूतय इति ससनाः
सार्वकामिके ननकाः सर्वान् कामानशीमही २३४५
एवमादीनि

अष्टमः खण्डः

आम्रे ममराः
दीर्घे रगघाः
पादमध्ये दधयाः
पादोपान्तीये ननताः
गौशृङ्गे ततसाः त्तरणिरित्सषासती३
षट्द्सु टटसाः
खड्गे डडगाः
कुब्जे बबजाः
वज्र्रे जजराः
ददरा वरुणसाम्नि इन्दुः समुद्द्रमुर्विया विभातीति २३४५
एवमादीनि

नवमः खण्डः

आख्यातं कखयाः
रकखा मूर्क्खम्
ङङखाः शङ्खम्
पत्थ्यं तथया ञञजाः शार्गेहावाञ्जाता १२३४ ईवियञ्जते स

समञ्जते
पूज्ज्यं जजयाः
दूङ्ढ्यम् डढयाः
तुब्भ्यं बभयाः
सन्न्षडह इति ननषाः
रकका अर्क्कपुष्पे साम्न्यर्क्को देवानां परमे वियो २ मा
२३४५ नर्क्कस्य देवाः परमे वियो मा २३४५ नेवमादीनि
त्र्यक्षराणामेतदुदाहरणं यथोक्तं यथोक्तम्

द्वितीयः प्रपाठकः प्रथमः खण्डः

अथ चतुरक्षराणामुदाहरणं सयमायमाभ्यां
सयमांस्तावद्यथाग्निरिति द्वौ
गकारौ यमनकारौ
यज्ञौ इति द्वौ जकारौ यमञकारौ युनज्मित इति द्वौ
जकारौ यम मकारौ विद्माहित्वेति द्वौ दकारौ यम मकारौ
समन्ते दधयममकारा भरामेद्ध्मं कृणवामा हवींषि तायि
गृब्भ्णीत इति बभयमणकाराः
उन्मृद्नीतानिति ददयमनकाराः
सगिड्ढ्मेति डढयममकाराः
पाप्प्मेति पपयममकाराः
विलम्बसौपर्णे ततयमनकारा इत्यस्य प्रत्नामनुद्युतमी ये
इयाहाइ एवमादीनि

## द्वितीयः खण्डः

अथ यमवर्जितानां यथोदङ्ङ्न्यञ्चेति ङङनयाः
कार्ष्मान्वाजीति रषमाः
यद्वीडाविन्द्र यत्स्थिर इति ततसथाश्चन्द्रमा अप्प्स्वन्तरेति पपसवाः
हारायणे गगधयाः शग्ग्ध्यूष्वौहो१२ ईशचीपतायि
कृत्स्नमिति ततसनाः पङ्क्तिरिति ङङकताः
स्थिरप्स्नुमिति पपसनाः
प्राङ्ङ्क्सुरिति ङङकसाः
कण्वरथन्तरे रजजया माज्ज्र्यमानस्सुहस्तिया एवमादीनि

## तृतीयः खण्डः

प्रेङ्खांस्तह्यारोहन्तीति रहहयास्तथा ब्व्रत इति बबवराः
सम्राज्ञीश्वराश्श्वामिति शशरवाः
मत्स्येक्षेति ततसयाः
श्रौतकक्षे ननदराः इन्द्रायमद्वने सुतमिन्द्रायामो वा
अयज्ज्व्यघटत इति जजवयाः
कण्णठ्य इति णणठया वर्गान्त्य इति ननतयाः
सुनिक्क्त्सीति ककतसाः
रथन्तरे रशशयाः प्राप्नुवदश्श्र्यायतो३वा एवमादीनि

## चतुर्थः खण्डः

अथ पञ्चाक्षराणामुदाहरणम्
यथा ज्योतिर्ग्गौरायुस्त्र्यह इति ससतरयाः

सङ्ङ्क्ष्णुत्येति ङङकषणाः
तस्मिन्न्त्स्वतन्त्रेति ननतसवाः
विश्वप्प्स्न्या इति पपसनयाः
ङङकषवाः पयस्यग्ने युङ्ङ्क्ष्वाहि १ ३ येतवा
पाष्ष्ण्योरिति रषषणयाः
शग्ग्ध्व्यांरोह इति गगधवयाः
पूर्णाञ्ज्ज्योत्याविति ञञजवयाः
हुवेजसिक्रयण्णट्स्वतामिति णणटसवाः
तार्क्ष्यसाम्नीति र क क ष याः तार्क्ष्यमिहा ३४३ हू ३ वा ५
यिमा ६५६ एवमादीनि

पञ्चमः खण्डः

अथ सयमान्
यथा सबुद्ध्न्या इति दधयमनयाः
दुःष्वप्प्न्यं स्विति पपयमनयाः
सार्पराज्ञ्या इति जजयमञयाः
माट्ट्ण्या इति टटयमणयाः
शुग्घ्न्ये गघयमनयाः पतिं वो अग्घ्न्यानां
धेनुनामिषूऽ२३ध्यसा उ वा
सक्थ्न्या इति कथयमनयकाराः
प्रथमवृद्धिस्त्नुमूतय इति ससतयमनकाराः
प्राग्ग्ध्माखपिबामेति गगधयममकाराः
मूर्द्ध्नो विशश्वस्येति रदधयमनकाराः

कावेरजजयममकाराः

इत्यबोधाधियग्निर्ज्ज्म उदा३इति सूरो १३या २ एवमादिनि

षष्ठः खराडः

अ्रथ षडक्षराणामुदाहरणम्

अ्रङ्गे चक्क्म्व्यादाविति द्वौ ककारौ

यममकारवकारयकारा इति

सत्रकात्स्न्यां इति रततसनयाः अ्रप्साध्यग्ग्ध्र्मवाहमिति

रगगधयममकाराः

अ्रथ सप्ताक्षरमेकमुदाहृतं मङ्क्षे प्रातिशाख्ये हि न हि न

घुञुघुञुक्षुङ्ङ्क्ष्क्ष्वाविति ङङकषकषवाः

गौतमेनोक्तं न सप्ताक्षरात्परः संयोगो भवत्येषा

सहस्रवर्त्मात्मा नानावर्तिविभूषिता संयोगशृङ्खला नाम

सामवेदनिबन्धनात्

इति द्वितीयप्रपाठकः

इति सामवेदीयगौतमीशिक्षा समाप्ता

"Saṁyogaśṛṁkhalānāma Sāmavedīya Catasṛṣu Śikṣāsu Tṛtīyā Gautamīya Śikṣā," in *Sāmavedīya Aṣṭa-Brāhmaṇe Sāmavidhānaṁ, Ārṣeyaṁ ca Śīkṣādi Saṁvalitam, Dvitīyo Bhāgaḥ*, Kumbakonam: Kumar Press, 1981, pp. 270-281.

Nāradi Śikṣā, Gautamī Śikṣā, Lomaśi Śikṣā, complete in 30 folios, 5237, 5238, 5239. Raghunath Temple Sanskrit Manuscript Library, Jammu: Manuscripts of Dharmartha Trust (धर्मार्थ ट्रस्ट) at Raghunath Temple, Jammu, J&K. Digitized by eGangotri; posted on archive.org.

Tripāthī, Śrī Rāma Prasāda, ed., *Śikṣhāsaṁgrahaḥ*, (Vārānasi: Sampurnand Sanksrit University, 1989), pp. 332-374.

# सामवेदीया लोमशीशिक्षा

लोमशीयां प्रवक्ष्यामि गर्गाचार्येण चिन्तिताम्
साभिधानां यथोक्तं तु स्वाचार्यवचनं तथा १
ह्रस्वं दीर्घं तथा वृद्धमभिगीतं तु सामगाः
मुहुर्मृदङ्गवत्कुर्युः सम्पातोत्थानसञ्ज्ञवत् २
केन कम्पातितः कम्पः संयोगो येन कम्पते
किं वा कम्प इति प्रोक्तो येनासौ कम्प उच्यते ३
पूर्वाङ्गेण हतं पूर्वं पराङ्गेण तु धारितम्
व्यञ्जनेन द्विधा भिन्नः स्वरो भीतस्तु कम्पते ४
दीर्घकम्पेऽध्यर्धमात्रा तृतीये परिकीर्तिता
द्वितीये अर्द्धमात्रा तु प्रयोगो घण्टतालवत् ५
रङ्गस्तु द्विविधो ज्ञेयः स्वरपरो व्यञ्जनः परः
पारावतः सवर्णाभो विहितोऽक्षरचिन्तकैः ६
तस्य मात्रा तु हृदये अणुमात्रा तु मूर्द्धनि
नासाग्रे त्वणूनां मात्रा रङ्गस्य परिकीर्तिता ७
रङ्गे चैव समुत्पन्ने न ग्रसेत् पूर्वमक्षरम्
स्वरे दीर्घं प्रयुञ्जीत तस्य नासिक्यमुच्चरेत् ८
द्विमात्रो मात्रिको वापि नासिमूलं समाश्रितः
अन्ते प्रयुज्यते रङ्गः पञ्चमैः सर्वनासिकः ९

इति प्रथमखण्डः

ककारार्द्धं टकारार्द्धं हन्वां तिष्ठति दक्षिणे
जिह्वाग्रेण तु आभाष्येत्किट्किडाकार एव च १

करेणुः कुर्विणी चैव हरिणी हारितेति च
तथा हंसपदा नाम पञ्चैताः स्वरभक्तयः २
करेणुं रिहयोर्विद्यात्कुर्विणीं लृहकरयोः
हरिणीं रिशयोर्विद्याद् हारितां लृशकारयोः ३
तथा रेफषकारे तु हंसपदां परिकीर्त्तिता
या तु रेफषकारी स्यात्काकिनीं तां विनिर्दिशेत् ४
रहाभ्यां तु परं नित्यं क्रामयन्ति विचक्षणाः
रहौ तु यत्र दृश्येते न क्रमस्तु तयोर्भवेत् ५
रयोर्यदिहकारस्तु दृश्यते मध्यमः क्वचित्
द्विर्भावं तत्र जानीयात्प्रेङ्खांस्तर्ह्येति दर्शनम् ६
इति द्वितीयः खण्डः

नैतत् स्वरति पूर्वाङ्गे न पराङ्गे कदा चन
न व्यञ्जने न मात्रायां कथं योगो विधीयते १
स्वरस्यैव तु पूर्वार्धे व्यञ्जनार्द्धार्द्धपश्चिमे
तयोरर्द्धार्द्धसंयोगे स्वरं कुर्याद्विचक्षणः २
अन्तोदात्तं मध्योदात्तं विरतं संशये पदे
अन्तोदात्तं विजानीयादुदात्तः प्रत्ययो यदि ३
अन्तोदात्तं नीचस्वरितं विरतं संशये पदे
अन्तोदात्तं विजानीयादनुदात्तः प्रत्ययो यदि ४
अवक्षेपः प्रमाणं च रवौ यश्चाप्युपद्रवः
यमलः स्वरितं चैव दोषाः पञ्चार्च्चिके स्मृताः ५

वर्णा विंशतिरेकश्च येषां द्विर्भाव इष्यते
प्रथमान्त्यास्तृतीयाश्च यलवाः शषसैः सह ६
अनुस्वारे विवृत्यां च विरामे चाक्षरद्वये
द्विरोष्ठ्यौ तु विनिर्गच्छेत्तथौकारउकारयोः ७

इति तृतीयः खण्डः

बहूनामप्युकाराणामेकं करणमिष्यते
ह्रस्वे दीर्घे च वृद्धे च नानाद्यं करणं भवेत् १
बहूनामप्युकाराणां मध्ये दीर्घं भवेद्यदि
आदावन्ते च करणं मध्यमः पृथगेव तु २
बहूनामप्युकाराणामन्ते दीर्घं भवेद्यदि
आदावन्ते च करणं मध्यमः पृथगाश्रितः ३
आदौ द्विष्करणं यत्र पश्चादुवर्णमेव च
आदिमध्यान्तः स विज्ञेयो वायोश्लेयो निदर्शनम् ४
आदौ सकृत्यकरणं यत्र पश्चादुवर्णमेव च
आदावन्तः स विज्ञेयो वायो शुक्रो निदर्शनम् ५
असंयुक्तः पूर्ववर्णः स्याद्युक्तस्तु परतो यदि
उकारेण तु संयुज्येत्करणाभ्यासस्तथा भवेत् ६
व्यञ्जनान्यनुवर्णानि यान्युवर्णान्त्यान् हितानि च
विद्याद्विष्करणामेतेषामथौकारउकारयोः ७
ओष्ठ्यस्वरावनन्तरौ यत्र सयोगसंयुतौ
तत्र सकृत्करणं स्याद्विष्करणामतोऽन्यथा ८

ओष्ठ्यौ वर्णौ यदि स्यातामसंयोगपरावपि
द्विरोष्ठ्यतामेतैः कुर्यादोजिष्ठं पुपुदर्शनम् ९
इति चतुर्थ खण्डः

यः स्वरान्तात् पूर्वपदात् परः षणकारमापद्यते
तत्र पदवद्विरेते सामसु सन्धिवत्प्रत्याहारम्भः १
नमौ गुरू नादसञ्ज्ञौ लघू चैवानुनासिकौ
संयोगौ सविसर्गौ च नादावेतौ प्रकीर्तितौ २
विवृत्तौ च विरामे च सवर्णे प्रत्यये परे
अनुनासिकास्तु विज्ञेयाः शेषा नादाः प्रकीर्तिताः ३
मात्रिका नासिका ज्ञेया द्विमात्रा नादसंज्ञकाः
सविसर्गास्तु नादाः स्युः सानुस्वारास्तु पूर्वशः ४
अनुनासिकास्तु ये वर्णा घोषास्तु प्रत्यया यदि
नादं तत्र विजानीयाद् अनुदहेति निदर्शनम् ५
नासिकेष्वपि वर्णेषु यो यत्र भजते स्वरः
तन्तमेवोपजीवन्ति नासादोषांश्च वर्ञ्जयेत् ६
अणुमेकमङ्गुष्ठे तु प्रदेशिन्यां तथैव च
तृतीये चैव कर्तव्ये प्रणतैवं प्रयुज्यते ७
द्वे अणवन्तरेङ्गुष्ठस्य प्रदेशिन्यां तु षट्स्मृताः
अर्धमात्रातृतीयस्य प्रणतैवं प्रयुज्यते ८
हकारं पञ्चमैर्युक्तमन्तस्थैर्वापि संयुतम्
औरसं तं विजनीयात्कण्ठ्यमाहुरसंयुतम् ९

हकारँ रेफसंयुक्तं कदा चिद्वलसंयुतम्
उच्चारणीयं कण्ठ्यस्थमेवमीप्सन्ति पण्डिताः १०
हकारो यत्र पूर्वस्थो तस्थाद्यो भवेत्परः
यदकाले वियुज्येत संहितायां न सौरसः ११
इति पञ्चमः खण्डः

व्यञ्जनं शिरसि निर्विष्टो रेफ ऋवर्णतां याति
स तु सर्वत्र न कार्यः शषसहकारेषु कार्यः १
अक्षरं शषसं चैव यत्र तिष्ठति संयुतम्
ऋवर्णं तत्र विद्येत व्यञ्जनं तु विनिर्दिशेत् २
अक्षरं यत्र दृश्येत व्यञ्जनं विरते पदे
पूर्वाङ्गं तद्विजानीयाद् यत्स्थितं तत्पराङ्गवत् ३
रेफस्य च ऋवर्णस्य स्वरभक्तेस्तथैव च
अवर्णवत् प्रयोगः स्याद्द्विवच्च व्यञ्जनस्य तु ४
मध्यमां श्रुतिमासाद्य द्विविधं दर्शयेत्स्वरम्
अधस्ये निशिवत्कुर्याद् ब्रह्मजज्ञानमूर्ध्वगे ५
सकृद्गीत्वा प्रणतं स्यादसकृन्नीचमुच्यते
आयाहि प्रणतं नीचं परिप्राणाचतुर्थयोः ६
आकारान्तं यदूष्मान्तं घोषं च परतः स्थितम्
स घोषवति लोपस्तु विदागाधं तु दर्शनम् ७
इति षष्ठः खण्डः

अस्थ उस्थे च रङ्गे च गतिलोपे तथैव च
एकारौकारलोपे च विवृत्तिर्व्यञ्जनोदया १
अश्रु प्रत्यया उवर्णा घढतपराः पवित्रवर्जम्
डढणेषु तु संवृत्ता ज्ञेयास्ते हरीतवर्जम् २
द्वितीये विरता या तु चतुर्थे न प्रवर्तते
दीप्तामधो गमे विद्यादुपरिष्टात्तु आयताम् ३
ऊताप्रहूयसा चैव त्सिबावारा तथा मही
नित्यायताः प्रयोक्तव्या निर्दिशन्ति विचक्षणाः ४
प्राणापाननिगारे च संस्वाद ऋषभे तथा
प्रथमस्वरे तु कर्तव्याः किट्किडाकार एव च ५
प्राणसाम्नित्यजेत् प्राणं प्रथमं दक्षिणं भवेत्
सव्येन तु ग्रहणं स्यात्प्राणस्य उच्चयाथवा ६
दक्षिणे निसृतः प्राण अपानस्त्वन्यथा भवेत्
सव्यं पीत्वा अपानस्य तुम्बुरोऽस्य मतं यथा ७
पादपूर्वा ये डकाराः पदपूर्वास्तथैव च
डइति चेति विज्ञेया डढणाकारेऽप्ययं विधिः ८
मथ्यमाने यथा दघ्नि नवनीतं प्रजायते
तद्वदिष्टमधः ताभ्यां पृथग्युक्तौ च भावयेत् ९
शषसहरा दृश्यन्ते तेषु चोदयवर्तिषु
दीर्घानुस्वारं जानीयात्संयोगे ह्रस्व एव च १०
असंयोगादनुस्वाराल्लघूनामुपयास्यति
संयोगात्तु परं नित्यं संशयो विनिवर्तते ११

संयोगः परतो यत्र अनुस्वारस्तु पूर्वशः
ह्रस्वं तं तु विजानीयात्संस्थे इति निदर्शनम् १२
अनुस्वारस्योपरिष्टात्संवृतो यदि दृश्यते
स दीर्घ इति विज्ञेय उभयं शृणु तच्च नः १३
मात्रादिद्विमात्रोऽनुस्वारो द्विमात्रान्मात्रा एव च
मात्रिकादपि संयोगे मात्रिकस्य द्विरूपवत् १४
इति सप्तमः खण्डः

यवौ तु रेफसंयुक्तौ रेफ आद्यो भवेद्यदि
पूर्वाङ्गं तद्विजानीयात्सूर्यपूर्वनिदर्शनम् १
यवौ तु रेफसंयुक्तौ विरते च भवेद्यदि
पराङ्गं तद्विजानीयातरो हर्येति लक्षणम् २
आसन्नाच्च महानाच्च यातुधानाच्च यो यथा
न एते नकारपूर्वास्युर्निर्दिशन्ति विचक्षणाः ३
हकारो यत्र दृश्येत वर्गान्तैः संयुतः क्वचित्
इहादयस्तु विज्ञेयाः पृथग्युक्तौ च भावयेत् ४
रेफपूर्वो हकारस्तु रेफात्परमथापिवा
अनुस्वारात्परो यत्र हकारः क्रमति त्रिषु ५
अनुस्वारपराः शषसा न क्रामन्ति कदा चन
तत्र क्रामन्ति शषसा अन्तस्थैः परतो यदि ६
सूर्यरश्मिप्रतीकाशः कणिकः यत्र दृश्यते
अणोस्तु तत्प्रमाणं स्यान्मात्रा तु चतुराणुवत् ७

हृदयस्थमणु विद्यात्कण्ठे विद्याद्विराणुवत्
त्रिराणवन्तु जिह्वाग्रे निसृतं मात्रिक भवेत् ८
चाषस्तु वदते मात्रां द्विमात्रां वायसोऽब्रवीत्
शिखी त्रिमात्रो विज्ञेय एष मात्रापरिग्रहः ९
एकमात्रो भवेद्ध्रश्वो द्विमात्रो दीर्घ उच्यते
प्लुतस्त्रिमात्रो विज्ञेयः व्यञ्जनं चार्धमात्रिकम् १०
विश्वस्पतोदस्य काकपदं सर्वमत्रचतुर्थन्न वर्द्धन्त एतानि वर्द्धन्ते
यथा दश्चरति रान्द्रस्त्विन्द्रसच्छू
ऋतपमात्वासूगोलारात्पतन्ती च रहस्ये
बर्हिष्यादीनामपरिस्वारो व्यञ्जनलोपो व्यञ्जनलोपः १२
यथा बालस्य सर्पस्य निश्वासोपहतस्य च
वमूष्माप्रयोक्तथोहकारं परिवर्जित १३
यथाधनुषाव्यतेन क्षिप्ते शरे पुनर्गुणः
स्वस्थानं प्रतिपद्येत तद्वद्वस्तगतः स्वरः १४
शून्यगृहेऽपिशाचस्क्त गर्जते नव दृश्यते
एवं यकारावक्तव्याधियग्निड्र्म निदर्शनम् १५
शुभं भवतु

इति लोमशी शिक्षा समाप्ता

Nāradi Śikṣā, Gautamī Śikṣā, Lomaśi Śikṣā, complete in 30 folios, 5237, 5238, 5239. Raghunath Temple Sanskrit Manuscript Library, Jammu: Manuscripts of Dharmartha Trust (धर्मार्थ ट्रस्ट) at Raghunath Temple, Jammu, J&K. Digitized by eGangotri; posted on archive.org.

Tripāthī, Śrī Rāma Prasāda, ed., *Śikṣhāsaṁgrahaḥ*, (Vārānasi: Sampurnand Sanksrit University, 1989), pp. 375-381.

# आत्रेयशिक्षा

## आत्रेयशीक्षाकारिका

कारिकां सम्प्रवक्ष्यामि प्रथमं पारिभाषिकम्
संहिताविषयं वेदपारायणफलं ततः १
पारायणक्रमश्चैव वाग्वृत्तिः पदलक्षणम्
क्रमस्याथ जटायाश्च शुद्धवर्णक्रमस्य च २
लक्षणं च क्रमात्तत्र यौ च द्वित्वागमौ स्मृतौ
तयोरभिनिधानस्य केवलाख्यागमस्य च ३
यमानां तन्निषेधानां द्वित्वागमनिषेधयोः
लक्षणं स्वरभक्तीनां सोदाहरणसंज्ञिकाः ४
विवृत्तेर्लक्षणं तस्यां संज्ञोदाहरणानि च
व्यक्तिमध्यस्थनासिक्यो रङ्गाख्यप्लुतदीर्घयोः ५
लक्षणं स्वरितोदात्तकम्पानां च विशेषतः
स्याद्वैकृतप्राकृतयोर्नासिक्यौरस्ययोरपि ६
विधिश्च जिह्वामूलीय्योपध्मानीयाख्ययोरपि
स्थितिसन्धिविधिश्चैव तथा प्रणवलक्षणम् ७
स्वरवर्णक्रमस्तत्रोदात्तादीनां निरूपणम्
उदाहरणसंयुक्तसप्तस्वरितलक्षणम् ८
तत्प्रयत्नप्रभेदाश्च मात्रावर्णक्रमस्तथा
मात्रामाननिरूपं च मात्राकालोक्तिविध्यपि ९
अङ्गवर्णक्रमस्तत्र परपूर्वाङ्गलक्षणम्
अङ्गवर्णक्रमोक्तेश्च सुस्पष्टं लक्षणं ततः १०
निर्वचनं वर्णसारभूतवर्णक्रमस्य तु

सङ्ख्या च वर्णधर्माणां तदुक्तेरानुपूर्विका ११
भक्त्यनुस्वारकम्पानां रङ्गस्याप्युक्तिलक्षणम्
शब्दोत्पत्तिप्रकारश्च तत्र ध्वनिनिरूपणम् १२
शरीरान्तर्गतं तत्र सर्वव्यापारलक्षणम्
जाठराग्निस्थितिः पञ्चवायूनां स्थानचेष्टिकाः १३
ध्वनिभेदास्तत्र जातवर्णानां च विनिश्चयः
तेषां तु स्थानकरणविवेकस्तत्प्रकारकः १४
प्रयत्नभेदा वर्णानां देवताजातिसंज्ञकाः
उदात्तादिस्वराणां च देवता जातयो गुणाः १५
ततो हस्तस्वरन्यासलक्षणं तस्य तत्फलम्
अङ्गाद्यवस्था षड्जादिसप्तस्वरनिरूपणम् १६
उदात्तादिस्वरोत्पत्तिर्वेदस्य महिमा ततः
विकृत्यष्टकसंयुक्तवेदस्याध्ययने फलम् १७
इत्येवमानुपूर्व्येण शीक्षा सम्प्रोच्यतेऽधुना १८
इत्यात्रेयशीक्षाकारिका समाप्ता

## आत्रेयशीक्षामूलम्

## परिभाषा

आम्नाया यस्य निःश्वासाश्चन्द्रसूर्यौ च चक्षुषी
तत्प्रणम्य परं ज्योतिः शीक्षां वक्ष्यामि निर्मलाम् १
अचः स्वरा इति प्रोक्ता व्यञ्जनानि हलः स्मृताः
ह्रस्वदीर्घप्लुतावर्णेवर्णोवर्णा ऋ ॠ ऌ च २

एदैदोदौदिति ज्ञेयाः षोडशेहादिताः स्वराः
कखौ गघौ ङचछजा झञौ टठडढा णतौ ३
थदौ धनौ पफबभा मः स्पर्शाः पञ्चविंशतिः
यरौ लवौ चतस्त्रोऽन्तस्स्थाश्च ≍कशषस≍पहाः ४
षडूष्मानो विसर्गोऽनुस्वारो ळो नास्यपञ्चकम्
इत्येते याजुषा वर्णा एकोनाः षष्टिरीरिताः ५
क्रमेण पञ्च पञ्च स्युः स्पर्शानां वर्गसंज्ञिकाः
वर्गेषु तेषु संज्ञाः स्युश्चतुर्णां प्रथमादयः ६
पञ्चमस्योत्तमः प्रोक्तो घोषाघोषौ तु तेषु वै
हान्योष्मा प्रथमाश्चैव विसर्गश्च द्वितीयकाः ७
अघोषाः स्युश्च तेभ्योऽन्ये घोषवन्तो हलः स्मृताः
परिविन्याभ्युपप्रावप्रत्यधीत्युपसर्गकाः ८
कारशब्दोत्तरो वर्णो वर्णाख्या प्रतिपाद्यते
व्यञ्जनानामकारः स्याच्छषसेत्यादिसङ्ग्रहात् ९
ह्रस्वोऽदिदुदृकारश्च तथल्कारः स्वरेषु वै
वर्गोत्तरस्तु वर्गाख्या प्रथमो भवतीत्यपि १०

संहिताविषयम्

आरम्भे यजुषः शाखा या स्यात्सा संहिता स्मृता
काण्डप्रश्नानुवाकाद्यैः प्रविभक्तान्तरान्तरा ११
यास्ततोऽन्या यजुश्शाखा न तासां विकृतीः पठेत्
संहिताग्रन्थमात्रस्य सविशेषौ पदक्रमौ १२
जटा वर्णक्रमाश्चैव क्रमाद्विकृतयः स्मृताः

केवलः स्वरसंयुक्तो मात्रिकासहितस्तथा १३
साङ्गश्च वर्णसारश्च पञ्च वर्णक्रमान् विदुः

वेदपारायणफलम्

सर्वथा नाधिगन्तव्यो वेदो लिखितपाठकः १४
अध्येतव्यः सविकृतिर्द्विजैर्यत्नाद्गुरोर्मुखात्
वेदेष्वक्षरमेकैकमेकैकं हरिनामकम् १५
अन्यूना स्वरतश्चैव वर्णतो या च संहिता
सकृत्पारायणे तस्या यावत्फलमिहोच्यते १६
त्रिगुणं तत्पदे तस्मात्क्रमे त्वष्टगुणं भवेत्
जटाध्याये शतं प्रोक्तं शुद्धवर्णे सहस्रकम् १७
स्वरवर्णेऽयुतं विद्यान्नियुतं मात्रिकायुते
प्रयुतं त्वङ्गवर्णे स्यादनन्तं वर्णसारके १८

पारायणक्रमम्

प्रायश्चित्तविधौ कृच्छ्रे ब्रह्मयज्ञे क्रियाविधौ
संहितापठनं कुर्यान्नियमान्न पदादिकान् १९
उत्सवार्थं तु देवेशे निर्गते गर्भगेहतः
क्रमादिकं पठेद्यद्वा तथोपनिषदं पठेत् २०

अनध्ययनप्रकरणम्

यस्तु पारायणं हित्वा कालातिक्रमशङ्कया
कुर्यात्सन्ध्यां स निष्कर्मी विज्ञेयस्तत्र पातकी २१
प्राप्ते महाप्रदोषेऽपि तदा देवेशसन्निधौ
अनद्ध्ययनमानेन न च पारायणं त्यजेत् २२

त्यजेद्यदि तदा मोहाद्ब्रह्महत्यां समाविशेत्

वाग्वृत्तिः

वाचस्तु वृत्तयस्तिस्रो द्रुतमध्यविळंबिताः २३
आवृत्यावृत्य चाभ्यासे द्रुतवृत्या पठेद् द्विजः
पारायणे प्रयोगार्थे मध्यमां वृत्तिमाचरेत् २४
बोधनार्थं तु शिष्याणां वृत्तिं कुर्याद्विळंबिताम्

पदलक्षणम्

पदाध्याये पदान्ते यदितिशब्दं प्रयुज्य च २५
पुनरुच्चार्यते द्वेधा तद्वेष्टनपदं स्मृतम्
यत्पदं वेष्टनोपेतं तदिङ्ग्यमिति कथ्यते २६
इङ्ग्यते हि पदस्यार्थ इत्यस्मादिङ्ग्यमुच्यते
विभागवत्पदस्यार्थो विभागे न विचाल्यते २७
इत्येवमिङ्ग्यशब्दार्थस्तस्य पूर्वं त्ववग्रहः
पर्यादीनि दशप्रोक्तान्युपसर्गपदानि च २८
अन्वपाद्यपिसूत्सन्निःपरा नव पदानि च
इत्यन्तानि स्युरेतानि पदान्येकोनविंशतिः २९
वाक्यान्तगं द्वयोरादि निहतं त्रिषु मध्यमम्
अवग्रहेऽत्र नेत्यन्तं यत्तत्स्यादध्वराव च ३०
लक्षणैः प्रग्रहा ये स्युरित्यन्तास्ते पदे सति

क्रमलक्षणम्

संहितावत्पठेत्पूर्वमनुक्रम्य पदद्वयम् ३१
द्वितीयं तत्र पदवदवसाने समापयेत्

ततस्त्वादिपदं हित्वा द्वितीयं च तृतीयकम् ३२
पठेत्ततस्तद्द्वितीयं पदं हित्वा तृतीयकम्
चतुर्थं च पठेत्पश्चात् क्रमादेवं पठेत्पुनः ३३
पूर्वं पूर्वं पदं मुक्त्वा संयुज्योत्तरमुत्तरम्
एवमुच्चार्यते यस्तु क्रमाध्यायः स उच्यते ३४
क्रमे तावत्तथोच्चार्ये यदीङ्ग्यं पूर्विकं पदम्
पठित्वा वेष्टनं तस्य पठेत्पश्चाद्यथाक्रमम् ३५
पूर्ववाक्यान्तगं यच्च परवाक्यादिकं तथा
तयोर्नानुक्रमेत्तद्वदन्तमाद्यनुवाकयोः ३६
प्रग्रहानिङ्ग्ययुक्तं च यदि स्यादादिमं पदम्
अखण्डवेष्टनं तस्य वाक्यान्ते यदनिङ्ग्यकम् ३७
पदे तु यद्यदित्यन्तं तन्नेत्यन्तं पठेत्क्रमे
षणत्वटत्वविधिना सह नित्यमनुक्रमेत् ३८
आदन्तं यदुदात्तान्तं पूर्वं यद्युपसर्गतः
तस्योर्ध्वेन त्रिक्रमः स्यान्नः परं षुपदं त्वधः ३९
पदत्रयमनुक्रम्य हित्वा चादिपदं पुनः
मध्यमान्तिममुच्चार्य त्रिक्रमे क्रमशो वदेत् ४०

इति द्वितीयोऽध्यायः

## जटालक्षणम्

क्रमवत्पूर्वमुच्चार्य प्रतिलोमं पठेच्च तत्
सन्धितश्च पुनः कुर्यात् क्रमपाठं पदद्वयम् ४१
एवं पाठक्रमो यस्तु सा जटेति प्रकीर्तिता

अखण्डवेष्टनेङ्ग्यादि यद्यदुक्तं क्रमे यथा ४२
तत्र तत्र तथा सर्वं जटायां च पठेद्बुधः
त्रिक्रमे त्रिपदस्यापि जटामुक्त्वा यथाविधि ४३
ततस्तत्र द्वितीयादिपदानां पूर्ववत्पठेत्
तुल्यं पदद्वयं यत्र स्वरतो वर्णतोऽपि वा ४४
न पठेत्तु जटां तत्र क्रममात्रं पठेत्सदा
लोपालोपादयो ये च षत्वणत्वादयश्च ये ४५
जटायां लक्षणैरुक्तास्तान् पठेत्तु यथाविधि

केवलवर्णक्रमलक्षणम्

ये अत्र सांहिता वर्णाः समाम्नाताश्च शास्त्रतः ४६
तान्सर्वान्कारशब्दान्तान्वदेद्वर्णक्रमोक्तिषु
अकारेण व्यवेतः स्यात्कारशब्दो हलामिह ४७
अनुस्वारे च नासिक्ये जिह्वामूल्यविसर्गयोः
उपध्मानीयवर्णे च कारशब्दस्तु नेष्यते ४८
रस्य त्वेफस्त्रयाणां च ह्रस्वो वर्णोत्तरो भवेत्
स्वरात्कारपरादर्वाङ् न सन्धिर्वर्णपाठके ४९
तान्सदीर्घविसर्गांश्च वदेदुक्तिसमापने
पूर्वं वर्णक्रमोक्तेस्तु तत्तावत्संहितां पठेत् ५०
यस्तु संहितया हीनाञ्छुष्कान्वर्णक्रमान्वदेत्
निष्फलं स्याद्यथा भित्तिहीनं चित्रविलेखनम् ५१
येनावसीयते वाक्यं वर्णेनापि स्वरेण च
तमेव वर्णपाठेषु प्रवदेन्न च सांहितम् ५२

एतेन विधिना विद्वान् क्रमाद्वर्णक्रमान् वदेत्

द्वित्वप्रकरणम्

अच्पूर्वं व्यञ्जनोर्ध्वं यद् व्यञ्जनं द्वित्वमाप्नुयात् ५३
स्पर्शश्च लवपूर्वो यो यत्तु रेफात्परं च तत्
ह्रस्वपूर्वौ पदान्तस्थौ ङनौ द्वित्वं परेऽप्यचि ५४
योऽनुस्वारो यजुष्यत्र स स्यादर्धगकारयुक्
यद्यात्माधः सरूर्ध्वे च शान्तिः शोर्ध्वे न गो भवेत् ५५
योगात्पूर्वमनुस्वारो ह्रस्वाद्यश्च परस्थितः
स एव द्वित्वमाप्नोति तस्य स्यादेकमात्रता ५६

आगमः

व्यञ्जनं यन्निमित्तेन द्वित्वमाप्नोति तेन वै
पूर्वागमः क्रमात्तत्र स्याद्द्वितीयचतुर्थयोः ५७
अखण्डे स्वरयोर्मध्ये यदि द्वित्वागमौ पदे
लक्ष्यानुसारसंज्ञौ तौ भवेतां लक्षणैः पृथक् ५८
पाथएषोऽतिधामातिभूतेपरमपूर्विकाः
तथोपसर्गपूर्वाश्चागमं छखिभुजा इयुः ५९
प्रथमस्योष्मणि परे द्वितीयादेशकः पदे
समे वर्णद्वयं भिन्ने . . . . . . . . . . . ६०
तैत्तिरीये शपूर्वस्य नस्य ञः स्यान्न काठके

इति तृतीयोऽध्यायः

अभिनिधानम्

अघोषादूष्मणः स्पर्शपराद्यत्र परस्थितः ६१

प्रथमोऽभिनिधानः स्यात्तस्य सस्थान एव च
शसौ यत्रागमौ स्यातां प्रथमः परतो यदि ६२
न तत्राभिनिधानोक्तिः प्रथमं द्विर्वदेद्बुधः

केवलागमः

नीचापूर्वस्तथोच्चोर्ध्वौ दकारः केवलागमः ६३
तथोत्तरे ङतोऽनन्त्यादागमौ स्तः कगौ क्रमात्

यमाः

स्याद्यत्रानुत्तमात्स्पर्शादुत्तमः परतो यदि ६४
क्रमेण स्युर्यमास्तत्र नान्तस्था परतो यदि

यमनिषेधः

स्पर्शो यद्यूष्मविकृतिर्न तत्र स्याद्यमागमः ६५
यत्र यस्माद्यमप्राप्तिस्तत्रोष्मा वर्तते यदि
नैव तत्र यमावाप्तिरप्यूष्मा द्वित्वमाप्नुयात् ६६
योऽपदान्ते पदान्ते वा प्रथमः स्यात्सषोत्तरे
स द्वितीयमवाप्नोति शोर्ध्वेऽनन्त्यः स चेत्तथा ६७

नादः

ह्रस्वात्परस्तु यो नादो भवत्यत्र द्विरूपवत्
तं च वर्णक्रमाध्याये सकृदेव वदेद्बुधः ६८

द्वित्वागमनिषेधः

प्राप्ते पूर्वागमद्वित्वलक्षणे यस्य वै हलः
द्वित्वं पूर्वागमश्चैव निवर्तेत तदुच्यते ६९
द्विरूपं नाप्नुयादूष्मा प्रथमोऽर्ध्वेऽच्परेऽपि वा

वकारश्च परे स्पर्शे विसर्गो रेफ एव च ७०
लकार ऊष्मणि स्पर्शे पर ईदैदधश्च यः
सवर्गीयानुत्तमोर्ध्वे स वर्णोर्ध्वे च हल्तथा ७१
मः स्पर्शयवलोर्ध्वश्चेत्तेषामेत्यनुनासिकम्
दीर्घात्परोऽन्तगो वोर्ध्वे न द्विर्न्नो न व्य वृ ग्व्र च ७२
परोऽपि ह्रस्वदीर्घाभ्यां न च द्वित्वं यहोत्तरे

स्वरभक्तिविषयम्

आप्नुतो रलयोर्यस्मादूर्ध्वे सत्यच्परोष्मणि ७३
ऋलृस्वरार्धावादेशौ तस्मात्स्यात्स्वरभक्तिता
चतुर्भिरिव सा श्लिष्टा पादैरज्व्यञ्जनात्मका ७४
आद्यन्तौ तेषु पादेषु पादौ स्यातां स्वरात्मकौ
स्थितौ मध्ये तु यौ पादौ तौ ज्ञेयौ व्यञ्जनात्मकौ ७५
पादं द्वितीयं पादेन प्रथमेनैव योजयेत्
तृतीयं च चतुर्थेन पादं पादेन योजयेत् ७६
एवं तत्र क्रमात्पादौ द्वौ द्वौ तु विभजेत्पृथक्
हलन्ता स्यात्पूर्वभागस्वरभक्तिस्तु संवृता ७७
भक्तिरुत्तरभागा स्याद्विवृता च स्वरोदया
पूर्वभागो हकारे स्याच्छषसेषूत्तरस्तथा ७८
अत्वमित्वं तथोत्वञ्च भक्तेरूर्ध्वस्वरस्य च
त्रयमेतदनुच्चार्य स्वरभक्तिं समुच्चरेत् ७९

स्वरभक्तीनां सोदाहरणसंज्ञाः

बर्हिः करेणुसंज्ञा स्याद्योगे तु रहयोर्यदि

सा मल्हा कर्वणी ज्ञेया संयोगे लहकारयोः ८०
वर्षं  हंसपदा ज्ञेया योगे तु रषयोरपि
शोत्तरे हरिणी रेफो दर्शः पर्शुरुदाहृतः ८१
सपरे यत्र रेफः स्याद्धस्तिनी बर्समित्यपि
तस्य धूर्षदमित्यादौ सा स्वतन्त्रा प्रचक्षते ८२
हारिता लशयोर्योगे शतवल्शमुदाहृतम्
क्रमेणैवं सुविज्ञेयाः सप्तैताः स्वरभक्तयः ८३

इति चतुर्थोऽध्यायः

विवृत्तिलक्षणं तस्याः संज्ञाश्च

स्वरयोरुभयोः सन्धिर्विवृत्तिरिति कथ्यते
ऋत्र सैव विवृत्तिस्तु व्यक्तिरित्यपि चोच्यते ८४
वत्सानुसृतिराख्याता तथा वत्सानुसारिणी
वैशेषिका पाकवती मध्यमा च पिपीलिका ८५
तथा सवर्णदीर्घी चोभयदीर्घी तथा स्मृता
इत्येवमष्ट संज्ञाः स्युर्विवृत्तीनां तु भेदतः ८६
ह्रस्वपूर्वा च या व्यक्तिस्तथैवोत्तरदीर्घिका
सा वत्सानुसृतिः प्रोक्ता समात्राकालतस्तथा ८७
ह्रस्वात्पूर्वे विवृत्तिः स्यात् प्लुताद्दीर्घात्परा च या
वत्सानुसारिणी सेयमेकमात्रेण संयुता ८८
व्यक्तेराद्यन्तयोर्यस्या दीर्घौ यद्यसवर्णकौ
यदि मध्ये विसर्गः स्यात् तदभावोऽथवा यदि ८९
सा तु वैशेषिकाख्या स्यादेकमात्रा च तत्र वै

पूर्वे यत्रोत्तरे चैव ह्रस्वो यदि भवेत्तदा ९०
पादोनमात्रिका तत्र सा च पाकवती स्मृता
यस्याः सवर्णदीर्घौ स्त उभयत्रोच्चनीचकौ ९१
विसर्गस्तत्र च स्वारः सन्धौ मात्रा च मध्यमा
मध्यमालक्षणे तत्र विसर्गो न भवेद्यदि ९२
पिपीलिकेति विज्ञेया सा व्यक्तिः पादमात्रिका
सवर्णदीर्घौ यद्यादावन्ते भिन्ने विसर्गकः ९३
सवर्णदीर्घ्येकमात्रा न सन्धौ स्वरितो यदि
तस्याः स वर्णदीर्घ्यास्तु संपूर्णे लक्षणे सति ९४
विसर्गस्तत्र नो चेत्सा समात्रोभयदीर्घ्यथ

विवृत्त्युदाहरणम्

उदाह्रियन्ते वत्सानुसृत्यादिव्यक्तयः क्रमात् ९५
वत्सानुसृतिसंज्ञा स्यात्त एनं भि स आयुरा
वत्सानुसारिणी प्रोक्ता सेदग्ने अस्तु वा इयम् ९६
वैशेषिका स्यात्ता एव कक्षीवाँ औशिजस्तथा
सा तु पाकवती ज्ञेया प्रउगं च स इञ्जने ९७
मध्यमा या आविविशुर्वेद्या आदन्यदित्यपि
पिपीलिका तु ते एनं वा आरण्यमुदाहृतम् ९८
सवर्णदीर्घी संयुक्ता आसन्नित्यादिदर्शनात्
इयं तूभयदीर्घी स्याद्वा आपस्त तथेत्यपि ९९

व्यक्तिमध्यनासिक्यः

नासिक्यो व्यक्तिमध्ये यः स भवेत्साणुमात्रिकः

व्यक्तेश्च साणुमात्रत्वं नाम पूर्वोक्तमेव हि १००

रङ्गप्लुताः

यशो ममोपहूताँ च सुश्लोकाँ च सुमङ्गलाँ
एते रङ्गप्लुता ज्ञेयास्तथा यद्घ्राँ इतीत्यपि १०१
रङ्गप्लुते द्विमात्रं स्यादादौ व्याघ्ररुतोपमम्
अनास्यं हृदयोत्पन्नं मन्द्रध्वनियुतं भवेत् १०२
अथ मध्यमभागे स्यात्तृतीयो मूर्धसंभवः
कांस्यघण्टानादसमः स कम्पस्त्वेकमात्रिकः १०३
अथान्त्यभागे नासिक्य रन्ध्रद्वयविनिस्स्रुतः
एकमात्रस्तुरीयांशः स तु काकळिको भवेत् १०४
यथा सौराष्ट्रिका गोपी मधुरेण स्वरेण वै
तक्राँ इत्युच्चरेदुच्चैस्तथा रङ्गं समुच्चरेत् १०५

रङ्गदीर्घाः

देवाँ उ ताँ इम्यमृवाँ अव स्वाँ अह काठके
रङ्गदीर्घा इति प्रोक्तास्ते सपादत्रिमात्रिकाः १०६
हृज्जातो मात्रिकस्तस्मिन् स्यात्सपादत्रिमात्रिके
मूर्धजस्त्वर्धमात्रः स्यात् तच्छेषो मुखनासिकात् १०७

इति पञ्चमोऽध्यायः

स्वरितोदात्तकम्पविषयम्

नित्याभिनिहितक्षैप्रप्रश्लिष्टाः स्वरिता इमे
सन्धौ तत्र प्रकम्पन्ते यत्रोच्चस्वरितोदयाः १०८
नीचं पूर्वस्वरस्यान्ते कुर्यात्स्यात्कम्प एव सः

ह्रस्वमप्यत्र कम्पेऽस्मिन् यथा दीर्घं तमुच्चरेत् १०९
स च कम्पोऽत्र विज्ञेयः स्वार उच्च इति द्विधा
स्वारकम्पः संहितायामुच्चस्त्वारण्यके भवेत् ११०
पुनश्च तत्र तौ कम्पौ ह्रस्वदीर्घाविति स्मृतौ
आदौ तु तस्य कम्पस्य स्वारः स त्र्यणुमात्रिकः १११
अन्त्यभागे तु निहतः पादमात्रः प्रकीर्तितः
उदात्तश्च तथैवादौ त्रिपादाधिकमात्रिकः ११२
तस्यान्ते चानुदात्तः स्यादणुमात्रो भवेत्तथा
सम्मेळने द्विमात्रः स्यात्तयोरेवं सुनिश्चितः ११३

वैकृतप्राकृते

शषसेष्वच्परेष्वत्र विसर्गो यत्र दृश्यते
वैकृतत्वं प्राकृतत्वं क्रमात्स्याच्छ्लिष्ट एव हि ११४

नासिक्यत्वोरस्यत्वे

हकारान्नणमा यत्र दृश्यन्ते परतस्तदा
नासिक्यत्वमुरस्यत्वं हस्तु तत्र द्विरुच्यते ११५

व्यक्तिमध्यस्थविसर्गः

विवृत्तिमध्ये यत्र स्याद्विसर्गः सोऽर्धमात्रिकः
विरामश्चैकमात्रः स्यात्तस्याः संज्ञा यथाविधि ११६

जिह्वामूलीयोपध्मानीयविधिः

प्राग्यद्यघोषवर्णाभ्यां विसर्गः कपवर्गयोः
क्रमात्स जिह्वामूलीय उपध्मानीय उच्यते ११७

स्थितिसन्धिः

ककारः षपरो यत्र भवेत्तस्मिन् परे सति
पूर्वस्थितो विसर्गः स्यात् स्थितिसन्धिरिति स्मृतः ११८

स्वरहीनस्य वर्णस्य वाचकं नाम

वर्णस्य स्वरहीनस्य नाम वाचकमुच्यते
वर्णक्रमस्याध्ययने न वदेदन्यसंज्ञिकाम् ११९

केवलानुस्वारः

योऽनुस्वारः केवलाख्यः स मध्यस्थो विधेरपि
तत्परस्य तु योगादेर्न जातु द्वित्वमिष्यते १२०

प्रणवलक्षणम्

अादौ प्रारम्भकोङ्कारे त्वकारः पादमात्रिकः
स त्रिपादद्विमात्रः स्यादुकारो मस्तुमात्रिकः १२१
अध्यायान्तेऽनुवाकान्ते मकारस्त्वर्धमात्रिकः

सन्धिनिषेधः

वर्णक्रमप्रपाठेषु स्वरात्कारपरादधः १२२
हरिः प्रणवमध्येऽपि सन्धिर्न स्यात्प्लुतेषु च

स्वरवर्णक्रमलक्षणम्

शुद्धवर्णक्रमे तस्मिन्नुच्यमाने यथा क्रमम् १२३
तत्रोदात्तानुदात्तौ च प्रचयश्च त्रयः स्वराः
तथैव सप्त स्वरिताः सप्रयत्नाः स नामकाः १२४
दशैतांस्तत्र तत्रैव स्वरेभ्योऽर्वाक्प्रयोज्य च
प्रवदेद्यदि नाम्नासौ स्वरवर्णक्रमो भवेत् १२५
व्यञ्जनानामुदात्तादीन्वर्णोक्तौ न वदेत्स्वरान्

## उदात्तादीनां संज्ञा

तत्र तावदुदात्ताद्याः स्वरास्तन्नाम वाचकः १२६
प्रयत्नाश्च क्रमेणैव निरूप्यन्ते यथाविधि
उच्चैरुदात्तो नीचैस्तु निहतश्चानुदात्तकः १२७
स्वरितः स्यात्समाहारः स्वार इत्यपि चोच्यते
परेषामनुदात्तानां स्वरितात्पदवर्तिनाम् १२८
संहितायां तु प्रचय उदात्तश्रुतिरिष्यते
धृतप्रचयशब्दौ च पर्यायौ स्तः परस्परम् १२९
इति षष्ठोऽध्यायः

## सप्तस्वरितलक्षणानि सोदाहरणानि

स्वाराः सप्तविधा ज्ञेयास्तत्प्रयत्नाश्चतुर्विधाः
क्षैप्रः प्राथमिकः स्वारो द्वितीयो नित्यसंज्ञकः १३०
तृतीयः स्यात्प्रातिहतश्चतुर्थो नामतो द्विधा
तत्राभिनिहतश्चैक इतरोऽभिहतः स्मृतः १३१
प्रश्लिष्टः पञ्चमः षष्ठो वृत्तः स्यात्पादवृत्तकः
तैरोव्यञ्जनसंज्ञो यः स्वरितः सप्तमो भवेत् १३२
इवर्णोतोर्यवत्वे सत्युच्चयो स्वर्यते च यः
स च क्षैप्राभिधः स्वारस्त्र्यम्बकं द्र्वन्न इत्यपि १३३
पदे स्थितेऽप्यपूर्वे वा नीचपूर्वे यवाक्षरम्
स्वर्यते यत्र नित्यः स्यान्न्यञ्चं कुह्वा उदाहृतम् १३४
उच्चे नानापदस्थेऽपि श्लिष्टेन स्वर्यते च यः
स प्रातिहत एव स्यात्स इधानः स तेजसम् १३५

नानापदे ह्युच्चपूर्वं नीचं यत्स्वर्यते यदि
व्यक्तेरभावे भावेऽपि स प्रातिहत इष्यते १३६
तस्मिन्नकारलोपश्चेत्पृथग्भूतपदे तदा
स्वारोऽभिनिहतो ज्ञेयः सोऽब्रवीत्तेऽब्रुवन्नपि १३७
उदात्तपूर्वे तस्मिन् स्याद्भावः स्वर्यते यदि
प्रश्लिष्टाख्यः स सूद्गाता सून्नीयमिव यस्तथा १३८
या त्वखण्डपदे व्यक्तिः सा भवेदर्धमात्रिका
यस्तस्याः परतः स्वारः पादवृत्तः स कथ्यते १३९
मध्ये पदस्य या व्यक्तिस्तस्यां च स्वरितश्च यः
स एव पादवृत्तः स्यात् प्रउगं नान्यदिष्यते १४०
तिरस्तिर्यगिति प्रोक्तं हल्व्यञ्जनमिति स्मृतम्
तेन व्यवेतो यः स्वारस्तैरोव्यञ्जनसंज्ञकः १४१
व्यञ्जनेन व्यवहितः पदे तूदात्तपूर्वकः
स्वरितो यः स एव स्यात्तैरोव्यञ्जन उच्यते १४२
यः समानपदे स्वारः स्वर्यते ह्युच्चपूर्वकः
स तैरोव्यञ्जनो ज्ञेय आपो वाचमुपायवः १४३

स्वरितानां प्रयत्नभेदः

क्षैप्रे नित्ये प्रयत्नः स्यात्स्वारे दृढतरो भवेत्
नीचपूर्वेऽभिनिहते प्रयत्नोऽतिदृढः स्मृतः १४४
उच्चपूर्वेऽप्यपूर्वे च प्रयत्नो दृढ इष्यते
प्रश्लिष्टप्रातिहतयोः स वै मृदुतरः स्मृतः १४५
स तैरोव्यञ्जने पादवृत्ते चाल्पतरः स्मृतः

एवं स्वरितभेदानां प्रयत्नानां च भेदतः १४६
विवक्षया लक्षणानि तेषामुक्तानि शास्त्रतः
एतत्सर्वं विदित्वैव स्वरवर्णक्रमं वदेत् १४७

मात्रावर्णक्रमलक्षणम्

अथातः संहिताध्याये लक्षणैरानुपूर्व्यशः
भवन्ति यद्यद्वर्णानां यद्यत्कालाः सुनिश्चिताः १४८
तत्र तत्र च ते सर्वे स्वरवर्णे यथाविधि
उदात्तादिस्वरेभ्योऽर्वाक् प्रयुज्यन्ते तथा यदि १४९
एवं पाठक्रमो यः स्यान्मात्रिकावर्ण उच्यते

इति सप्तमोऽध्यायः

मात्राकाललक्षणम्

मात्राणां कालनियमा उच्यन्ते हेतुभिः पृथक् १५०
ब्राह्मणी नकुलश्चाषो वायसश्च शिखी क्रमात्
अणर्वधैकद्वित्रिमात्रान् ब्रुवते कालतः सुखम् १५१
इन्द्रियाविषयो योऽसावणुरित्युच्यते बुधैः
चतुर्भिरणुभिर्मात्रापरिमाणमिति स्मृतम् १५२
एकमात्रो भवेद्ध्रस्वो दीर्घः स्यात्तु द्विमात्रिकः
त्रिमात्रिकः प्लुतो ज्ञेयो ह्रस्वार्धं त्वर्धमात्रिकम् १५३
तत्र रङ्गप्लुतो यः स्याच्चातुर्मात्रः स कथ्यते
तं तु व्याघ्ररुतान्ते यो घण्टानादोऽनुवर्तते १५४

मात्राकालोक्तिविवेकः

संयुक्तं वाप्यसंयुक्तं व्यञ्जनं सस्वरं यदि

स्वरकालं वदेत्तत्र न पृथग्व्यञ्जनस्य तु १५५
सिद्धेऽप्यर्धाणुमात्रत्वे सस्वरे वा पृथग्घलि
तथापि न वदेत्तस्य कालं वर्णक्रमेषु वै १५६
हलस्त्ववसिता यत्र तत्रैषां काल इष्यते
अनुत्तमे त्वर्धमात्रो विरामस्थे विधीयते १५७
विरामस्थेषूत्तमेषु कालाधिक्यं प्रदृश्यते
पूर्वेऽनुनासिकं ह्रस्वाद्द्विमात्रं यत्तदुच्यते १५८
दीर्घात्प्लुताच्च तन्नादमेकमात्रमिति श्रुतिः
अवसाने विशेषोऽयमन्येषां च न विद्यते १५९
संहितायां तु तन्मात्रः पदकालेऽधिको भवेत्
ह्रस्वात्परोऽवसानस्थः पदाध्यायेऽनुनासिकः १६०
द्विमात्रो मात्रिकस्त्वन्यः संहितायां तथाखिलः
तत्तत्कालान्विदित्वैवं मात्रकावर्णमुच्चरेत् १६१

## अङ्गवर्णक्रमलक्षणम्

अङ्गवर्णौ हलामादावङ्गं संज्ञां च नाम च
अचां संज्ञां च मात्रां च स्वरं नाम वदेत्क्रमात् १६२

## अङ्गलक्षणम्

वर्णानामङ्गवर्णोऽस्मिन् सुव्यक्तं चाङ्गलक्षणम्
पूर्वत्वेन परत्वेन विधिना वा सहोच्यते १६३
राजतेऽसौ स्वयं यस्मात्तस्मात्तु स्वर उच्यते
उपरिस्थायिना तेन व्यङ्ग्यं व्यञ्जनमुच्यते १६४
न शक्यं केवलं स्थातुं व्यञ्जनं तु स्वरं विना

सापेक्षं व्यञ्जनं नित्यं स्वरस्तु निरपेक्षकः १६५
व्यञ्जनानि च सर्वाणि स्वराङ्गानि भवन्ति हि

पराङ्गपूर्वाङ्गलक्षणम्

भवेत्परस्वरस्याङ्गं व्यञ्जनं प्रायशोऽपि हि १६६
तत्र पूर्वस्वराङ्गं स्यादवसाने स्थितं च यत्
परायुक्तमनुस्वारो विसर्गौ भक्तिरेव च १६७
योगाद्यसंयुतो ङो नो रेफः स्यादृपरे सति
पूर्वाङ्गं न भवेत्स्पर्श ऊष्मणो विकृतिर्यदि १६८
सा पराङ्गं भवत्येव या भक्तिः प्रचयात्परा
धृते ह्यृकारे परतो रेफश्च स्यात्पराङ्गभाक् १६९
पराङ्गमसवर्णं स्यादन्तस्थापरमेव यत्
पराङ्गे चोष्मणि परे पराङ्गं स्पर्शको यमाः १७०

अङ्गवर्णक्रमोक्तिलक्षणम्

पौर्वापर्यक्रमेणैव विदित्वाङ्गं प्रयोजयेत्
हलां तु पूर्वशब्दं वा परशब्दमथापि वा १७१
उक्त्वा ततोऽङ्गशब्दं तु भूतशब्दोत्तरं क्रमात्
हल्संज्ञकेति संज्ञां च नाम कारोत्तरं वदेत् १७२
अचामच्संज्ञकेत्युक्त्वा तन्मात्रांश्च ततः स्वरान्
उदात्तादींस्ततो नामान्यानुपूर्व्येण संवदेत् १७३
संयोगो यत्र पूर्वाङ्गं स्यात्सवर्णात्मको यदि
सकृदेव वदेत्तत्र पूर्वाङ्गादि पठेत्ततः १७४
योगो यत्रोभयाङ्गं स्याद्यद्येकव्यञ्जनात्मकः

पौर्वापर्यक्रमात्तत्र पृथगङ्गं प्रयोजयेत् १७५
यद्यदुक्तं शुद्धवर्णे द्वित्वागमयमादिकम्
अङ्गवर्णे तु तत्सर्वं  तत्र तत्र वदेत्क्रमात् १७६
स्वरवर्णे स्वरा यद्वल्लक्षणैः प्रतिपादिताः
मात्राश्च मात्रिकावर्णे यथा यत्र विनिश्चिताः १७७
तान्सर्वानङ्गवर्णोक्तौ तथा तत्र वदेत्सुधीः

इत्यष्टमोऽध्यायः

वर्णसारभूतवर्णक्रम इत्यस्य नाम्नो निर्वचनम्

सर्वेषामेव वर्णानां साराध्वन्यादयः स्मृताः १७८
ध्वनिस्थानादयो ये स्युस्ते धर्मा इति कीर्तिताः
तैर्भूतो भूतशब्देन प्रापितार्थ इहोच्यते १७९
स तथोक्तश्च वर्णानां क्रमो वर्णक्रमः स च
असौ वर्णक्रमश्चेति विग्रहो विशदीकृतः १८०
तस्मादयं वर्णसारभूतवर्णक्रमः स्मृतः

वर्णधर्मक्रमः

एकस्योच्चादियुक्तस्याप्यचः सव्यञ्जनस्य च १८१
धर्माः षड्विंशतिः प्रोक्ताः क इतीत्थमुदाहृतः
लक्षणैः शब्द एवात्र ध्वनिरित्युच्यते तथा १८२
ध्वनिः प्राथमिको धर्मो द्वितीयः स्थानमुच्यते
तृतीयः करणं विद्यात्प्रयत्नः स्यात्तुरीयकः १८३
देवता पञ्चमो ज्ञेयः षष्ठो जातिरिहोच्यते
अङ्गं तु सप्तमः प्रोक्तो वर्णसंज्ञाष्टमो भवेत् १८४

एते धर्माः क्रमेणैव विधीयन्ते हलामिह
अचां धर्माष्टकेऽप्यस्मिन्नुच्यमाने सति क्रमात् १८५
मात्राकालश्च वक्तव्यो मध्ये देवप्रयत्नयोः
स्वराणां निहतादीनां दश धर्माः समीरिताः १८६
तत्रादौ देवता ज्ञेया ततो जातिस्ततो गुणः
ततो रेखादर्शनं स्यादङ्गावस्थात्रयं पुनः १८७
ततः षड्जादिहेतुः स्यादुत्पत्तिस्थानकं ततः
तत्संज्ञा च ततश्चैतान्दशधर्मान्विदेत्क्रमात् १८८
केवलस्वरमात्राङ्गवर्णेषु चतुषूदिताः
ये ये धर्माश्च तान्सर्वान् प्रयुज्यास्मिन् क्रमात्पठेत् १८९
इति नवमोऽध्यायः

अनुस्वरभक्तिकम्पविषये रङ्गप्लुतविषये च
यो धर्मः पञ्चमत्वेन स्यादचां वर्णसारके
स्वरभक्त्यंशभूतानामचां स्यात्सप्तमो हि सः १९०
अनुस्वारस्य भक्तीनामंशभूताञ्झलामपि
धर्मान्यथावद्ध्वन्यादीन्वर्णसारे वदेत्सदा १९१
अनुस्वारस्य वर्णेऽस्मिन्नङ्गात्पूर्वं तु मात्रिकाम्
अप्यनुस्वारभक्त्यंशे व्यङ्गान्धर्मान् क्रमाद्वदेत् १९२
कम्पे तद्धेतुकस्वारधर्मानादौ पठेत्तथा
तस्मादुत्पन्नकम्पस्य य आद्यंशश्च तस्य तु १९३
त्रिपादाधिकमात्रस्य धर्मान्स्वारस्य नोच्चरेत्
तदन्त्यांशस्य नीचस्य ब्रूयाद्धर्मान्यथाविधि १९४

शुद्धवर्णो यथा तत्र तथैवात्रापि योजयेत्
रङ्गप्लुते त्ववर्णोच्चप्लुतानामानुपूर्व्यशः १९५
वदेद्धर्मान्वर्णसारे तदन्ते वर्णसंज्ञकाम्
सर्वत्राभिनिधानाख्यो यस्तस्याङ्गं तथैव च १९६
वर्णसंज्ञामपि ब्रूयान्नान्यधर्मान् पठेत्सदा
न ध्वन्यादीन्यमे ब्रुयात् स्थानान्न निषिध्यते १९७

शब्दोत्पत्तिप्रकरणम्

अथात्र सर्ववर्णानां याजुषाणां विशेषतः
उच्चारणप्रसिद्ध्यर्थं शब्दस्योत्पत्तिरुच्यते १९८

तत्प्रकारः

नित्यः कार्य इति द्वेधा शब्दः सामान्यतो भवेत्
नित्योऽव्यक्तो विभुः शब्दो यो ब्रह्मव्यपदेशभाक् १९९
तस्माद्व्यक्तः कार्यशब्दः कार्यादुत्पद्यते श्रुतिः
श्रुतेर्नादस्ततो नाळी नाळ्या उच्चावचस्वराः २००
एते क्रमात्प्रजायन्ते शब्दोच्चारणमात्रतः
मिथोऽपृथक्त्वमेतेषां दीपतत्प्रभयोरिव २०१
भवन्ति नादप्रमुखा वर्णोच्चारणहेतवः

ध्वनिनिरूपणप्रकरणे शरीरान्तर्गतजाठराग्निस्थितिः

उपनाभ्युदये सूक्ष्मधमनीघुटिबन्धनम् २०२
आधारं सर्वधातूनामिन्द्रियाणां भवत्यपि
तत्प्रत्यगाढकस्थूलाप्यर्धाङ्गुलिसमुच्छ्रिता २०३
निश्चला सततं दीप्ता ज्वाला वह्नेस्तु जाठरी

पराणुसूक्ष्मावरणा धमनी तत्परिस्थिता २०४
वायुना पूरिता वृत्ता द्रुतं सञ्चरतानिशम्
इति दशमोऽध्यायः
प्राणादीनां पञ्चानां वायूनां स्थानस्थित्यादिकम्
प्राणोदानापानसमा हृत्कण्ठगुदनाभिषु २०५
चत्वारः संस्थिता देहे व्यानः सर्वाङ्गसंश्रितः
तेषां स्थूलसूक्ष्मरूपचेष्टाविशेषः
एते पञ्चांशकास्तत्र स्थित्वैवांशैस्त्रिभिस्त्रिभिः २०६
द्वाभ्यां द्वाभ्यां शरीरेऽस्मिन् स्वस्वचेष्टां प्रकुर्वते
समः सुषिरचक्रस्थस्तौन्दं बर्हिषमावति २०७
नाडीलताश्रितोऽपानः शिक्यमूले त्रिकोपरि
विभज्योच्चारशमलौ पुरः पश्चात् क्षिपत्यधः २०८
सर्वनाडीः समाश्रित्य व्यानः सर्वत्र सञ्चरन्
सदा वितनुते सर्वं नमनोन्नमनादिकम् २०९
उदानो गळगर्तस्थो व्यानदत्तं रसादिकम्
आजिह्वामूलमुत्प्लुत्य गृहीत्वान्तः क्षिपत्यधः २१०
हृत्पद्मकोशपृष्ठस्थे नाडीनाळनिरन्तरे
स्थित्वा स्थाने बली प्राणो ह्रासैर्विकसनैरपि २११
यथा क्रमं स्वयं दत्ते भुक्तिमुक्त्योः सृतिं पराम्
प्राणादीनामिमाश्चेष्टाः स्थूलाः सूक्ष्मा तु कथ्यते २१२
प्राणे हृदिस्थस्वांशेन कण्ठस्थोदानमंशतः
अन्तराकर्षति बहिस्तदंशोऽस्यांशकं क्रमात् २१३

उभाभ्यां श्वासरूपाभ्यामंशाभ्यां धार्यते वपुः
विवक्षुणात्मना नुन्नं मनो रुध्वा गळानिलम् २१४
सह तेन पतित्वाग्नौ जाठरे तत्समुत्थया
ज्वालया भेदयत्याशु समानावरणं ततः २१५
भिन्नावृतौ समे कण्ठवायुना मनसा सह
कण्ठोरोमध्यदेशस्थे प्राणोंऽशं स्वं नियच्छति २१६
श्रुत्यादिप्रकृतिः कार्यो नित्याच्छब्दोऽत्र जायते
स्थानं कण्ठोरसोमध्यं करणं तु समोऽनिलः २१७
मनःप्रयोगो यत्नोऽस्य स्याच्छब्दोत्पत्तिरीदृशी
इत्थमुच्चार्यमाणेषु शब्देषु श्वासरोधिषु २१८
तदर्थं सममच्छिन्नमाकृष्योदानसंयुते
मनस्यभ्युत्थिते तस्मिन्नैश्चेष्ट्यं सोढुमक्षमः २१९
सममध्ये पुनः प्राणः स्वांशेनैव पतत्यसौ
तस्माद्विच्छिद्यते तत्र प्राणसंघट्टनात्समः २२०
छिन्नधारो भवत्याशु स्वस्थानान्तर्गतश्च सः
सद्यस्तत्त्वक्तिरोधत्ते प्राणोदानौ तु पूर्ववत् २२१
विचेष्टेते तदा ताभ्यां महाञ्छ्वासः प्रजायते
भूयो मनःप्रयोगेन शब्दः सम्पद्यते तथा २२२

ध्वनिभेदाः

कण्ठाकाशगतः कार्यः शब्द एव ध्वनिः स्मृतः
नादः श्वासो हकारश्चेत्येवं त्रेधा ध्वनिर्भवेत् २२३
कण्ठे तु संवृते नादः श्वासः स्याद्विवृते सति

मध्यस्थे तु हकारः स्याद्वर्णप्रकृतयश्च ताः २२४

तज्जातवर्णाः

नादजाः स्वरघोषाः स्युर्हचतुर्था हकारजाः
अघोषाः श्वासजास्तत्र श्वासो द्वेधाल्पको महान् २२५
प्रथमाश्च तदन्ये च वर्णा अल्पमहद्भवाः

वर्णानां स्थानकरणविवेकः

अचां स्थानमुपश्लेषो यत्रान्याङ्गस्य तन्यते २२६
तदङ्गं करणं स्थानसमीपे नीयते च यत्
यदङ्गं स्पृश्यतेऽङ्गेन हलां स्थानं तदिष्यते २२७
अङ्गेन स्पृश्यते स्थानं येन तत्करणं हलाम्
संहितायामचो नित्यं यत्राव्यञ्जनपूर्वकाः २२८
भवन्ति तेषां स्थानोक्तौ पूर्वं कण्ठेति संवदेत्
अकारोच्चारणे चौष्ठौ हनूनात्युपसंहृतौ २२९
कार्यौ तु दीर्घप्लुतयोर्न चातिविवृता इमे
उपश्लेष्यमिवर्णोक्तौ जिह्वामध्यं तु तालुनि २३०
ओष्ठावुवर्णे दीर्घौ स्त उपश्लेषयुतौ तथा
पृथगोष्ठोपसंहारो नार्धमात्रान्तरे भवेत् २३१
एकमात्रान्तरत्वस्य स्यात्तु सर्वत्र सम्भवे
ऋवर्णे लृति च स्यातामोष्ठौ नात्युपसंहृतौ २३२
हनू अत्युपसंहार्ये जिह्वाग्रं बर्स्वके भवेत्
एकारेऽव्यञ्जने जिह्वाप्रान्तावीषद्युतोष्ठकौ २३३
करणं तालु तु स्थानमतिश्लिष्टहनूर्ध्वयुक्

सव्यञ्जनेऽस्मिन् करणमीषच्छ्लिष्टोष्ठयुग्भवेत् २३४
जिह्वामध्यं स्थानमतिश्लेषवद्धनुतालुकम्
हनू अनतिविश्लेषे ओष्ठौ चात्युपसंहृतौ २३५
दीर्घौ च भवतस्तत्र त्वोकारोच्चारणे सति
अणुस्त्वादावदेदोतोरन्त्ये स त्र्यणुकस्त्विदुत् २३६
ऐकारौकारयोरादावकारस्त्वर्धमात्रिकः
इवर्णोवर्णयोः शेषौ स्यातामध्यर्धमात्रिकौ २३७
ऐकारौकारावयवेष्वदिदुत्सु यथाक्रमम्
अदिदुत्स्थानकरणप्रयत्ना एव नान्यथा २३८
एदोतोरदिदुत् स्वल्पोऽप्यत्र न श्रूयते पृथक्
नातोऽस्ति तेषां धर्मोऽस्य किन्त्वेत्वं त्वोत्वमेव हि २३९
ऐदौतोराद्यकारस्य करणीभवदोष्ठकः
संवृताख्य इति प्राहुर्वर्णक्रमविचक्षणाः २४०
उच्चारणे कवर्गस्य हनूमूलं स्पृशेद्बुधः
जिह्वामूलेन चोरुक्तौ जिह्वामध्येन तालु च २४१
जिह्वाग्रेण टवर्गे तु प्रतिवेष्ट्य शिरः स्पृशेत्
जिह्वाग्रतस्तवर्गे च दन्तमूलेष्वधस्तथा २४२
अधरेणोत्तरोष्टं तु पवर्गोच्चारणे स्पृशेत्
जिह्वामध्यस्य पार्श्वाभ्यां तालु योच्चारणे स्पृशेत् २४३
जिह्वाञ्चलस्य मध्येन दन्तमूलोपरि क्रमात्
आसन्नमत्यासन्नं च प्रदेशं रलयोः स्पृशेत् २४४
अधरोष्ठाग्रभागेन बाह्येनोर्ध्वदतः स्पृशेत्

ओष्ठ्यस्वरान्तरस्थे वे तद्भिन्ने त्वान्तरेण चेत् २४५
जिह्वामूलीयपूर्वाणां हभिन्नानां तथोष्मणाम्
कवर्गादिषु यत्स्थानं तदेव स्युर्यथाक्रमम् २४६
कारणानां तु यत्तेषां मध्यं तु विवृतं भवेत्
विसर्गस्य च हस्य स्यात्स्थानं च करणं गळः २४७
उरो हस्योत्तमान्तस्स्थापरत्वे स्यात्तु तद्द्वयम्
वर्गान्त्या नासिकामात्रस्थानका हात्परेऽपरे २४८
मुखावयवनासिक्या नासिका नस्विकासतः

इत्येकादशोऽध्यायः

वर्णानां प्रयत्नभेदाः

प्रयत्नाः पञ्चधा ज्ञेयाः वर्णानां संवृतादयः २४९
संवृतो विवृतः स्पृष्ट ईषत्स्पृष्टोऽतिपूर्वकः
संवृतोऽकारमात्रस्य प्रयत्नः परिकीर्तितः २५०
प्रयत्नो विवृतोऽन्येषां स्वराणामूष्मणामपि
स्पर्शेषु स्पष्टतान्तस्स्थास्वीषत्स्पृष्टत्वमीरितम् २५१
द्वितीयाश्च चतुर्थाश्चाप्यतिस्पृष्टप्रयत्नजाः
अतिस्पृष्टे चतुर्थानां न्यूनत्वं किञ्चिदिष्यते २५२

देवतालक्षणम्

देवता वेदवर्णानां वाय्वग्निक्ष्मेन्दुभानवः
यशकारावेदवर्णौ प्रथमा वायुदेवकाः २५३
आग्नेया ऐदिवर्णौ च द्वितीयाश्च रसावपि
उवर्ण ओत्तृतीयाश्च हलौ स्युर्भूमिदेवकाः २५४

ऋवर्ण औच्चतुर्थाश्च वळौ चान्द्रमसाः स्मृताः
लृकारोत्तमशाः सौर्या नेतरेषां तु देवताः २५५

जातिलक्षणम्

वर्गप्रथमवर्णाश्च स्वराः स्युर्ब्रह्मजातयः
क्षात्रा द्वित्रितुरीयाः स्युर्विशोऽन्तस्स्थोत्तमा अपि २५६
शूद्रा ऊष्मविसर्गानुस्वाराः स्युरिति निश्चिताः

इति द्वादशोऽध्यायः

वर्णसंज्ञा

अचः स्वरा व्यञ्जनानि स्पर्शान्तस्स्थोष्मणो हलः २५७
अघोषघोषवद्वर्गप्रथमाद्युत्तमादयः
ह्रस्वदीर्घप्लुता भक्तिकम्परङ्गप्लुता यमः २५८
विसर्गजिह्वामूलीयोपध्मानीयादयस्तथा
अनुस्वरादयश्चैते वर्णसंज्ञा इति स्मृताः २५९

उदात्तादीनां देवतानियमः

सूर्याग्निचन्द्रवसुधाश्चत्वारश्च क्रमादिह
धृतानुदात्तस्वारोच्चस्वराणां देवता स्मृताः २६०

जातिः

उच्चनीचस्वारधृताः स्वराश्चत्वार एव च
ब्रह्मक्षत्रियविट्शूद्रा आसन् जात्या क्रमादिह २६१

गुणलक्षणम्

सात्विकः स्याद्गुणेनोच्चः स्वरितो राजसः स्मृतः
द्वौ तामसगुणौ स्यातामनुदात्तधृतावपि २६२

## हस्तस्वरविन्यासलक्षणम्

यः स्वरन्यासकृद्विद्वान् स आसीनस्त्वतन्द्रितः
कृत्वा गोकर्णवद्धस्तं दक्षिणं दक्षजानुनि २६३
क्रमात्स्वरेषु हस्ते च मनो दृष्टिं निवेश्य च
यथाशास्त्रं स्वरन्यासमङ्गुष्ठाग्रेण विन्यसेत् २६४
तदा यद्यागतः पूज्यो गुरुर्वा देवतापि वा
प्रणम्याथ न्यसेत्तिष्ठन् कृत्वा नाभिसमं करम् २६५
यदि तैरभ्यनुज्ञातः सोऽभ्यासकरणे सति
आसीन एव कुर्वीत स्वरन्यासं यथाविधि २६६
उदात्तं निर्दिशेन्न्यासे तर्जनीमध्यपर्वणि
नीचं कनिष्ठिकादौ च मध्यमामध्यमे धृतम् २६७
स्वारं चानामिकान्त्ये तु सर्वत्रैवं विनिर्दिशेत्
यः स्वरः स्यात्पृथग्भक्तेः स्वरेखास्थानमाप्नुयात् २६८
स्याद्यत्रोच्च इव स्वारः स्यात्तदूर्ध्वस्थितश्च यः
क्रमादनामिकायास्तौ विन्यसेन्मध्यमान्त्ययोः २६९
आद्यन्त्यांशौ स्वारकम्पे यौ स्यातां स्वारनीचकौ
अनामिकान्त्यादिमयोस्तौ न्यसेद्द्वावपि क्रमात् २७०
ततश्चोदात्तकम्पे तु यावुच्चनीहतौ च तौ
मध्याद्ययोः प्रदेशिन्याः क्रमात्सन्निर्दिशेदपि २७१
विरामे व्यञ्जनं यत्तदुच्चारणवशात्क्वचित्
स्वरान्तरश्रुतिं सम्यक्स्वतन्त्रमिव चाप्नुयात् २७२
तथापि तस्य विन्यासे पृथक्स्थानं न निर्दिशेत्

## स्वरविन्यासफलम्

य एवं स्वरवर्णार्थाञ्छास्त्रदृष्ट्यानुचिन्तयन् २७३
स्वरन्यासक्रमेणैव सह वेदमिमं पठेत्
स स पूतः सर्ववेदैश्च परं ब्रह्माभिगच्छति २७४

## अङ्गाद्यवस्था

गात्रदैर्घ्यं ध्वनेर्दार्ढ्यं कण्ठाकाशाणुता तथा
तिस्रोऽवस्था इमाः शब्दमुच्चैः कुर्वन्ति तत्र तु २७५
ह्रस्वता या च देहस्य मृदुता च ध्वनेश्च या
महत्ता कण्ठखस्यैता नीचैः कुर्वन्ति शब्दकम् २७६

## षड्जादिस्वरनिरूपणम्

नीचात् षड्जर्षभौ जातावुच्चाद्गान्धारमध्यमौ
निषादः पञ्चमश्चैव धैवतश्च त्रयः स्वराः २७७
स्वरितप्रभवास्तेषां पुनस्तत्कारणक्रमः
नित्याभिनिहतक्षैप्रा निषादस्वरहेतवः २७८
हतश्लिष्टावुभौ स्यातां पञ्चमस्वरहेतुकौ
तैरोव्यञ्जनवृत्ताभ्यां जायते धैवतस्वरः २७९
दीर्घह्रस्वानुदात्ताभ्यां जातौ षड्जर्षभावुभौ
उदात्तप्रचयाभ्यां तु गान्धारो मध्यमस्तथा २८०
रौति क्वणत्यजा क्रौञ्चो गान्धारं मध्यमं क्रमात्
केकारुतसमः षड्ज उक्षा रौत्यृषभस्वरम् २८१
निषादं बृंहते कुम्भी पिकः कूजति पञ्चमम्
हयहेषातुल्यरूपं संविद्याद्धैवतस्वरम् २८२

इति त्रयोदशोऽध्यायः

उदात्तादिस्वरोत्पत्तिस्थानम्

अनुदात्तो हृदि ज्ञेयो मूर्ध्न्युदात्त उदाहृतः
स्वरितः कर्णमूलीयः सर्वाङ्गे प्रचयः स्मृतः २८३

वेदाध्ययनफलम्

अङ्गमात्रादयो धर्माः पूर्वमेवोदिताश्च ये
तान्सर्वान्वर्णसारेऽस्मिन् तत्र तत्र प्रयोजयेत् २८४
एवं सलक्षणं वेदं योऽधीतेऽध्यापयत्यपि
न तत्कल्पसहस्रैश्च गदितुं शक्यते फलम् २८५

वेदमहिमा

वेद एव परो धर्मो वेद एव परं तपः
वेद एव परं ब्रह्म सर्वं वेदमयं जगत् २८६
तस्माच्छ्रेयः परं प्राप्तुं विधिनैव गुरोर्मुखात्
अध्येतव्योऽखिलैर्विप्रैरेष धर्मः सनातनः २८७
धर्मेण य इमां ब्राह्मीं विद्यां शिष्याय बोधयेत्
नन्दन्ति देवताः सर्वास्तं विप्रं नाविशेद्भयम् २८८

अध्ययनरहितदोषः

यो हित्वा ब्राह्मणो वेदानन्यग्रन्थे प्रवर्तते
ब्रह्मत्यागी स विज्ञेयः कर्मशूद्र इति स्मृतः २८९
वेदहीनस्य विप्रस्य सर्वशास्त्रप्रगल्भता
वस्त्रहीनस्य देहस्य सर्वभूषणता यथा २९०
यो निराकृतिना विप्रः स जग्धिं कुरुते यदा

स विप्रस्तु तदाप्नोति सुरापानफलं ध्रुवम् २९१
तदानिराकृतिः सोऽयं लभते पावनं परम्
तस्मान्निराकृतेः पापं न कुर्यात्पङ्क्तिभोजनम् २९२
निराकृतिः अध्ययनरहित इत्यर्थः
वेदांश्च श्रोत्रियं ब्रह्म ये के दूष्यन्ति मानवाः
ते घोरं नरकं प्राप्य जायन्ते भुवि सूकराः २९३
साङ्गवेदाद्ध्ययनफलम्
वेदरूपविलसत्परात्परं ये पठन्ति विधिना द्विजोत्तमाः
ते त्रिवर्गमिह चानुभूय तच्छाश्वतं पदमवाप्नुयुः परम् २९४
इति चतुर्दशोऽध्यायः
इत्यात्रेयशीक्षामूलं सम्पूर्णम्

Chakraborty, Deepro, *Ātreya Śīkṣā: A Śikṣā of the Taittirīya School*, (New Delhi: DK Printworld, 2015, 279 pp.

Aithal, K.P., *Veda-Lakṣaṇa: Vedic Ancillary Literature, a descriptive bibliography*, (Delhi: Motilal Banarsidass Publishers, 1993), #141 Ātreya Śikṣā (3), found in the following two manuscripts:

Hamburg Staats-Universitaet Bibliothek (codice Palmblaetter III 8/133).

Tirupati SVUORI 618 (3792c). PL. Gr., in *An Alphabetical Index of Sanskrit, Telugu and Tamil Manuscripts in the Śri Venkateswara University Oriental Research Institute Library, Tirupati,* (Tirupati: Sri Venkateswara Oriental Research Institute, 1956). iv, 369 pp.

# पारिशिक्षा

प्रणिपत्य जगन्नाथं वासुदेवं सनातनम्
गणाधिपं गिरां देवीं शीक्षां वक्ष्ये यथामति १
अथ वर्णसमाम्नाय उच्यते याजुषोऽत्र तु
आदितो नववर्णाः स्युः समानाक्षरका इह २
ह्रस्वदीर्घे सवर्णे स्तो द्वेद्वे न प्लुतपूर्वकम्
स्वराःषोडश तस्यादौ शेषो व्यञ्जनसंज्ञकाः ३
स्पर्शाः स्युर्व्यञ्जनेष्वाद्याः पञ्चविंशतिरीरिताः
पराश्चतस्रस्त्वन्तस्थाः षडूष्माणस्ततः परे ४
स्पर्शानामानुपूर्व्येण वर्गाः स्युः पञ्चपञ्च च
प्रथमाद्याः क्रमात्संज्ञा उत्तमः पञ्चमस्य तु ५
विसर्गोष्मद्वितीयाः स्युरघोषाः प्रथमा न हः
घोषवान् व्यञ्जनशेषः पर्यान्यध्यभिविप्रति ६
प्रावोपेत्युपसर्गाः स्युः वर्णः कारोत्तरो भवेत्
वर्णाख्या तद् व्यञ्जनानां स्यादकारव्यवेतकः ७
विसर्जनीयानुस्वारोपध्मानीयाश्च नात्र च
जिह्वामूलीयनासिक्याश्चैतेषां रस्य रेफकः ८
वर्णोत्तरस्त्रयाणां स्याद्ध्रस्वोऽकारो हलां भवेत्
ऋकारल्कारकौ ह्रस्वावनुस्वारोऽदिदुत्तथा ९
वर्गोत्तरस्तु वर्गाख्या प्रथमो भवतीत्यपि
इति परिभाषा

अथ वक्ष्ये वर्णसारभूतवर्णक्रमस्य च १०
शुद्धवर्णक्रमादीनां चतुर्णामपि लक्षणम्
तत्रादौ वर्णसारस्य प्रकारः सम्यगुच्यते ११

ध्वनिः स्थानं च करणं प्रयत्नो देवता ततः
जातिरङ्गं वर्णसंज्ञा व्यञ्जनानां विधीयते १२
अचामेवं प्रोच्यमाना ध्वन्यादौ च यथाक्रमम्
प्रयत्नदेवयोर्मध्ये मात्राकालः प्रकीर्तितः १३
अचां हलां केवलानामङ्गं न परिकीर्तयेत्
उदात्तादिस्वराणां तु ध्वन्यादीन् परिवर्जयेत् १४
तथापि देवताजातिगुणा रेखादिदर्शनम्
अध्येत्रङ्गाद्यवस्थां च षड्जादिस्वरकारणम् १५
सोत्पत्तिस्थानकं चैव स्वसंज्ञां चानुपूर्व्यशः
ये धर्माः शुद्धवर्णे तु शास्त्रोक्ता इह तानपि १६
संयोज्य तत्र तत्रैव भक्तिरङ्गादिकान् वदेत्
व्यञ्जनस्याष्टधा धर्मः स्वरस्यैव तथाष्टधा १७
नीचोच्चादिस्वराणां तु दशधर्माः प्रकीर्तिताः
व्यञ्जनोच्चादिसंयुक्तस्वरस्यैकस्य वै पुनः १८
षड्विंशदीरिता धर्माः क इत्येष उदाहृतः
इमं बुधा वर्णसारभूतवर्णक्रमं विदुः १९
इति द्वितीयोऽध्यायः

अथ शब्दस्योद्भवो वायुशरीरकसमीरणात्
कण्ठोरसोश्च सन्धाने तस्योत्पत्तिः प्रकीर्तिता २०
प्रातिश्रुत्कानि तस्यात्र भवन्त्येतानि पञ्च च
उरः कण्ठः शीर्षमुखं नासिकाया बिलद्वयम् २१
नादः स्यात्संवृते कण्ठे श्वासस्तु विवृते सति
हकारः क्रियते मध्ये वर्णप्रकृतयश्च ताः २२

अज्घोषवत्सु नादोऽनुप्रदानं भवतीत्यपि
हकारो हचतुर्थेषु श्वासोऽघोषेषु चैव हि २३
सभूयान् प्रथमान्येषु ह्येतानेव विदुर्ध्वनीन्
नातिव्यस्तमवर्णे हन्वोष्ठं नात्युपसंहृतम् २४
उपसंहरतीवर्णे तालौ जिह्वान्तरं सति
कार्य ओष्ठोपसंहार उवर्णोऽत्र विशेषकः २५
एकान्तरस्य कर्तव्यः प्रकृतान्नार्धमध्यकः
बर्स्वेष्वादौ तु जिह्वाग्रमुपसंहरति त्रिके २६
हनूपसंहृततरे स्यातामोष्ठावकारवत्
ईषत् प्रकृष्टावोष्ठौ स्तोऽत्युपसंहृतके हनू २७
जम्भ्यान् जिह्वान्तरान्ताभ्यामुत्तरान् स्पर्शयत्यपि
एकारे पूर्ववत् तालौ जिह्वामध्यमिवर्णवत् २८
नातिव्यस्ते हनू ओष्ठावोकारेऽत्युपसंहृतौ
करणं स्थानमेदेतोर्यदैदौतोः क्रमेण तत् २९
ऐकारौकारयोरादिरकारार्धमितीरितम्
एकेषां संवृततरकरणं भवति स्म तत् ३०
इकारोऽध्यर्धः पूर्वस्य शेषः स्यादुत्तरस्य उत्
अनुनासिकधर्माः स्युरनुस्वारोत्तमा अपि ३१
अचां यत्रोपसंहारः तत्स्थानं क्रियतेऽत्र तु
स्वराणां करणं विद्यादुपसंहरतीति यत् ३२
व्यञ्जनानां तु तत्स्थानं स्पर्शनं क्रियते यदा
करणं तद्बलां ज्ञेयं स्पर्शयत्यत्र येन तु ३३
हनूमूले कवर्गे तु जिह्वामूलेन वै तथा
स्पर्शयत्यथ तालौ चवर्गे जिह्वान्तरेण तु ३४

प्रतिवेष्ट्य टवर्गे तु जिह्वाग्रेणैव मूर्धनि
दन्तमूलेष्वधोभागे जिह्वाग्रेण तवर्गके ३५
उत्तरोष्ठेऽधरोष्ठेन पवर्गे स्पर्शयत्यथ
तालौ यकारे वै जिह्वामध्यान्ताभ्यां तथैव च ३६
रेफे जिह्वाग्रमध्येन दन्तमूलोत्तरेषु ले
ओष्ठान्ताभ्यां वकारे तूत्तरदन्ताग्रकेषु च ३७
ऊष्माण आनुपूर्व्येण स्पर्शस्थानेषु पञ्च च
तेषां करणमध्यं तु विवृतं भवतीह तत् ३८
कण्ठं स्थानं स एवात्र करणं हविसर्गयोः
उरस्यत्वं हकारे तूत्तमान्तस्थापरे सति ३९
नासिक्या नासिकास्थाना मुखनासिक्यकाश्च वा
स्थानयोगो भवत्यत्र वर्गवच्चेति तेषु तु ४०

इति तृतीयोऽध्यायः

स्वरोष्मणां स्याद्विवृतः प्रयत्नस्त्वकारमात्रस्य तु संहृतत्वम्
ते स्पृष्टजन्याः खलुकादिमान्तास्तस्येषदादावथ चेच्चतुर्णाम्
४१
वर्गद्वितीयश्चतुरीयवर्णोऽतिस्पृष्टजः पञ्चविधः प्रयत्नः
वाय्वग्निभूचन्द्रदिवाकराश्च वेदाक्षराणामधिदेवताः स्युः ४२
अवर्णवर्गादियषैत्समीरा इदैद् द्वितीयेन्द्रसवह्निसंज्ञाः
भौमा उवर्णोहल ओत्तृतीयश्चान्द्रा ऋवर्णो व ओ औच्चतुर्थाः
४३
सौर्या लृकारोत्तमशास्तथैवं पञ्चाशदर्णा ऋषिभिः सुगीताः
ब्राह्मास्तु वर्गप्रथमाः स्वराश्च क्षात्रास्तथा द्वित्रितुरीयवर्णाः

४४
वैश्या यकारादिचतुस्तथोत्तमाः शूद्रा अनुस्वारविसर्ग
ऊष्मा

इति चतुर्थोऽध्यायः

यद्व्यञ्जनं तद्भजते स्वराङ्गं तदङ्गभूतं तु परस्वराङ्गम् ४५
पूर्वस्वराङ्गं त्ववसानवर्ति भवेत्परायुक्तमसंन्युतो नः
योगाद्यनुस्वारविसर्गभक्तयो रेफस्त्वृकारे परतस्तथा स्यात्
४६
पूर्वस्वराङ्गं न भवेद्य ऊष्मणः स्पर्शो यदि
स्याद्द्विकृतिस्तथापि
भक्तिः पराङ्गं प्रचयात्परा स्यात् तथा धृते सत्यृपरे च रेफः
४७
यत्रासवर्णं तु परस्वरस्यान्तस्थोदयं व्यञ्जनमङ्गमेव
परे सति ह्यूष्मणि वै पराङ्गे स्पर्शो यमाश्चैव परस्वराङ्गम् ४८

इति पञ्चमोऽध्यायः

अचः स्वराः स्पर्शहलावघोषान्तस्थोष्मघोष्व्यञ्जनमुत्तमाद्
याः
तथैव वर्गप्रथमादि ह्रस्वदीर्घप्लुताद्या इति वर्णसंज्ञाः ४९

इति षष्ठोऽध्यायः

ह्रस्वश्च यावद्द्विपिने स्वभावात् किकीदिवी रौति स
एकमात्रः

काकोऽब्रवीत् तद्द्विगुणं तु कालं द्विमात्रकः स्यात्तु स एव दीर्घः ५०
शिखी त्रिमात्रं वदति प्लुतः स्याद्ध्रस्वार्धकालं नकुलोऽर्धमात्रम्
उच्चस्य भूमिर्निहतस्य चाग्निः स्वारस्य चन्द्रः प्रचयस्य चार्कः ५१
नीचो विराड्ब्राह्मणजातिरुच्चः स्वारस्तु वैश्यः प्रचयश्च शूद्रः

इति सप्तमोऽध्यायः

स्वारोच्चकौ राजससात्त्विकौ स्तो धृतानुदात्तावपि तामसौ स्तः ५२

इत्यष्टमोऽध्यायः

विनिर्दिशेत्तर्जनिमध्यपर्वण्युच्चं च नीचं तु कनिष्ठिकादौ अनामिकान्त्ये स्वरितं च निर्दिशेत् तं मध्यमायाः प्रचयं च मध्यमे ५३
भक्तेर्भवेद्यत् स्वर उच्यते पृथक् तदङ्गुलीस्थानमुदात्तकादिः स्वारं यदि ह्युच्चमिवोर्ध्वकं च ह्यनामिकामध्यमकान्त्ययोश्च ५४
तौ स्वारकम्पे स्वरितानुदात्तावनामिकान्त्यादिमरेखयोश्च उदात्तनीचौ क्रमशः प्रदेशिनीमध्याद्ययोर्निर्दिशदुच्चकम्पे ५५
तद् व्यञ्जनस्यैव विरामकाले न स्यात् पृथक्स्थानमुपैति

पूर्वम्
गोधेनुकर्णाकृतिदक्षहस्ते ह्यङ्गुष्ठकाग्रेण विदर्शयेज्ज्ञः ५६
स्वरेषु हस्ते च मनश्च दृष्टिं क्रमान्निवेश्यात्र नियोजयेत्तत्
हस्तेन वेदं य इमं त्वधीते वर्णस्वरार्थाननुचिन्तयन् सन्
५७
स ऋग्यजुःसामभिरेव पूतः तद्ब्रह्मलोके सततं महीयते
यद्गात्रदैर्घ्यं दृढता च या ध्वनेः तथाणुता कण्ठबिलस्य या
च ५८
एतानि कुर्वन्ति च शब्दमुच्चैर्यद्ध्रस्वता सा मृदुता स्वरस्य
या विस्तृता कण्ठबिलस्य चैताः कराणि शब्दं निहतं च
नित्यम् ५९

इति नवमोऽध्यायः

गान्धारको मध्यम उच्चजातः षड्जर्षभौ द्वौ निहतोद्भवौ
स्तः
स पञ्चमो धैवतको निषादः त्रयःस्वराश्च स्वरितात् तु
जाताः ६०
तत्रापि नित्यो निहतश्च तेऽत्र क्षैप्रो निपादस्वरहेतवः स्युः
प्रश्लिष्टकप्रातिहताभिधानौ स्यातां तथा पञ्चमकारणे तौ ६१
तथान्तिमस्वारकपादवृत्तौ स्यातां तथा धैवतहेतुभूतौ
गान्धारकस्याप्यथ मध्यकस्य क्रमादुदात्तप्रचयावपि क्रमात्
६२
अथानुदात्तौ यदि दीर्घह्रस्वौ हेतू च षड्जर्षभयोः क्रमेण ६३
उरश्च कण्ठं दशनांश्च तालु जिह्वां च नासां युगपच्च

संस्पृशन्
तेभ्यो हि यस्मात् स्वर एष जायते षड्भ्यस्ततः षड्ज इतीह चोच्यते ६४
नाभेः सकाशाल्लघुवात उत्थितः कण्ठोत्तमाङ्गेन समाहतः सन्
यस्मान्नदत्यार्षभवत्सनीचस्वरेण तस्मादृषभः स्मृतः स्यात् ६५
गौरुच्चवान् धारयतीति तां वै गान्धेत्यजा सेति च रौति वा स्यात्
गान्धार एवोपरिभागजातप्रयत्नकोच्चारितधर्मयुक्तः ६६
मध्यस्थितत्वादपि तत्स्वराणां स मध्यमः स्वारकनीचयोश्च
नाभ्युत्थितो वायुरुरःप्रदेशहृत्कण्ठमूर्धश्रुतिमूलकेषु ६७
पञ्चप्रतीकेषु चरंश्च कण्ठादुत्तिष्ठते पञ्चम इत्यतः स्यात्
षड्जादिसप्तस्वपि मध्यमत्वात् काले पिकैः पञ्च्यत इत्यतो वा ६८
यस्मात् स्वरान्तेन विशेषतोऽभिसन्धीयते स्वर्यत एष धैवतः
तानप्रधानत्वबलाल्ललाटप्रान्ते स पश्चाद्व्यवतिष्ठतीति ६९
अस्मिन्निषीदन्त्यच इत्यनेन निषाद इत्युक्तमतः स पश्चात्
व्याप्यावतिष्ठत्यखिलं च सन्धिप्रदेशमैभध्वनितुल्यरूपः ७०
प्रथममुदितशब्दः श्रूयते ह्रस्वमात्रः श्रुतिरिति विदुरेनं सा स्वराङ्गप्रधाना
विविधभरतविद्भिः प्रोच्यते तत्स्वराणां सरिगमपधनीति

ह्यत्र संज्ञा मुनीन्द्रैः ७१
इति दशमोऽध्यायः

ज्ञेयोऽनुदात्तो हृदि मूर्ध्न्युदात्तः स्यात्कर्णमूले स्वरितं तु
विद्यात्
सर्वप्रतीके प्रचयः स्मृतः स्यात् स्थानं स्वराणामिदमेव
नान्यत् ७२
स्वारः समाहार उदात्त उच्चैर्भवेद्धि नीचैरनुदात्त एव
ते संहितायां स्वरितात्परे स्युरेकोऽथवा द्वौ बहवोऽनुदात्ताः
७३
पदस्थिता ये प्रचयस्वरात्मकं गुणं भजन्त्यत्र स उच्चकश्रुतिः
इत्येकादशोऽध्यायः

इवर्णकोतोर्यवकारभावे यः स्वर्यते क्षैप्र उदात्तयोः स्यात्
७४
स्थिते पदे यत्र तु नीचपूर्वेऽप्यपूर्वके वा यवपूर्वमक्षरम्
यत्स्वर्यते तत्स्वरितं तु नित्य एवेति विद्यान्न यथाक्रमोऽत्र
७५
नानापदस्थेऽपि च सांहितेन यः स्वर्यते प्रातिहतः स उच्चैः
लुप्ते पृथग्भूतपदस्थितोच्चात् परेऽनुदात्ते यदि तर्ह्यकारे ७६
पूर्वोच्चकोऽयं स्वरितस्वरः स्यान्नाम्ना भवेत्सोऽभिहतश्च
पश्चात्
उच्चादुकारादनुदात्तधर्म उकार ऊर्ध्वे सति सन्धितोऽत्र ७७
ऊभाव एष स्वरितश्च तत्र प्रश्लिष्ट इत्युच्यत एव सद्भिः

या स्यात्समाने तु पदे विवृत्तिस्तस्याः परे यः स्वरितश्च
लब्धः ७८
स पादवृत्ताह्वय एव नान्यः एतद्विवृत्तेरपि चार्धमात्रः
पदे समाने य उदात्तपूर्वस्तैरो ऋधो व्यञ्जन उत्तरः सः ७९
क्षेप्रे च नित्येऽतिदृढः प्रयत्नो दृढोऽतिपूर्वोऽभिहते प्रयत्नः
प्रश्लिष्टके प्रातिहते च कार्यः स्वारे तथैवातिमृदुः प्रयत्नः
८०
स्यात्पादवृत्ते खलु सप्तमे च स्वारे भवेदल्पतरः प्रयत्नः
इति द्वादशोऽध्यायः

प्रश्लिष्टनित्याभिहताश्च यत्र क्षैप्रस्तथोच्चस्वरितोदयाः स्युः
८१
तत्र प्रकम्प्यन्त इमे हि सन्धौ पूर्वस्वरान्ते निहतं च कुर्यात्
स कम्प एवात्र यथा हि दीर्घे तथोच्चरेद्ध्रस्वमपि प्रकम्पे
८२
कम्पो द्विधा स्वार उदात्तकश्च स्वाराख्यकम्पास्त्विह
संहितायाम्
शाखान्तरेष्वेव उदात्तकम्पाः पुनर्द्विधा तौ खलु ह्रस्वदीर्घौ
८३
तस्यादितः स त्र्यणुमात्रकालस्वारस्तदन्त्ये निहतोऽणुमात्रः
उच्चस्तथा स त्र्यणुमात्र ऋादौ तस्यान्त्यभागेऽप्यणुमात्रनीचः
८४
संमेलने चैव तयोर्द्विमात्रः स एव कम्पः स्वरितोच्चयोश्च
क्षैप्रस्य कम्पस्तु चतुर्भिरादूदेदैद्भिरेङोऽभिहतस्य कम्पः ८५

प्रश्लिष्ट ऊत्वात्कथितोऽत्र नित्यः आतोच्यतेऽसौ क्वचिदेङ
ओङः
एङ्कूपनित्यौ स्त उदात्तकम्पावित्थं कृतः कम्पविनिर्णयश्च
८६

इति कम्पविनिर्णयो नाम त्रयोदशोऽध्यायः

स्वरोत्तरोष्मण्यपि पूर्वरेफलकारयोश्च स्वरभक्तिसंज्ञा
स्यादर्धमात्रा रलयोस्तदादावन्ते स्वरांशावणुमात्रयुक्तौ ८७
रलौ तु यस्मात्स्वरपादयुक्तौ तस्मात्तयोश्च स्वरभक्तिसंज्ञा
पूर्वा शपादद्वययुग्घलन्ता स्यात्संवृताख्या हपरे तु भक्तिः
८८
परांशयुक्ता शषसेषु भक्तिः परेष्वजन्ता विवृताभिधाना
पूर्वस्वराल्पत्वकमित्वमुत्वं त्रयं विसृज्यैव वदेद्धि भक्तिम्
८९
करेणुसंज्ञा रहयोश्च योगे सा कर्विणी स्याल्लहकारयोगे
योगेर्षयोर्हं सपदेति विद्याद्रेफे सति स्याद्धरिणी शसोर्द्ध्वे
९०
भक्तिस्तु या रेफसकारयोगे तां हस्तिनीति प्रवदन्ति केचित्
स्य धूर्षमित्यत्र तु या च भक्तिः सेयं स्वतन्त्रा
स्वरभक्तिरुक्ता ९१
सा हारिता स्याल्लशयोस्तथैवं क्रमेण सप्तस्वरभक्तयस्ताः

इति चतुर्दशोऽध्यायः

उदाहरिष्ये स्वरभक्तयस्ताः क्रमात्करेण्वादि च हारितान्तम्

९२
बर्हिर्यजत्यर्हति गार्हपत्यं करेणुमल्हा इति कर्विणी स्यात्
सहर्षभा हंसपदा सुवर्ष दर्शश्च पर्शुर्हरिणी च बर्सम् ९३
तद्वर्समित्यत्र तु हस्तिनी वा ऋतस्य धूर्षेति तथा स्वतन्त्रा
सहस्रवल्शाः शतवल्श हारिता एवं च
सप्तस्वरभक्त्युदाहृताः ९४

इति पञ्चदशोऽध्यायः

दीर्घाच्च ह्रस्वात्स्वरितादनन्त्यात् पृथग्भवेद्भक्तिरसांहिता च
पृथक्स्वरं यो भजतीह वर्णः पृथक् च भक्तिर्निहते न होर्ध्वे
९५

इति षोडशोऽध्यायः

अत्रो भयोश्च स्वरयोरसन्धिर्विवृत्तिरित्युच्यत एव तज्ज्ञैः
क्रमेण वत्सानुसृतिश्च वत्सानुसारिणी पाकवती पिपीलिका
९६
वैशेषिका चोभयदीर्घिका च स्यान्मध्यमा चैव सवर्णता च
इत्येवमष्टौ हि विवृत्तिसंज्ञास्तासां स्वरूपं खलु वक्ष्यतेऽत्र
९७
या ह्रस्वपूर्वोत्तर दीर्घिका स्यात् सा तर्हि वत्सानुसृतिः
समात्रा
ह्रस्वोत्तरा यत्र तु दीर्घपूर्वा वत्सानुसारिण्यपि सैकमात्रा ९८
यस्या विवृत्तेरुभयत्र ह्रस्वः पादोनमात्रा खलु पाकवत्या
क्रमेण पूर्वोत्तरयोश्च दीर्घौ स्त उच्चनीचौ पदकाल एव ९९

विसर्जनीयश्च न यत्र दृश्यते यस्यां च सन्धौ स्वरितं च लभ्यते
सवर्णभूतावपि तौ भवेतां सा पादमात्रा च पिपीलिका स्यात् १००
स्यातां विवृत्तेरपि यत्र यस्याः आद्यन्तयोश्चाप्यसवर्णदीर्घौ
मध्ये विसर्गौ यदि वापि मा वा वैशेषिका मात्रिककालयुक्ता १०१
आद्यन्तयोश्चैव सवर्णदीर्घौ स्वरो न सन्धानपदे विसर्गः
एवंगुणा यत्र भवन्ति यस्याः स्यादेकमात्रोभयदीर्घिका सा १०२
सवर्णदीर्घावुभयत्र यस्या उदात्तनीचौ भवतः क्रमेण
यद्यस्ति चेत्तत्र विसर्जनीयः स्वारोऽपि सन्धौ च समात्रमध्यमा १०३
आदौ तथान्ते च सवर्णदीर्घौ विभज्यमाने सविसर्जनीयः
न तत्र जातु स्वरितश्च तस्या वृत्तिः समात्रा हि सवर्णदीर्घौ १०४
यद्व्यक्तिमध्ये त्वनुनासिकः स्यात् तत्रानुनास्यस्तु सपादमात्रः
सा व्यक्तिरप्यत्र सपादमात्रा पूर्वोक्तमेवात्र च नाम तस्याः १०५

इति सप्तदशोऽध्यायः

उदाहरिष्यत्यधुना विवृत्तयो वत्सानुसृत्यादि सवर्णतान्तम्
त आ वहन्ति प्रतरां न आयुः स आयु वत्सानुसृतिस्त एनम्

१०६
ते अस्य यो वा अयथा च वत्सानुसारिणी वा इयमग्र आसीत्
स इञ्जनेन प्रऽउगं न इन्द्रायांहोमुचे पाकवती म इन्द्रः १०७
वा आदि वा आह्रियमाणरण् चे ते एनमभ्यत्र पिपीलिका स्यात् १०८
ता एव सो एव तथा च कक्षीवां औशि वैशेषिकसंज्ञिकाः स्युः
वा आप ते एव तथैव तस्या आवृश्च्यथो ओभयदीर्घिका स्यात् १०९
भवन्ति वा आग्रयणाग्रवेद्या आदंश्च या आविवि मध्यमाः स्युः
वा आशता आस च आप्रिदिव्या आपस्तु ता आहु सवर्णदीर्घीं ११०

इत्यष्टादशोऽध्यायः

यशो ममा चैव सुमङ्गलासु श्लोकोपहूता च तथैव यद्घ्रात्
एते हि रङ्गाः खलु पञ्च तेषां वक्ष्यामि वर्णक्रमलक्षणं तत् १११
रङ्गे मुखे व्याघ्ररुतोपमं स्यान्मात्राद्वयं हृञ्जनितं त्वनास्यम्
अथैकमात्रस्त्विह कांस्यघण्टानादः सकम्पः स तु मूर्धजातः ११२
नासिक्यरन्ध्रद्वयनिस्त्रुतोऽन्त्ये स्यादेकमात्रः स तु काकली स्यात्

सौराष्ट्रिकागोपवधूः सुकराठस्वरेण तक्रा३ इति भाषते यथा
११३
तथा समुच्चार्य वदेत्स्वकालाद्रङ्गश्च कम्पः खलु वर्धते सः
इत्येकोनविंशोऽध्यायः

देवा उ ता इम्यमृवा अव स्वां अहं कठे स्युः खलु
रङ्गदीर्घाः ११४
एते द्विमात्राश्च सपादमात्रनासिक्ययुक्ताश्च विवृत्तिपूर्वात्
सपादमात्रत्रितये हृदि स्यादेकस्ततो मूर्धनि चार्धमात्रः ११५
भवेद्विशेषो मुखनासिके च व्यक्तेश्च तस्या अपि साणुमात्रः
इति विंशोऽध्यायः

अच्पूर्वकं व्यञ्जनमेति हल्परे स्पर्शो द्विवर्णं लवकारपूर्वः
११६
परं च हल्यत्स्वरपूर्वरेफाद् द्वित्वं परे तत्सति वर्णमात्रे
द्विवर्णमाप्नोति पदान्तवर्ती ङो नः स्वरोर्ध्वोऽपि च
ह्रस्वपूर्वः ११७
यजुष्यनुस्वार इहापि यत्र भवेत्तदाद्यर्धगकारयुक्तः
सरूपशान्तिः शपरो यदि स्यान्न स्याद्गकारस्य तु
केवलाख्यः ११८
ह्रस्वादनुस्वार इयाद्द्विवर्णं योगे परे तस्य च मात्रिकः
स्यात्
योगादिरप्यत्र तथा द्विरुच्यतेऽनुस्वारपूर्वोऽप्यथ चागमः
स्यात् ११९

## इत्येकविंशोऽध्यायः

यद्व्यञ्जनं येन निमित्तकेन द्विवर्णमाप्नोत्यधुनैव तेन
पूर्वागमो ह्यत्र भवेद्द्वितीयचतुर्थयोश्चैव यथाक्रमेण १२०
धामातिभूतेपरमोपसर्गपाथ एषत्र्यात्पूर्ध्वगताश्छखिद्धजाः
एते त्रयस्तत् प्रथमं तृतीयं पूर्वागमं प्राप्नुयुरेव शब्दाः १२१
क्वचित्समाने स्वरयोस्तु मध्ये लक्ष्यानुसारद्वितयं हलः
स्यात्
पदे द्वितीयस्य तुरीयकस्य पूर्वागमः स्याद्धि तथैव लक्ष्यात्
१२२
शात् तैत्तिरीये खलु नस्य ञः स्यादादेश एवात्र न काठके
ञः
हान्योष्मणः स्पर्शपरात्परस्तत्स्पर्शस्य संस्थान इहागमः
स्यात् १२३
सकृच्च वर्गप्रथमः स चाभिनिधीयतेऽत्राभिनिधान उच्यते
ङान्ते परे धे सति तर्ह्यनन्तात् क्रमात्कगौ द्वावपि चागमौ
स्तः १२४
स्पर्शाद्यदोष्माविकृतेरनुत्तमात् स्यादुत्तमोर्ध्वे सति
चानुपूर्व्यात्
नासिक्यसंज्ञा इह चागमाः स्युरेतान् यमानेव वदन्ति
केचित् १२५
पदान्तगो व्याप्य पदान्तवर्ती द्वितीयवर्णं प्रथमोऽश्नुते स्म
सषौ परौ चेदपदान्तवर्तिनौ द्वितीयकत्वं प्रथमस्य शोर्ध्वे
१२६

ह्रस्वात्परो नाद इह द्विरूपो वर्णक्रमे तं सकृदुच्चरेज्ज्ञः
द्वित्वं निवर्तेत यदा प्रसक्तौ पूर्वागमो वापि तदुच्यतेऽत्र
१२७
ईदैदधो यश्च विसर्गरिफावूष्मा स्वरे वा प्रथमोत्तरे च
स्पर्शे परे वश्च लकार ऊष्मस्पर्शोत्तरस्थेन भजेद्द्विरूपम्
१२८
परे सवर्गीय अनुत्तमे हल् द्वित्वं सवर्णोत्तर एव नेयात्
स्पर्शोत्तरश्चेद्यवलोत्तरो मस्तस्येति तेषामनुनासिकं च १२९
दीर्घात्परश्चेच्चपरेऽन्तगो नो यथा तथा वा यहयोस्तथैव
शषसेष्वच्परेष्वत्र विसर्गो यत्र दृश्यते १३०
वैकृतत्वं प्राकृतत्वं क्रमात् स्याच्छ्लिष्ट एव हि
हकारान्नणमा यत्र दृश्यन्ते परतस्तदा १३१
नासिक्यत्वमुरस्यत्वं हस्य तत्र द्विरुच्यते
विवृत्तिमध्ये यत्र स्याद्विसर्गः सोऽर्धमात्रिकः १३२
विरामश्चैकमात्रः स्यात्तस्याः संज्ञा यथाविधि
प्राग्यद्यघोषवर्णाभ्यां विसर्गः कपवर्गयोः १३३
क्रमात्स जिह्वामूलीय उपध्मानीय उच्यते
वर्णस्य स्वरहीनस्य नाम वाचकमुच्यते १३४
वर्णक्रमस्याध्ययने न वदेदन्यसंज्ञिकाम्
इति द्वाविंशोऽध्यायः

शुद्धवर्णे त्वचामादौ यद्युच्चादिः प्रयुज्यते १३५
संविद्यात्स्वरवर्णं तमेतदेवास्य लक्षणम्
वर्णे च स्वरमात्राङ्गवर्णसारेषु नित्यशः १३६

कारोत्तरस्वरेभ्योऽर्वाङ् न च संधिः कदाचन
उदात्तादिस्वरात् पूर्वं स्वरवर्णे च मात्रिका १३७
यदि युज्येत नाम्नासौ मात्रिका वर्ण उच्यते
तस्मिंस्तु मात्रिकात् पूर्वमचां संज्ञोच्यते यदि १३८
हलामादावङ्गसंज्ञा नामान्यस्याङ्गवर्णकः

इति त्रयोविंशोऽध्यायः

यत्र यत्र व्यञ्जनानां पौर्वापर्यविधानतः १३९
यथाङ्गलक्षणं प्रोक्तमङ्गवर्णे तथा वदेत्
व्यञ्जनानामङ्गवर्णे त्वङ्गं भूतोत्तरं वदेत् १४०
हल्संज्ञिकेति कण्ठोक्त्या वदेत् तन्नाम वै ततः
आदौ स्वराणामच्संज्ञा तत्तन्मात्रा वदेत् ततः १४१
अथ स्वरानुदात्तादीन् तन्नाम च वदेत् क्रमात्
व्यञ्जनं यद्यवसितं तस्य मात्रा विधीयते १४२
यत्रानवसितं तत् स्यात् तन्मात्रा तत्र नेष्यते
अनेकवर्णसंयोगो यत्रैकव्यञ्जनात्मकः १४३
स्यात्पूर्वाङ्गो भवेत् तत्र पूर्वाङ्गादि सकृद् वदेत्
एकव्यञ्जनसंयोग उभयाङ्गो भवेद्यदि १४४
पृथगङ्गं प्रयुञ्जीयात् पौर्वापर्यक्रमात् तदा
यदुक्तं केवले वर्णे शास्त्राद् द्वित्वागमादिकम् १४५
तत् सर्वमङ्गवर्णोक्तौ प्रयुञ्जीयाद्यथाविधि १४६

इति चतुर्विंशोऽध्यायः

पारि शिक्षा समाप्ता

"Pāri Śikṣā," in Chandra, Lokesh, ed., *Sanskrit Texts on Phonetics: A Collection of Śikṣā Texts*, Śata-Piṭaka Series, Delhi: 1981, pp. 317-394.

Stautzebach, Ralf, *Pāriśikṣā und Sarvasaṁmataśikṣā: Rechtlautlehren der Taittirīya-Śākhā*, Stuttgart: Franz Steiner Verlag, 1994.

"Pañca-Varṇa-Krama-Lakṣaṇam," Hamburg Staats- und Universitätsbibliothek, Ātreya Śikṣā palm-leaf codex, Cakra, son of Rāma Ayyaṅgār, scribe, III 8/133, pp. 65-72.

"Varṇa-Krama Śikṣā," Mysore Governmental Oriental Manuscript Library, Telugu script on palm leaves, 10 folios, (P 4772/22).

# व्यासशिक्षा

## संज्ञाप्रकरणम् १

श्रीवासुदेवं वरदं प्रणम्य श्रीमद्गणेशं वचसाञ्च देवीम् १
शिक्षां प्रवक्ष्ये श्रुतिकारणाङ्गं सुबोधकं लक्षणशीर्षभूषाम् २
अथ स्वरादिसंज्ञाश्च तत्प्रयोजनमेव हि ३
तत्फलञ्च प्रवक्ष्यामि विदुषां प्रमुदे यथा ४
अवर्णेवर्णकोवर्णा ऋवर्णौ लृत्वमेत्वमैत् ५
ओदौद्रङ्गौ क्रमादोम्योत्स्वरास्स्युर्व्यञ्जनान्यथ ६
कादिमान्तास्स्मृतास्स्पर्शा अन्तस्था यादिवोत्तराः ७
जिह्वामूल्यादिहान्ताश्च षडूष्माण उदीरिताः ८
स्पर्शानां पञ्च पञ्च स्युर्वर्गा वर्गोत्तरस्य च ९
तत्प्रथमादिसंज्ञास्स्युः पञ्चमस्योत्तमः क्रमात् १०
अघोषास्स्युर्विसर्गोष्मद्वितीयप्रथमा न हः ११
गजडाद्या दबाद्याश्च घोषवन्तः परे हलः १२
सविशेषस्तु यस्तस्य ज्ञेयं वर्णान्तरं बुधैः १३
तुल्यरूपं सवर्णं स्याल्लोपस्स्यादप्रदर्शनम् १४
ऋवर्णस्य लृकारस्य पृक्तसंज्ञा प्रकीर्तिता १५
अवसानेऽन्त्यवर्णाश्च नादा इति बुधैस्स्मृताः १६
आख्यानेकस्य वर्णोर्ध्वः स्वरस्य कारतोत्तरः १७
भवेदकारकारोद्ध्वो हलामत्तु र एफगः १८
अदन्तं ग्रहणं वा स्यात्सन्देहे सन्निधिं त्वपि १९
निर्देशाः कारमुख्याश्चान्वादेशावपि चेत्यधः २०
त्वथैवेति निवृत्तिस्थो ह्यधिकारोऽवधारकः २१
अनमाना निषेधे स्युर्वेति वैभाषिको भवेत् २२
सम्मिश्रस्स्याद्यदेकत्वं सम्बन्धः श्रवणे द्वयोः २३

अनेकव्यञ्जनश्लिष्टस्संयोगश्च प्रकीर्तितः २४
वर्णाभावो विरामश्चावसानं सार्धमात्रिकः २५
नानापदवदिङ्ग्यश्चासङ्ख्याने चाद्यवग्रहः २६
वेदभागः क्रमेणैव स चार्षः कथ्यते बुधैः २७
उच्छ्वासेऽनवसाना स्यात्संहिता चान्तगं पदम् २८
पदवर्णस्वराङ्गानां द्विर्द्विर्युक्ते च संहिता २९
द्विधादिसंहिता ह्यत्र पञ्चैवं संहितास्स्मृताः ३०
पदवत्संहिता यत्र न कार्यं सांहितं यदि ३१
विज्ञेया प्रकृतिस्तस्या ज्ञानादेव फलं लभेत् ३२
संहितावत्क्रमो ज्ञेयो द्वितीयं पदवद् द्वयोः ३३
इतिगन्त्वादि चेदुक्त्वा द्वितीयं चोत्तरं तथा ३४
आदन्तन्तु यदुच्चान्तमोपसर्गपरं यदि ३५
परेण त्रिक्रमस्स्याद्धिषु पदं नः परन्त्वधः ३६
सकृदादि द्वितीयं द्विः पठेच्चादिपदं सकृत् ३७
सन्धितः क्रमवच्चेति प्रोच्यते सा जटा बुधैः ३८
त्रिक्रमस्य जटा ज्ञेया ह्युक्त्वा पूर्वं क्रमं तथा ३९
पुनरन्तं मध्यमादि पुनराद्यन्तरं परम् ४०
अनुलोमस्स्वपाठस्स्याद्विलोमस्सन्धिनिर्मितः ४१
पदं पदं पठेत्ताभ्यां त्रिवारञ्चोर्ध्वतः पुनः ४२
प्रोपावापर्यधिव्युत्सुन्यन्वपाप्यत्यभि प्रति ४३
परानिस्सं नव दशाप्युपसर्गाः स्युरत्र हि ४४

इति संज्ञाप्रकरणम् १

## अथ प्रग्रहप्रकरणम् २

अथ प्रग्रह एवान्त उच्यतेऽवग्रहो न चेत् ४५
ऊकारः स्थित ओकारोऽप्यकारव्यञ्जनोत्तरः ४६
स म ह द थ पित्पूर्वो नित्योऽथेदेत् पतीश्रुतिः ४७
कार्ष्णी धी चक्षुषी मुष्टी देवता फल्गुनी अमी ४८
अहनी अपणी हूती सुम्निनी सामनी हरी ४९
कल्पयन्ती तपसी नाभ्यैक्षव्यापृषती हुरी ५०
रिष्यन्ती वाससी दर्वी नः पृथिवी व्यचस्वती ५१
जन्मनी वैष्णवी द्यावापृथिवी आहुती कृतौ ५२
रोदसी चोत्तरः पान्यपरो न्वती च ची प्र यत् ५३
न ह्यन्योद्ध्वौ समीची घ्नी घ्नी चक्रे पोद्ध्व आन्मही ५४
ऊद्ध्वे शाखे धृते शृङ्गे एने मेध्ये च देवते ५५
पार्श्वे एवोत्तरे अक्ते तृणे तृद्ये कनीनिके ५६
शिप्रे रथन्तरे शस्त्रेऽहोरात्रे चोत्तमे उभे ५७
सामे सदोहविर्द्धाने वजेऽधिषवणे शिवे ५८
विषुरस्य विरूपे च दृढे ध्वंसदने हुले ५९
अर्पिते रैवते पूर्ते भागधे च धृतव्रते ६०
अच्छिद्रेऽनृते प्रत्ते अस्मे त्वे इत्यनिङ्ग्यगम् ६१
एते वैसं हि तन्वेव यज्ञेष्टक् पत्परो द्वयोः ६२
द्वे परश्चैकव्यवेतः कृष्णा वीड्द्वार्यदा चराव् ६३
स्थः परः पूर्वतो वापि ईदेकारोऽन्त एव च ६४
बहुस्वरस्य ते थे च आकारैकारपूर्वकः ६५
पूर्णे ब्रह्मजेमे आपस्सजूः क्रूरं तथैषु च ६६
एव रसेन गर्भञ्च उपोत्तर इमे तथा ६७
ते तूपाहर्नमो गर्भं वायुर्मापैनमभ्यधः ६८

ते अस्याचक्र्छन्दस्वोर्वी येऽप्र यङ् क्रान्तरासु च ६९
सोमाय स्वेति चैतस्मिन्वरी इत्याद्ययं परः ७०
इरावती प्रभृत्यैव दाधारान्तस्तथैव च ७१
कुर्यादिष्टिष्वग्निं गानूद्भवतोऽवान्तराकरोत् ७२
आस्तां गमयतोऽब्रूतां स्तभ्नीतां बिभृतस्त च ७३
वाचयत्यप्युभाभ्याञ्च ताभ्यामेव तनू यदा ७४
प्रवर्तपर आषष्ठात्सदा प्रग्रहकार्यभाक् ७५
नातेऽवेऽन्हे धत्तेर्याते ग्रामी ज्ञे वर्चसी थुनी ७६
लोके रुन्धे मासे नित्यं पस्थे नीचस्त उर्वशी ७७
प्रग्रहेङ्ग्योपसर्गान्त इति स्यादप्यसांहिते ७८
पुनस्त्विङ्ग्यं क्रमे चादिर्विरामस्थं द्विधैक्यतः ७९
नोपसर्गोऽवसानस्थो निहतश्च द्वयोरधः ८०
अवानस्त्रिषु मध्यस्थोऽवग्रहो न क्रमे तु च ८१
इति प्रग्रहप्रकरणम् २

अथ परिभाषाप्रकरणम् ३

अथेयात्संहितायां यत्कार्यञ्चेत्सनिमित्तकम् ८२
विकृतञ्च पदेऽदाद्यनाद्यनुस्वारयुक्पदम् ८३
ह्रस्वस्यानित्यदीर्घं स्यात्तद्वास्याप्युपलक्षणम् ८४
पूर्वं पूर्वन्तु तत्रैव कर्तव्यं प्रथमं यथा ८५
सामान्योक्तस्तु सर्वत्र विशेषो नैव दृश्यते ८६
तयोरेकत्र चाल्पस्थो विशेषो बलवान् स्मृतः ८७
पुनरुक्तं यतः पञ्चपदमित्युत्तरञ्च वा ८८
पूर्ववद्भवति ज्ञेयं सर्वत्रापि विचक्षणैः ८९

परि त्वा पुनरूर्जा यन्नोऽस्यारातीयतोऽपि च ९०
सप्त तेऽपो अनु त्वग्ने त्वङ्गेमांश्चाधि रोचने ९१
चित्रं च भवतं द्रप्सस्सहस्व पुनरैक्यतः ९२
आयुर्यज्ञेन वाजश्च प्राणम्म आयुरेव च ९३
पवस्व व्रतपास्सूर्ये परोऽग्न आदयः पुनः ९४
येनाग्नेऽस्मिन् सधस्थे च वाज्यध्वनस्त्वनैक्यतः ९५
एदोर्द्ध्यां वक्ष्यतेऽतश्च यदनेकपदे पुनः ९६
जटोच्यतेऽन्यशब्देन तत्रानैक्यं न विद्यते ९७
ग्रहणन्त्वेकमुद्दिश्य पदं वै क्रियते यतः ९८
तदन्यत्र तु न ग्राह्यं यज्जटाभिमतैरिति ९९
संहितावत्क्रमो ज्ञेयो जटा च विकृतादिषु १००
आर्षे तूक्तं मुखेऽन्ते चान्यत्स्यादुभयत्र हि १०१
इति परिभाषाप्रकरणम् ३

## अथ दीर्घप्रकरणम् ४

अथादावन्त आर्षे तु ह्रस्वो दीर्घं भजेद्धलि १०२
सदेङ्ग्ये तु व्यानोदानशब्दयोस्तु सुबन्तयोः १०३
लोक एवेष्ट चाद्याश्वात्तस्य देवा यते युवम् १०४
वयुना हृदयाश्वा विद्वर्षाह्वामुत्तरस्तथा १०५
चित्रर्तावयवातत्वद्रविणप्रस्थभङ्गुर १०६
पुष्पष्णियर्णकशक्तिश्वदेव्यविषुचेन्द्रिय १०७
वीर्याश्ववद्वन्वानूर्ध्वो वनान्योर्ध्वेषु चेन्द्रचेत् १०८
सत्राज्युक्थायुमत्सुम्ना यन् सुगोपरथीतम १०९
स्वाधियं धी रुहं राज्यं परो दीर्घाधियः परः ११०

शीक शुद्ध च मेघाघ वसु शत्रु च योत्तरः १११
विश्वाराड्वसुमित्रापि साह हा पुषवत्परः ११२
परी णसमधी वासं प्रावणेभिस्सहोत्तरः ११३
रात्र्योषध्याहुति श्रोणि चिति व्याहृति पृष्टि चेत् ११४
स्वाहाकृति शच्यृक्साम हनुह्लादुनि भोत्तरः ११५
चर्षणी धृत्पारीण् पूती गाभीवृत्सह सूयव ११६
त्विषि वाशिम्यनूब्याज्ञात् काश्विभूदाववग्रहः ११७
ऋक्ष्वथा तेस्वयं धत्तं सपत्नान्नो रयिं भव ११८
देवानां शतसोमस्य जीवो यूयं पितॄन् परः ११९
अधा ते च यथा ह्यूद्ध्वस्तिष्ठादेवशरीर चेत् १२०
अच्छा वोचो जिगा नक्षि पितर्देवान्नियुद्वद १२१
चकृमा सुजुषध्वं कद्वयं दैव्येऽत्र पूष्ण ते १२२
सृजा ररा दृतिं वृष्टिं सं रक्षा माकिराज च १२३
भवा तोकाय नस्त्वं पा वाज्यत्रा ते नियुन्नरः १२४
ससादा पिद्यजी मुञ्चा विस्वस्त शिक्षनस्सखि १२५
क्षामा रेभिरु घा स्यालात्सत्यं मृडा जरित्र नः १२६
धारया रयिं वसूनि मय्यवता हवे वचः १२७
विद्मा ते तं हि बोधा सनोऽद्या देवान् हुवे च वृण् १२८
भरता वस् बृहज्ज्ञातवर्धया त्वं रयिं परः १२९
सचस्व नुद वर्धावा नोऽत्तधामाह ना ह दे १३०
युक्ष्व स्वेन जनिष्वा हि मधूर्ध्वस्सिञ्चथोक्षत १३१
घुष्याश्वस्य वि पाथा दिवारिथामुञ्चता यज १३२
पिबा चरा सोम हिष्ठाम् वर्तयर्ष यथा पु चेत् १३३
जनयथा च दीयार ऋध्यामा ते हरा नि चेत् १३४

तत्रा रथं जयता नरू कुत्राचिद्य तरा मृधः १३५
याता हिर पृणस्वा घृते भरा दद्धयपा वृधि १३६
वोचता मेऽनदता हद्येना सहस् चृता बचेत् १३७
भजा त्वं जनया दैव्यं दक्षिणेना वसून्यपि १३८
रुहेमा स्व स्तरीमाजु भवता मृड धर्ष मान् १३९
बिभृता स्वीरयथा मरु भरेमा मनीष चेत् १४०
हन्तना तं जगामा परस्याश्चेत्तपता सुवृक् १४१
जुहुता विश्व तरता रजांसि शृणुता हवम् १४२
पारया नव्यस्सादया यज्ञञ्चेत्कृणुता बृहत् १४३
क्रयी पोश्मसी ग यदी भू कृधी स्वस् श्रुधी हवम् १४४
मोष्वा तु नू रणे मक्षू दे थू करूशु बल् सु नु १४५
इति व्यञ्जनपरदीर्घप्रकरणम् ४

## आगमप्रकरणम् ५

आगमस्त्रपुपूर्वः स्यान्मिथ्वधश्शोऽपि चोत्तरः १४६
सु पूर्वश्शोऽपि चन्द्रोर्ध्वस्सम्पूर्वस्सः कुरूत्तरः १४७
समपूर्वश्च कुर्वोर्ध्वो नीचापूर्वो द उच्परः १४८
ङपूर्वः कस्सषोद्धर्वश्चेट्टनपूर्वश्च तो भवेत् १४९
इति आगमप्रकरणम् ५

## लोपप्रकरणम् ६

लोपो विसर्गस्सोऽनिङ्ग्यस्स्य उच्चोऽथैष चेद्धलि १५०
एनौषधीरिद्विदग्न इमान्नः परतश्च सः १५१
मकारः पदमीं पूर्वश्चादौ व उच्चतुन्वधः १५२

मश्चावग्रह इत्येकं या तिष्ठन्त्येकयोर्ध्वतः १५३
रेफोष्मोर्ध्वोऽन्तगो मस्तु नादौ संसाञ्च रापरे १५४
वर्तमानस्स उत्पूर्वस्स्थस्तयोरित्यनोत्परे १५५
इति लोपप्रकरणम् ६

वैकृतप्रकरणम् ७
अथ वैकृतमाप्नोति पदासम्पूर्वऋृत्वरम् १५६
विसर्गोऽवग्रहेष्वाशीस्सुवर्धू रं परस्स षम् १५७
नकारश्शमियाञ्चोर्ध्वो नैरयन्नार्ध्नुवन्नपि १५८
एवास्मिन्ननड्वानायन् घृणीवान् वारुणानिति १५९
हकारः प्रथमादूर्ध्वस्तत्सस्थानञ्चतुर्थकम् १६०
स्पर्शपूर्वश्शकारश्छं लन्तश्चाप्नोति लोत्तरः १६१
तवर्गश्चटवर्गाद्यौ भजेदन्तोऽन्तमूर्ध्वयोः १६२
नकारो लपरस्तस्य सवर्णमनुनासिकम् १६३
स्पर्शोत्तरो मकारस्तु यवलोत्तर एव च १६४
अनुनासिकमेतेषां सवर्णं प्रतिपद्यते १६५
ज्ञघ्नोत्तरो मकारश्चेदनुस्वारोऽत्र केवलः १६६
द्विमात्र इति विज्ञेयो ह्यन्यधर्मविवर्जितः १६७
इति वैकृतप्रकरणम् ७

षत्वप्रकरणम् ८
अथेतस्सविसर्गौ षं पदि मह्योहि मो द्यवि १६८
सोदिव्ययं कमूप्रोत्री पूर्वोऽवग्रहपूर्वकः १६९
असिञ्चन्नसदामापि ह्यनयोरादिपूर्वके १७०

परि वि प्रति निरार्यध्यभि पूर्वो निहते पदे १७१
तोर्ध्वो वेस्सुमतिर्माकिरीयुरायुर्नकिर्विदुः १७२
प्तेसोऽग्निरविदुर्मीढुर्निराभिः पायुभिस्सधिः १७३
नावर्णा हल्लिमौ मृत्युस्पति कुन्यृतु पल्यधः १७४
ध्यन्यपूर्वस्सवस्थानमृद्रवत्यप्यवग्रहः १७५
सन्तानेभ्यः स्पशस्सीतं सप्ताभिस्संमितां स्तनाम् १७६
सभेयस्सत्वा सस्यायै सक्सनिश्च सनीस्सनि १७७
न स्तुप् स्तरीस्वरस्पर्धास्फुरं साहस्रसारथिः १७८
ज्योतिरायुश्चतुः पूर्वः स्तो प्रतिप्रसवस्त्विति १७९
टन्तो वाघाषपूर्वष्षात्थाकारश्चैव ठं भजेत् १८०
विद्वांस्तांस्त्रीनृतून् लोकांस्तर्हां स्तस्मिन् पितृननान् १८१
युष्मानूर्ध्वानश्मन् कृणवन् कपालानम्बकानपि १८२
तिष्ठन्नाद्युच्चके नेमिर्देवांश्चेत्सवने पशून् १८३
नकारः प्राकृतश्चैषु नित्यतोर्ध्वस्समाप्नुयात् १८४
इति षत्वप्रकरणम् ८

## णत्वप्रकरणम् ९

अथैति नो णमस्थूरि षु ग्रामोरु समिन्द्र वाः १८५
धिसुवस्त्रिटपूर्वो निष्पूर्वो हन्योप्यमान च १८६
पारी परि प्र पूर्वश्च तदवर्णाव्यवेतकः १८७
प्राधो वन्नुह्यमानोऽयन् यानं यवेन वाहनः १८८
षुम्नान्योऽनित्यषत्वस्थ इन्द्रोऽध एनमत्र च १८९
केनेत्यत्रायजुः पूर्वो नृश्रीपूर्वो मना अपि १९०
अङ्गानां ग्यानि गान्योने गानां यामेन षण्ण च १९१

रषः पूर्वो हवन्यन्हे हन्त्रुपूर्वो मयान्यनी १९२
न नूनं नृत्य नह्यत्यन्वान्यशब्दे न्य उच्चकः १९३
नकारो द्वित्वगो लक्ष्यात्तकारोर्ध्वोऽपि वान्तगः १९४
उत्तमं प्रथमोऽन्त्योर्ध्वस्तृतीयं घोषवत्परः १९५
अन्तोऽचि वा सवर्गीयं ककुदन्त्यश्च मोत्तरः १९६
इति णत्वप्रकरणम् ९

रेफप्रकरणम् १०
अथ विसर्ग आप्नोति रेफमज्घोषवत्परः १९७
ह्वारेष्टरबिभर्वार्हारनन्तस्सवितस्त्वकः १९८
अजीगश्शमितस्त्वष्टः प्रातश्चाहरहस्त्वभाः १९९
नेष्टर्यष्टर्विवर्वस्तस्सनुतस्तनुतः पुनः २००
स्तोतर्होतः पितर्म्मातः करावरनुदात्तयोः २०१
आवृत्परोऽयमित्यूर्ध्वश्चानाद्युच्चेऽन्तरेव हि २०२
अनिङ्ग्यान्तास्सुवश्चाहास्त्वहर्नभ्यां भिरुत्तरः २०३
रेफोर्ध्वो लुप्यते रेफस्तत्पूर्वो दीर्घमाप्नुयात् २०४
द्वन्द्वेऽहो रात्परे ओत्वं याति रोर्ध्वे सुवस्त्वपि २०५
अःकारश्च त्वकारोर्ध्वो घोषवत्पर एव वा २०६
इति रेफप्रकरणम् १०

विसर्जनीयसन्धिप्रकरणम् ११
क ख पे षं तथावर्णे पूर्वस्संयात्यवग्रहः २०७
अत्र देवरिषश्चाविर्निरिडश्शश्वतोऽपसः २०८
विश्वतोंऽहसोऽतिदिवोऽप्यश्मनस्तमसस्त्विति २०९

स क्र घान्योत्तरः पिन्व पथे कृध्युत्तरस्तथा २१०
पत्नीवे पतिशब्दे द्विः पुत्पर्यूर्ध्वे दिवोहसः २११
वसुष्कोर्ध्वश्च रायस्पोपरो नमस्करोपरः २१२
नाध्वरं विश्वतोऽन्तश्च पुनस्तु विविशुः परुः २१३
जातोऽत्र धषवत्यूर्ध्वे परि वा प्रोत्तरे ननिः २१४
लुप्यते संयुतोष्मोर्ध्वोऽप्यवर्णाद्घोषवत्परः २१५
ऊष्माणमप्यघोषोर्द्धवस्तस्य सस्थानमाप्नुयात् २१६
जिह्वामूलीयमाप्नोति उपध्मानीयमेव वा २१७
करवे पफे परे न क्षे अवर्णाद्यत्वमच्परे २१८
इति विसर्जनीयसन्धिप्रकरणम् ११

## यत्वप्रकरणम् १२

ग्रहे हिरण्यवर्णीये पृष्ठ्ये याज्योख्ययोरपि २१९
नित्याचिनो यमात्पूर्वमीदूत्पूर्वोऽन्त एति रम् २२०
सोमान्यपूर्वन्दुर्यां स्तु मर्त्यान् पोषान्वशानरान् २२१
मधुमानविमान् गोमानमित्रानमृतान्महान् २२२
सो अस्मान् हविष्मान् कक्षीवानिडावांश्च बाणवान् २२३
चिकित्वान् हिपयस्वांश्च विदत्रानुदयान् हि यम् २२४
इन्द्रोमाचोढ्वमीडेन्यान् अप्येत्वकुर्वतादुहत् २२५
अधरान्त्सर्त्वगन्माकरग्रेऽलञ्चादितिः परः २२६
नार्चान् पतङ्गान् यजीयान् समानांश्च तथा यमान् २२७
रश्मीन् हि श्रपयांश्चात्र पदश्चेदुदथा परः २२८
उक्तौ विधिनिषेधौ च यत्वरत्वे स्वरे परे २२९
विलोमेऽप्येव तौ ज्ञेयौ प्रकृतौ नैव नो हलि २३०

अयवावेदोदायावावैत्वमौत्वं स्वरेऽनति २३१
तत्तस्मादयुतादुत्वात्स्वकालाद्धः पदात्परः २३२
यमिवर्णोऽसवर्णे वमुन्नश्येती मिथुन्यचि २३३
यकारोऽवर्णपूर्वोऽचि ह्यादेशो यदि लुप्यते २३४
न प्लुते प्रग्रहे सन्धिविधिर्यत्वे तु लुप्तके २३५
रोष्मभावात्तु नात्पूर्वं लुप्तान्माच्च तदुत्तरात् २३६
नकाराद्याकृतेर्लुप्तादनुस्वारागमो भवेत् २३७
अनुस्वारो यजुष्येवमध्यायेऽपि यदा भवेत् २३८
तदा गकारसंयुक्तो न शान्तिश्शासरूपरः २३९

इति यत्वप्रकरणम् १२

## अच्सन्धिप्रकरणम् १३

अथ स्वरावुभावेकमाप्नुतोऽच्सन्धिरुच्यते २४०
आद्यष्टसु सवर्णोद्ध्वे दीर्घमप्लुतपूर्वके २४१
अथात्रावर्णपूर्वे तावेत्वञ्चेवर्ण उत्तरे २४२
उ वर्णोत्तर ओत्वञ्च ऐत्वमेदैत्परे तथा २४३
औत्वमोदौत्परेऽरमृत्यारं प्रोपावपूर्वके २४४
न स्वधा मा प्रपास्यूर्ध्व आपूषाज्या प्रबुध्निया २४५
अमिनन्त स्वपाठेऽचि पदं मानो यदाषुसाम् २४६
ओष्ठेतनेव एष्टश्चेदेमन्नोद्मन्परं पदम् २४७

इति अच्सन्धिप्रकरणम् १३

## अनैक्यप्रकरणम् १४

एदोत्पूर्वेऽयकारोद्ध्वे एकं पूर्वसमन्वितः २४८

अथ प्राकृत उख्येयुर्याज्या द्रापे हिरण्यव २४९
धाता जुष्टो विकर्षोऽग्निर्मूर्बिहव्येयमे नमः २५०
वाजपेय महापृष्ठ्येश्योनायोप ध्रुवक्षितिः २५१
तेष्वहन्यनिष्ट्रवद्यादवन्त्वसंहसोंऽहतिः २५२
अन्वापस्त्वो वातोऽर्मासो मर्तो दत्ते रथस्त्वधः २५३
वातः पूर्वोऽभिवापश्च अपः पूर्वोऽगमत्त्वनु २५४
आपः पूर्वोऽद्भिरस्मांश्चेदपान्न पात्तथैव च २५५
अदूद्ध्वोऽस्मान् स इन्द्रोऽधस्तेऽधोऽग्नेऽन्धोंऽशुरद्य च २५६
ग्न्यूद्ध्व आविन्नस्सोमोऽधोमेऽधोऽग्नेऽस्याश्विनापरा २५७
नः पूर्वोऽघाद्यपथ्यस्मिन्नसदभ्यग्निरन्तमः २५८
नमः पूर्वोऽग्रियाग्रे त्वश्वेभ्यश्चेतरत्र तु २५९
धीरासोऽदब्धासोऽषाढ एकादशास एव च २६०
ऋषीणां पुत्रश्शार्याते पृथिवी यज्ञ एव च २६१
पितार आसते ये गो समिद्ध ऋषभः पुवः २६२
युवयोर्यो गृह्णाम्यग्रे जज्ञे वानेष एव च २६३
पतिर्वः पृष्ठे संस्फानश्शुष्मो वृष्णो वचस्तथा २६४
वर्षिष्ठे जुषाणः पाथो यो रुद्रः पूर्व इत्यपि २६५
अरतिमस्य यज्ञस्य त्वतिद्रुतोऽतियन्ति च २६६
अविष्यन्ननमीवश्च अन्नेष्वर्चिस्तथानृणः २६७
अप्सु योऽज्यानिमर्वन्तमजीतानन्हियास्तथा २६८
अम्बाल्यस्त्वङ्गिरोऽङ्गे च अस्कभायत्तथा कृणोत् २६९
अश्वसनिरशिश्रेद्य अच्युतोऽस्थभिरघ्निय २७०
अध्वर स्वर ऊद्ध्वे चेदेष्वकरस्स्वभावतः २७१
इति अनैक्यप्रकरणम् १४

## ऐक्यप्रकरणम् १५

अथैतद्विषयेष्वेकमेदोदितस्त्वसीति च २७२
न गर्भश्च यमोनद्धो भद्रः पूर्वस्त्वसीति च २७३
यवनहेष्वजूर्ध्वेषु ग्नजोर्ध्वोऽकार उच्चकः २७४
मो वचस्स्थे दधानोऽधो अग्नेत्यकार ऐक्यतः २७५
अभ्यावर्तिन्नभिद्रोहमधाय्यपि दधामि च २७६
अदितिश्शर्माग्नेर्जिह्वामग्नयः पप्रयोऽरथाः २७७
अद्यान्वस्माकमरिष्टा अश्माश्वाश्रुतिरव्यथ २७८
अस्मत्पाशानस्मिन् यज्ञे अङ्गिरस्वदथो अदः २७९
अस्तास्मेधत्त चादुग्धा अर्चन्त्यत्रस्थचार्यमन् २८०
अन्तरस्याममापूपमश्यामान्नाय चाकरम् २८१
गाहमानो जायमानो मन्यमानस्त्रिधोऽग्नयः २८२
तपसो भामितो धावः स्पतिभ्यो हेतयः पते २८३
आयोऽध्वर्यो क्रतोऽधश्चेन्नान्य प्रग्रह पूर्वकः २८४
ग्रन्थान्तरेऽप्यनार्षेऽयं स्वेच्छया वर्तते त्विति २८५
इति ऐक्यप्रकरणम् १५

## स्वरधर्मस्वरूपप्रकरणम् १६

वर्णानां कारणं वेद उदात्तादिस्वरास्ततः २८६
तेषां तत्स्वरसन्धेश्च लक्षणं कथ्यतेऽधुना २८७
उदात्तोच्चारणे तस्य देहदैर्घ्यं भवेद्यतः २८८
उच्चारणेऽनुदात्तस्य देहस्य ह्रस्वता भवेत् २८९
भवेत्तत्र समाहारः स्वरितश्चोच्चनीचयोः २९०
प्रचयश्च बुधैः प्रोक्ता उदात्तश्रुतिरित्यपि २९१

स्वारश्शीर्षे मुखेऽप्युच्चप्रचयौ निहतो हृदि २९२
नीचोच्चस्वारप्रचयाः क्रमाज्ज्ञेयाः प्रजापतौ २९३
इति स्वरधर्मस्वरूपप्रकरणम् १६

## स्वरसन्धिप्रकरणम् १७

मध्यस्थ एकनीचोऽतिप्रयत्नो विक्रमो भवेत् २९४
उच्चसन्धिर्भवेदुच्चः स्वरितः स्वारनीचयोः २९५
नीचोर्ध्वाकारसम्मिश्र उच्च एङ् स्वरितो भवेत् २९६
अत्राभिनिहितश्चायमिति संज्ञायते बुधैः २९७
यवत्वे ह्युच्चयोर्यत्र इवर्णोकारयोरपि २९८
परतः स्वर्यते नीचः स्वरितः क्षैप्र उच्यते २९९
उच्चोत्वान्नीच उत्वे स्यात्प्रश्लिष्टस्सन्धितो यमः ३००
अखण्डे सयवो नित्यो नीचपूर्वः स्वयञ्च वा ३०१
स्थितस्वारस्य चान्त्योऽणुर्नीचः स्यात्प्रवणोत्तरे ३०२
स्वरद्वयस्य चैकस्मिन् कम्पसंज्ञास्ति दीर्घता ३०३
क्षैप्रकम्पश्चतुर्धैवमादूदेदैद्भिरुच्यते ३०४
प्रश्लिष्टो नित्य ऊदाद्धयामेङाभिनिहतस्स्मृतः ३०५
उच्चोद्ध्वौ यददीव्यादि त्रिके न कञ्चनेति च ३०६
उच्चकम्पौ स्थितेङ्रूपौ स्वाराः कम्पाश्च सांहिताः ३०७
उच्चादुत्तरतो नीचः स्वरितं प्रतिपद्यते ३०८
स्वारोऽयं प्रचयश्चैव नोदात्तस्वरितोत्तरे ३०९
स्वारादुपरि नीचानां प्रचयः परिकीर्तितः ३१०
यस्समानपदे स्वारस्तैरोव्यञ्जन उच्यते ३११
पादवृत्तस्तयोर्व्यक्तावन्यः प्रातिहतस्स्मृतः ३१२

नित्योऽत्युच्चनीचः क्षैप्रस्तत्समो न्यूनतः परः ३१३
दृढतरप्रयत्नस्स्यान्नित्ये क्षैप्रे च वा दृढः ३१४
प्रश्लिष्टे चाभिनिहते मृदुता स्वल्पतान्यतः ३१५
नादानुस्वारयोः पूर्वस्स्वारभागुच्चवत्स्थितः ३१६
स्वर्येतेऽस्मात्परावेव नादानुस्वारकावपि ३१७
भक्तिस्वारात्तदङ्गानज् घृतवद्दृपरे च रः ३१८
आयपूर्वेऽथ चोच्चः स्याद्भक्तेर्नीचो डधू अधः ३१९
स्वारश्चारण्यके भक्तेरत्र शीर्षं स्रपूर्वके ३२०
स्वर्यते चादितो ह्रस्वो दीर्घमध्यं तथैव च ३२१
संयुतोद्ध्वे तु दीर्घश्चेदन्त्यस्वारो भवेत्तदा ३२२
ऋकारोत्तररेफोद्ध्वेऽवसाने दीर्घ एव च ३२३
यो जटामात्रविद्ब्रह्मसन्धिज्ञो विष्णुरुच्यते ३२४
ईश्वरस्सर्वसन्धिज्ञ इत्येवर्षिभिरीरितः ३२५
इति स्वरसन्धिप्रकरणम् १७

## हस्तस्वरविन्यासप्रकरणम् १८

कनिष्ठानामिकामध्या तर्जनीषूत्तमे करे ३२६
नीचस्वारधृतोदात्तानङ्गुष्ठाग्रेण निर्दिशेत् ३२७
आद्यन्तमध्यामध्यासु तद्रेखासु च तान् क्रमात् ३२८
पृथक् तदङ्गुलिस्थानं भक्तेर्यस्स्वर उच्यते ३२९
स्वारमुच्चमिवोर्ध्वञ्च ह्यनामिकान्तरान्त्ययोः ३३०
स्वारकम्पे स्वरावेतावनामिकोत्तमाद्ययोः ३३१
निर्दिशेदुच्चकम्पे च तर्जनीमध्यमाद्ययोः ३३२
विरामे व्यञ्जनस्यैव पृथक्स्थानं न विद्यते ३३३

एवं हस्तस्वरन्यासे कथितश्च विनिर्णयः ३३४
सुहस्तस्वरविन्यासान्निर्मलाध्ययनं भवेत् ३३५
तत्पूतो ब्राह्मणो यस्तु ब्रह्मणा सह मोदते ३३६
इति हस्तस्वरविन्यासप्रकरणम् १८

द्वित्वप्रकरणम् १९
स्वरपूर्व इयाद्द्वित्वं व्यञ्जनं व्यञ्जनोत्तरे ३३७
लपूर्वे च वपूर्वे च द्वित्वं स्पर्श उपाप्नुयात् ३३८
अच्पूर्वाद्रादियाद् द्वित्वं वर्णमात्रोदये च हल् ३३९
ह्रस्वादन्तौ नङौ द्वित्वमाप्नुतो ह्यच्परावपि ३४०
ह्रस्वाद् द्वित्वमनुस्वारः प्राप्नुयात्संयुते परे ३४१
तदनुस्वारपूर्वश्च संयोगादिर्द्विरुच्यते ३४२
इति द्वित्वप्रकरणम् १९

पूर्वागमप्रकरणम् २०
व्यञ्जनं यन्निमित्तेन द्विवर्णमिति वर्णितम् ३४३
द्वितीयतुर्ययोस्तेन भवेत्पूर्वागमस्त्विह ३४४
धामाननूपसर्गाश्च भूते थ एष आति च ३४५
परमैभ्यः पराः पूर्वञ्छखि भुजा इयुस्तथा ३४६
समाने स्वरयोर्मध्ये लक्ष्याद्द्वित्वं हलः क्वचित् ३४७
द्वितीयस्य चतुर्थस्य तथा पूर्वागमस्स्मृतः ३४८
काठके तु पृणच्छिद्रञ्छकारः पूर्वमाप्नुयात् ३४९
शात्तैत्तिरीयके नस्य ञो भवेत्काठके न चेत् ३५०
हकारान्योष्मणः स्पर्श उत्तरे सकृदेव हि ३५१

तन्मध्ये प्रथमः स्यात्तत्स्पर्शसस्थान आगमः ३५२
ङकारादेव चानन्त्यात्तपरे धपरे सति ३५३
ककारश्च गकारश्चेत्यागमस्स्याद्यथाक्रमम् ३५४
यत्रोष्माविकृते स्पर्शादुत्तमोर्ध्वेत्वनुत्तमात् ३५५
आनुपूर्व्याद्यमानेतान्वर्णयन्त्यागमान् बुधाः ३५६
ऊष्मोत्तरे द्वितीयः स्यादादेशः प्रथमस्य तु ३५७
ह्रस्वाद्द्विरूपवन्नादो यद्येनं सकृदुच्चरेत् ३५८
इति पूर्वागमप्रकरणम् २०

द्वित्वनिषेधप्रकरणम् २१
अथैतस्य प्रसक्तस्य प्रतिषेधस्तु कथ्यते ३५९
ईदैत्पूर्वौ यकारश्च विसर्गो रेफ एव च ३६०
प्रथमोद्ध्र्वेऽच्परे चोष्मा वकारस्स्पर्श उत्तरे ३६१
ऊष्मस्पर्शपरस्थे तु लकारश्च तथैव हि ३६२
वर्गीयानुत्तमोद्ध्र्वे हल् सवर्णोत्तर एव वा ३६३
यवहेषु परस्थेषु नकारश्चान्तगस्त्विति ३६४
नस्यान्तगस्य दीर्घात्तु यवहे हे च हल् परे ३६५
परैरेभिर्हि तस्यैव न स्यात्संयुतता तथा ३६६
स्वरायुक्तस्य वर्णस्य वाचकं नाम कथ्यते ३६७
वर्णक्रमोक्तिकाले तु नान्यसंज्ञां समुच्चरेत् ३६८
सर्ववर्णान्वदन्त्येवं ज्ञातौ द्वित्वागमौ न तु ३६९
ततोऽफलं फलं प्रोक्तं द्वित्वाद्युच्चारणाद्बुधैः ३७०
इति द्वित्वनिषेधप्रकरणम् २१

## अङ्गसंहिताप्रकरणम् २२

स्वराणां पूर्वतश्चैव ह्युदात्तादिस्वराः स्मृताः ३७१
व्यञ्जनानां तदाप्त्यर्थमङ्गताद्य विधीयते ३७२
परस्य व्यञ्जनञ्चाङ्गं पूर्वस्याचोऽवसानगम् ३७३
ऋकारे परभूते च रेफः पूर्वाङ्गतामियात् ३७४
अनुस्वारो विसर्गश्च स्वरभक्तिरसंयुतः ३७५
योगादि च परायुक्तं पूर्वस्याङ्गं तथा स्मृतम् ३७६
न पूर्वाङ्गं भवेत्स्पर्श ऊष्मणो विकृतिर्यदि ३७७
पराङ्गं प्रचयाद्भक्तिः प्रचयेत्वृपरे च रः ३७८
अन्तस्थोदयमङ्गं स्यादसवर्णं परस्य च ३७९
ऊष्मण्यूद्ध्र्वे पराङ्गं तु स्पर्शश्चैव यमास्त्विति ३८०
इति अङ्गसंहिताप्रकरनम् २२

## स्वरभक्तिप्रकरणम् २३

स्वरोद्ध्र्वोष्मणि रेफस्य लस्यापि स्वरभक्तिता ३८१
तन्मध्ये ऋत्वलृत्वे च स्वरभक्तिं प्रकल्पयेत् ३८२
हपरे तु हलन्ता स्यात्स्वरभक्तिस्तु संवृता ३८३
अजन्ता शषसोद्ध्र्वे च विवृता समुदीरिता ३८४
स्वरभक्तिः करेणू रो होद्ध्र्वो लः कर्विणी भवेत् ३८५
हरिणी शषसोर्ध्वौ रो लकारो हारितोच्यते ३८६
दीर्घात्स्वारादनन्त्या च स्वाराद्भक्तिः पृथग्भवेत् ३८७
प्रत्येकस्वरभाग्यश्च न भक्तिर्निहते च हे ३८८
इति स्वरभक्तिप्रकरणम् २३

## स्थानकरणप्रयत्नप्रकरणम् २४

वायौ चरत्युरस्यन्तर्मन्द्र उद्भवति ध्वनिः ३८९
कण्ठे च मध्यमो ज्ञेयः शीर्षे तारः स्वशक्तितः ३९०
उच्चार्यते त्रिभिस्तैस्तु यावदध्ययनं क्रमात् ३९१
नादः श्वासो हकाराकौं कण्ठेऽल्पे विवृतेऽधिके ३९२
अज्घोषा नादतो जाता हचतुर्था हकारजाः ३९३
प्रथमाः श्वासतोऽन्येऽर्कादघोषाश्च ततो यमाः ३९४
कण्ठो वक्त्रादिमध्यान्तं दन्तमूलान्तनासिकम् ३९५
ताल्वोष्ठमुरः स्थानानि वर्णानां करणान्यधः ३९६
उवर्णप्रकृतेरोष्ठौ दीर्घौ स्त औत्परस्य ३९७
अव्यञ्जनस्वराणाञ्चादौ कण्ठ इतीरितः ३९८
ओष्ठताल्ववर्णेवर्णे व्यस्तसंवृतमैत्यपि ३९९
औति चोष्ठौ स्त ओत्यल्पाधिकावेत्योष्ठतालु च ४००
कवर्गादिषु जिह्वादिमध्यान्तोष्ठेन चोपरि ४०१
टवर्गे वक्त्रमध्ये ळे जिह्वाग्रेणोपरि स्पृशेत् ४०२
मध्यान्ताभ्याञ्च तालौ ये रेफे जिह्वाग्रमध्यतः ४०३
लकारे दन्तमूलेषु जिह्वाग्रेणोपरि स्पृशेत् ४०४
वे चोष्ठान्तेन दन्तेषु स्पर्शस्थाना य ऊष्मकाः ४०५
हकारश्च विसर्गश्च कण्ठस्थानावितीरितौ ४०६
प्रयत्नश्चोष्मणां व्यस्त इणोऽन्येषामचां भवेत् ४०७
केवलानाञ्च सर्वेषामत्यल्पस्पृष्टता स्मृता ४०८
स्पृष्टत्वं स्पर्शसंज्ञानां परेषां किञ्चिदुच्यते ४०९
अतिस्पृष्टो द्वितीयेषु चतुर्थेषु च तत्समः ४१०
हकारं तत्र नासिक्यमुत्तमोत्तरमेव च ४११

अन्तस्यापरमित्यत्र उरस्यञ्च विदुर्बुधाः ४१२
विज्ञेया नित्यनासिक्या यमानुस्वारपञ्चमाः ४१३
अजन्तस्था हकारश्च निमित्तेन तु कीर्तिताः ४१४
इति स्थानकरणप्रयत्नप्रकरणम् २४

## प्लुतप्रकरणम् २५

अकारान्तः प्लुतो यश्चेदनुनासिक उच्यते ४१५
अमत्रध्वनितुल्यश्च रङ्गसंज्ञ इतीर्यते ४१६
श्लोकाँ गलाँ ममाँ हूताँ यद्घ्राँ एवेति च प्लुताः ४१७
दीर्घा देवाँ उ ताँ इम्यमृवाँ अ स्वाँ अहं कठे ४१८
पत्नीवाश्चेतव्याः कार्याश्चित्यारभ्याः प ता उ च ४१९
होतव्यां सत्यराजांश्च सृज्यां प्राश्यांश्च मीयताम् ४२०
कर्तव्या सहस्रामद्राक्सोमाः क्रामाश्च हा इति ४२१
ब्रह्मान् त्वं द्विपदां हौषां स्थेया अग्ना इवत्यगान् ४२२
हावरत्नीश्छिनत्ती च जुहवानी च गच्छती ४२३
एती लाजीञ्छाचीन् सर्वे त्वन्तोदात्ताऽप्लुता इमे ४२४
पत्या इति गृहा इ त्वी उत्ताना इत्यवेरपाः ४२५
सोमपा असोमपा द्वावश्रुता उवतिष्ठिपाय् ४२६
सावित्रान्न वेत्थाद्वौ व्यमग्निहोत्रान्न चेति च ४२७
अवेत्योवभृथा ना द्वौ रभ्यः पशूश्शृतं हवीः ४२८
स्थेयोऽग्नीर्धस्विदासीद्द्वावस्तु ही इव विन्दती ४२९
नकं त्रिपञ्चाशदूर्ध्वं चतुर्णां दशमाः प्लुताः ४३०
नवदशाज्झलो ळश्चाप्यनुस्वारौ विसर्गजौ ४३१
चतुर्भक्तियमाश्चेति वर्णाष्षट्षष्टिरीरिताः ४३२

इति प्लुतप्रकरणम् २५

## ओष्ठ्यप्रकरणम् २६

मध्ये वकारेऽनुस्वारे विरामे संयुते स्थिते ४३३
अप्यौकारे परे व्यक्तौ द्विरोष्ठ्याविति निश्चितौ ४३४
संयुतश्चोष्ठ्यमध्ये हो विसर्गादुत्तरश्च पः ४३५
तालुभ्यां वायुमापूर्य माण्डूकोष्ठ्यः परस्स्मृतः ४३६
स्पर्शयोस्संयुते यत्र पाठे चावसरे यदि ४३७
आदेरीषच्छ्रुतिर्ज्ञेया विरामे मस्य चैव हि ४३८
विरामे वर्ग्यपूर्वस्य प्रयत्नः क्रियते पृथक् ४३९
ओमः पवर्ग ऊर्द्ध्वे च न प्रयत्नः पृथक्तथा ४४०
इति ओष्ठ्यप्रकरणम् २६

## कालनिर्णयप्रकरणम् २७

चाषोक्त एकमात्रस्स्याद्वायसेन द्विमात्रिकः ४४१
मयूरेण त्रिमात्रश्च जानीयात्काललक्षणम् ४४२
कालोऽतिसूक्ष्मकोऽणुः स्यान्मात्रार्द्धं व्यक्तमात्रिकम् ४४३
अङ्गुलिस्फोटनं यावान् तावान् कालस्तु मात्रिकः ४४४
हल्युक्तं हलुत्तरं तदणुमात्रं प्रकीर्तितम् ४४५
विरामे वर्णयोर्मध्ये ह्यणुकालोऽप्यसंयुते ४४६
हलो भक्तिर्विसर्गोऽन्तो ह्रस्वान्नो यवहोत्तरः ४४७
स्पर्शोर्द्ध्वो वोऽर्धमात्रास्तेऽवसाने लस्त्रिपादता ४४८
विसर्गान्तेऽर्धमात्रस्स्याद्विरामः क्षपरेऽपि च ४४९
संयुतोर्द्ध्वे च पूर्वत्र द्विरोष्ठ्येऽप्यौवयोस्तथा ४५०

पिपीलिका दीर्घसमे च मध्यमा सवर्णता पाकवती पदैक्ये ४५१
दृष्टाचिवत्सानुसृतिस्त्वसाम्येऽप्यधोऽणुमुख्यास्तु विरामकालाः ४५२
स्वरोदये त्वनुस्वारो भवेदध्यणुमात्रिकः ४५३
विरामश्च तयोर्मध्ये वैशेषिका विदीर्घयोः ४५४
प्रणवान्ते पवर्गोर्द्ध्वेऽवग्रहस्यान्त एव च ४५५
वाक्यान्ते तु विरामश्च सार्धमात्रः प्रकीर्तितः ४५६
पदप्रणवयोर्नित्यं विरामस्स्याद्द्विमात्रिकः ४५७
द्रुताद्धल् स्वरसम्बन्धे तयोस्तत्स्वरकालवत् ४५८
अनुस्वारो द्विमात्रस्स्याद्रेफोष्मसु परेषु च ४५९
संयुतोत्तर इत्येष एकमात्रः प्रकीर्तितः ४६०
स्यातां सोर्ध्व खथोर्ध्वे च ङनौ ह्रस्वाद्द्विमात्रिकौ ४६१
षपरा नित्यखथोर्ध्वे हकारे हल्परे तथा ४६२
असंयुतश्च नो दीर्घान्मात्रिको यवहोत्तरे ४६३
ह्रस्वान्नादो द्विमात्रस्स्यादन्यत्राप्येकमात्रिकः ४६४
केवलप्रणवे तु स्यात्स्वरस्सार्द्धद्विमात्रिकः ४६५
मकारान्तो यजुष्युच्चस्स्वरिता ओन्तदादिषट् ४६६
अजेकद्वित्रिमात्रास्त्रिरेको द्विश्चैकगो द्विगाः ४६७
त्रिमात्रत्वं विरामस्य ऋगन्तेऽर्धान्त एव च ४६८
होता यक्षदिति त्वन्ते देवं बर्हिश्च पञ्चमे ४६९
सहाम्भसि पितृप्रश्न ऋक्स्याद्वाङ् निधनेन चेत् ४७०
काण्डप्रश्नानुवाकान्ते दशाष्टपञ्च मात्रिकाः ४७१
ग्रन्थानां परिपूर्णे तु त्रिगुणः काल उच्यते ४७२

ह्रस्वस्स्यादेकमात्रस्य द्विमात्रस्य तु दीर्घता ४७३
त्रिमात्रस्य प्लुतोऽचां हि पादो मात्राचतुर्थकः ४७४
शीघ्रं विलम्बितं मध्यं तिस्त्रो वाक्यस्य वृत्तयः ४७५
कालान्यता च यद्वृत्तौ तदा कर्मान्यता भवेत् ४७६
प्रयत्नात्कालतश्चोक्तास्तद्वर्णा उद्भवन्ति हि ४७७
तदभावे वर्णाभावस्सम्यग्ज्ञेयं द्वयं ततः ४७८
मध्यमां वृत्तिमाश्रित्य चैवं कालास्सुनिश्रिताः ४७९
प्रातिशाख्यादिषु ह्यत्र वृत्तिस्सैव समाश्रिता ४८०
इति कालनिर्णयप्रकरणम् २७

उच्चारणफलप्रकरणम् २८

न विश्रमश्चैकपदे प्रोन्न्यानिस्सुविसम्परम् ४८१
च न ह्युवा स्म ह त्वीं वैन्वेतेभ्योऽधश्च कूटतः ४८२
व श्रीर्देघधया उच्चास्स्थापितव्यास्स्वरं गताः ४८३
नैवं तृतीयसम्बन्धाः प्रयोगान्तर इत्यपि ४८४
युक्तोर्ध्वं व्यञ्जनान्तञ्च दीर्घं गुर्वितरल्लघु ४८५
तत्त्रिस्त्रिरक्षराश्चैव गणा इति बुधैस्स्मृताः ४८६
त्रिलो नः स्वस्त्रिगुरुर्मो भूरादौ केन्द्रू यभौ शुभम् ४८७
द्यौस्तोऽन्ते सोऽनिलस्तापं मध्येऽग्न्यर्कौ रजौ क्रमात् ४८८
अदादेत्प्रथमयषा लृनासिक्याः क्षशोत्तराः ४८९
अनिलाग्निमहीन्द्वर्काः पञ्चानां त्वधिदेवताः ४९०
ब्रह्मजातिर्भवेदुच्चः क्षत्रजातिस्तु नीचकः ४९१
वैश्यजातिर्भवेत्स्वारश्शूद्रस्तु प्रचयस्स्मृतः ४९२
उदात्तस्सात्विकः प्रोक्तस्स्वरितो राजसस्स्मृतः ४९३

निहतप्रचयावेतौ तामसौ तु विदुर्बुधाः ४९४
स्वराश्च प्रथमाश्चैव द्वितीया ब्रह्मजातयः ४९५
तृतीयाश्च चतुर्थाश्च क्षत्रजातय ईरिताः ४९६
उत्तमाश्चैव मन्तस्था वैश्या हि परिकीर्तिताः ४९७
अनुस्वारो विसर्गश्च ह्यूष्माणोऽवरजास्स्मृताः ४९८
यदन्यजातिरुच्यते तत्तत्संहारको भवेत् ४९९
यज्जात्युच्चारणे तेषां तज्जातिपरिरक्षणम् ५००
वर्णोच्चारण इत्यत्र समग्रं लक्षणं स्मृतम् ५०१
न्यूनातिरेकराहित्यं ब्रह्म भक्तिर्यथोच्चरेत् ५०२
सुव्यक्तस्सुस्वरो धैर्यं तच्चित्तत्वं चतुर्गुणाः ५०३
एतद्युक्तः पठेद्वेदं स वेदफलमश्नुते ५०४
अध्यायस्य मुखे चान्ते भूत्वा विद्वानतन्द्रितः ५०५
संरक्षणाय वेदानामोङ्कारं तूच्चरेत्सदा ५०६
स्रवत्यादावनुक्ते च तस्यान्ते तु विशीर्यते ५०७
आद्यन्तप्रणवौ तस्य स्यातामङ्गानि वै ततः ५०८
संहितापदसन्धीनां वर्णानां लक्षणान्त्वपि ५०९
छन्द आदीनि शास्त्राणि ह्युपाङ्गानि विदुर्बुधाः ५१०
ध्वनिः स्थानञ्च करणं प्रयत्नः कालता स्वरः ५११
देवता जातिरेतैश्च वर्णा ज्ञेया विचक्षणैः ५१२
यजुर्वेदः पिङ्गलाक्षः कृशमध्यो बृहद्गलः ५१३
बृहत्कपोलः कृष्णाङ्घ्रिस्ताम्रः काश्यपगोत्रजः ५१४
लक्षणेन विनाध्यायं यः पठेदपि सर्वदा ५१५
नैव तत्फलमाप्नोति स विप्रस्सुजनोऽपि हि ५१६
संहितापदवर्णानां कालादीनाञ्च लक्षणम् ५१७

हल् विसर्गाच्स्वराणाञ्च सन्धेर्लक्षणमेव च ५१८
एतानि सम्यगष्टौ च विदित्वा लक्षणानि यः ५१९
अध्यायं स पठत्येव द्वितीयं ब्रह्म कथ्यते ५२०
संहिताञ्च पदं वापि क्रमञ्चैव जटां पठन् ५२१
लक्षणज्ञस्तदाप्नोति ब्रह्मज्ञानं हि शाश्वतम् ५२२
वेदामृतं पिबेद्यस्तु स तस्माद्भूसुरो भवेत् ५२३
एवञ्च व्यासशिक्षाविद्भूसुरेन्द्रस्स कथ्यते ५२४
श्रीमत्परब्रह्मसुपूर्णचित्तश्रीव्यासकराठप्रसृताञ्च शिक्षाम्
एतामभिज्ञः प्रयतः पठेद्यस्सर्वानभीष्टांश्च समश्नुते वै ५२५
इति उच्चारणफलप्रकरणम् २८

समाप्तोऽयं ग्रन्थः

P.N. Pattabhirama Sastri, ed., *Vyas Siksha along with Vedataijas Commentaray of Sri Surya Narain Suravadhani and Sarva Lakshanmanjari Sangraha of Sri Raja Ghanapathi*, (Varanasi: Veda Mimamsa Research Centre, 1976).

"Vyāsa Śikṣā," Hamburg Staats- und Universitätsbibliothek, Ātreya Śikṣā palm-leaf codex, Cakra, son of Rāma Ayyaṅgār, scribe, III 8/133, pp. 25-40.

# भारद्वाजशिक्षा

गणेशं प्रणिपत्याहं संदेहानां निवृत्तये
शीक्षामनुप्रवक्ष्यामि वेदानां मूलकारणम् १

-अ-

वृजने ज उदात्तश्चेदकारेण सहोच्यते
स्तुतं पदं तु वाक्यान्ते प्रचयं परिकीर्तितम् २
आ पञ्चमाद्धव्यपूर्वो घृतेनोर्ध्वश्च आहुतम्
वाक्यान्तोऽपि तथा प्रोक्तो यः पूर्वस्तु न विद्यते ३

-स्वरभक्तिः-

रादत् परशुरन्तोच्चे त्विङ्ग्यः पर्शुश्च भक्तिता
पर्षच्चेहातिपर्षापि स्वरभक्तेस्तु नित्यता ४
पापंविलोमपूर्वे चाकार्षं कार्षीत्तदादिषु
स्वरभक्तिं विजानीयान्नान्यवर्णोऽत्र संभवेत् ५

-आ-

अग्ने तान्नपते त्रींश्च त्रिष्टुभा चैवमाद् भवेत्

-इ-(इय)

क्षिप्रा भर्त्र्ययित्र्यरात्र्यमन्त्र्यपित्र्यापि काठके ६
समाने तु पदे ह्रस्वाः सहल्रा विरळाश्च ये

-इ-

जुष्टो वाचः प्रजाग्निंचि मानोमित्र उदस्त च ७
अग्निर्वाव च देवावै केशवापविधायकः
रक्षांसीत्यनुवाकेषु ह्यप्येतीकारवान् भवेत् ८
छन्दा या ते न बर्हिश्च इद्ध्या अग्ने बृहन्परे
यज्ञस्य पूर्व इष्ट्यै च त्विकारादिः प्रकीर्तितः ९
अकारिषं च णः पूर्वो रीरिषो रीरिषन्नपि

तारिषच्चारिषं चेत् स्यात् स्वरभक्तिर्न विद्यते १०
उपसर्गेषु पूर्वेषु त्वियुरित्यत्र विद्यते

-ई-

जुष्टः प्रश्नकाराडाच्छिद्रारएयके मानुषी सईत् ११
विनिष्पर्यसुरः पूर्वक्रीयेत्यत्र न ते परे
चातूरथस्यपूर्वान्यौ होत्री नप्त्री च दीर्घगौ १२
पोत्री नेष्ट्री स्वस्त्री स्तोत्री शतरुद्री न णांपरः
वरीयसी च पीयूषो दवीयोऽथ ह्रसीय च १३
चीयते च द्वितीयश्च तृतीयादौ तथैव च
पीयति त्वस्तृतीयश्चावृकास्ते ऊर्ध्वगामीयुः १४

-उ-

स्वरोत्तरपपूर्वे तु शषहोर्ध्वे तु मध्यगः
रेफादुकार एव स्यात् स्वरभक्तिर्न विद्यते १५
रादुत्वमरुषश्रुच्चेदरुहद्रुह चारुहम्
तिक्रुष्ट चक्रुषश्चक्रुः क्रुङ्ङमुक्षद्धरोत्तरे १६
पहणामत ऊर्ध्वे च त्वभिमित्रकपूर्वके
द्रुषदं वै द्रु ध्रु वा ध्रुङ् नानादृत्य दृतिश्रुतिः १७
दृशेऽनादृत्य दृषदः उद्दृष्ट उद्धृतोद्धृतः
च वि मे नम आ देवः स्तुहीह हवनेत्यसिस् १८
वाजं वो वै सित स्वर्षि तपो मे हृदये न च
गण् माच्योर्ध्व श्रुतः श्रुष्टी श्रुधी श्रुत् श्मश्रु शुश्रुवान् १९
द्वित्वं चाप्यृतवो यज्ञो र्वतः पूर्वं श्रितः सइत्
परिन्ययो वचोर्ध्वे च स्नुति शब्दश्च सस्नुषः २०
स्नुक् पदे स्नुह्युकारः स्यात्ससृवां स न विद्यते

षान्तः प्रुट् म्रुक्ति चोर्ध्वश्च वाग्भ्रू शुभ्रु च शत्रु च २१
भ्रुमिं भ्रुविग्रुमुष्टिश्च क्षामन्त्रुरुच वव्रु रुत्
शतमित्त्यान् च मामस्मान् पूर्वं नादुत्वमुच्यते २२
जुह्वत्यप्याहि जुह्वेऽन्त्यस्वारो गृह्णोपभोत्तरे
उकारवान् जुह्वशब्दः संधानं परतो न चेत् २३
देवानां त्वे क्रतुं चासौ यजमानेषु षात्तदुत्

-ऊ-

भूतेभ्यः प्रोक्षति तस्माद्विभूर्देवायतः परे २४

-ॠ-

वृष्ट्यहृत ॠकारः स्याद् विवा यस्य ह ॠध्यते

-ॡ-

अक्षरान्तलृकारो यः स्वरो ज्ञेयो विचक्षणैः २५
उदाहृतः क्लृप्तशब्दे न पदाद्यन्तयोः स्वरः

-ए-

बद्धेने सा भवे मैच्च येन्त एकादशत्रयम् २६
ग्नीपूर्वतो जुषेतां च प्रथमोऽञ्जन्तिसत्ययोः

-ऐ-

येकेशिनः स ऐकारो व्यैच्छन्नित्यत्र वर्णितः २७
प्रैयमेधा आसन् नैयग्रोधप्रैयंगवं तथा
दोहै यज्ञं च वैयाघ्रे दैयांपात्यैत्वगा इमे २८
ब्रह्मवर्प्रेन्द्रियं चेन्द्रि पशून्वीर्यमनुपरः
मुखतो ज्योतिरूर्जाय एवास्मै चैवमैद भवेत् २९
त्रीन् ब्रह्म व्यग्नि चेन्द्राग्नी मेदसैच्च पुरोहविः

-औ-

एनौ विवा इन्द्रस्यायुरादावन्तेऽग्नयेऽन्नवत् ३०
स्फ्येन यां परि घर्मापनुत्त्यै तेषां पराणुत्त्यै

-क (प)-

इत उत्तरं ककारादिप्रथमान् वक्ष्यामः
अन्तःस्थाभ्यः पवर्गाच्च स्वरेभ्यः पूर्वतः स्थितौ ३१
त्रिष्टुक्शब्दस्तथानुष्टुक् ककारान्तावितीरितौ
अन्यत्र तु पकारान्तावेताविति विनिश्चितौ ३२
प्राणानामिति च ग्रैष्मी पदयोः परभूतयोः
पूर्वस्य तु बिधेस्तत्र वैपरीत्यमिति स्थितिः ३३
चक्षे सू श्रद्धऊर्ध्वे क उत्करोऽन्तोच्च एव कः

-कृ-गृ-

विष्टुतं कृष्टशब्दश्च पच्योर्ध्वः षात् परस्तु टः ३४
त्वष्ट्रे वस्वग्नये प्रातर्मत्या अष्टाकपालमत्
वैश्वानरश्च जुष्टोऽम्बे शं नोऽग्निर्नश्च तारिषत् ३५
परापात्वेभ्यएवैनत् ब्रह्माद्येकाप एव तः
विदुषो हविषा चैनत् वेदत्पशुर्ऋतव्यतः ३६

-स्तृ-स्पृ-स्मृ-

थमेनात्मानं स्पृणुत स्पृणोति स्पृत सांहितः
प्राणानां स्पृत्यै द्वावेव लोकस्पृते ब्रह्मस्पृतम् ३७

-घा-खा-

सघा चतुर्थो नोदेऽसि सध्यासं लान्यमेघ च
रघानघाभ्य आघाघ प्रघातश्चैव मोघ च ३८
क्रियाशब्दश्च यत्रैव तदन्यो घन जङ्घ च
पुनस्तुवी प्रतूर्तिश्च त्वावतश्च बृहत्कृधि ३९

स्यन्दता ये वलं विद्म च नो वसु सुरेतसम्
पूर्वौ मघः पितृशब्दः परो वा मघवश्रुतिः ४०

-ग-घ-

त्रीणि प्राणादि विश्वान्यो जिघाँसन् यो जघन्थ च
टवर्गेऽपि चतुर्थत्वं वोढवेत्यादिरुच्यते ४१

-थ-ध-

यदक्रन्दश्च दीध्यानो भिर्वस्तेधस्तु चर्तुधा

-द-ध-

ब्रह्मन्पञ्चान्त्यमेधाश्च तनूवर्चपयोर्ध्वगः ४२

-देहि-

उपायज्ञो येत ईशा जी सी सू दक्षि मेपरः
परि स्यनः पुन र्देहिवेद्यूर्ध्वे च चतुर्थकः ४३

-ददातु-दधातु-

यस्य स्वाहा परः चेद्वा कर्मण्यं श्रवणो वरम्
नयास्माकं यमो मे नो धाता वेदो मनस्ततः ४४
इन्द्रः पूर्वौ ददात्वन्यः सुकृताद्युत्तरे च धः

-ददाति-दत्ते-

तेनायुरेषां रूपाणां त्रयस्त्रिंशत्तथैव च ४५
शमसप्रचनोर्ध्वश्च कामेनान्नात्परोऽपि च
चतुर्थ्यन्तपरोऽपि स्यादाभ्यो येऽध्वर्यवेऽपि च ४६
अग्नीधे ब्रह्मणे होत्रे चैनत् बर्हिषि दक्षिणाम्
तार्प्यं हिरण्यं वै धेनुमात्मना यश्चपूर्वकः ४७
ददातीति तृतीयत्वं तदन्यत्र च संपिबत्
या मानोभ्रिं रुचन्नीं शूना मन्नाद्यं रभि स्वयम् ४८

यं सू द्धि ची न्द्रियं दत्ते धेयमात्मन्न धो

-धकारः-

ब्रूह्यवसः तुरीपं थं जहि स्रोहैः विक्षु सप्रथाः ४६
शोचिरमुत्र भूयात् भूः शृरावे रश्मिरनागसः
देवं भूयिष्ठभाजश्च सहध्यै पूर्वतस्त्वथ ५०
वमदाबसशत्राश्च सस्वरा गोकुरो स्रयः
स्वरपूर्वा स्रमीत्वाद्या स्रकाराद्याश्च तत्रधः ५१

-धकारः-

रधामद्रधसी गाधं क्लृधानधः षतोरधम्
क्षुधक्षोधुस्पृधोनाधै मागधं विवधादध ५२
वावृध वैमृध व्याध युधश्रुद्वीवृधादधुः
रुधश्रुदृराधन्नद्धो नाधमान रराध च ५३
गवीधुकस्त्रिध ग्रोधमिदधञ्जनधाः षध
पदान्ते च धिकारोऽपि राधश्रुदवधिष्मच ५४
स्रधोनिष्ट्या वि घोषवद्युक्तः पदादिगस्त्वपि
स्रश्वाभिधानीमिषुधे त्वबाधन्त विबाध च ५५
कायाधवश्च निध च निर्बाधाबधिरोपि च
स्रसाधयत गौधूमं गावीधुकमिति स्थितिः ५६
नाकारान्तवृथाद्युञ्चा स्रथोऽर्थं तीर्थ पार्थ च
वीथोऽभागोर्थशब्दस्तु रूथ्यो निर्ऋथ एव च ५७
जगन्थ घन्थ ततन्थ दाधर्थ मो ववर्थ च
मेथीं मथित थायन्ति राथीतरो विमाथ च ५८
वेत्थावृथं चावृथाश्च जहर्थास्थ्ना तथैव च
स्रन्तोच्चकाविथेत्थौ च विसर्गान्तौ न चेच्छिथि ५९

मेथिष्टा विथुरक्राथ प्रोथाथर्व मिथः क्वथन्
ग्रमात्थ्नश्च विदथ्यं च कतियूरूपपूर्वकः ६०
शृं पं ग्रं मं च मां पूर्वः समाने तु चतुर्थ च
मथ्यमानो रथ्यस्वारः पृथ्वी राथन्तरोऽपि च ६१

-भ-

फल फेन फणात् फर्व्य शफेभ्योऽन्यो भ उच्यते
वैशंभल्या च शीभादौ पवर्गे च चतुर्थगः ६२

-ङ-

अवाङिति ङकारान्तं नाभिमूर्ध्वं च सर्वदा

-ञ-

याच्ञैव च ञकारान्तमुपज्ञु च तथैव च ६३

-ज्ञ-ग्न-

कस्मा उप य रा जाज्ञ ने नवर्णात्परौ च ये
तपूर्वौ तपरौ स्यातां जञावन्यौ गनौ स्मृतौ ६४
भूयांस उनन्तशब्दोज्ञशंस्तासूर्ध्वोंहोऽतंसयत्
उन्नवंशं स्त्रीषसादं सावन्यो मुखोज्ञकः ६५
आताँसीच्छँसिने शँसन्नासिक्यो दुषदँ सदः
शब्दैक्ये रषपूर्वो णो व्यवेतो स्पृषतेः क्वचित् ६६
चर्मण् चर्षण् वृषण् शीर्षण् ब्रह्मणणक्षरणावग्रहे
वाणश्शताणवश्चापि मेरायादौ प्राकृतश्च णः ६७
बस्तपूर्वपरो वृष्णि वृष्णा वृष्णश्च वृष्णियम्
रुन्धे हुकः पूर्वाद्यज्ञो विष्णुः कृष्णः क्रमोदितौ ६८

-रुन्धते-दधते-

अन्तोऽनन्त्यं न वै इन्द्रस्तस्याप्रति न मध्यगम्

तार्प्यं  च रुन्धते त्वेषु दधते स्यात्परत्र तु ६९
एकैकस्त्रिवृदाग्नेयं विश्वा युञ्जन्ति चाग्नये
त्वं ह्यप वै न देवोर्ध्वे इन्द्रश्चत् पुर आदितः ७०
नवान्ये दधते विद्वाँसः साध्याः षड्तवो वै
पृथिव्यै जाजायन्तेन्य एष्वतिष्ठन्त इत्यपि ७१
कुसुरुबिन्दोऽप्रतिष्ठां च उत्क्रा प्रजापतिर्नव
आयुर्वा अन्त आदित्यं प्रजाग्निं तं प्र संततिः ७२
धिष्ण्याद्द्वितीयं च साकं देवस्य स्फ्यं तु बार्ह च
ब्रह्म द्वितीयतृतीये पुरुषं प्रतिपूरुषम् ७३
देवा मिथो देवस्याहं च्यवन्ते चैषु तद्विधिः
वाग्वा इन्द्रस्त्रिवृद्बर्हिर्नः प्रतिष्ठापयन्ति च ७४
विवा एता वप्रतिष्ठां तार्प्यं  तृतीयतुर्ययोः
संततिर्यस्य युञ्जन्ति तार्प्येणासुर्यमन्तगम् ७५
प्रजापतिः शुक्रमादियत्पशुः समर्धयन्ति नः

-न-ङ-

साव्यूर्ध्वं  त्र्यहा भवन्ति न प्रत्यङ् पृष्ठ्य आपृथि ७६

आलभन्त

आद्या वैन्द्रमुक्षाग्नेयीं तयास्मिन्नप्रथत्परे
पूर्वो मेधा यालभन्त ह्यादन्तोऽस्ना भवेच्च नः ७७

भविष्यन्ति

ते भविष्यन्ति देवासुस्तेभ्यः षड्द्वा परश्च च्छन्

गच्छन्ति

इन्द्रोऽगच्छदगच्छन्त्यसौ देवानां नेन्द्रियं तु छन् ७८

एवैतान्

देवस्य रश सावित्रं मेध्यानेवैना उच्यते
देवानाग्नउ पूर्वं तु समीच्येनान्निरन्तरम् ७९

-न-निरवपन्-

स्यात्ते तास्तान्यथोनत्वं बहुश्रुति दधत्यपि
संवत्सरो द्वि साध्यर्तव ग्रादित्याद्वे यथाजान् ८०

-श्याव-ग्रयाम-

सुवरयाम चादित्याः प्रजापत्याङ्गिरोऽपि चेत्

-हिरण्मय-हिरण्यय-

भूत्वा पुरुष दामापि द्यावा शकुनि संश्रितम् ८१
तेन ब्रह्मान्तरेणोर्ध्वो हिरण्मयोऽत्र संस्मृतः

-समन-सवन-

पारावगत्य बहूनामिवोर्ध्वः समनेऽपि मः ८२

-एवैनाम्-(वै त्रिश्च)-

वारुणोऽन्ते द्विरेवैनां इमेऽवन्ति च सप्तभिः
यजुषाग्नेः पुनः सृष्टीश्चैनां ब्रह्मा तु दीर्घतः ८३

-प्रथमजामृतस्य-

पीवोन्नां प्रथमं चैव हरिं प्रथमजां च मः

-वृद्धामिन्द्रः-

ग्रग्नये नासो धात्रादि प्रजां वृद्धां च सर्वतः ८४

-स्यामिति-स्यादिति-

यामिति मुनिकाण्डे चाप्यर्धुकं स्याद्विसर्जयेत्

-यकारः-

ऐत्वं हित्वा ष्यतोर्ध्वश्चेत् ग्रइमध्ये य एकतः ८५
निवृश्चत वृश्चतश्च ग्रन्यो वृश्च्यत तेपरः

-ऋत्वियः-

योनिः पुरयो हवै योनिं तस्माद्गर्भो यजै महै ८६

महो य एष स्य हिस्थ पूर्व ऋत्विय एव यः

-यविष्ठ्य-

यदग्ने तु यविष्ठ्यात्र सकारोर्ध्वो न होतयुक् ८७

-मर्त्यास-

उषसं चामृतं पूर्वे मर्त्यासोऽत्र य उच्यते

आकारान्तोरयिष्ठा च अस्तभ्नाद्द्यांदसंयुतम् ८८

-(वि)राज्ये (व)-

विराज्येप्रत्यसद्देवा संवत्सर्तुविवै परः

मर्तेष्वयोग्निरूर्ध्वे तु पूर्वश्चाद्युच्चमिङ्ग्यगम् ८९

अन्तोदात्त सुवर्गश्च लोकशब्दपरेऽपि वा

-र-

वीर्यस्य नस्य चानात्यै राध्नुवन्त्यप्यरेफता ९०

-अनुनासिकः-

युक्तोत्तमाच्च पूर्वं तु शब्दैक्ये नानुनासिकः

अनुदन्त-अनुदत

मनोजयदु यत्पञ्च त्रयस्त्रिंशत् परोऽनुदत् ९१

-र-

आद्युदात्ते तथेङ्ग्यस्थे द्वित्वं वात्र ग्रहे गरौ

-ग्रहीष्यते-गृहपतिः-

तव्याःष्योर्ध्वेऽप्यृकारान्ते न मेधपतिसोत्तरे ९२

एवैनं च पतिं साक्षात्ताभिरन्तं मुखं तथा

ऋतेन मुखतः पूर्वो र स्यादारभतेऽन्वपि ९३

अगौः पूर्वे तु यज्ञं चान्वात्मानं वत्सरं तथा
यज्ञेनोर्ध्वौ गृहीत्वा स्वात्तोर्ध्व आरभ्य रेफगः ९४
नरन् रभेत्वनारब्धोऽस्य प्रक्ष्यः प्रवतापि च
पशुमादित्रयं प्रक्षो देवा होत्रा च रोऽसमः ९५
अतप्यतपरः सोमश्चाद्याः पञ्च रुण्यतरः
सूर्यादित्यपयोधाता दूरादपि च सौर्यरः ९६
एक मैत्र जुहोत्यूर्ध्वौ नाङ्ग्ध्यूर्ध्वौ जरितार च

-ल-

नासिक्यलत्वमध्ये वोऽन्यंव्लीनासंव्लियाय च ९७

-व-

दीर्घ प्रजावतीर्वश्च नक्षैकावं ग्रहावहै
त्रिसप्तग्राम्याः पशवो वस्व्यथैकात्रिवृत्परः ९८
स्वे भवेद्यतने धेये स्तोमे योनावृतौपरः
स्वया देवतयेत्यत्र ह्यैकारान्तः प्रकीर्तितः ९९

-ष-

कषचाषजषाशब्दाः चषाल्ममाषवाचकः
षाट् चानवर्ण पूर्वः षण् नदकोर्ध्वौ यथा मषम् १००

-स-

सख्या श्रेष्ठः पदे स स्यादिध्यसेऽत्र स उच्यते
योऽसौ चतुःससर्वेषां यद्यश्वा समर्धयत् १०१

-विसर्गः-

वीते एव च ते ग्नीतौ अमीसामेव सेत्यपि
सत्रं केनवैपर्यन्तं एकसंख्याद्वयात्रयुक् १०२

-उपाधत्त-उपादधत-

छन्दो देवा सुरास्तेन पूर्वं वृष्टिसनीः पशुः
यथाधत्त तृतीयान्ता यथावै मान्त वान्त च १०३
-नो भ्रातृव्यस्य वृङ्क्ते-आत्मन्-
यत्पत्न्यादीन्द्र इष्टर्गो यजुषा छन्द इत्यपि
नो भ्रातृव्यस्य वृङ्क्ते स्यादात्मन् यज्ञस्य सं पच १०४
-आत्मन्-
देवासुराब्रुवन्नादौ तथा दधत कीर्तितम्
-कुरुते-
सर्वा वयो वै ज्योतिष्मः कुरुते देवकद्रविण् १०५
-पतिः पशून्-
तेऽस्मात् सृष्टाश्च नर्क्षैनान् पशून्परः पतिः पशून्
यावैतन्मेदपूर्वेद्युर्यज्ञं च मनसातनु १०६
-अग्निमसृजत-
तं सृप्र सोऽबिभेत्सोऽस्मात् सोऽश्वोऽग्निमसृजापि च
-अचिनुत-अचिकीषत-
यशसर्तुक्षुरचिनुत पृथिव्यग्न्यचिकीषत १०७
अनुजावरं परं चैन्द्रं राजानं सोममेव च
सा सृष्टाश्वविराजं च सोऽग्निं च पुरुषं तथा १०८
स इन्द्रं तत्परो देवा सुरानिति च कीर्तितम्
सोऽस्मात्तं सृष्टमित्यस्मिन्नश्वमेधं परे तथा १०९
अग्निहोत्रं परे यज्ञान् देवान्ते पाप्मना परः
-प्राण व्यान-अपान-
विश्वकर्मात ऊर्ध्वं तु व्यानं मध्यं परोऽशुना ११०
न कस्त्वा वाक्यवद्ग्रन्थे न स्वाहोर्ध्वैकवाक्यके

प्रजा त्रिवृद् वसीयान् स्यात् पूर्वं तु स्वयमुत्तरा १११
प्रदशहोतारं तेन द्वादशासुरपूर्वकम्

-अमु-इम-

प्रान्यामुंपूर्वमम्भांसि सविता द्वयमध्यगम् ११२
अग्निद्वितीयतृतीये देवाश्चैवं परद्वयम्
यावती प्रथमे तुर्ये यदेकेनादिगत्रयम् ११३
भूमिरादिद्वयं चास्मिंश्चामुष्मिँश्चेति सर्वतः
अन्त्यं तु ज्योतिरापो वा इमे वा एत एव च ११४
प्रजापती रक्षांस्येव प्रजापतिर्निवैषु च
आदौ नयति वित्तान्ववाणुशः शोयुनक्तयमन् ११५
दर्भास्यास्माद्विशानीममब्राह्मण इति त्वतः

-द्वितीयपक्षे-शब्दाः-

द्विरुद्वयस्यपस्याश्च सदृशत्रयमध्यगः ११६
द्वितीय ससृवांसोऽवधत्तामुत्तमं जुहुयात्
वेत्वाहाहंत्रिस्ते नन्दा आह्वयता च दिश्यवि ११७
उत्तमए इकारान्ता रेफाच्च वर्णतः क्रमात्

## उत्तमवर्णपदानि

व्युत्क्रमावस्तवान्या यत्सुभगा ददतु प्रियम् ११८
घृतभूतकृतावोच्च पृथिवीत्वारदब्रुवन्
रात्र्यस्यत्यत्यहश्चन्द्र वा योनिर्निवैष्यथः ११९
एतेनोक्तं न्यदाग्नेयः पशवोनो विचारथ
प्राणममृत आदित्यः सतनूपसृपानुवि १२०
तस्मा एत मवाचस्त्वा सजाता ह्याय चातिथिः

जुषन्तां पुष्कलेभिश्च स्यातां जीवांश्च तेजसा १२१
तेदक्षन्तपुरोडाशं दिशोऽस्माकं च दुष्करम्
विष्णोष्टभ्नाच्च दाधर्थ निर्घ्नन्ति यामि चेमि चेत् १२२
मये हनिधिना चोग्रमन्यस्तिग्मं च मष्मषा
पिप्रतोथो अधियीत परिदत्तादमं फला १२३
द्विविषाद्यपिधानं च रोहोर्ध्वौ यजमान अत्
दिशोऽस्माकं स्तवानि यत् सुभगा धूर्ददत्वपि १२४
घृतभूतकृतावोच्चैः पृथिव्यै त्वारदब्रुवन्
रात्रियास्यत्यहश्चन्द्रा वा योनिर्न उपैष्यथ १२५
तस्मा एतमवाचस्त्वा सजाता ह्याय चातिथिः
एते तस्यान्यदाग्नेयः पशवो न तथा विचि १२६
अधरामृत आदित्यसतनूपसृष्ठानुवि
जुषन्तां पुष्कलेभ्येजञ्जीवानस्माकं मामित १२७
मयेह निधनोग्रमन्यस्तिग्मेन च मष्मषा
विष्णोऽष्टभ्नाच्च दाधर्थ निर्घ्नन्ति यामि चेमि च १२८
ते दक्षन्त पुरोडाशं पिधानमसि दुष्करम्
पिप्रतोऽथोऽप्यधीयीत परिदत्तादिदं फला १२९
तेजसास्मै च संयन्तु अविग्राहं च विष्यताम्
परस्तादविषादी च अणुभिर्भासि रोह च १३०
आसादयेदासवित्रे सशीर्ष्णा ह्याशिषोऽम च

-उत्तमपक्षे-

एवेति ह विसर्गौ च मध्ये चान्तेवयोऽप्युशन् १३१
देवा इन्द्रिय इदं वा इन्द्रोवृत्रा प्रकेतुना
या वां च पावमानोऽयं वावतृतीय इत्यपि १३२

द्वितीये तु प्रदेवं हि देवीः प्राचीन चैव चेत्
समिद्धो अग्निः संक्रूरं सुवर्दाक्षि च नान्यतः १३३
वैपरीत्यं वषट्कारः परा वैश्वानरोऽग्नये
देवस्याहं च सर्वाणि वयोघ्नन्ति नवापरः १३४
एकादशाग्निष्टोमं च ब्रह्मकिं चैषवै विभूः
वास्तोरिन्द्रं चोपहूतं पूर्वं होताग्निमेव च १३५
प्रजापतेस्त्रयं सत्यं देवसवितर्यज्ञ एव च

-विसर्गः-

ऋृध्यते नीत आहुर्यौ विश्व तद्धि सुवर्ग च १३६
चैनास्तास्वति छन्दांसि त्वपां नान्त्यं पशुष्वपि १३७
देविका एतएवेति संपैवैनास्तु माध्रुवा
आत्पूर्व समिधः श्रोत्रं दाविधृति र्वसिष्ठ तैः १३८
त्वं सोन्ते तव मय्येषा त्वं सर्वः च ध्रुवोऽसि प्रिः
यत्स्थले यादृशः शब्दः तादृशः परिकीर्तितः १३९
विभक्तिलिङ्गरूपैश्च वर्णा ज्ञेया विचक्षणैः
क्रम इंग्यः च कण्ठोक्ति यजुरादि पदद्वयम् १४०
पदसांख्यं वर्णसांख्यमवधानाष्टकं बुधैः
यो जानाति भरद्वाजशिक्षामर्थसमन्विताम् १४१
स ब्रह्मलोकमाप्नोति गृहमेधी गृहं यथा १४२

इति भारद्वाजशिक्षा समाप्ता

समाप्तोऽयं ग्रन्थः

Dikshitar, V.R.Ramachandra, and Ayyar, P.S.Sundaram, editors, *Bhāradvājaśikṣā with Nāgeśvara's Commentary*, (Poona: Bhandarkar Oriental Research Institute, 1938) 110pp.

# चारायणीयशिक्षा

प्राक् प्रपद्ये विभुं भक्त्या सर्वलोकपितामहम्
शिक्षां साक्षात्प्रवक्ष्यामि तेनैवालं पितामहम् १
चारायणीं महाशिक्षां प्रवक्ष्याम्यनुपूर्वशः
निबोधत बुधैर्जुष्टां नित्यं वाङ्मलशान्तये २
वर्णानां चैव संख्यानं संज्ञास्थानं पृथग्विधम्
स्वराः सव्यञ्जनाश्चैव तेषां भेदमशेषतः ३
दश स्थानानि वर्णानां कीर्तयन्ति मनीषिणः
यतः प्रवृत्तिर्वर्णानां तानि मे गदतः शृणु ४
उरः कण्ठः शिरस्तालुदन्ता ओष्ठौ तु नासिका
जिह्वामूलं तु सृक्वश्च दन्तमूलस्तथैव च ५
उरः कण्ठः शिरश्चैव स्थानानि त्रीणि वाङ्मये
सवनान्याहुरेतानि सावमात्यर्थतोऽन्तरम् ६
उदात्तस्तालुगर्भश्च स्वरितः प्रचयस्तथा
नीचः सार्वानुदातुश्च सन्नतरस्तथैव च ७
तरसा प्रयजेन्नीचमुच्चं पृष्ठादिवोन्नयेत्
नैष्पान्यं च भ्रुवोर्मध्ये स्वरितं शिक्षिका विदुः ८
अकारप्रमुखैर्वर्णैर्हकारं तैस्त्रिषष्टिभिः
विबद्धं वाङ्मयं सर्वमप्रमेयमपारगम् ९
अकारा औकारान्ताः स्वरा ज्ञेयाश्चतुर्दशम्
शिष्टानि व्यञ्जनान्येव प्रोक्तान्यक्षरचिन्तकैः १०
कादयो मावसानाश्च स्पर्शाः स्युः पञ्चविंशतिः
यादयाश्च तथान्तस्थाः ऊष्माणश्च शषसहाः ११
स्पर्शानां करणं स्पृष्टमन्तःस्थानामतोऽन्यथा
यमानां संवृतं प्राहुर्विवृत्तं च स्वरोष्मणाम् १२

वर्गावसानगा वर्णाश्चतुः संज्ञाः प्रकीर्तिताः
नासिक्या आनुनासिक्याः पञ्चमाश्चान्त्यसंज्ञकाः १३
वर्गप्रथमद्वितीयाः शषसाश्च त्रयोदश
ज्ञेया अघोषा इत्येवं संज्ञयाक्षरचिन्तकैः १४
अघोषाणां तु करणं श्वासवत्समुदाहृतम्
नादवश्चैव सर्वेषां अकरस्तेति निश्चयः १५
अघोषे तु विसृष्टस्य परमं स्थानता भवेत्
अनुस्वारो विसृष्टश्च कलापाठः प्लुता यमाः
जिह्वामूलमुपध्मा च षोडशैते पराश्रयाः १६
अनुस्वारे तु नित्यं स्यात् द्वित्वं चारायणीयके
अलाबुवीणा निर्घोषा दन्त्यमूलस्वरा ननु
अनुस्वारस्तु कर्तव्यो नित्यं ह्नोः शषसेषु च १७
एकमात्रः स्वरो ह्रस्वो द्विमात्रो दीर्घ उच्यते
प्लुतस्त्रिमात्रो विज्ञेयो व्यञ्जनं त्वर्धमात्रकम् १८
ह्रस्वं द्विमात्रसंयुक्तं प्लुतमाहुर्मनीषिणः
वृद्धस्त्रिमात्रमेवापि व्यञ्जने त्वर्धमात्रकम् १९
ह्रस्वप्लुता प्रयुञ्जीत विरामेष्वनुनासिकान्
स्वर्लोकप्रभृतीनां तु न तु व्यञ्जनमस्तकान् २०
स्वरसन्धिस्तु सर्वेषां द्विमात्रेण विनिर्दिशेत्
ह्रस्वदीर्घप्लुतानां च यथा शास्त्रनिदर्शनम् २१
अनन्त्यश्च भवेत्पूर्वः अन्त्यश्च परतो यदि
तत्र मध्ये यमस्तिष्ठेत्सवर्णः पूर्ववर्णयोः २२
अपञ्चमस्त्वेकपदे संयुक्तः पञ्चमेऽक्षरे
यमो ज्ञेयो यथा रुक्मसंख्नग्निग्र्घ्नन्ति चैव हि २३

पञ्चायुग्मा स्वरा ह्रस्वः शिष्टा दीर्घस्त्वशेषतः
तेषामेव प्लुताः स्सन्ति ॠ लॄ वर्णौ विवर्जितौ २४
विद्यादमित्यनुस्वारं जिह्वामूलं कखाश्रयम्
विसृष्टस्तु इति प्रोक्त उपध्मा स्यात्फलाश्रयः २५
अशरीरास्तु ये वर्णा विज्ञेयास्तु पराश्रयाः
अन्यं वर्णं समाश्रित्य दर्शयन्ति निजं वपुः २६
जायापत्योर्यथा योगाद्गर्भं चैव प्रजायते
तथा पराश्रयो वर्णः संयोगश्च प्रजायते २७
प्राक् पदैः पर्यामाणास्तु पुरुषश्च यथा शुभम्
तथा पराश्रया वर्णा विज्ञेयास्ते पराश्रयाः
संश्रयन्ति परं तु तदिति द्वितीयः पादः २८
स्पर्शनासिक्यसंयुक्तास्तत्र मध्ये यमाः स्थिताः २९
अशरीराश्चतुर्भेदास्संज्ञाभिर्विहिताः पृथक्
प्रथमः पञ्चमैर्युक्ताः कयमं तत्र मध्यगम् ३०
द्वितीयेष्वेव खयमं तृतीये गयमं स्मृतम्
चतुर्था यत्र दृश्यन्ते वर्गान्तैः सह संयुताः
घयमस्तत्र मध्यस्थो ज्ञेयश्चारायणीयके ३१
नासा मूर्धनि संस्थानः प्रथमश्च यमः स्मृतः ३२
द्वितीयं तालुजिह्वायां नासायां तु विनिर्दिशेत्
तृतीयः कर्णदन्तं च कर्णौ नासां च संस्पृशेत्
चतुर्थो हृदयं नासां सर्वे कण्ठ्या यमाः स्मृताः ३३
अष्टौ स्थानानि वर्णानामुरः कण्ठः शिरस्तथा
जिह्वामूलं च दन्ताश्च नासिकोष्टौ च तालु च ३४
अकुहविसृष्टाः कण्ठ्यास्तालुनीचुयशाः स्मृताः

मूर्धन्यृटुरषा ज्ञेया दन्त्या लृतुलसाः स्मृताः
उपूपध्मानीया श्रोष्ठ्या तुरस्यौ हविसृष्टकौ ३५
कण्ठ्यतालव्यकण्ठ्योष्ठ्याः संधिवर्णाः प्रकीर्तिताः
दक्स्वरः परतो यत्र हकारस्य तु दृश्यते ३६
हकारं कण्ठ्यमित्याहुरौरस्यं व्यञ्जनेन तु ३७
श्रवर्णश्च कवर्गश्च जिह्वामूलीय इत्यपि
नवैते कीर्तिता वर्णा जिह्वामूलसमुद्भवाः ३८
इवर्णश्च चवर्गश्च यशकारौ तथैव च
एते वर्णाः परा ज्ञेया दश तालुसमुद्भवाः ३९
लृवर्णश्च तवर्गश्च लसकारौ तथैव च
श्रष्टौ दन्त्याः परिज्ञेया दन्तमूलसमुद्भवाः ४०
उवर्णश्च पवर्गश्च वकारोऽष्टम एव च
उपध्मानीयसहिता श्रोष्ठ्या वर्णा दश स्मृताः ४१
हकारः स्वरसंयुक्तो लघुत्वं दृश्यते यदि
कण्ठ्यं तं तु विजानीयाद्धृदयेति निदर्शनम् ४२
हकारं पञ्चमैर्युक्तमन्तस्थैर्वापि संयुतम्
तमुरस्यं विजानीयादाह्वियेति निदर्शनम् ४३
यमानुस्वारनासिक्यानामामूलसमुद्भवाः
सर्वस्थानमवर्णस्य केचिदिच्छन्ति सूरयः ४४
यस्य यस्य तु वर्णस्य करणं नोपपद्यते
प्रतिज्ञा तत्र बोद्धव्या करणं हि तदात्मकम् ४५
एते स्थानसमुत्पन्ना वर्णाः षष्टिस्त्रयस्तथा
यैरेव त्वखिलं विश्वं व्याप्तं वाङ्मयमण्डलम् ४६
स्वराः चतुर्दश प्रोक्ताः स्पर्शाः स्युः पञ्चविंशतिः

यादयाश्च स्मृताश्चाष्टौ षोडशैव पराश्रयाः ४७
एते वर्णास्त्रिषष्टिश्च विहिताक्षरचिन्तकैः
एतैरेवाखिलो व्याप्तो वाङ्समुद्रस्त्वपारगः ४८
सितवर्णाः स्वरास्सर्वे ईकारं स्पर्शसन्निभम्
स्पर्शान्तःस्थास्तथोष्माणः श्यामपीतारुणाः स्मृताः ४९
अयोगवाहाश्श्यामास्तु सिताः सर्वे स्मृताः स्वराः
अन्तःस्था हरिता ज्ञेया ऊष्माणश्चारुणप्रभाः ५०
स्पर्शा ईकारसहिताः कृत्स्नवर्णा न संशयः
सौम्योत्र तालव्यगणो जिह्वामूलस्तु नैनृताः ५१
आग्नेयः कण्ठजश्चैव मूर्धन्यो वायुदैवतः
दन्त्या रौद्रास्तु विज्ञेया ओष्ठ्याश्चैवाश्विना मताः ५२
वैश्वदेवास्तु विज्ञेयाः शेषा वर्णा न संशयः
एवं वर्णाः प्रयोक्तव्या नाव्यक्ता न च पीडिताः ५३
सम्यग्वर्णप्रयोगेन ब्रह्मलोके महीयते
संहितायास्त्विमां लोकं जित्वान्तरिक्षमाप्नुयात् ५४
अयं लोकोन्तरिक्षस्य तृतीयं दिवमेव तु
जित्वेमान्क्रमपाठस्तु ब्रह्मलोके महीयते ५५
प्राक्कूलोपर्युपासीत पवित्रैश्चैव पावितः
प्राणायामैस्त्रिभिःपूतस्तत ओंकारमर्हति ५६
प्रणवं प्राक् प्रयुञ्जीत व्याहृती तदनन्तरम्
सावित्रीं चानुवचनं ततो वृत्तान्तमारभेत् ५७
वसिष्ठः तपस्तप्स्यति योऽरण्ये मुनिर्मूलफलाशनः
ऋचमेकां तु यो्ऽधीते तच्च तानि च तत्समम् ५८
वेदाभ्यासोऽन्वहं शक्त्या महायज्ञक्रियाक्षमाः

नाशयन्त्याशु पापानि महापातकजान्यपि ५९
वेदोचितं स्वकं कर्म नित्यं कुर्यादतन्द्रितः
तद्धि कुर्वन्यथाशक्ति प्राप्नोति परमां गतिम् ६०
यज्ञानां तपसां चैव शुभानां चैव कर्मणां
वेदधर्मौ द्विजातीनां निःश्रेयसकरावुभौ ६१
निर्वृत्तपूर्णां पृथिवीं दत्त्वा यत्फलमश्नुते
तपसश्च परस्यैव तत्स्यात् वाध्यायिनि द्विजे ६२
यजूंषि शक्तितोऽधीते योऽन्वहंसघृतामृतैः
प्रीणन्ति देवानाज्येन मधुना च पितृंस्तथा ६३
यः स्वाध्यायमधीतेऽब्दं विधिना नियतः शुचिः
तस्य नित्यं क्षरत्येष पयो दधि घृतं मधु ६४
इति चारायणीयसंज्ञाध्यायः प्रथमः

इदानीं सन्धिप्राप्तानां वर्णानां लक्षणमाह
सन्धिप्राप्तास्तु ये वर्णास्तेषां द्विर्भाव इष्यते १
अभावे सन्धिना चैव लघुत्वं चैव निर्दिशेत्
दीर्घं विसर्जनीयान्तं पदान्तं बिन्दुसंयुतम् २
संयोगस्य शृणोति दर्शनम्
एकबिन्दुरनुस्वारो विसृष्टस्तु द्वयोः स्मृतः
न तूपङ्कलपाठस्य मूर्धन्या इव दृश्यते ३
ह्रस्वपूर्वस्त्वनुस्वारो विज्ञेयो द्वित्वमात्रकः
अर्धमात्रस्तु पूर्वः स्याद्विपरीतो विपर्ययः ४
अनुस्वारे तु नित्यं स्यात् द्वित्वं चारायणीयके
तर्जयित्वा तु पुंश्चल्यास्तथा वै संस्कृतादिषु ५

ब्रह्मचारी च पुंश्चली तन्नौ संस्कृतम्
नरे द्वे वा हकारे वा द्विर्भावं विद्यते क्वचित् ६
न चैव जिह्वामूलीये नोपध्मानीय एव च
सूर्मीं ३ वर्णवतीं ३ यथायर्हिंधिर्रूपायः कामयते ७
न चैवास्वरपूर्वे तु नान्तस्थैः स्पर्शसंयुतैः
न च वर्गद्वितीये तु न चतुर्थी कदा चन ८
आद्यमन्तं च मध्यं च स्ववर्णेनैव पीडयेत्
यदवघ्रापयति हराभ्यां तु परं नित्यं क्रामयन्ति विचक्षणाः
९
तथैव जिह्वामूलीयां तथोपध्मान्विनिर्दिशेत्
स्वरपूर्वात्तु रेफात्स्यादिद्वर्भावो व्यञ्जनस्य तु १०
हकारात्तु परं नित्यं क्रमते ह्यस्वरादपि
रेफपूर्वो हपूर्वो वा यः संयोगो भवेत्क्वचित् ११
द्विरुच्यते परं तस्य घर्म्मौ ब्रह्मनिदर्शनम्
हरौ यत्र नियुज्येते हकारः क्रमते तदा १२
अह्लतं ह्लियते ह्लादिनीं ह्लदं च निदर्शनम्
रयावुभयतो यत्र हकारो मध्यतः स्थितः १३
उभयोः क्रमणं विद्यादेतर्ह्यग्निर्निदर्शनम्
लवरेफहकाराणां जिह्वामूलमुपध्मयोः १४
तु यत्पूर्वं  तदिद्वमात्रं गुरुः स्मृतम्
ह्रस्वपूर्वस्त्वनुस्वारो द्विमात्र इति मे मतिः १५
द्विमात्रपरो ह्रस्वश्च मन्यन्तेऽक्षरचिन्तकाः
तैलवत्पीडयेद्वर्णान्सन्धिप्राप्तांस्तु सर्वदा १६
संधिना रहितांश्चैव पर्णवच्च समाचरेत्

स्वरात्क्रामति संयोगे व्यञ्जनं व्यञ्जने परे १७
केचित्पूर्वं परं केचिदुभयोर्नोभयोरपि
संयोगो द्विविधो ज्ञेयः कृतः कृत्रिम एव च १८
कृतस्त्वेकपदे जातः कृत्रिमः सन्धिसंभवः
तत्र यस्स्यात्स्वरपरकृतो वा कृत्रिमोऽपिवा १९
तस्य पूर्वाक्षरं द्विः स्याद्यथा श्श्वोश्श्वोश्श्वमित्यपि
व्यञ्जनान्तं पदं पूर्वं तद्वर्णं चापरं भवेत् २०
द्विर्भावं तं विजानीयात्संधिकाले तु नित्यशः
तेषु स्वरावनन्तरौ यत्र संयोगसंज्ञिकौ २१
तत्र द्विष्करणं स्यात्सकृत्करणमतोऽन्यथा
ओष्ठ्यौ वर्णौ यदि स्यातामसंयोगपरौ यदि २२
द्विरोष्ठितामतैः कार्या जिह्वां पुपूषदर्शनम्
वर्णा विंशतिरेकश्च येषां द्विर्भाव इष्यते २३
प्रथमान्त्यास्तृतीयाश्च यलवाश्च षसैः सह
अन्तस्था सन्निपाते तु प्रथमं क्रामयेद्बुधः २४
अनुस्वारो विसृष्टस्तु द्वावेतावशरीरिणौ
द्विर्भावमेतयोश्चैव ज्ञेयं चारायणीयके २५
शषसहा न दृश्यन्ते परस्थस्य तु नित्यशः
दीर्घानुस्वारमित्येके संयोगे ह्रस्व एव तु २६
अनुस्वारस्योपरिष्टात्संवृतं दृश्यते यदि
दीर्घानुस्वारौ विज्ञेयौ यज्ञं शृणोति दर्शनम् २७
एतेषामेव वर्णानां परं क्रामेन्नसंशयः
अन्तस्था स्पर्शसंयोगे स्पर्शस्य क्रान्तिर्दृश्यते २८
अन्तस्था सन्निपाते तु प्रथमं क्रमयेद्बुधः

यथा खल्वाश्नमे अवेल्लीयन्ते जल्म्मा उदरम् २९
अन्तस्थोष्मपरस्पर्शसंयोगो यत्र दृश्यते
स्पर्शे द्वित्वं वदेत्तस्मिन् कल्म्माशीविश्य्यती तथा ३०
यत्र चोभयतः स्पर्शाः संयुक्ताः शषसैस्सह
आद्यस्तत्र क्रमो ज्ञेयो नापरो बोधितो बुधैः ३१
स्पर्शाः पञ्चमसंयुक्ता यत्र पञ्चममन्तगाः
संयोगसंज्ञा दृश्यन्ते तत्र मध्ये यमा स्थिताः ३२
अपञ्चमस्त्वेकपदे संयुक्तः पञ्चमेऽक्षरे
यमो ज्ञेयो यथा रुक्क्म स इढ्ढग्ग्निग्घ्घन्ति चैव हि ३३
शषस्तथा संयोगी मनौ तु परतो यदि
यमं तत्र विजानीयात्स्न्नात्स्न्नानेति दर्शनम् ३४
वर्गवर्गचतुर्भिः स्युः परस्मिन्पञ्चमे यमाः
शविकारच्छकारादिर्त्र्यसंनतु संज्ञितम् ३५
स्पर्शा यत्र न दृश्यन्ते वर्गान्तैः सह संयुताः
यमास्तत्र निवर्तन्ते श्मशानादिव बान्धवाः ३६
वर्ग्यान्त्याच्छोषसैः सार्धमन्तस्थैर्वापि संयुतम्
दृष्ट्वा यमा निवर्तन्ते आदेशगमिवाब्दगः ३७
उभयोरन्त्यसंयुक्तः पुमान्कुण्डलयोरिव
अयसन्तं विजानीयात्संज्ञानेति निदर्शनम् ३८
संज्ञाननोपधादीर्घं न चानुस्वारमादिशेत्
संनियस्य ञकारेण परिक्रामे ङ्ञौ लघु ३९
अनुस्वारं तथैकारमुपधामनुनासिकम्
विक्रोशमनुकूजं च संज्ञाने परिवर्जयेत् ४०
समाश्लक्ष्णा न सन्दिग्धान्वर्णानुश्चारयेद्बुधः

न वैयाकरणैश्शक्यं सम्यग्वक्तुमशिक्षकैः ४१
हकारः पञ्चमैर्यत्र संयुजेत यथा विधि
तयोर्मध्ये तु नासिक्यं पह्णोह्णं ब्राह्मणो यथा ४२
न वायुं हससंयोगे नासिकाभ्यां समुत्सृजेत्
नाभ्यन्तमुरसा नादं तथा हयवनेषु च ४३
हकारं स्वरसंयुक्तं लघुत्वं दृश्यते यदि
कण्ठ्यं न तु विजानीयाद्धृदयेति निदर्शनम् ४४
हकारव्यञ्जनैर्युक्तं गुरुत्वे दृश्यते यदि
तमुरस्यं विजानीयादाह्वियेति निदर्शनम् ४५
नासिकेष्वपि वर्णेषु यो यत्र भजते स्वरम्
तं तमेवोपजीवन्ति नासादोषांश्च वर्जयेत् ४६
ऋकाररेफसन्देहे यत्पूर्वव्यञ्जनं परम्
रेफं तद्धारिकं विद्यादृकारे लघु तद्भवेत् ४७
ङणनाः पूर्वपदान्तः शषसेषु परेषु च
कटतैर्व्यवधीयेत्तु वर्जयेत्तच्च संयुतम् ४८
प्रथमा ऊष्मसंयुक्ता पदस्था वा पदादिगाः
न चैनात्प्रतिजानीयाद्यथा मत्स्याः क्षरोप्सरः ४९
टशौ पशौ च संयोगे तथा स्यात्कशकारयोः
दर्शयेत्स्वतूपं तेषां द्वितीयं तु विसर्जयेत् ५०
षट्पात्रक्षराणि विरिप्शिन्नुतादयः
अनुक्षातिपदं यत्र विरिप्शिन्तु तथैव च ५१
स्वरूपे तु कपौ तत्र द्वितीयं तु विसर्जयेत्
अन्यत्र यदाद्यादृग्येकपादूष्मसंयुतम् ५२
द्वितीये त्वदुतं ज्ञात्वानुष्टुप्शारद्युदाहृतम्

तृतीयश्च चतुर्थश्च चतुर्थादिपरं पदम् ५३
त्रिषुग्धर्मः
न विकारा ञकारात्तु शकारे छागमः स्मृतः
शकारात्तु छकारस्य ह्यन्येषामपि शालिनाम् ५४
अघोषे तु विसृष्टस्य परसंस्थानता भवेत्
क्षसादिच्छपरे चैव प्रकृत्या तेषु नित्यशः ५५
न क्रमेत्संस्कृतादीनां पूर्वं चैव तथा परम्
ऋगर्धर्चानुवाकादौ स्वरभंतौ तथैव च ५६
पुंश्चल्या तु तथैवास्या तूष्मा चैवोष्मणि स्थितः
वर्णेषूक्तः क्रमविधिरेतच्चारायणेर्मतम् ५७
सर्वेषां क्रमशास्त्राणां स्वरोधिष्ठानमुच्यते
नास्वरत्क्रमते वर्णो बहु प्राप्तोऽपि कारणात् ५८
द्वितीयोध्यायः

संहिताकरणं चेदमथ वक्ष्याम्यतो लघु
व्यञ्जनेन क्वचित्संधिः स्वरेण स्यात्क्वचित्तथा १
तथा सनत्कुमारः
स्वरेऽक्षरमिति प्राहुराचार्याः शब्दचिन्तकाः
समुदायः पदं तेषां तच्चतुर्धा व्यवस्थितिम् २
नामिकाख्यातिके चोभे नैपातिकमनन्तरम्
उपसर्गश्च निष्पत्तिः पदमेवं चतुर्विधम् ३
नामिकं सविता व्योम व्यर्त्त्वित्याख्यातिकं स्मृतम्
पर्युपेत्युपसर्गश्च चवाहेति निदर्शनम् ४
नामवायव्यमैन्द्रं वा सौम्यमाख्यातमिष्यते

आग्नेयस्तूपसर्गः स्यान्निपातो वारुणः स्मृतः ५
भारद्वाजकमाख्यातं भार्गवं नाम गोत्रतः
वासिष्ठा उपसर्गास्तु निपाताः काश्यपाः स्मृताः ६
लोपसंधिस्सते लोकमुश्चन्द्रेत्यागमः स्मृतः
वज्यसीतिविकारस्तु प्रकृतिः किंस्विदित्यपि ७
वर्णस्याद्दर्शनं लोप आगमो वर्णदर्शनम्
वर्णान्यत्वं विकारस्यात्स्वभावः प्रकृतिः स्मृतः ८
वर्णागमो वर्णविपर्ययश्च द्वौ चापरौ वर्णविकारनाशौ
तोस्तथार्थातिशयो नियोगस्तदुच्यते पञ्चविधं निरुक्तम् ९
ह्रस्वसंधिं तथा दीर्घं स्वरेण व्यञ्जनेन तु
चतुर्विधं यथा संधिं वक्ष्याम्य अग्निर्वै प्राङ्न चेत्तम् १०
द्वौ दीर्घौ ह्रस्वदीर्घौ वा दीर्घह्रस्वावनन्तरौ
ह्रस्वयोरुभयोर्वापि दीर्घमेकं समासतः ११
दक्षिणावर्तयति
एसंधिः स्यादकारान्तादिकारादे परे पदे
उकाराद्ये तथोभावमृवर्णे रेफसंयुतम् १२
ऋवर्णाद्यमकारान्ताद्रेफत्वं याति तत्स्वरः
परेण सह संयोज्यो यथर्त्त्विति निदर्शनम् १३
यत्र यत्र ह्यृकाराद्यमकारान्तं परं पदम्
तत्र तत्र भवेद्रेफः परेण सहसंयुतः १४
पुनर्ग्रहणं स्पष्टार्थं संधिवर्णेष्वकारांत्तात्परेष्वेव समासतः
प्रथमाद्ये द्वितीयत्वं तृतीयाद्ये चतुर्थता एवैषापरीति १५
एवकारकरणात्क्वचिद्द्वित्क्रामो दृश्यते
अपान्ते सर्शादयामीत्येवमादयः १६

इकारान्तं पदं पूर्वं स्वराद्यं चेत्परं पदम्
समासे संधयेद्यत्वमुकारान्ते तु वागमम् १७
प्रत्यक्सवरुणः स्थावरः स्रवन्ति समासतो
विवृत्तिः स्यात्संधिवर्णात्स्वरे परे ह्रस्वपूर्वामयुरमां च १८
दीर्घपूर्वमतोत्यथा नविवृत्तिरकाराद्यमेकारान्तात्परं पदम्
एकसंधिं कंचिदिच्छन्ति केचिद्विवृत्तिसंहिताम् १९
अयुग्मेषु यथासंधिरकारान्तात्स्वरे परे
युग्मेप्याहुस्तथा संधिं दीर्घश्च तदनन्तरम् २०
कण्ठा द्विसृष्टस्योभावं परे घोषेऽथ तत्परे
प्राहुर्लोपं तथा दीर्घाद्विवृत्तिः स्यात्स्वरे परे २१
नास्य क्षरा द्विसृष्टस्य घोषाद्ये रेफतूपता
लोपमाहुः परे रेफे दीर्घः स्याद् इउवर्णयोः २२
विसृष्टस्त्विदुपूर्वाभ्यां परो रेफो यदा भवेत्
संधिकाले तु तौ दीर्घौ रेफसंधिमतोन्यथा २३
रेफत्वकण्ठपूर्वोऽप्यकारान्तादीनि शेषतः
समासतः परे घोषे स्वस्थानतमतोन्यथा २४
तालुमूर्धन्यदन्त्यानां वर्गाणां प्राग् द्विकं द्विकम्
यत्र चैकपदाद्यं चेद्विसृष्टात्सोष्मसंयुतम् २५
पञ्चमत्वं स्ववर्गाच्च प्रथमाः पञ्चमे परे
तृतीयत्वं परे घोषे प्रथमाद्यैः स्वतूपता २६
परे स्पर्शे मकारान्तात्यर्शे स्यात्स्वान्त्यसंयुतम्
सवर्णतापरेऽन्तस्थे अनुस्वारस्तथोष्मणि २७
यज्ञेषु कत उत्वोंय्य विष्टः
अनुस्वारे परे पूर्वे सय्योगे पुरतः स्थिते २८

तद्धि ह्रस्वं विजानीयात्संस्थाप्येति निदर्शनम्
अनुस्वारोपरिष्टाश्च संवृतं दृश्यते क्वचित् २९
सदीर्घमपि विज्ञेयाद्यज्ञं शृणोति दर्शनम्
ह्रस्वोपधास्तु ङ्णनाः स्वरादेषु पदेषु च ३०
प्रत्यङ्ङासीनः सर्वत्र गुरोवो ज्ञेया लघुदीर्घोपयास्तथा
यानावहनक्रमे तु समासाङ्गे व्यञ्जनं ऋत्स्वरे परे ३१
संय्योगे क्रमते नित्यं व्यञ्जनं रेफवर्जितम्
नृषुयदन्ना व्यञ्जनान्तं पदं पूर्वं परव्यञ्जनमक्षरम् ३२
ऋवर्णेन तु संयुक्तं तत्समासेन भारिकम्
अभीष्टकान्ध्यृन्दन्ति प्रथमातूष्मणाद्ये तु द्वितीयत्वं परे पदे ३३
संयुज्यं प्रथमं मध्ये नासिक्योष्मणायोस्तथा
तत्सावित्रोदयच्छत रङ्गसंधिर्नकारान्त ३४
द्विसृष्टेव सरेफता मकारान्तादनुस्वारम्
परेष्वेव रफोष्यसु द्वे पदे तु संगसंषर्वम् ३५
राट्परं यदि मागमः स्यात्तयोर्मध्ये नानुस्वारो विधीयते
सम्राट्दिशां समासे क्रमते ताल्व्यं तकारां तादनन्तरम् ३६
सयकारं च्छकारं च लकारं तुल्य एव तु
यश्चरुर्भवति तच्छान्तं मिथुनं स्वर्गाल्लोकात् ३७
पूर्वं कृत्वा पदच्छेदं समासं तदनन्तरम्
समासे तु कृते पश्चादर्थं ब्रूयाद्विचक्षणः ३८
संहितायां विधिः प्रोक्तः कवीनामनुकम्पया
पुरासकृद्बुधैर्जुष्टः सैनिकैरिव केशवः ३९
इति चारायणीशिक्षायां तृतीयोऽध्यायः

मन्त्रो हीनः स्वरो तो वर्णो तो वामिथ्या प्रयोक्तो न
स्वमर्थमाह
सवाग्वज्रो यजमानं हिनस्ति यथेन्द्रशत्रुः स्वरतोऽपराधात्
१
ऊतीर्थादागतं जग्धमपर्वणेषु भक्षितः
न तस्य परिमोक्षोऽस्त्रि पापाहेरिव दुर्द्विषां २
सुतीर्थादागतं जग्धं स्वाम्नातं सुप्रतिष्टितम्
सुस्वरं च सुवक्त्रं च प्रयुक्तं ब्रह्मराजते ३
यथा व्याघ्री हरेत्पुत्रं दंष्ट्राभिर्न च पीडयेत्
भीता पतनभेदाभ्यां तद्वद्वर्णान्प्रयोजयेत् ४
मधुरं च नचाव्यक्तं व्यक्तं च नच निष्टुरम्
सनाथस्ये वदेशस्य नवर्णाः संकरं गताः ५
माधुर्यमक्षरव्यक्तिः पदच्छेदस्तथात्वरः
धैर्यो गुरुलघुत्वं च षडेते पाठके गुणाः ६
प्रतर्वदे नित्यमुरः स्थिते न स्वरेण शार्दूलरुतोपमेन
मध्यन्दिनोकण्ठगतेन चैव चक्राह्वयाकूजितसन्निभेन ७
नारं तु विन्द्यात्सवनं तृतीयं
शिरोगतं तच्च सदा प्रयोज्यम् ८
वाचं स्वतन्त्री न पटेत्कदा चित्प्राज्ञोन्यथा तैर्विहितं वेदम् ९
समविक्रमसम्यत्रामदुतामविलम्बिताम्
उच्चारयेत कल्पाणीं वाचमांन्नायसारिणीम् १०
नवासरस्य पूर्वाह्णे तारमुच्चारयेत्स्वरम्
उत्साहो नश्यते तस्य रात्र्यं ते मैथुने यथा ११
पठेत्कैवल्यसोमानं सौम्येन परिवेष्टितम्

तु लाकोटिनिभं पाठं स्वराध्यं मध्यमं स्वरम् १२
स्वरात्स्वरं संक्रमयेत्स्वरे संधिमनुल्बणम्
अदिछिन्नं समं कुर्यात्सूक्ष्माच्छायोतपोरसम् १३
समं स्वरं पठेन्नित्यं मार्गं  हस्ते प्रदर्शयेत्
यद्वाणी गच्छति स्थानं तद्धस्तेन प्रदर्शयेत् १४
यथा वाणी तथा पाणिर्विस्वरं परिवर्जयेत्
यत्रैवावस्थितावाणीपाणिस्तत्रैव गच्छति १५
स्वरस्यानुगतं हस्तं नृणामिव शुभाशुभम्
हस्तस्यानुगता दृष्टिच्छाये वानुविधावति १६
हस्तं वागनुगं कृत्वा वाचं कृत्वा मनोनुगां
दृष्टिं हस्तगतां कृत्वा त्रैस्वर्यस्येति लक्षणम् १७
स्वरतश्च स्वरो नीचः स्वरः स्वरित उच्यते
स्वरं प्रधानं त्रैस्वर्ये प्राहुरक्षरचिन्तकाः १८
सुखोपविष्टश्च चिरेकचित्तो विवर्जितत्रासमदाश्रयस्तु
यथर्तु युक्त्याशनपानभोजी वेदं पठेद्वर्जितवर्णदोषम् १९
दक्षिणाक्षिनिपातेन दृष्टिं हन्यात्कनीयसीम्
नासागराडभ्रुवोः संधिमुदात्तविषये विदुः २०
पुटिं ददुस्स्फुटिं वीणा मुष्टिको धनुराकृतिः
षडेते हस्तदोषास्तु परशुश्चेति सप्तमः २१
उत्तानं सोन्नतं किंचित्सुव्यात्कां गुलिरञ्जितं
स्वरं विद्धं करं कुर्यात्प्रादेशोद्देशगामिनम् २२
उदात्तस्तालुगर्भश्च तालुगर्भस्ततः परः
समाहारे तु स्वरितः प्रचयस्तस्य पृष्टतः २३
नीचस्थानोनुत्तुश्च सन्नतरस्ततोध्वगः

सर्वानुदात्तुयोर्मध्ये सप्तैते स्वरौत्तमाः २४
अन्तोदात्तं पदं पूर्वमुदात्तं वा भवेत्क्वचित्
उदात्तं परपदं स्यात्तालुगर्भः स उच्यते २५
स्वरितानन्तरं वर्णं यत्किंचित्तत्रविद्यते
प्रचयं तं विजानीयादेवमाहुर्मनीषिणः २६
उक्ष्यन्नाय
प्राहुस्सर्वानुदात्तुं तु नीचानीचरतस्तु यः
तत्परं चेद्भवेन्नीचमाहुः सन्नतरं बुधाः २७
स्वरितं अङ्गुलं विद्या सुच्चैर्यत्र परं पदम्
नीचं वापि पदं भूयादङ्गुले स्वरितं भवेत् २८
अग्ने सम्राडजैकपादाहवनीय
अमावस्यायां वा यजते कया शुभा २९
प्रचितं तालुगर्भं च सन्नतरं तथापि च
वाक्स्पृशति न पाणिश्च ज्ञेयं चारायणीयके ३०
चारायणीयशिक्षायां चतुर्थोऽध्यायः

स्वरा अष्टविधाः प्रोक्ता अमी वक्ष्ये यथाक्रमम्
तिर्यक्त्वं चतुरो गच्छेच्चत्वार ऋजवः स्मृताः १
सयकारं सवं वाप्यमक्षरं स्वरितं पदम्
नीचपूर्वमपूर्वं वा स जात्यः स्वर उच्यते २
सदस्यते
ए ओ आज्यमुदात्ताभ्यामकारो यत्र दृश्यते
अनुदातो ओ भिनिहितः सहं तस्मै वाजमिति ३
सोऽहं वाजसनोमि तस्मै वाजं सूवान्तम्

इ उ वर्णो यद्युदात्तौ आपद्यते यवौ क्वचित् ४
नीचे च प्रत्यये नित्यं विद्यात्क्षैप्रस्य लक्षणम्
अस्वकं यजामहे द्व्यन्नः सर्पिः ५
इकारे यत्र लोपः स्यादिकारेणैव संधितम्
उदात्तं चानुदात्तुं च प्रश्लिष्टोभीन्धतामिति ६
ह्रस्वप्रकृतिरिकार ईकारोच्चनीचयोः
प्रश्लिष्टं स्वर्यते तादृग्विहीमि स्वोविभाव्यते ७
उदात्तपूर्वं यत्किंचिच्छन्दसि स्वरितं पदम्
एष सर्वबहुस्वारस्तैरोव्यंजनौच्यते ८
ईडे अग्निम्
अवग्रहात्परं यत्र स्वरितं स्यादनन्तरं
ततो विरामं तं विद्यादुदात्ते यद्यवग्रहः ९
गोपतौ
उच्चनीचौ स्वरौ यत्र नीचे स्याद्यद्यवग्रहः
तथाभाव्यं विजानीयादेवमाहुर्मणीषिणः १०
यथाधनुषमादाय शिरे क्षिप्ते पुनर्गुणः
स्वस्थानं प्रतिपद्येत तद्वदस्तगते स्वरे ११
प्रश्लिष्टक्षैप्रजात्यानां यश्चापि नेहिते भवेत्
उदात्तोपस्थितं तेषां एकदेशे प्रकीर्तितम् १२
न तत्स्वरितपूर्वाङ्गे नापराङ्गे कदा चन
उभयोर्वावसंयोगे द्वारं कुर्याद्विचक्षणः १३
अन्तोदात्तं पदं पूर्वमुदात्तं वा भवेत्क्वचित्
हस्तं न नीचैर्निक्षिप्यति यंककुत्रैव गच्छति
तव श्रियव्यजिहीत १४

पत्नी स्वः
अनुदात्तात्कम्पनं यत्र द्व्यङ्गुलं तत्र पृष्टगम्
हस्तं स्वरसमायुक्तं कम्पयेत विचक्षणः १५
देवा अत्थोन्यस्य
स्वरितात्कम्पनं यत्र तत्राङ्गुलकमूर्धगः
हस्तं श्रुतिगतं कम्पे त्राङ्गुलादतिरेचयेत् १६
इषिरा अनत्तिः न्यङ्िनयन्ति अवरुह्य तथोदात्तादङ्गुलं
सामेवतु
कम्पं कुर्यान्नतः पश्चाद्धस्तं तत्रैव गच्छति । अ १७
संव्वावसोऽग्नेः
कम्पयोरुभयोर्यत्र ह्येकस्थानं कदा चन
सार्धात्स्यादङ्गुलादेकाद्द्वितीयं चाङ्गुलोर्ध्वगम् १८
मनुष्यास्नेन्यतः
साधां तथाङ्गुलात्कम्पा सर्वस्थानेषु कथ्यते
स्वरज्ञाः केचिदिच्छन्ति मायाभेदाः प्रकीर्तिताः १९

पञ्चमोऽध्यायः

दयथा सौमन्तनागेन्द्रः पदात्पदं विधावति
एवं पदं पदं व्यक्तं दर्शनीयं पृथक्पृथक् १
पदान्ते तु विरामः स्याद्वलाहक इति स्मृतः
अर्धचैर्वैद्युतो नामदगन्ते तु भुजं गमः २
पदे विरमते यातसवै विशिखौच्यते
योन्यस्मिन्छन्दसि प्रोक्ताः पर्वकं तं विदुर्बुधाः
प्रतगसम्

तनुमध्यं तु तद्वृत्रं यस्य पादं षडक्षरम् ३
कुमारललिज्ञं सप्त ह्यष्टाक्षरमनुष्टुभं
नवाक्षरं फलयुतं प्रणवं तु दशाक्षरम् ४
एकादशोपेन्द्रवज्रं द्वादशं तु जलोद्धतम्
त्रयोदशाक्षरपादं प्रहर्षं वृत्तमुच्यते ५
चतुर्दशाक्षरं वृत्तं वसन्ततिलकं विदुः
पञ्चदशं तु मालिन्यमृषभं षोडशां विदुः ६
सप्तादशाक्षरं पादं मन्दाक्रान्तं तु नित्यशः
अष्टादशं सुगोकर्णं शर्दूलैकोनविंशतिः ७
विंशाक्षरं सुवदनं स्रग्धरा चैकविंशतिः
द्वाविंशमभ्रतृत्तं तु सुललितं विंशतित्रयम् ८
चतुर्विं शतितत्वङ्गी क्रौंचपादमतः परम्
अष्टाविंशमश्च पादं शोभनं नवविंशकम् ९
भुजङ्गजृम्भं षड्विंशं ततो मधुकरं परम्
योन्यस्मिंस्त्रिंशमात्पादा आर्यां वैतां निबोधत १०
अतोन्यथा भवेद्द्द्यं यत्र पादेन विद्यते
यत्रकण्ठ्यदन्त्यदन्त्यष्टानामत्तं पदं तु वर्तते ११
परे पदे तथाग्रं स्यात्तद्विरामं विदुर्बुधाः
दिवसृक् हुत
अक्ष्णो निमेषमात्रेण या वर्णा पृस्व धीयते १२
स एकमात्राद्द्विर्भावाद्दीर्घस्त्रिप्लुत उच्यते
हृदयस्थं मण्डलं विद्यात्कण्ठे विद्याद्द्विराणवम् १३
त्रिराणवं तु जिह्वाग्रे विसृतं मातृकं भवेत्
चाषस्तु वदत्ते मात्रां द्विमात्रां वयसो भ्रवेत् १४

शिखी त्रिमात्रां विज्ञेया एष मात्रापरिग्रहः
आकाशस्था यथा विद्युत्स्फुटिके मणिसूत्रवत् १५
एवं छेद्यं विवृत्तीनां यथा बलेषु कर्तनम्
चतसृणां विवृत्तीनामन्तरं मातृकं भवेत् १६
अर्धमात्रमन्येषामन्येषामनुमात्रकम्
उभौ यत्र दीर्घौ स्यातां व्यवधानं तु मातृकम् १७
यवा आयवा
पूर्वमग्रे तदर्धं तु ह्रस्वयोरर्धमेव च
ह्रस्वादिवत्सानुसृता वत्सानुवारिणी चाग्रे १८
पावकवत्युभयोर्ह्रस्वा
दीर्घमध्यापिपीलिका १९

चारायणीशिक्षां षष्टोऽध्यायः

पद्रचितावलगातारा केशिनी धात्रिरेव च
स्वमतिपिपीलकान्वष्ट्रा वायव्या नववृत्तयः १
तिस्रस्तिस्रः क्रमेणासां पूर्वे मध्ये तथोत्तरे
सवनेषु प्रशस्यन्ते दुतमध्यविलम्बिताः २
अभ्यासार्थे द्रुतिं वृत्तिं प्रयोगार्थे तु मध्यमाम्
शिष्याणामुपदेशार्थे वृत्तिं कुर्याद्विलम्बिताम् ३
पदक्रमेण सन्धाय यज्ञुर्धर्मेण संस्थितं
स्थानपाणिस्वरश्लिष्टं द्रुतमाहुर्मणीषिणः ४
लघ्वादिगुरुसन्धिं च स्वोछ्वासन्नं पदे पदे
मात्राकालं समं कुर्यान्मध्यमां तां प्रचक्षते ५
पदं पदं पृथक्पृथक् प्रक्रमं प्रक्रमं तु यत्

प्राणप्रमाणप्रश्लिष्टां न्यासे वृत्तिं विलम्बिताम् ६
वाद्यं चताण्डवादीनां मात्रार्थमनुवर्तते
क्रमं चैव तिरस्कृत्यशिष्याभ्यासनहेतवे ७
क्रुद्धो गुरुर्वदति यानि यदा निशिष्ये दावाग्निसूर्यसदृशानि
दहन्ति तानि चून्येव शिक्षितपदानि सुखादहानि
पश्चाद्भवन्ति कुमुदा करशीतलानि ८
इति सप्तमोऽध्यायः

वर्गाणां प्रथमा भुक्ता भुक्ताश्चैव तु पञ्चमाः
अन्तःस्थानां लवौ भुक्तौ शेषाश्चान्येऽबुभुक्षिताः १
वर्गे वर्गे द्विकं वाद्यं दशकं वर्णसंचयम्
परेषां सहयोगेन भक्ष्यवृत्तिः प्रशस्यते २
यक्ताहलिक्ष्णन् पत्नीवान्
परस्परं स्पर्शौ भुक्तौ वर्जयित्वा तु पञ्चमौ
ङकारः पञ्चमैर्यत्र भोक्तव्यं तत्प्रयत्नतः ३
रुक्ममुपदधाति वाङ्नोपधस्यति
पञ्चान्त्यैस्त्रीणि चान्तस्था पदे चैके लवद्वयम् ४
प्रागन्त्येनान्त्याश्चतुरो भक्ष्याः पञ्चदशाक्षराः
अर्वन्यज्ञः
यकारादि हकारान्तमष्टकं च परस्परम्
चतुरश्चतुरो वापित्वभक्ष्यं षोडशाक्षरम् ५
विष्वग्वातो वान्तः
तृतीयाः पञ्चमावर्ज्याः शेषाभक्ष्यास्तु वर्गिणः ६
एकपदेन नासिक्या उपनीतस्य मधिवम्

उद्गाश्वमे विरिनन्वाधे
परस्परं स्पर्शभक्ष्यास्तृतीयाः पञ्चमादृताः ७
स्पर्शा अन्तःस्थसंयुक्ता मदिरेव द्विजातिभुक्
सप्तते अग्ने युग्मदयुजौ
तृतीयश्च चतुर्थश्च ह्यन्तस्थोष्माणसंयुतः ८
सन्धिं तु पञ्चमा यत्र नवक्ष्यामीतिमे मतिः
वाचुताजिह्वामे आगतान् अन्ति ९
संप्रेष्याणां तु पिण्डानां भक्षं चारायणीयके
यकारं हरयोर्युक्तं स्फुटमन्यत्र न क्वचित् १०
हकारे तु स्फुटं प्रक्रमे कारे रेफ ऋक्स्वरे
स ह्यग्निस्तन्मनुष्येषु वीर्यमस्य तमेव च ११
स ह्यग्निः तन्मनुष्येषु वीर्यमस्पृतमसि
ज्वालापिण्डात्सनासिक्यान्स्वानुस्वारांस्तु मृणमयान् १२
सोपभ्यान्वायुपिण्डां च जिह्वामूलांस्तु वज्रिणः
ब्रह्मोस्तं वङ्गा १३
आसन्सयमं विद्ययस्पिण्डमन्यस्थेषु च दारुवत्
अन्तःस्था यमवर्जितमूर्णापिण्डं विनिर्दिशेत् १४
स्यानं पदविभागेन विक्रते पाटको जनः
एकपदे तु सम्मोहं दन्त्यतालव्ययोर्यदा १५
सविकालं छकारं तु तालव्यं विनृते जनः
सकारे दन्त्यमित्याहुरभेदे स्मृतिविभ्रमः १६
गछगछकलश्चैव यछतश्चयोरेव च
इछ ऋछ तथा ऐछ तालव्यं विन्दते जनाः १७
प्रवत्स्यन्यसुतोवत्सो निहोतासत्सिपित्सरु

पुनरुत्स्यतमाधत्स्वपुनरुत्सृष्टपीत्स्थति १८
रुरुत्समानोदित्सन्तं वात्स्येत्स्याममदित्स्यया
उत्सदतोंतित्सत्से आरथकृत्सश्चिकित्सतः १९
संवत्सरो जिघत्सेतवृत्वकाममरुत्स्म हि
नोत्स्यान्नावीतभत्सौरात्स्यकुत्सशोत्रैव वेत्स्यथ २०
उत्सादुहेनभित्सारो वरुणछत्मभित्सति
उत्सं यतोत्सं जुषस्वदन्त्याश्चाभिहितापृथक् २१
हकारं पञ्चमैर्युक्तामन्तस्थैर्वापि संयुतम्
औरस्यन्तं विजानीयात्कण्ठ्यमाहुरसंयुतम् २२
न वायुं हमसंयोगे नासिकाभ्यां समुत्सृजेत्
नात्यन्नमुरसानादं तथा हयवनेषु च २३
ब्रह्मादेवानां स्वाह्येनं वागैह्व
ऋत्स्वरः परतो यत्र हकारस्य तु दृश्यते २४
हकारः कण्ट्यमित्याङ्गरौरस्यं व्यञ्जनेन तु
आह्यग्रेत उरस्यन्तं विजानीयादाह्वयेत निदर्शनम् २५
हकारं स्वरसंयुक्तं लघुत्वं दृश्यते यदि
कण्ठ्यं तं तु विजानीयाद्धृदये तु निदर्शनम् २६
हृदयमपि कक्ष्ये हकारं पञ्चमं युक्तं मन्नःस्यैर्वापि संयुतं
तयोर्मध्ये भवेत्तु नासिक्यं प्रोक्तं तु ब्रह्मणे २७
स्वरभक्तिर्द्विधा ज्ञेया लकारे रेफ एव च
स्वरोदाव्यञ्जनोदा च विहिताक्षरचिन्तकैः २८
रहयोः करिणीं विद्यात्कर्विणीं रशकारयोः
लशयोर्हरिणीं विद्याद्धात्रीं तु रसकारयोः २९
या तु हंसपदानाम सा स्याद्रेफषकारयोः

अभक्ष्याक्रमवर्ज्याश्च पञ्चैताः स्वरभक्तयाः ३०
एकपदा भवेद्यत्र स्वरभक्तिः स्वरोदया
द्विपदा चैव यादृष्टा व्यञ्जनोदा च सास्मृता ३१
अणुमात्रं च रेफः स्याद्व्यञ्जनस्य तथैव च
स्वरस्य सार्धमात्रं च स्वरभक्तिं विनिर्दिशेत् ३२
स्वरभक्तीः प्रपुञ्जानस्त्रीन्दोषान्वर्जयेद्बुधः
इकारं चाप्युकारं च ग्रस्तदोषान्विवर्जनात् ३३
दर्शपूर्णमासौ वार्षुकेस्मै
यथेन्द्रनीलप्रभयाभिभूतः शुक्लो मणियान्तिर्हि नीलभावम्
तथैव नासिक्यगुणाभिभूतः स्वरोपिरङ्गत्वमुपैति कृत्स्नम् ३४
हृदयाञ्जायते रङ्गः कांस्यवच्चैव निःसृतः
लघुश्चैव द्विमात्रश्च ददत्वेति निदर्शनम् ३५
दधत्वार्योनर्यः
हकारे व्यञ्जनोदः स्यात् शषसेषु स्वरोदयः
शषसैर्विवृतं विद्यात्तद्धरिसंनृतं विदुः ३६
संयोगे रशयोर्दोषः शतवत्सो निदर्शनम्
तस्य मात्रा तु हृदये अणुमात्रा तु मूर्धनि ३७
नासाग्रेत्वणूनां माचारङ्गः सपरिकीर्तितः
न स्वरेण विनारङ्गो ङकारेण तथैव च ३८
उभयोर्धानसंयोगाद्रङ्ग इत्यभिधीयते
रपरे रङ्गमित्याहुरघोषे मुखनासिकाः ३९
स्वरपरे तु नासिक्यस्तनमध्यं दधत्वयोः
ऋतूं ऋतुयते भ्रातृव्यवौ स्त्रन्नते गोमा ४०
अग्रे वर्णस्यादर्शनं लोप आगमो वर्णदर्शनं

वर्णात्पत्वं विकारः स्यात्स्वभावः प्रकृतिः स्मृताः ४१
सन्धिश्चतुर्विधा तेषां पदानां समुदाहृतः
लोपागमविकारास्तु प्रकृतिश्चेतिनिश्चयः ४२
लोपसन्धिः सतेलोकसश्चन्द्रेत्यागमः स्मृतः
वाजिसीतिविकारस्तु प्रकृतिः कस्विदित्यपि ४३
तृणवेतिणत्वं विद्यात्सुषुपुषीतिषत्वयोः
राधस्योषोत्युपचारं दीर्घं च्यावयते विदुः ४४
तृणवः सुषुपुषी
क्रियालोपं समस्कुर्वन्नन्नष्टे वर्णलोपता
एतैः षड्भिर्द्विलोपैस्तु ज्ञेयं चारायणीयके ४५
एकपदे पदार्थे च पदावग्रहजे तथा
स्थानारं भन्तकुर्वीत त्रिः प्रक्रमपदेषु च ४६
यः तं ग्रामं जयति अमागम्या इति
काटकश्च समग्रश्च हिमवान्केशवस्तथा
चत्वार्येते तान्यसंख्यानि श्रुतितो य गुहागुणैः ४७
वर्णसंज्ञास्तु संयोगः संहिताकरणं तथा
मात्रा प्रमाणं हस्तश्च स्वराः कम्पा विवृत्तयः ४८
स्वरभक्तीः पादवृत्तं वृत्ती भुक्तमभुक्तयोः
एतत्क्रमेण पूर्वोक्तमथातः क्रमलक्षणम् ४९
इत्यष्टमोऽध्यायः

द्विपदां संहितां कृत्वा विरमेत्तु पदापदं
पूर्वमुत्सृज्यसंयोज्यमुत्तरेणोत्तरं पदम् १
असितस्य तस्य ते

त्रिपदान्यवसानानि यथास्थात्त्रिपदः क्रमः
पूर्वमुत्सृज्यमेधावी प्रक्रमेत्पुनरेव तु २
देवते योजयामि
चतुष्क्रमस्तथैव स्यात्त्रिपदेन विधिः स्मृतः
पदं पदं त्यजेत्पूर्वं प्रक्रमेत्पुनरेव च ३
देवेभ्य एमेनत्
स्वरान्तानि दुदादींस्त्रान्स्वरसन्धिसमीरितान्
त्रिक्रमां जनयन्त्येते उभयोषत्वणत्वयोः ४
उपेपेत्रु ब्रह्मणोद्धरति ऋतस्यादिच्छयथेम पाचीन् ५
सोषूणः
उकारः पदयोर्मध्ये पत्रापृक्तः परं भवेत्
सत्रिकस्त्रिक्रमो ज्ञेयस्तथैवाकारमादिशेत् ६
उदुत्यं यत्र त्वेव समेयातां हेतूत्रिक्रमकारकौ
अन्ययोः पदयोर्मध्ये सचतुष्कचतुष्क्रमः ७
सपुनरैमीत्येद्वृक्षस्य पदात्तेषु प्रग्रह्याणामित्यकारो निदर्शनम्
८
न क्रमस्यावसाने तु न च स्यात्सहितां प्रति
उर्वीरोदसी ऋगर्धर्चानुवाकां तास्तथाप्येकपदं च यत् ९
विसंहितमसन्धेयं संहारः केवलाः स्मृतः
अनुदृश्यामजंतकवयः
अनुदात्तं पदं पूर्वं सुरायुश्चैः परं पदम् १०
प्रक्रमे संध्यमानानां उच्चैः करणमादिशेत्
जात्यादीनामशेषाणां तिर्यक्प्रक्रमणं स्मृतं ११
अनन्यपूर्वमेतेषां उदातादेवनिर्दिशेत्

स्वरितं परैर्फलैर्पदं स्याट्टजुः प्रक्रामयेद्बुधः १२
परमे व्योमन् पत्नीसरोह्वाव
स इत्येतत्तथापूर्वमित्यदंततः परम्
स्वरादिना तृतीयेन क्रमं तत्र विनिर्दिशेत् १३
सेच्चैव तु तथा स्यातामुपदे परतः स्थितः
सन्धिना तु यथोक्तेन तं चतुष्क्रममादिशेत् १४
द्विपदं प्रक्रमात्पूर्वं  परयोंऽगिरसः परम्
त्रिक्रमं वालखिल्या वै माषकुम्भ्यां चतुष्क्रमम् १५
पुनरुक्तपदे पूर्वे परिहारं तु वै भवेत्
कृत्वा प्रक्रमसन्धिं तु संहरेत्विचक्षणः १६
देवावास्तोस्वाहेति
अतोन्यत्र तु संधायपुनरुक्तपरे पदे
द्विपदं त्रिपदं कुर्यादुक्तप्रक्रमलक्षणम् १७
सवितोन्नयतु
प्रक्रमेषु यथाशास्त्रं लक्षणं विहितं क्रमात्
वेष्टेष्वेव तु संधीनामत ऊर्ध्वनिगद्यते १८
षत्वणत्वमुपारो दीर्घत्वं तश्चतुष्टयम्
पदे यस्मिन्निवर्तेत तत्समायाद्यलक्षणम् १९
नवमोऽध्यायः

वेष्टापरिग्रहश्चैव संहारश्च विवर्ततः
आदरः परिहारश्च शब्दाः पर्यायवाचकाः १
अवग्रहं समापाद्यं प्रग्रह्यं नैधनानि च
संयोज्य पुनरावृत्तिः परिहार्याणि शास्त्रतः

सुषुपुषी उर्वी इति २
परिहारे विधिं विद्यात्संयोज्यभ्यास्यते
पुनः इत्यन्तां संहितां कृत्वा पदवत्पुनरारभेत् ३
प्रप्रायमग्निः प्रप्रेति प्रप्र
अकारान्तं पदं यत्र दीर्घं वा यदि वाप्लुतम्
एसन्धिस्तत्र कर्तव्यः परिहारेषु नित्यशः ४
प्रदातारं सुगावाः उपयाम इति
सन्धिवर्णेषु शेशेषु विवृत्तिः स्यात्स्वरे परे
उकारान्तं वकारः स्यादिकारे ईत्वमादिशेत् ५
अंहोमुचे अनुमत्या अष्टाकयलः
न त्यक्षराद्विमृष्टस्तु रेफं कुर्याद्विवर्तने
आवर्वरितिरे ह्येते कण्ठ्यपूवास्तु नित्यशः ६
मयो भूर्वातः वेन आवः
यत्त्वा ह्येते भुवो ह्येको ज्ञेयो रेफविवर्जितः
अन्ये सरेफः कर्तव्या भुवशब्दाः प्रयत्नतः ७
ऋतावायज्ञियो भुवः अकारात्तु पुनः रौयातः ८
स्वर्भुस्त्वहरहर्कः
दोषावस्तरजीगर्तः प्रणे तस्सन्नतस्तथा
उद्गातः प्रातरुन्नेतर्होतनेष्टस्तथैव च ९
द्वारविभरजागश्च द्वारभाः सन्नतस्तथा
एते पदा विशेषाः स्युः पृथक् तेन समुद्धृताः १०
रेफतः परिहार्याः स्युः नित्यं चारायणीयके
अवग्रहं समापाद्यं प्रगृह्यं नैयनानि च ११
आदरं पदवर्णैस्तु ऋते दुरोहणाकैदिति

अश्ववन्तं वर्धनतत् दूरोहणम् १२
विनते षत्वणत्वे तु कण्ठ्यव्यवहितौ यदि
पृथगेकपदे तौ तु न तत्रादरमादिशेत् १३
शुक्तं विषजन्ति अयः प्रणयते
स्वपन्तौ रेफलोपः स्यादुपद्या स्यात्परिग्रहे १४
स्वर्षायन्तु सकारेण गुरुणाश्वविनिर्दिशेत्
ऋते दूरोहणादेव निवृत्तानामतः परम् १५
नैधनावग्रहे स्यातां तौ तु ज्ञेयौ यथापदम्
दुन्दुभः प्रथमान्तं पदं यत्र तृतीयत्वं परिग्रहे १६
पञ्चमा अविकाराः स्युरेवमाहुर्मणीषिणः
यज्ञमानुषक्
सर्वेषां तु स्वरादीनां यकारे स्याद्विवर्तनम् १७
इकारे ह्रस्वदीर्घेन सवर्णे नैव निर्दिशेत्
ऋतवत्पृतवा इहो इतौ १८
इतिकारपरान्सर्वान्संयुक्तान्क्रामयेद्बुधः
असंयुक्तमिकारेण नक्रमन्ति छवर्जिता इति १९
कारपरा स्वसामितिस्वसां छायमिव
मोक्षपूर्वेऽनुवाकान्ते प्रक्रमान्ते तु सारणां २०
तौ तु नीचावसानौ चेत्पूर्वे चैव विनिर्दिशेत्
यदक्षरं त्यजेत्मोक्षं पदकाले तु नित्यशः २१
तदेवादर्शयेत्पाठं नीचस्थे ग्रहणे पदे
इति कारपदं मोक्षं स्वराद्यं ग्रहणं पदं २२
अन्त्यवर्णं पुरस्कृत्य पूर्ववर्णे विनिर्दिशेत्
हन्यमाने पदे नीचे पूर्वाङ्गं विनिहन्यते २३

पदवन्नीचपूर्वे स्यान्नीचः स्यादुच्चपूर्वके
मोक्षान्ते स्वरिते त्यर्थे वर्णशेषाद्विमोक्षणम् २४
अनुसंधाने पराङ्गे पदववच्च निहन्यते
मोक्षान्ते द्विपदं वर्णं साधारत्वे स्थितं यदि २५
ग्रहणं तं विजानीयात्तत्पूर्वे मोक्षणं भवेत्
मोक्षग्रहणसंधाने स्यन्दनं दृश्यते यदि २६
स्यन्दनं सारणं कुर्यात्तत्पूर्वे मोक्षणं भवेत्
स्वरिताद्ग्रहणं नीचं पादशेषाद्विमोक्षणम् २७
पदवन्नीचपूर्वः स्यान्नीचे स्यादुछपूर्वके
मोक्षान्ते स्वरिते वोच्चं सुराद्यं ग्रहणं पदम् २८
उच्चस्थं वापि नीच्चस्थं वर्णशेषाद्विमोक्षणम्
एकारान्तं पदं मोक्षं स्वराद्यं ग्रहणं पदम् २९
एकारे मोक्षणं कुर्यादकारे ग्रहणं तथा
सविसृष्टभुवो मोक्षामकाराद्यं परं पदम् ३०
विसृष्टे मोक्षणं कुर्याद्वर्णो वर्णशेषं विवर्जयेत्
मोक्षणादुश्चकं गच्छेर्द्व्णमाद्ये परे पदे ३१
द्वितीयं ग्राहयेद्वर्णं मोक्षकाले तु नित्यशः
पुनरुक्तावसानं तु स्वरिते दृश्यते यदि ३२
ग्रहणमनुदात्ते चेदुदात्ते मोक्षणं भवेत्
अन्तोदात्तादिसर्वेषां वर्णादिस्मरणं भवेत् ३३
द्विरुदात्तु तथाद्यं च द्वितीये चैव निर्दिशेत्
ब्रह्मचारी स्वचरिते मेधावे कर्मकृत्तथा ३४
प्रियश्च धनदश्चैव यश्च विद्यां प्रयछति
श्रोत्रियः शुशृषणश्च श्रद्धावान्प्रश्नकृत्तथा ३५

दमशमसमायुक्तस्तीर्थान्येतानि ब्रह्मणः
पृथिवीं वित्तपूर्णां त्रिर्दत्त्वा यत्फलमश्नुते ३६
परस्य तमसश्चैव ततवाध्यायिनिद्विजे
केचित्सांख्ये नगच्छन्ति केचिद्योगेन योगिनः ३७
केचिदेव महात्मानः क्रमस्याध्ययनेन तु
सर्वशास्त्रविदो ये च ये च क्रमविदो जनाः ३८
एकार्थभावोपगतास्ते हरिं प्रविशंति वै
षट् पञ्चाशत्प्रथमे वै त्रिंशच्छ्लोकाद्वितीयके ३९
तृतीये श्शिंश्चैवोक्ता एकेनोनाश्चतुर्थके
षट्त्रिंशत्पञ्चमे प्रोक्ताः सप्तचत्वारमेव हि ४०
चत्वारिंशत्त्वष्टमे वै नवमे तु त्रयोदश
चत्वारिंशत्तु दशमे श्लोका वै परिकीर्तिताः ४१
एकत्रैव तु विख्यातं श्लोकानां तु शतत्रयम्
चत्वारिंशदधिकं वै शास्त्रं चारायणीयकम् ४२
अमत्सर इदं देयं मत्सरे न कदा चन
मत्सरे तु भवेद्दत्तं त्युप्तं बीजमिवोषरे ४३
य इदं पठते नित्यं यश्चाध्यापयेद्द्विजम्
अस्यार्थं बुद्ध्यते यो वै ब्रह्मलोकं स गच्छति ४४

इति चारायणीयशिक्षायां दशमोऽध्यायः

Aithal, K.P., *Veda-Lakṣaṇa: Vedic Ancillary Literature, a descriptive bibliography*, (Delhi: Motilal Banarsidass Publishers, 1993), #550 Cārāyaṇīya-Śikṣā, found in the following two manuscripts:

Bhanderkar Oriental Research Institute, Poona: Cārāyaṇīya Śikṣā, #21 of 1875-76. 13 folios (6-18).

Catalogue of the Stein Collection of Sanskrit Manuscripts from Kashmir, now deposited in the Indian Institute Library, Oxford: Cārāyaṇīya Śikṣā, Manuscript #62. 98 folios. Sharada script. Copied in 1894.

# श्रीकौण्डिन्यशिक्षा

वागीशादिसुरान् सर्वान् कृतार्थान् कर्तुमादिशत्
वटमूले यदाभाति तस्मै चिन्महसे नमः १
अधीत्य संहितां पूर्वं पदक्रमजटाघनान्
शिक्षादिशास्त्राध्ययनं कुर्यात् कौमारसंयुतम् २
पदानां संधिरुच्छ्वासे संहितानवसानगा
अनुलोमविलोमाभ्यां सा द्विधा पदमन्तगम् ३
वर्णाक्षरस्वराङ्गाणां संधयस्तु यथाक्रमात्
पृथक्पृथगनुप्रोक्ताश्चतस्रः संहिताः स्मृताः ४
पदवत् संहिता यत्र न कार्यं सांहितं यदि
संहिता प्रकृतिर्ज्ञेया सप्त ताः संहिताः स्मृताः ५
पदस्यावग्रहस्यापि संदध्यादुत्तरेण च
क्रमेण प्रोच्यते यत्तु लक्षणेन समन्वितम् ६
सुप्तिङन्तादिभेदेन बुधैस्तत् पदमुच्यते
शमानं च विलङ्घ्यं च नपरं तपरं स्वरम्
अवर्ण्यनिङ्ग्यमिङ्ग्यांशमष्टलक्षणमीरितम् ७
क्रमेण नार्थः पदसंहिताविदः पुराप्रसिद्धाश्रयपूर्वसिद्धिभिः
अकृत्स्नसिद्धिश्च न चान्यसाधकं न चोदयापायकरो न च
श्रुतः ८
विपर्ययाच्छास्त्रसमाधिदर्शितात् पुराप्रसिद्धेरुभयोरनाश्रयात्
समभ्युपेयाद्बहुभिश्च साधुभिः श्रुतेश्च सन्मानकरः क्रमो
भवेत् ९
उच्चार्य संहिताबद्धे पदे प्रोच्योत्तरं पुनः
संदध्यादुत्तरेणैव क्रमोऽर्धर्चान्तमापयेत् १०
आकारान्तमुदात्तान्तमाङ्परं यत्र दृश्यते

त्रिक्रमं तं विजानीयात् मो षू ण ऊ षु ण स्तथा ११
क्रमाभिगमभिन्नानि दुर्गाणि सुमहान्त्यपि
विलीयन्तेऽर्कभिन्नानि तमांसीव निशात्यये १२
पदद्वयं क्रमादुक्त्वा द्वितीयं प्रथमं पुनः
पुनश्च क्रमवद्ब्रूयात् संधितः सा जटा स्मृता १३
सकृदादिं द्वितीयं द्विः द्विरादिं सकृदुत्तरे
द्विस्तृतीयं सकृन्मध्यं द्विरादिं सकृदुत्तरे १४
जटामुच्चार्य विधिवत्तृतीयं संहितेव हि
विलोमेनानुलोमेन वदेच्चेत् स घनः स्मृतः १५
द्विपदोऽष्टादशपदः पदैः षोडशभिर्युतः
त्रयोदशपदश्चेति चतुर्धा घन ईरितः १६
यत्र द्वयोश्च पदयोः समानस्वरवर्णयोः
तृतीयेन घनेन स्यात् क्रमवद्द्विपदो घनः १७
त्रिक्रमस्य जटामुक्त्वा चतुर्थं संधितो वदेत्
विलोमेनानुलोमेन चाष्टादशपदो घनः १८
तत्त्रिक्रमे पूर्वपदेन युक्ते द्वयं जटावत्क्रमवत्तु शेषम्
उक्त्वा विलोमादनुलोमतश्चेद्वदेद्घनः षोडशभिः पदैः सः
१९
प्रथमः पञ्चमः षष्ठो द्वादशैकादशौ तथा
संहितासंधयः प्रोक्ता इतरे पौरुषा घने २०
पदादिविकृतीनां ये पारायणपरायणाः
महात्मानो द्विजश्रेष्ठाः ते ज्ञेयाः पंक्तिपावनाः २१
घनपारायणं यस्तु सकृत् कुर्यात् द्विजोत्तमः
स वै ब्रह्मा स वै विष्णुः स वै रुद्रो न संशयः २२

कोटिजन्मकृतं पापं ब्रुवतां नश्यन्ति क्षणात्
पठन्तः श्रद्धया भक्त्या सहस्राणां गवां फलम् २३
लभेरन् दानजं तस्य पाठकानां च पूजनम्
यः करोति शिवस्थानं लभते नात्र संशयः २४
पठतां श्रद्धया पूजां यः करोति नरोत्तमः
ब्रह्मलोकनिवासी सन् ब्रह्मणा सह मोदते २५
पठतां शृणवतां वापि पूर्णायुः सर्वसम्पदः
पाठकानां च पूजायामैश्वर्यमतुलं भवेत् २६
प्रग्रहत्वं जटायां स्यादक्षरस्य घनेऽपि च
अन्त्यस्वरपरेऽप्येवं संधिकार्यं न युज्यते २७
पदानां ह्रस्वभाजां तु घनसंधिषु ह्रस्वता
दीर्घत्वमनुलोमे स्यात्सर्वत्र संधितो भवेत् २८
उक्तं पुनः पञ्चपदं च वाक्यमित्युत्तरं चापि तथैव सर्वतः
ज्ञेयं बुधैः पूर्ववदन्यदुक्तं तत्रस्थलक्ष्यं न तु पूर्ववद् भवेत्
२९
द्र प्सश्चित्रं सप्त तेपः पुनश्चेन्नाकं विष्णोरक्षदेवस्य गोमान्
अग्ने त्वं न स्यादयं नः परित्वा गोमा यज्ञं त्वस्य लोपः
सहस्व ३०
यास्ते प्राणमग्ने च पवस्व द्यौस्ते रक्षा यैव चायुरग्ने नयैव
दध्यप्यस्मिंश्चापिजश्चत्वमग्नेनैक्यश्चाकारोऽपि यः प्राणतः
स्यात् ३१
आयुर्वर्चस्वत्वमग्ने तन् पा ज्योतिष्मन्तं मानुषीभ्यो विधम्
त्वामारण्यं पावको ग्रे जनिष्वागत्याघर्वासीदचाग्नित्वं
लोपः ३२

ता अस्या इमं स्ते सुवर्यं प्रमातृप्रेद्धो यक्षत्या त्वमग्ने
समास्त्वा
माघावाचायं रपजातो निषीदन्नप्रेदग्नेस्य त्वमग्नेत्वलोपः ३३
उरुव्येङ्गिर इति क्रम्या घनोर्षयति पानकः
भवत्यग्नेऽग्न इत्यादिष्वकारो लोप उच्यते ३४
उदात्ततुनुपूर्वौ वश्चादौ लोपो भवेत् तदा
ऋत्परस्य नकारस्य णत्वं प्राप्तमितीरितम् ३५
ऊकारस्याप्यनित्यस्य वकारादेश ईरितः
ह्रस्वोपलक्षणन्यायात् घनसंधिषु सर्वतः
न सकारष्षत्वमेति महि सृज्यध्वमत्र वै
ऋकाररेफवत्पूर्वं बलवत्तरमुच्यते ३६
विलोमेषु तृतीयो नश्चान्नमन्येन्य उच्चकम्
नो णं नाप्नोति प्रकृतावाप्नोत्येव तृतीयनः कः ३७
पुनःशब्दे विसर्गस्य सत्वं स्यात्तु परे कृधि
विश्वतः क्षत्रमित्यत्र न विसर्गः समाप्नुयात् ३८
इड इत्यत्र विसर्गश्च परिधिग्रहणे परे
सकारमाप्नुयात्तत्र ग्रहणप्रबलादि --- ३९
स्यान्मकारः केवलोनुस्वारो ज्ञघ्नपरोऽपि वा
अन्यधर्मेण रहितो द्विमात्रः परिकीर्तितः ४०
अप्यकारादिवचनं प्रकृतौ कार्यभाग्भवेत्
विलोमेषु च सर्वत्र कार्यभाङ् न भवेत्सदा ४१
यरौ स्यातां यस्य नस्य प्रकृतौ तस्य पौरुषे
निषेधः प्रकृतौ यस्य विलोमे तस्य वै भवेत् ४२
अनन्यस्वरसंमिश्रात्तत्तस्मादयुतात् पदात्

उक्ता जटादिषु ह्यत्र वागमः पर ईरितः ४३
भवेदप्यपपूर्वस्य छस्य पूर्वागमः स्मृतः
हकारान्नणमा ऊर्ध्वाः पूर्वं तु प्रसरन्दिहात् ४४
एत्वमवर्णपूर्वे ताविवर्णोत्तर आप्नुतः
उद्दोकारमयमेदवमोदत्परो न चेत् ४५
ऐदायमावमौकारश्चाप्नोत्येवात्परे तथा
ऋकारोर्ध्वेऽवर्णपूर्वे विकारमरमाप्नुयात् ४६
ओपप्रावचपूर्वश्चेदारमृत्पर आप्नुतः
एषां संधावुदात्तश्चेदुदात्तसंधिरुच्यते ४७
स्वारसंधिश्च विज्ञेयो नित्यस्वारानुदात्तयोः
निमित्तं वापि लक्ष्यं वा द्विपदग्रहणं यदि ४८
स्यात्क्रमे कार्यमेकेन विलोमेषु द्वयेन च
टपूर्वो लश्च टश्चापि तयोः संधिर्यदा भवेत् ४९
जटादिषु प्रपद्येतां द्वित्वळत्वमुभौ तथा
इवर्णोकारयोः स्यातां यवावुदात्तयोः क्रमात् ५०
परोऽनुदात्तः स्वरितः स्यात्स स्वारः क्षैप्र उच्यते
अखण्डपदमध्यस्थः स्वर्यते यवसंयुतः ५१
अपूर्वो नीचपूर्वो वा स स्वारो नित्य ईरितः
नानापदस्थो निहत उच्चाद्यः स्वरितो भवेत् ५२
सोऽयं प्रातिहतः प्रोक्तः स्वारोदात्तपरो न तु
अकारेणानुदात्तेन संमिश्र उच्यते एङ्कित् एङिति ५३
स्वर्यते चाभिनिहितः स स्वारो ज्ञायते बुधैः
उकारादुच्चकान्नीच उकारे परतः स्थिते ५४
उभयोः संधितः प्रोक्तः प्रश्लिष्टः स्वरितो बुधैः

विवृत्त्यां पदयोरुच्चान्नीचः स्वारः परो भवेत् ५५
स पादवृत्तो विज्ञेयो नोदात्तस्वरितोत्तरः
उदात्तात्परतो नीच आप्नुयात् स्वरितं पदे ५६
सोऽयं तैरोव्यञ्जनः स्यान्नोदात्तस्वरितोत्तरः
इउवर्णौ यदोदात्तावापद्येते यवौ क्वचित् ५७
अनुदात्ते परे विद्यान्नित्यं क्षैप्रस्य लक्षणम्
स्वारोत्तरे स्थितः स्वारश्चान्यो नीचोऽणुमात्रकः ५८
पूर्वस्य कम्पसंज्ञा स्यात् ह्रस्वश्चेद् दीर्घमेति सः
स्वराः षोडश विज्ञेयाः स्पर्शाः स्युः पञ्चविंशतिः ५९
अन्तस्थाश्च चतस्रश्चेदूष्माणश्च षडीरिताः
द्व्यनुस्वारौ विसर्गौ ळः स्वरभक्तिश्चतुर्यमाः ६०
वर्णानां षष्टिसंख्या स्यादित्युक्तं याजुषे मते
परं स्वरादनुस्वारं व्यञ्जनं व्यञ्जने परे ६१
द्विरूपमिष्यते रेफात् स्वरपूर्वात् परं च यत्
लवाभ्यामुत्तरस्पर्श इति प्राप्तिश्चतुर्विधा ६२
न द्वितीयचतुर्थानां द्वित्वं तत्प्राप्तिगोचरे
पूर्वागमस्ततः पूर्वं वेद्यश्छखिभुजेषु च ६३
यत् युतस्वरयोर्मध्ये --- पूर्वागमोऽपि च
उच्चारणादिना स्पष्टं तदत्र न विधीयते ६४
अघोषादूष्मणः स्पर्शे परे तन्मध्य आगमः
प्रथमस्पर्शसस्थानस्तयोरव्यवधायकः ६५
पदान्तस्येतरस्यापि प्रथमस्य द्वितीयता
सषयोः परयोः स्यात्तु चापदान्तस्य शे परे ६६
न व्यञ्जनेऽवसानस्थे द्वित्वं रेफविसर्गयोः

जिह्वामूलीयाभिधेयोपध्मानीये च कुत्रचित् ६७
न स्वरे चाभिधानान्यप्रथमे चोष्मणः परे
न सरूपसवर्गीयपरो वर्णो द्विरुच्यते ६८
निषेध उत्तमपरे स्पर्शानां यमनुत्तमे
अनुस्वारस्य न द्वित्वं सस्वरे व्यञ्जने परे ६९
न स्पर्शे लवयोर्लस्य हशोरस्वरिते च वे
पदान्तेष्वानुनासिक्ये पदसंहितयोस्तथा ७०
प्राकृतो वैकृतश्चापि तद्धर्मा बुध्यते सुखम्
पदमध्यानुनासिक्ये स्पर्शात्पूर्वे तदुत्तमः ७१
अन्तस्थाभ्यः पुरा तच्चेत्सैवान्तस्थेति निर्णयः
स्वरभक्ती रलौ स्यातां परे ह्यूष्मणि तस्य तु ७२
द्वित्वे चाभिनिधानान्यप्रथमे च परे न तत्
चतुर्भ्यः प्रथमादिभ्यः उत्तमे परतः क्रमात् ७३
प्रथमाद्यास्तु नासिक्या हकारात्केवलस्तथा
शकारः प्राकृतेरूर्ध्वं च नासिक्यो न विद्यते ७४
शषसाभिनिधानानां यद्यन्तस्थोत्तमात्क्रमात्
लवयोः संयुतौ यत्र नीचोच्चस्वरितौ यदि ७५
द्वित्वं तत्रैव योगादेः ऐत्पूर्वे वपरे न हि
असंयुतलकारस्य द्विपादत्वं सदा भवेत् ७६
धूङ्क्ष्णादङ्क्ष्णावोच्छन्सीघ्नन्तृक्ष्वश्च बैल्वोऽपि च
विशेषविधिभिस्तेषां मात्राधिक्यं भवेद्यदि ७७
अच्पूर्वकः पदान्तो ङो यकारे परतः स्थिते
द्विरूपमेति सर्वेषामृषीणां मतमीदृशम् ७८
अव्यञ्जनपरे यो ङो द्वित्वं नैति पदान्तगः

अनृकारपरे हे मः पदान्तोऽच्पूर्वकस्तथा ७९
अव्यञ्जनकारपरे वकारे दीर्घपूर्वतः
ङनौ पदान्तावच्पूर्वौ हि यकारपरौ तथा ८०
वत्सानुसृतिराख्याता तथा वत्सानुसारिणी
वैशेषिका पाकवती मध्या चाथ पिपीलिका ८१
तथा सवर्णदीर्घी चोभयदीर्घीति या स्मृता
इत्येवमष्टसंज्ञास्तु विवृत्तीनां च भेदतः ८२
ह्रस्वपूर्वा च या व्यक्तिः तथैवोत्तरदीर्घिता
सा वत्सानुसृतिः प्रोक्ता सा मात्रा कालस्तथा ८३
ह्रस्वात् पूर्वा विवृत्तिः स्यात् प्लुताद्दीर्घात्परा च या
वत्सानुसारिणी सेयमेकमात्रेण संयुता ८४
व्यक्तेराद्यन्तयोर्यस्या दीर्घौ यद्यसवर्णकौ
यदि मध्ये विसर्गः स्यात् तदभावोऽथवा यदि ८५
सा तु वैशेषिका स्यात्साणुमात्रा तथैव च
पूर्वे यत्रोत्तरे चैव ह्रस्वो यदि भवेत् तदा ८६
पादोनमात्रिका तत्र सा हि पाकवती स्मृता
यस्याः सवर्णदीर्घौ स्त उभयत्रोच्चनीचकौ ८७
विसर्गस्तत्र च स्वारः सन्धौ मात्रा च मध्यगा
मध्यगालक्षणे तत्र विसर्गो न भवेद्यदि ८८
पिपीलिकेति विज्ञेया सा वृत्तिः पादमात्रिका
सवर्णदीर्घी यद्यादावन्ते भिन्ने विसर्गकः ८९
सवर्णदीर्घ्येकमात्रा न संधौ स्वरितो यदि
विसर्गस्तत्र नो चेत् सा मात्रोभयदीर्घ्यथ ९०
अनुस्वारो द्विरुक्तोऽन्त्यपञ्चमश्च द्विमात्रिकः

ह्रस्वात्परः प्लुताद्दीर्घात्केवलस्त्वेकमात्रिकः ९१
सविसर्गं हरिपदं प्रणवात्पूर्वमिष्यते
हरिशब्दे विसर्गस्य न संधिः प्रणवोत्तरे ९२
केवलः स्वरसंयुक्तो मात्रिकासहितस्तथा
अङ्गं च वर्णसारं च पञ्च वर्णक्रमाः स्मृताः ९३
उत्तमो लक्षणज्ञानी लक्ष्यज्ञानी तु मध्यगः
लक्ष्यलक्षणयोर्ज्ञानी तद्धि यत्नं प्रशस्यते ९४
लक्षणं न त्यजेद्धीमान् संप्रदायोऽन्यथा भवेत्
लक्षणेन विना शिष्यः संप्रदायो विनाशवान् ९५
नासौ तत्फलमाप्नोति सम्यक्पाठमजानतः
लक्षणेन विना वर्णा निर्मलानि न शुध्यति ९६
प्रमदा रूपसंपन्ना दरिद्र स्येव योषिता
स्वरहीना यथा वाणी वस्त्रहीनास्तु योषितः ९७
एवं वर्णा न शोभन्ते प्राणहीनाः शरीरिणः
लक्षणं यो न ना वेत्ति न तस्य फलभाग्भवेत् ९८
लक्षणज्ञो हि विप्राणां सकलं भद्र मश्नुते
आचार्योपासनाद्योगात्तपसः प्राज्ञसेवनात् ९९
विविच्य कथनात्कालात् षड्भिर्विद्या प्रपद्यते १००
इति श्रीकौण्डिन्यशिक्षा समाप्ता

Aithal, K.P., *Veda-Lakṣaṇa: Vedic Ancillary Literature, a descriptive bibliography*, (Delhi: Motilal Banarsidass Publishers, 1993), #472 Kauṇḍinya-Śikṣā.

K.V. Abhyankar and G.V. Devasthali, eds., *Veda-vikṛti-lakṣaṇa-saṁgraha*, (Poona: Banderkar Oriental Research Institute, 1978) pp. 113-123.

# कौरिडन्यशिक्षा

एकश्रुतिं क्वचिद्विंद्यात्क्वचिच्च विहितं स्वरम्
स्वरभक्तिस्स्वतन्त्रा च व्यञ्जनस्याङ्गमन्यथा १
वर्णोऽन्यो वा स्वरोऽन्यो वा पञ्च प्रश्नेषु दृश्यते
आरएयादौ द्वयोश्चान्ते त्रिषु चैवं विधीयते २
विधिनोक्तं नातिक्रामे न चाव्यक्तं समुच्चरेत्
अतिव्यक्तं न वक्तव्यं विद्वद्भिस्त्रयमुच्यते ३
एवं वेदे कदाचित्त्वं तद्वृत्ताश्चैव तद्भवेत्
सवर्णा नित्य इत्याहू श्रुतिरेकः स उच्यते ४
करेणुः कर्विणी चैव हरिणी हारितेति च
हंसपदेति विज्ञेया पंचैता स्वरभक्तयः ५
करेणुं रहयोर्विन्द्यात्कर्विणीं लहकारयोः
हरिणीं रशसानां च हारितां लशकारयोः ६
या तु हंसपदानामा सा तु रेफषकारयोः
रेफस्य तृटिमात्रं स्यादृकारस्त्वर्धमात्रकः ७
लकारः सा च मात्रेण लृकारेण पुनः पुनः
हरिणी ध्यर्धमात्रं स्याद्धारिता द्विपदाधिकः ८
हंसपादा त्रिमात्रा स्यान्मात्राधिक्यं तु वा भवेत्
स्वाराद्ध्रस्वात्परे भक्ते द्रुतत्वं च विधीयते ९
तस्य मात्रा भवेदेकं विरामो वा विवृत्तिषु
शिक्षा च प्रातिशाख्यं च विरुद्धा तु यदा तदा १०
शिक्षातिदुर्बले त्याहु यथा सिंहमृगौ तथा
ओष्ठ्ययो स्वरयोर्मध्ये व्यञ्जनं यदि दृश्यते ११
पृथग्भावस्तु कर्तव्य एकं तद्व्यञ्जनं न चेत्
विवृत्तिर्वा विरामो वा स्वरभक्तिस्तथापि च १२

अनुस्वारोऽपि दृष्टश्चेत्पूर्वोक्तो नात्र संशयः
बहवश्च तयोर्मध्ये दृश्यंते चेत्पृथक्पृथक् १३
परो धरस्तु कर्तव्यो पकारे चाधरस्य च
ओष्ठ्यस्वरेषु कार्येषु प्रथमेनाक्षरद्वये १४
परयोरोष्ठ्ययोश्चैव कार्यं न स्यात्कथं चन
ओष्ठ्ययोस्स्वरयोर्मध्ये दृश्यते च तयोर्यदि १५
पृथग्भावस्तयोर्न स्यात् तृटि मात्रस्तयोर्भवेत्
ओष्ठ्ययोस्स्वरयोर्मध्ये पकारो यत्र दृश्यते १६
पृथग्भावस्तयोर्न स्याद्भिन्नरूपौ स्वरौ यदि
आद्यंतयोस्सवर्गश्चेत् प्रयत्नस्तत्र इष्यते १७
अवसाने स विज्ञेयः संहितायां तु चेत्तथा
आकारान्तमुदात्तान्तमाङ्परं यत्र दृश्यते १८
त्रिक्रमं तं विजानीयान्मोषूण ऊषुणस्तथा
नकारान्तं पदं पूर्वं हकारः परतो यदि १९
न हकारकयोर्मध्ये तत्र वर्णमसंयुतम्
नकारस्य पकारस्य संयोगस्वरितो यदि २०
तदा संयुक्त एव स्यादसंयुक्तस्तदन्यथा
मात्रं द्विमात्रोऽनुस्वारो द्विमात्रान्मात्र एव तु २१
मात्रिकादपि संयोगे मात्रिकस्तु द्विरूपवत्
अनुस्वारस्य यो मात्रसंहिता काल एव तु २२
पदमध्ये द्विमात्रस्य देकमात्रं द्विरूपवत्
अनुनासिककालस्य विशेषेण विधीयते २३
संहितायां च तन्मात्रः पदकालेऽधिको भवेत्
दीर्घात्प्लुताच्च मात्रं स्यादेकमात्रं द्विमात्रकम् २४

अवसाने विशेषो यमन्येषां च न विद्यते
तेन शब्दात्परापृक्तः प्राप्तं न प्राप्यते कठे २५
हकारे फलभक्तिस्तु तैत्तिरीये तु पठ्यते
ऊष्मणा पृक्तसंयोगे निषेधस्तत्र नेष्यते २६
आदेशाद्भक्तिरेव स्यात्पूर्वाङ्गत्वं विधीयते
ऋकारश्च लृकारश्च पृक्तमित्यभिधीयते २७
वेदपाठे सविज्ञेयो वेदसंबंधिनौ न चेत्
हृदयादुत्थितं रङ्गं कांस्य ध्वनि समं स्मृतम् २८
द्विमात्रं च त्रिमात्रं च प्राप्नूयात्सानुनासिकम्
वर्गान्तं शषसैस्सार्थमन्तस्थाभिश्च संयुतम् २९
दृष्ट्वा यमा निवर्तन्ते अत्यन्तं सूक्ष्ममुच्यते
कामो मन्युस्तथा पापं त्रिषु पूर्वेषु तत्त्वतः ३०
स्वरभक्तिं विजानीयादिकारो नास्त्यसंशयः
अन्तस्थाद्युदये पूर्वः पञ्चमस्तु द्विरुच्यते ३१
इतरादौ पदेरत्र स च नेति स्मृतो बुधैः
स्वरितोदात्तयोश्चैव स्वारपृक्त तयोस्तथा ३२
प्रचयादनुदात्तस्य तेषां कार्यं तु कथ्यते
पूर्वं तीव्रतरं चायुस्तीव्रयैव पदस्य तु ३३
परस्य मन्दवायुः स्यात्प्रयोक्तव्यं यथा क्रमम्
आपदादौ चतुर्थस्य पञ्चमः परतो यदि ३४
अभ्यासस्तस्य विज्ञेयस्तृतीयः पूर्वमेव तु
सव्यहस्तेन यो धीते तस्य तन्निष्फलं भवेत् ३५
स दक्षिणेन कर्तव्यो वर्णं तथैव च
पदां तयोरकारस्तु द्वित्वं सर्वत्र नेष्यते ३६

अचः पूर्वे विकल्पोऽस्ति व्यंजनेन त्यमेव च
रेफपूर्वो नकारो यः पदांतो यत्र दृश्यते ३७
विशेषं तत्र जानीयाद्द्वित्वमेवाभिधीयते
प्रथमस्य द्वितीयस्यात् न षकारपरो यदि ३८
अभ्यासोऽस्ति सविज्ञेयः पूर्वं प्रथम एव तु
सप्तस्वरानतिक्रम्य स्वरितो वर्तते क्वचित् ३९
अल्पवायुस्तु तस्य स्यात्पादवृत्तिस्त्विति स्मृतः
टनकारे विशेषोऽस्ति धकारो यदि दृश्यते ४०
अनभ्यासोऽस्य विज्ञेयः धकारो नात्र संशयः
अध्यायेत्तैत्तिरीयाणामार्षे पाठ इष्यते ४१
आनुवाकादनुवाकस्य वदेदादौ पदद्वयम्
प्रश्नात्प्रश्नं च न ब्रूयाद्धेतुसंबंधिनो न चेत् ४२
अतिनासेन च ब्रूयाद्वनुवाकं तथैव च
तैत्तिरीयस्य वेदस्य पदवाक्यान्तराशिषु ४३
गणितास्ते प्रयोक्तव्यास्तेन गच्छन्ति ते गतिम्
काठके द्विपदं ज्ञेयं गरायं चैव न विद्यते ४४
ययेषो वा तथा वाक्ये विकल्पोऽस्ति विशेषतः
वेदपाठं बहिष्कृत्य वेद संबंधिनो यथा ४५
तेन त्यजन्त्युदात्तादीन् सर्वदा वेदबन्धनात्
अवसानानुदात्तस्य उदात्तं कथ्यते बुधैः ४६
आरण्यादौ द्वयोश्चान्ते यथा दृष्ट्वा तथैव तत्
न हि शब्दादि यामेन देवेष्वेव विवक्षित ४७
सन्धिकार्यं न कुर्वं ति संहिता त्वदमेव तत्
स्वरास्तु ब्राह्मणाज्ञेया वर्गाणां प्रथमाश्च ये ४८

द्वितीयाश्च तृतीयाश्च चतुर्थाश्चैव क्षत्रियाः
वर्गाणामुत्तमावैश्या अन्तस्थाश्च तथैव च ४९
अनुस्वारो विसर्गश्च शूद्रा ऊष्माण एव च
कथं वर्णास्तु वर्णानां ब्राह्मणक्षत्रियादयः ५०
स्वकालात्वाद एव स्याद्ब्राह्मणानां च कथ्यते
तदर्धं क्षत्रियादीनां शास्त्रदृष्ट्यानुवर्तते ५१
केचित्पादस्तु सर्वेषां मात्राबुद्धिप्रकीर्तिता
वासः शब्दाच्च नासिक्यं पूर्वं न प्राप्यते स्मृतम् ५२
स्वरभक्तिस्वतन्त्रा वा काठके परिकीर्तिता
पितृमेधे स्वाध्याये चोपनिषदि नारायणे ५३
न हेमेनी पूर्वोऽस्य दुःस्पृष्टादेश एव तु
शकारस्य नकारस्य संयोगे तस्य वक्ष्यते ५४
तत्स्थाने यो इकार स्यात्तैत्तिरीये तु पथ्यते
ते वर्गे प्रथमागमकाठके तु ययो विधिः ५५
लोपोकारस्सुवोर्मध्ये पूर्वस्वारं तु कम्पितम्
छिद्रं परस्य तत्र स्यात्पादयोरन्तरागमः ५६
चकारस्तत्र जानीयात्काठके परिकीर्तितः
तत्स शब्दविशिष्टं तु यदि त्वं कथ्यते बुधैः ५७
उत्कार्यमुत्सृजेत्तस्य स्वरितत्वं भवेद्ध्रुवम्
तिस्रो वृत्तिरुपदिशन्ति वाचो विळंबितं मध्यमां च द्रुतां च
५८
वृत्यन्तरे कर्म विशेषमाहुर्मात्रा विशेषः प्रतिपत्तिमेति
अभ्यासार्थे द्रुतां वृत्तिं प्रयोगार्थे तु मध्यमाम् ५९
शिष्याणामुपदेशार्थे कुर्याद्वृत्तिं विळंबिताम्

अध्यापने त्रिमात्रत्वमध्याये तस्य मात्रिकम् ६०
समा हारः प्रयोगे वा उच्यते मुनिभिस्त्रयम्
मार्जारः पुत्रमास्येन पीडयेदर्भकेन च ६१
एवं वर्णवळिं ब्रूयान्मार्जारस्तस्य कारणम्
गीतीशीघ्री शिरः कम्पी तथा लिखितपाठकः ६२
अनर्थज्ञोऽल्पकण्ठश्च षडेते पाठकाधमाः
अवसाने तवर्गीया वाद्यन्तौ दन्तमूलजौ ६३
अपदान्तो नकारस्तु संयोगे यः स वर्जितः
अवग्रहे तु द्विविधो नकारः संप्रकीर्तितः ६४
जिह्वाग्रमध्यमेव स्याद्द्वितीयस्य च तस्य च
+श्च शब्दान्नकारस्तु पुनः शब्दाद्विशेषतः ६५
जिह्वाग्रमेव तौ स्यातामशब्दाच्च तथापरे
न रेफे वा हकारे वा द्विर्भावो जायते क्वचित् ६६
न च वर्गद्वितीये तु न चतुर्थे कथं च न
तृतीयेन चतुर्थस्य प्रथमे न परस्य च ६७
आद्यं तस्य मध्यंतं च स्वाक्षरेणैव पीडयेत्
एकश्रुतेरवसान उदात्तस्वरितोऽपि वा ६८
प्रकृतिर्वा संहिता वा सर्वमेकश्रुतिर्भवेत्
अनुनासिक पूर्वस्य ककारो मध्य एव तु ६९
गकारश्च तकारे च धकारे च यथा क्रमम्
न वायुं हमसंयोगे नासिकाभ्यां समुत्सृजेत् ७०
ननादेदुदरं सान्त्यं तथा यरलवेषु च
ईषन्नादा यणो जश्च अन्यथा बृहतस्तथा ७१
हकारं केचिदिच्छंति द्विविधत्वं तथा भवेत्

वेदस्य पाठमात्रेण विगतो दुष्कृतो भवेत् ७२
तूलक यथा क्षिप्तं पापराशिं विनश्यति
न वेदविदुषो विप्रास्सर्वशास्त्रमधीयते ७३
सर्वाभरणसंपन्ननग्निस्त्रिय इव ध्रुवम्
ऋग्विरामस्त्रिमात्र स्यादर्धर्चेऽपि तथा भवेत् ७४
पदकाले द्विमात्रं स्यादेकमात्रो विवृत्तिषु
पदमध्ये तदर्धं स्याद् वा +++ काले त्रि मात्रिकम् ७५
त्रिमात्रं केचिदित्याहुर्दीर्घाधिक्यं तु वा भवेत्
प्रणवे तु त्रिमात्रं स्यात् समात्रस्तु प्लुतो भवेत् ७६
द्विमात्रं दीर्घमित्याहुस्तदर्थं ह्रस्वसंज्ञकम्
स्वस्थे नरे सुखासीने यावत्स्पन्दति लोचने ७७
तावन्मात्रं विजानीयादिह कालः सपञ्चसु
व्यंजनं त्वर्धमात्रं स्यादेकमात्रं क्वचिद्भवेत् ७८
द्विमात्रं तत्र जानीयान्न कदाचित्त्रिमात्रिकम्
अचः परे विशेषोऽस्ति पादमात्रं तु तद्भवेत् ७९
पूर्वकाले द्विमात्रं स्यादेकं चे(द्व्यं)जनं भवेत्
ऐ हु शो यस्य पूर्वं स्याद् अणुमात्रं तदुच्यते ८०
अपरे त्रुटि मात्रं स्यात्स्वराधिक्यो न संशयः
चतुर्भिरणुभिर्मात्रं तदर्धं तु त्रुटिर्भवेत् ८१
वेदकाले तु तत्कालो भाषायां न च तद्भवेत्
दृढस्वरस्य विद्वद्भिः प्रयत्नाधिक्यमिष्यते ८२
मृदुमल्पतरं चैव मध्यमेन तु कारयेत्
नातिक्रामेद्यथा शक्तमध्यापरमवश्यकम् ८३
अशुश्रूषोन्न दद्याच्चेन्नरको नात्र संशयः

अधीतमपि यो वेदं विमुंचंति यदा नराः ८४
भ्रूणहा स तु विज्ञेयो वियोनिमधिगच्छति
नित्यस्वाध्याय शीलत्वं दया सत्यं च संयमः ८५
तेन शुद्धिमवाप्नोति देवत्वं चाधिगच्छति ८६
इति कौण्डिन्य शीक्षा षडशीति समाप्तं

Aithal, K.P., *Veda-Lakṣaṇa: Vedic Ancillary Literature, a descriptive bibliography*, (Delhi: Motilal Banarsidass Publishers, 1993), #473 Kauṇḍinya-Śikṣā. Mysore ND II 3322 (P4772/14). Palm leaves, Telugu script, 5 folios (10-14), Extract no. 100.

Courtesy of Oriental Research Institute, University of Mysore: "Kauṇḍinya Śikṣā Ṣaḍaśīti," Manuscript #3322 in Descriptive Catalogue of Sanskrit Manuscripts in the Oriental Research Institute, University of Mysore,Volume II (Vedāṅgam, etc.) 1978 (Oriental Research Institute Series 124).

# आरण्यशिक्षा

गणपतिमभिवन्द्यावद्यजालामयघ्नं
स्वरपदमितिवर्णोद्बोधनं शीलनेन
क्षितिसुरगणहेतोरेतदारण्यशिक्षा-
मृतमिव नवशिक्षावारिधेरुद्धरामि १
आद्युदात्तानि वाक्यानि चैकद्वित्र्यादिसंख्यया
विविधानि तु वृन्दानि विस्पष्टान्यत्र कृत्स्नशः २
उदात्ताह्रियन्तेऽध्येतृणां सन्देहानां निवृत्तये
आदिमध्यान्तग्रहणं क्रियते यत्र तत्र तु
वाक्यानामिति मन्तव्यं श्रुतिस्त्वेकश्रुतेरिति ३
द्व्युदात्तमध्यमित्यादि ज्ञेयमेवात्र धीमता
भवेतामाद्युदात्तौ च यत्तच्छब्दौ तु सर्वशः
योषित्प्रतिमया चेम इमे नित्यं परं न चेत् ४
तस्याः पात्रविशेषेण स्थितं मेणिमविन्दत
यत्रैतदुपदृश्येते यो वै तां ब्रह्मणो वेद इत्यादि
वर्णान्यत्वं ---न्यत्वं पञ्चप्रश्नेषु दृष्यते
स्वारनीचत्वमुच्चस्य नीचादीनाँ तु चोच्चता
यातपुण्यपरं यत्र यथा वेत्थ परं यदि
तत्र ते च यथापुण्येत्येतन्नीचाद्यवाचि हि
उच्चं नेति पदं सर्वं  रिष्यास्याधिपरं न चेत्
अथ व्यशेमापमापां महानाम्नीर्मरीच्यदः
योनिनो मा च यत्रैतत्किमेकश्रुदपाणि च
शुक्लवासा ह्लादयते चाह्नस्संवत्सरे क्षि च
आङ्क्तेऽक्रुद्धस्य चाभ्यन्तं दुर्भिक्षं हेमतः पराङ्
लोहितस्त्वं तथाभ्राणि विश्वे जायेतदेवशम्

पृच्छाम्युभयतोवातादाभोगाश्वापयः पुरम्
देवीपुत्रश्च नासत्यात्युग्रोधीरामया ततः
आमन्द्रैस्त्यमतृष्यन्मृत्वाणुभिश्चेन्द्र आप्लव
वरुणस्यानवर्णौ च ह्यरिष्टं नृमुणं रथम्
एकत्वसंख्यया वाक्यान्याद्युदात्तान्यवेक्षत
वारादं विनना यावै ह्यादित्ये हसितं प्रभुः
तं सो जिह्वोऽनुबध्नाति ह्यमून् लोकानभीतिवत्
कालैर्नैनं रेत इन्द्रं सर्वभूतसहिद्विकम्
शुक्लकृष्णोऽमुतोनैव शंनश्च मरुतः शिरः
पर्जन्याश्शिशिरश्छन्दोभीरोदस्योरपीतवि
तवेतिमन्त्रास्सर्वेषां ते एते ता अवित्रिकम्
अनूसहस्त्राक्षापाघ्रां भूमिं चत्वारि ब्राह्मणाः
संवत्सरीणमन्वेति त्वसतास्थाय चैकया
पञ्चकं चान्त्यविषुषट् स्मृतिर्नक्तं दसप्तकम्
अणुशः श्रेष्ठं नवकं षडुद्यमास्तथा दश
सुखदीमादिविषूक्तस्तौतावेकादशेति च
यस्मिन्नस्य सप्तदशनित्या अष्टादशेति च
देवा आदित्या ये सप्तविंशतिः कथितानि हि
यस्मिन् सूर्या इति त्रिंशत्त्रयस्त्रिंशन्निजानुकाम्
आशातिकाद्विपञ्चाशदनुवाका इतः परे
संवत्सरमथादित्यस्यादयः पञ्च चैषु तु
नैतैरूरुस्समारूढो भद्रा स्थात्र इयान वै
गार्ग्योऽमुत्रसप्तसूर्या उतचित्रं यदीत हि
दीर्घयुयो पङ्क्तिराधा एवमेतविचाकशत्

अष्टौ दिगरुणाश्वाग्निं वाश्राराजा प्रवर्ग्यवत्
द्वितीयं त्वं करोषीति विश्वरूपैः पुरोदितम्
पदं स्वरश्च बलं ह्यति च ज्योतिषान्तकम्
सोऽहं मात्रादिके द्वे द्वे यन्मे चोरस्य वैतया
यस्मिन्विमानवान्वाचोऽप्येकं च निधनेत्युभौ
अहस्तत्कर्मरात्रिस्तद् ब्रह्मवान्नाहमन्तिमम्
यद्वैतच्छिरसोच्चादितुल्यं द्व्युच्चान्तकं स्वरम्
उपान्त्यं तु गुरु स्याच्चेन्निहतं तत्र चेष्यते
लघु चेत्तदुदात्तं स्याच्छ्रुतिवाक्येषु मन्यते
एतद्रुविशिखे हेवा वराहव न रिष्यति
सप्तभिर्वा मिथौ येने ये चेमे यन्मयामन
अकार्यकार्युद्धृतादिर्वयमिमं म ईश्वरीम्
अमुत्रेतेति सहनावहमं नादि तु त्रयम्
निहतादि द्व्युदात्तान्तं तुल्यस्वरकमेष्वियात्
उद्धृतासि वराहेण कृष्णेन शतबाहुना
मृत्तिके हनमपापं यन्मया दुष्कृतं कृतम्
त्वं वै शीतेन सर्वस्माद् ब्रह्मन् ह्लादयते पुरम्
यो वा अदुःखो यच्छ्वेतानथाग्नेश्शिरसा तथा
तस्मै ब्रह्मेति तस्यां हि सर्वं ह परिये तथा
अलूक्षादि द्वयं चैव यदह्लादादिकं द्वयम्
अभूतिं च विजानीयाद् द्विस्वार्यं चाद्युदात्तकम्
त्वं वै शीतेन सर्वस्माद्यच्छ्वेतान् ह्लादयतेति च
यो वै च परियेऽलूक्षा यथा ते शिरसा तथा
यदह्लाद्येतदुक्तेषु द्विस्वार्यैकोच्चमध्यता

अथाग्नेस्सर्वं तस्यां हि तस्मै ब्रह्म पुरं त्वदुः
द्व्युदात्तमध्यं द्विस्वार्यं ब्रह्मन्न भूतिमेव च
सर्वस्मात्तस्मात्त्रिस्वार्यमुच्चाद्येकोच्चमध्यकम्
पटरो निजहन्विष्णुकश्यपात्पशवोऽग्नयः
उभयानशृतासेह चोद्धृतेत्यादि पञ्चकम्
शरीरे चोत्तमेत्यादि द्वयं च यन्मयामन
ईश्वरीमूर्ध्वरेतं च सरमा अमुमश्विना
नीलद्विस्वार्यनीचादिवाक्यजालमुदाहृतम्
प्रतिष्ठिते विनान्यत्तत्सर्वमेकोच्चमध्यकम्
यदिप्रसेन्द्रथेनुद्वौ यथाशक्तीत्यसञ्चय
श्रीर्मेविद्याप्रजापश्चेत्येते सध्विपदोत्तरे
यः पूर्वस्य च योगश्च श्रियाह्रियान्निया रसः
ओन्तदादिषडासीतमहान् स्यात्स्वरितादिकम्
स्वाध्यायो देवगायत्रीं छन्दसां च कषोदभीत्
निहतानन्तरस्वारपदान्युक्तान्यमूनि तु
अत्र द्विजस्वरेकारान्नीचेकारे परे सति
ईकारः क्रियते सन्धौ प्रश्लिष्टः स्वरितः क्वचित्
हीन्द्रक्वचिदभीद्धोक्तं प्रश्लिष्टस्वरितद्वयम्
अनृणाचित्रं यस्तित्या नमो ब्रह्मेति या ऋचः
स्वाध्यायब्राह्मणे सान्तास्तासामिति परं न चेत्
ग्रामे मध्यन्दिने चैव तस्य द्वौ कतिधा भवेत्
एकद्विपञ्चकं चैकं नमो वाचेति तद्द्वयम्
होमे पूर्वे सहप्रश्ने पितृमेधाम्भसोर्ननि
प्राकृतस्वरमध्यस्थो डकारो ळत्वमाप्नुयात्

वितुदस्येति दत्वं स्यात्प्रेत्येकार एव तु
भद्रं च सह संज्ञानं लोकस्तुभ्यमिति क्रमात्
एते काठकसंज्ञास्स्युः पञ्चप्रश्ना न चेतरे
तेनशब्दात्परः पृक्तः पूर्वं नाप्नोतिकाठके
ऊष्मणापृक्तसंयोगे विषेधस्तत्र नेष्यते
ऋकारश्च लृकारश्च पृक्त इत्यभिधीयते
तेनशब्दात्परो रेफं नैति द्वित्वं च तत् परम्
धिष्णियद्रात्र्या मन्त्र्यपित्र्यभत्र्यौ जनयित्र्योऽपि च
काठकस्थपदेष्वेषु नेकारस्याद्य एव हि
वासः शब्दादनुस्वारः काठके नीच इष्यते
काठकेषु शनावेव स्वोऽन्यत्र च शञौ सुवः
कम्पौ तु द्विविधावेव स्वारोच्चाविति निश्चितौ
संहितायां तयोः स्वार उच्चस्त्वारण्यके मतः
नित्योऽभिनिहतः स्वारो यददीव्यादिषु त्रिषु
नकञ्चने चोच्चपर उच्चः कम्पो विधीयते
पदान्ते च तथा कम्पा अन्ततो निहताणुकाः
शेषस्योदात्तता वा स्यात्स्वरितो वा व्यवस्थया
आरण्यके तु न स्वारो नोदात्तश्चैव संहिते
पारक्षुद्रे न कम्पस्स्याद्द्विधाकम्पो न तु त्रिधा
इन्द्रघोषादयस्सप्तविशीर्ष्णीत्यादयस्त्रयः
अष्टयोनीं तथा योऽसावेषु तुल्यस्वरं विदुः
तुल्यं स्वरं तु जानीयाद्यत्रै वैकोच्चकं पदम्
एतद्वस्ताननुपरि संज्ञानं वो विहायसे
पुष्करपर्णैर्महानाम्नीरिन्द्रश्चैतद्विवर्जयेत्

नादित्येन तथाप्नोति व्यपोह्यसह चन्द्रम
उभे बहूतपरमे शरीरे पाप्मनो महान्
अमृतस्याथजिह्वामे प्रतिवेशोऽप्सु लोमशाम्
अद्भ्यो वायोरहं नित्यं मनुष्या ब्रह्मविद्यदा
भीषाकीर्तिर्निरुक्तादि द्विः श्रुतादित्रयं क्रमात्
पाने ह्येव परोन्नश्रुद्विज्ञानश्रुत्तथैव च
नोपासते परः प्राण आनन्दोऽग्निरिदं त्वृतम्
सत्यैवमेतदेतेषु नोच्चान्तेष्वादिनीचता
सर्वत्राकाशशब्दः स्यादात्मासन्धिपरो न चेत्
तथैव पृथिवीशब्दः पूर्वपुच्छपरो न चेत्
आदिशन्नस्त्वन्त्वमिति वदिष्यामीति पठ्यते
द्वितीयशं नस्त्वं त्वामित्यवादिषमितीर्यते
अहमस्म्यादि चत्वारि कश्चित्समिति चैककम्
एषु प्लुतोत्तराश्चान्त्यवर्णास्सर्वेऽपि नीचकाः
न कंचन यतोवाचस्स्वारान्तोपनिषद्भवेत्
सर्वे नारायणप्रश्न उच्चान्त इति निर्णयः
विश्वा अग्निश्च सावित्रमसन्नेव द्वयं द्वयम्
देवा एकं नकं सप्त षोडशारण्यके प्लुताः
प्लुतस्सर्व उदात्तस्स्यात्स्विदासीदन्तिमं विना
प्रश्नेऽम्भसीति बहुशो विसंवादस्फुटायवै
एकश्रुत्यादिवाक्यानि कण्ठोक्तानीति सर्वशः
उदात्तादि स्वरा यत्र चातुः स्वर्याविवेकतः
प्रोच्यते चोच्चवद्वाक्यमेकश्रुतिनिगद्यते
आदिमैकपदेद्व्युच्चं बहूच्चं यत्र कुत्रचित्

एकोऽनुदात्तस्स्वरितमन्तोच्चं तच्छ्रुतीर्यते
एकस्मादवसाने च द्वाभ्यां वा श्रुतिवाक्यगौ
चतुर्थं पञ्चमादर्वागपदान्तौ यमाविति
पूर्ववच्च त्रयोद्व्युच्चास्तत्षष्ठः पूर्ववद्भवेत्
उपान्त्यन्तु गुरु स्याच्चेन्निहतं तत्र चेष्यते
लघु चेत्तदुदात्तं स्याच्छ्रुतिवाक्येषु मन्यते
आदौ मध्ये तथा चान्ते क्वचित्सर्वत्र तद्भवेत्
भूमिर्धेनुरलक्ष्मीश्च कामो मन्युस्तथैव सः
श्रीश्चादित्रीणि यज्ञश्रुत्त्वेतान्यभ्यवेक्षत
कामो मन्युश्च वाक्यान्त्ये विना मध्यगते उभे
अथान्त्येन विने शानोऽप्यन्तश्चरति वा तिलाः
स्तुतादि द्वे च गोस्तेयमुच्यन्ते द्विश्रुतीनि हि
अन्तश्चरति भूतेषु गुहायां विश्वमूर्तिषु
एतत्सोमस्य चौजोऽसि नमः प्राच्यै बहुश्रुतिः
यो वेदादावन्नमयप्राणापानादि च द्विषट्
सचामिति तथा चादावेकश्रुतिनि गद्यते
वृतैतस्मिन्नमो वारु सर्वात्वं हि तथैव च
द्वितीयमेते आत्मानं पठ्यत्यन्त्यश्रुतीनि हि
ऊर्ध्वाद्यं परमत्यन्तमग्निश्चादित्रयं तिलान्
प्राणानां ग्रन्थिर्द्वे चादि पाह्यङ्गुष्ठनमोहिर
सर्वाणि श्रुतिवाक्यानि विनामय्यन्तमेष तु
गायत्रीकुक्षिपर्यन्तं याम्यन्तं पञ्चकं स्मृतम्
पञ्चादियोगपर्यन्तं सप्तचान्त्यश्रुतीनि हि
ओजोऽसीतिमहावाक्यस्यान्त्यश्रुतिनिगद्यते

ब्रह्माविष्णुश्च रुद्रश्च पदत्रयमनुक्रमात्
नमो गङ्गादितेमादिसन्तियन्ति नमोऽन्तकम्
विज्ञेयानि तथैतानि चत्वार्यन्त्यश्रुतीनि हि
सर्वायुरेकमेतस्मिन्नीचाद्येकश्रुतीर्यते
ओम्भुवो मुखवाक्यानि पञ्च सर्वोच्चकानि वै
अहमस्म्यादि तु त्रीणि चादेराद्यक्षरं विना
इति मन्त्राश्च यत्रैतदपेतश्च तथैतिवत्
अयमात्मा यथा कूपो दक्षिणायै परं नमः
एतत्सर्वं द्व्युदात्तादि महसः परमोमिति
वापोद्धमाकूजसिद्धमणिमैक ऋषिस्तथा
अमुष्येति द्व्युदात्तानि पदान्युक्तानि वैदिकैः
समानसी सदाम्नी चावान्तरायै तथालकम्
प्रत्नोषिकं तु द्विषतस्सवितारेपसस्तथा
पद्मकोशज्वालमालातिर्यगूर्ध्वो ह्यमोद्वनात्
सतः शब्दस्तु सर्वत्र महसो महसः परम्
धान्यमेतानि चान्तोच्चान्यवेदिषतवैदिकैः
प्रमँहेति द्युदात्तादिद्व्युच्चमध्यमभीषुणः
सरुरिश्चाद्युदात्तः स्याच्छुक्छुचं तौ तु सर्वतः
अस्मादस्मादिदं वाक्यमुपान्त्येतु द्व्युदात्तकम्
उपादि तु द्व्युदात्तं स्यादिहेहववराहव
अवसान उदात्तस्य सन्धौ नीचत्वमिष्यते
सहवै पितृमेधाम्भस्युदात्तस्याथसन्धिषु
नीचत्वं तत्परेषां च द्वयोरेकस्य वाक्वचित्
अश्वान्तसत्वं यथा चैव मीशानश्चैव पुण्यकृत्

यन्मे मनान्तश्चाया तु नमः प्राच्यै तथैव च
एकैकवाक्यमेतेषु सन्धिनीचं निगद्यते
यन्मयामनसर्तं स सहस्रपरमां तथा
एतत्सोमस्य वै प्रोक्तं सोग्रभुङ्नीलतोयद
गन्धद्वारामत्याशनादधाश्च क्रान्त इत्यपि
सन्धिनीचत्वमेष्टव्यं वाक्ययोरुभयोः क्रमात्
यन्मया मनसा वाचा कृतमे नः कदा चन
ऋतं सत्यं परं ब्रह्म पुरुषं कृपिङ्गलम्
सहस्रपरमादेवी शतमूलाशताङ्कुराः
एतत्सोमस्य सूर्यस्य सोग्रभुग्विभजन्तिष्ठन्
नीलतो यदमध्यस्था गन्धद्वारां दुराधर्षाम्
अत्याशनादतीपानादश्वक्रान्ते रथक्रान्ते
क्षुत्पिपासां च पक्षादौ पूर्वोक्तं क्रमशस्त्रिषु
क्षुत्पिपासामलं ज्येष्ठामित्यादि वाक्यत्रयम्
पद्मकोशप्रतीकाशमित्यादि वाक्यत्रयम्
उत्तमे शिखरे चैव तिलाःकृष्णास्तथैव च
यदह्नात्कुरुते पापं चतुर्णां क्रमशो भवेत्
यो वेदादौ स्वरः प्रोक्तः पञ्चानां क्रमशो भवेत्
नारायणं महाज्ञेयमुद्धृतास्यादिषट् तथा
प्राणापानव्यानोदानद्वादशानामनुक्रमात्
दूर्वाशतयमो विष्णुः तस्मात्त्वयि च काश्यपे
पाणिना यञ्च नित्यैषा पुरुषं तद्ययोक्षरम्
सन्ध्याभूम्यां विश्ववेद गच्छदेवि तथैव च
सहस्रशीर्षमित्यस्मिन्नाहारमिति वर्जयेत्

एतत्सन्धिनिघातस्य वर्णस्य परमक्षरम्
निहतं तद्विजानीयादेकैकस्वरवित्तमः
कृतमेनो रक्षकृष्णो ब्रह्महा यन्म कर्म च
गच्छमीति तथालक्ष्मीः पूर्वोक्तं निहतद्वयम्
यन्मया मनसा वाचा कृतमेनः कदा चन
यत्रैव सन्धिनीचत्वं तत्रैवेत्यवसानता
पापं भूत्वा यन्तिदेवी याम्याद्यवसितस्थलम्
आरण्यादौ द्वयोश्चान्ते त्रिषु चैवं विधीयते
वर्णान्यत्वं स्वरान्यत्वं पञ्चप्रश्नेषु सूरिभिः
स्वारनीचत्वमुच्चस्य नीचादीनां तु चोच्चता
वैतां देवी च भूयिष्ठा वेदाश्चेति क्षिता इति
इत्यादिषु स्वरान्यत्वं वर्णान्यत्वं च हेळनम्
शिक्षादित्रितयं त्वेकोऽध्याये भवितुमर्हति
आद्यौ द्वौ पितृमेधाम्भः पञ्चाध्याया भवन्त्यमी
श्लोकाँ सुमङ्गलाँ यद्घ्राँ उपहूताँ ममाँ प्लुताः
दीर्घास्ताँ इमिदेवाँ उ स्वाँ अहं ममृवाँ अव
पञ्चरङ्गप्लुतादीर्घाश्चत्वारस्तैत्तिरीयके
तेषामन्तेषु नासिक्यं रङ्गसंज्ञनितीर्यते
रङ्गे स्वरे च मात्रैका प्रत्येकं रङ्गदीर्घयोः
रङ्गे स्वरे च द्वे मात्रे तथावत्प्लुतरङ्गयोः
रङ्गप्लुतश्चतुर्मात्र इत्युक्तो याजुषां मते
ऊष्मरेफस्वरेभ्यः प्रागनुस्वारः प्रवर्तते
परमात्मं सरूपं प्राङ्ककारस्यानुनासिकः
ओमित्यत्र मकारो यः परे शान्तौ म एव हि

अस्मेद्वितयसंयुक्तमकारो याति वाक्यताम्
शान्तित्रितयसंयुक्तः प्रणवो याति वाक्यताम्
यायकाराडविधायोर्ध्वमृषिभ्यो ह्यृषयो ह्यृषिः
इत्यास्त्रशीमकापूर्वमृषं चेति स्वतन्त्रता
आद्युदात्तस्तपोगर्भ स्वस्वानीति परं न चेत्
आदित्यो वानुवाकश्च सत्यादित्र्यनुवाककाः
द्विजस्वरद्वयान्तोपनिषच्छब्दावसानकाः
द्वितीयादि चतुष्काणां नवकं चादिनीचकम्
यो सावित्यनुवाकेऽस्मिन् शेषमुच्चादिकं भवेत्
न कंचनानुवाकेऽस्मिन् वाक्यानामाद्युदात्तता
अहमित्यनुदात्तादि स्वरितादि महानिति
दीप्तिशून्याः स्वनाम्नाक्षैप्रादयस्त्वादिमध्ययोः
स्वाराः सप्त स्वरितानित्या प्राकृतश्चाक्षयो ध्रुवः
अक्षरश्चाव्ययो नाम तेषामुच्चपरेऽपि वा
क्षैप्रस्स्वार इवर्णस्य गायत्री श्रीः श्रियाह्रिया
केवलं यवयोस्स्वारश्चाग्नयः पशवो यथा
तत्र नित्यस्य विद्या यदि प्रजाद्वौ महान् रसः
एकारौकारयोस्तत्र स्वारोऽभिनिहतो भवेत्
सेन्द्रयोनिरदुःखस्तु तत्राभिनिहतः कषोत्
सांहिते स्वरितेऽप्युच्चपरः प्रातिहतो भवेत्
अमुमाहुरूर्ध्वरेतं यथा ते त्विहतेति च
ऊकारस्स्वरितस्तत्र प्रश्लिष्टोऽभूतिमित्यपि
केवलं यस्स्वरस्स्वारः पादवृत्तस्त्वसञ्चयः
तस्यां हि पूर्वमुच्चस्तु तैरोव्यञ्जनकः पुरः

लक्षणेन विना विद्या निर्मलापि न शोभते
अप्राणस्येव देहस्य भूषणैरप्यलङ्कृतिः
इत्थं न्यरूपि सकलं स्वरवर्णजालं
स्वाध्यायपञ्चसुमुदे निगमेतराणाम्
आरण्यके यदिह किंचन न न्यरूपि
तद्बुद्धिमद्भिरखिलं स्वयमूहनीयम्
चित्यादि प्रश्नत्रितये संहितावत्स्वरो भवेत्
एकश्रुत्यादिकं वाक्यं विना सत्यसमस्वरम्
प्राप्नोत्येवोमिति परे ह्यवर्णान्तस्य दाशिवोम्
सुब्रह्मण्यों परं रूपं सवोमित्यादि सर्वतः
आरण्यके तु वाक्यान्त उदात्तो नम उच्यते
नोपते वै महोजाय सेभ्यः पूर्वो विगास्तथा
सद्यश्च वामदेवाय ऋतँ ससत्यमेव च
भूः प्रपद्ये च सर्वो वै नमश्च स्वरितो भवेत्
नकंचन यतो वाचस्वारान्तोपनिषद्भवेत्
सर्वेनारायणप्रश्न उच्चान्ता इति निर्णयः
श्रीरस्तु

इति आरण्यशिक्षा

*Sanskrit Texts on Phonetics, A Collection of Śikṣā Texts*, reproduced by Lokesh Chandra from the papers of the late Prof. Raghu Vira, Satapitaka Series--Indo-Asian Literatures Volume 282, New Delhi, 1981, pp. 173-210.

# लौगाक्षिशिक्षा

महेन्द्रो मलय सह्यः शुक्तिमान्वृक्षपर्वतः
विन्ध्यश्च पारियात्रश्च सप्तैते कुलपर्वताः १
वेदवैष्णवरौद्रार्हच्छैवसौरविभेदतः
षड्दर्शनमिति ख्यातं मुनिभिर्ज्ञानकोविदैः २
ओं स्वयम्भुवे नमस्कृत्वा ब्रह्मणे वेदमूर्तये
वेदेभ्यो देवताभ्यश्च मंत्रकृद्भ्यस्तथैव च ३
आर्षं छन्दोदैवतं च विनियोगं तथैव च
प्रवक्ष्याम्यनुपूर्वेण कृत्स्नं चारायणीयके ४
आयुर्यशोधनं पुत्राः पुण्यं स्वर्गस्तथैव च
प्राप्यते सर्वमेतेन यथावद्विदितेन तु ५
अविद्वान्ब्राह्मणश्चैव ऋत्विग्भ्यो याज्य एव च
कुर्यात्कारयते यज्ञं कर्ममात्रेण केवलम् ६
छन्दसां यातयामत्वात् पापीयान् जायते तु सः
सर्वज्ञातिं प्रमीतश्च गर्भस्थनुपपद्यते ७
मन्त्रे मन्त्रे तु यो वेद ऋषीं छन्दांसि तस्य तु
दिव्यमन्दसहस्राणामेकैकस्याविनिन्दितः ८
प्रतितन्दिंति सर्वे तं पूजितो धनवांस्तथा
निरातंको देवतायास्तस्या तद्भयमाप्नुयात् ९
यो मंत्रो येन वै दृष्टस्तपसा भावितात्मना
सतस्यैव ऋषिः प्रोक्तो ब्रह्मा सर्वस्य चैव हि १०
ऋषिः सर्वस्य चिद्ब्रह्मा कस्मादन्योयमुच्यते
क्षेत्रज्ञपरतात्मानौ तस्माद्वेद्यौ तु तावुभौ ११

अग्निः पुनर्नवो जीर्णः छन्दोभिः क्रियते न्वहं
वरेण ब्रह्मणश्छेज्यः पूर्वमेतच्छ्रुतिर्जगौ १२
छन्दोविशिष्टस्संयाज्य उक्तः काम्यासु चेष्टिषु
होतुस्तद्रूपतः चोक्तः प्रवेशो ब्रह्मधर्मसु १३
छन्धोभिछादिता मर्त्या देवत्वं वै यतो गताः
यज्ञस्सर्वस्तु छन्दांसि तस्माद्वेद्यानि तानि तु १४
अविदित्वात्तु यच्छन्दो यज्ञं जप्यं स्वरं तथा
कुरुते त आयतति वाग्वज्रश्शक्रशत्रुवत् १५
वक्ष्यामि लक्षणं येषां यजुषामादितस्त्विदम्
विद्वानेतान्विदित्वा तु सर्वत्रैव प्रकल्पयेत् १६
एकाक्षरादि क्रमशो मा प्रमा प्रतिमा तथा
अस्त्री वयोक्षरपंक्तिर्गायत्र्युष्णिक्तथैव च १७
अनुष्टुप् बृहती पङ्क्तिर्विराट् त्रिष्टुप् तथैव च
जगत्यतिजगती च शक्वर्यतिशक्वरी तथा १८
अष्टिरत्यष्टिश्च धृतिश्चातिधृतिस्तथा
कृतिः प्रकृतिश्चाकृतिश्चैव विकृतिः संकृतिस्तथा १९
अतिकृतिश्चोत्कृतिश्च षट्त्रिंशतिरनुक्रमात्
अत ऊर्ध्वमतिछन्दो यजुषे तां विकल्पयेत् २०
छन्दांसि ऋक्षु वक्ष्यामि पूरयेच्च यवैः पदम्
पादैश्चतुर्भिरात्मीयैर्भवन्त्येतानि सर्वदा २१
एकद्वित्रिचतुष्पादं पंक्त्यादं सर्वमेवमेव हि
चतुष्पदीत्वक्षराण्युत्कृतिस्स्याच्च तदा २२

सदैकेन हीनेन तु दक्स्यादधिकेन च
विराट् स्वप्रगृह्या प्लुतास्सर्वत्र उदात्तो ब्राह्मणो वासिष्ठो
गायत्रः
अनुदात्त क्षत्रियो भारद्वाजस्त्रैष्टुभः स्वरितोः वैश्यगौतमौ
जागर्तः २३
अग्निरुदात्तस्य देवता
अनुदात्तस्य वायुः स्वरितस्य सूर्यः
ज्वालाखचृद्वायुवज्रस्तु शूद्रा ह्येतेन संशयः २४
षड्जश्च वृषभश्चैव गान्धारो देवतस्तथा
पञ्चमो मध्यमश्चैव निषादस्सप्तमस्स्वरः २५
उच्चे निषादगान्धारौ नीचे ऋृषभधैवतौ
शेषास्तु स्वरितो ज्ञेयाः षड्जमध्यमपञ्चमाः २६
शुक्लमुच्चं विजानीयान्नीचं लोहितमेव च
श्यामं तु स्वरितं विन्द्यादग्निरुच्चस्य देवता २७
नीचस्य वायुः सविता स्वरितस्य विधीयते
उदात्तस्तालु गर्भश्च स्वरितः प्रचयस्तथा २८
नीचः सर्वानुदात्तश्च स्वरः सन्नतरस्तथा
प्रचयस्तालुगर्भश्च सन्नतरस्तथैव च २९
वाक्पृशति न पाणिस्तु ज्ञेयं चारायणीयके
रङ्गस्तद्विविधो ज्ञेयो स्वरे च व्यंजने परे ३०
पारावतस्य वर्णाभ्यां विहिताक्षरचिंतकैः
तस्य मात्रा तु हृदये अनुमात्रा च मूर्धति ३१

नासाग्रे त्वणुमात्रस्य रङ्गस्य परिकीर्तिता
यथेन्द्रनीलप्रभयाभिभूतः मुक्तामणिर्याति हि नीलभावम्
तथैव नासिक्यगुणेन युक्तस्स्वरोऽपि रंगत्वमुपैतिकृत्स्नः ३२
हृदयाज्जायते रंगः कांस्यवत्तस्य निःस्वनः
लघुश्चैव द्विमात्रश्च सखीं रछ्वा निदर्शनम् ३३
टपरे रंगमित्याहुरघोषे मुखनासिकम्
अन्यस्वरोऽनुनासिक्यमृँ भूरिति निदर्शनं ३४
हकारं पञ्चमैर्युक्तमन्तैश्चापि संयुतम्
उरस्य तं विजानीयात्कण्ठ्यमाहुस्तु केवलम् ३५
अनुस्वारे पदे पूर्वे संयुक्ते पुरतः स्थिते
तदा ह्रस्वं विजानीयात्संस्थाप्येति निदर्शनम् ३६
अनुस्वारोपरिष्टाच्च संवृत्तं दृश्यते क्वचित्
सदीर्घमपि विज्ञेयाद्यज्ञं शृणोति दर्शनम् ३७
न करालो न लम्बोष्टो न च सर्वानुनासिकः
गद्गदो बद्धजिह्वश्च प्रयोगं कर्तुमर्हति ३८
वर्णहीनं तु योऽधीते कृतिस्वरविवर्जितं
ऋग्यजुःसामभिर्दग्धो वियोनिमधिगच्छति ३९
प्रहीणः स्वरवर्णाभ्यां यो वै मन्त्रः प्रयुज्यते
यज्ञेषु यजमानस्य रुषत्यायुः प्रजां पशून् ४०
सुतीर्थादागतं व्यक्तं स्वस्नातं स्वप्रतिष्ठितं
सुस्वरेण सुवक्त्रेण प्रयुक्तं ब्रह्म राजते ४१
यलवा यत्र दृश्यंते शषसैः सह संयुताः

लोमशांस्तां विजानीयाच्छेषाश्चान्ये ह लोमशाः ४२
प्रथमानूष्मसंयुक्तानेकपादे द्वितीयकाः
स्वन्तपं द्विपदे कुर्यात्मत्स्यस्तत्सवितुर्यथा ४३
ङणनाः पूर्वपदान्तशषसेषु परेषु च
कटतैर्व्यवधीयेत्तु वर्जयेत्तच्च संयुतम् ४४
ह्रस्वादिवत्सानुसृतिर्वत्सानुसारिणी चाग्रे
पाकभृत्प्रभय ह्रस्वाद्विदीर्घा तु पिपीलिका ४५
एताविवृत्तयो ज्ञेयाश्चतस्त्रोक्षरचिन्तकैः
पिपीलिका त्रयामात्रा स्थानं वत्सानुसारिणी ४६
वत्सानुसृत्यो द्व्यणुः पावकवत्याम् अणुः पादस्याणुः
स्थानमवर्चस्य द्व्यणुः
ऋचो मात्रानुवाकस्य तिस्त्रः स्थानकस्य गोदोहमात्रं ४७
अनुस्वारो यत्र पूर्वो यवां च परतः स्थितौ
परसवर्णं तं विद्याद्द्वित्वं तत्र विनिर्दिशेत् ४८
स्वरभक्ती प्रवक्ष्यामि चतस्त्रस्तु यथाक्रमम्
रहयोर्हरिणीं विद्यात्कर्विणीं रशकारयोः ४९
लशयोः करिणीं विद्याद्धात्रीं तु रसकारयोः
या तु हंसपदानाम सा स्याद्रेफषकारयोः ५०
स्वरभक्तीः प्रयुंजानस्त्रीन्दोषान्परिवर्जयेत्
विस्वरं विरसं चैव ग्राह्यदोषस्तथैव च ५१
अनुस्वारो तु कर्तव्यमंगुष्टाग्रे प्रकुंचनम्
मान्ते मुष्ट्याकृतिं कुर्यात्पांते त्वंगुलिपीडनम् ५२

कर्णान्ते योस्तु कर्तव्यं प्रदेशिन्याः प्रकुंचनम्
गणांतयोस्तथैव स्यादूष्मांतेऽङ्गुलिमोक्षणम् ५३
तलयोस्त्वथसंश्लेषे अंगुल्यंगुष्टयोर्विदुः
प्रसारणं स्वरांतस्य नान्तस्यापि नखे नतु ५४
यथा सौमत्तनागेन्द्रः पदात्पदं त्रिधाविधा
एवं पदं पदाद्यन्तं दर्शनीयं प्रयत्नतः ५५
अनुदात्तादिसर्वेषां वर्णादौ सारणाभवेत्
द्विरुदात्तो तथाद्ये च द्वितीये चैव निर्दिशेत् ५६
मोक्षग्रहणसन्धाने स्पर्शनं दृश्यते यदि
स्पर्शने सारणां कुर्यात्तत्पूर्वे मोक्षणं भवत् ५७
अन्तोदात्तमाद्युदात्तमुदात्तमनुदात्तं नीचस्वरितं
मध्योदात्तं स्वरितं द्विरुदात्तं त्रिरुदात्तमिति नवपदशय्याः
५८
अग्निः सोमः प्र वो वीर्यं हविषां स्वर्वनस्पतिः
इन्द्राबृहस्पतिभ्यामित्युदाहरणान्यत्र क्रुद्धो गुरुर्वदति यानि
इति ५९
ह्रस्वप्लुतान्प्रयुंजीत विरामेष्वनुनासिकम्
स्वश्लोकप्रभृतीनां तु न तु व्यञ्जनचोदिशेत् ६०
पदानि पुनरुक्तानि सप्तचारायणीयके
विहाय पंच द्वे वाच्ये शाकल्यो मुनिरब्रवीत् ६१
अनुदात्तात्कम्पनं यत्र द्व्यङ्गुलं तत्र पृष्टगम्
हस्तस्वरसमायुक्तं कम्पयेत विचक्षणः ६२

अवरुह्य तथोदात्तादङ्गुलं सार्द्धमेव च
कम्पं कुर्यात्ततः पश्चाद्धस्तस्तत्रैव तिष्टति ६३
स्वरितात्कंपनं यत्र तत्रैकांगुलमूर्ध्वगम्
हस्तं श्रुतिगतं कम्पेत् वांगुलाद् अतिरिचयेत् ६४
उभयोः कम्पयोर्यत्रत्वेकस्नारं कदाचन
सार्धास्यादंगुलादेकादि्द्वतीयं चांगुलोर्ध्वगम् ६५
ग्रहावंत्यादयो प्रचयो तदत्याभावेरुक्ता
पुनरुक्तयोरुच्चनीचयोः
उच्चादेन पुनरुक्तस्याद्ययोः प्रचये तदन्याभावे पुनरुक्तस्य
६६
अविद्यमानवत्प्रचयः विसन्धादीनां नेष्टमेव ६७
अग्निष्टोमप्रणीती प्रणीतात्त्रिशिं चिन्ननुष्टुप्त्रिष्टुभादीनां
पदवल्लोपेवेष्टानम्
ज्योतिष्कृत्स्वर्यत्यादीनां पूर्वौ सजिह्वामूलीयोपध्मानीयौ
दूष्यदूष्यदुभयोः पूर्वौ सरेफौ ६८
अहोरात्र सदोहविर्धानादीनि
द्विवचनात्पृक्तमवर्णमखण्डितानि चतुर्थां वर्जं
नवधादीनि च भृणहाविश्च हासंस्कृतमित्यखंडितरत्येव ६९
अक्षिपत्कुकुभ्मानस्वप्रचौ जागृवां स
इत्यखण्डितानि चारायणीये समद्वेतिशब्दशब्दशब्दः परः
७०
समद्विति बह्वृचां

उत्तमे दिग्वाचमखराडां परस्यापि टकारः
दमुतोन्तुरस्मादुत्तरस्य पक्षस्थ विष्णोर्त्तुकं वीर्याणि
प्रवोचमित्युत्तरस्य भ्रातृव्यह्लोक
उत्ताराणीत्ये वमादीनिदिरवाचकात्यखरिडतात्येव यानि
दक्षिणानि छन्दींषि
तान्युत्तरान्युत्तरमेवमेवमाद्युत्तरं खंडितं निषसा च ७१
निषसूषणा
दृषूणावीतां पूर्वपदसा बन्धानेषत्वणत्वौ स्वस्स्वर्गवाचकं
जात्यम् ७२
श्रैष्ट्याय समसूषत्ये ते तस्य लोपो नास्ति
अग्निस्वेतत्वं प्राहिं सीदग्निस्त्वामात्रयादितिस्त्वायस्त्वास
दन ७३
आयुस्ते विश्वतो दधदित्येवमादीनां न व्येपैराणामपि
टकारोनाखि
अकष्टवावा पृथिवीत्यनामि परस्यापि टकारः
स्वर्णघर्मस्वर्णज्योतिरित्यत्र संहितायां न त्वं चारायणीयके
इन्द्राणी वा विधवात्वष्ट ७४
तृशमीन्द्राराया एकादशीत्येतावेनुभयह्रस्वावपिष्टक्षिष्टा
वेवरेषधिवनस्पत्यग्निबहुमित्रादयो ह्रस्वाः तु भिस्मपरा
खरिडताः स्वपिषत्ववर्जेति खंडितम् ७५
ओषधिपदं ह्रस्वान्तं मंत्रेजुष्टमाद्योदात्तमन्त्रे इति शिक्षापाठः
७६

घश्चेति सप्तमः नोदितावलगातारा
केशिनी धातृ रेवच स्वमतिः पिपीलिका त्वाष्टा वायव्या
नववृत्तयः ७७
तिस्त्रः तिस्त्रः क्रमेणासां पूर्वे मध्ये तथोत्तरे
सवनेषु प्रशस्यन्ते द्रुतमध्यविलम्बिताः ७८
यथा हि सौवत्सरुतं निशा हित्वा त्यं वत्साभिमुदे
प्रयाति ब्रह्मापि तद्वत्प्रणावोपि हूतो वक्तारमागछति ७९
चाशुवक्त्रे सामविक्रमसम्पन्नासद्रुतामविलम्बिनीम्
उच्चारयेत कल्याणीं वाचमाम्नायसारिणीम् ८०
सामशब्देन वास्येत आपः प्राणाः
अष्टौ स्वरान्प्रवक्ष्यामि तेषामेव तु लक्षणम् ८१
जात्योऽभिनिहितश्चैव क्षैप्रः प्रश्लिष्ट एव च
तैरोव्यंजन संज्ञाश्च तिरोविराम एव च ८२
च तथाभाव्यास्तथोस्वारः पादवृत्तस्तथाष्टमः
तिर्यग्वाद्यास्तु चत्वारो गच्छेयुर्सजवौ परे ८३
यथा धनुष आदाय शरक्षिप्ते पुनर्गुणः
स्वस्थानं प्रतिपद्येत तद्वद्धस्तगते स्वरे ८४
गुणवतः परे नीचे जात्यादीनामशेषतः
हस्तो पुनरागच्छेदुच्चैर्यत्र परं पदम् ८५
स्वरितं त्र्यंगुलं विद्यात्प्रचये पुरतस्थिते
एकांगुलं परी नीचे उदात्ते तु षडंगुल ८६
गम्यते त्रिविधे स्वारे तिर्यक्पदं समाहरेत्

यद्यकारो परिष्टात् स्याद्गतोप्यगतिवद्भवेत् ८७
तीक्ष्णोभिनिहितस्वारः तस्मात्किंचित्मृदुर्भवेत्
प्रश्लिष्टोथमृदुः किंचित्क्षैप्रस्तस्माद्विधीयते ८८
क्षैप्रान्मृदुतरो जात्यो जात्यान्मृदुतरो भवेत्
तिरोविरामस्तस्मात्तु तैरोव्यंजन उच्यते ८९
पादवृत्तस्य सर्वेषां मन्दयित्वा विशिष्यते
स यकारं सवं वापि अक्षरं स्वरितं पदम् ९०
नीचपूर्वमपूर्वं वा सजात्यः स्वर उच्यते
एग्रो आज्यमुदात्ताभ्यामकारो यत्र दृश्यते ९१
अनुदात्तोभिनिहितस्सहन्तस्सैवाजमिति त
इउवर्णौ यदुदात्तावा यद्येते यवौ क्वचित् ९२
नीचे तु प्रत्यये नित्यं विद्यात्क्षैप्रस्य लक्षणम्
इकारे यत्रलोपस्स्यादिकारेणैव सन्धितम् ९३
उदात्तमनुदात्तं च प्रश्लिष्टोभीत्थतामिति
उदात्तपूर्वं यत्किंचिद्दृश्यते स्वरितं पदम् ९४
एषसर्वबहुस्वारे तैरोव्यंजन उच्यते
अवग्रहात्परं यत्र स्वरितः स्यादनुत्तरं ९५
तिरोविरामं तं विद्यादुदात्ते यद्यवग्रहः
उच्चनीचौ स्वरौ यत्र नीचे यस्याप्यवग्रहः ९६
तथाभाव्यं विजानीयात्तनूनप्त्रे निदर्शनम्
स्वरस्य स्वरितो यत्र विवृत्ता यत्र संहिता ९७
पादवृत्तं विजानीयादेवमाहुर्मनीषिणः

पादान्ते तु विरामः स्याद्बलाहक इति स्मृतः ९८
अर्धर्चेवैतृता नाम ऋगन्ते तु भुजङ्गमः
दूतायां वृत्तौ त्रिकलात्रामध्यमायां चतुष्कला पंचकलायां
विलम्बितायाम् ९९
शुक्लागायत्रीरूपेण सारंगं रूपमुष्णिहाम्
पिंगलं ककुभां रूपं कृत्स्नमानुष्टुभं तथा १००
रोहितं बृहतीनां तु तीलं पांक्तं ततः पुनः
सौरभं त्रिष्वभां रूपं गौरं जागत उच्यते १०१
अतोयान्यानि छन्दांसि श्यावदं तेषां ततः पुनः
नकुलं त्वेकपादानां द्विपदां वभ्रुरेव च १०२
सारंगं शुक्लकृष्णरूपमुच्यते
प्रथमांत्यातृतीया च यरलवाश्शषसैः सह १०३
एकादिकां विंशतिं च द्विर्भावेन नियोजयेत्
परे स्वरविवृत्तिः स्यादौंताश्चारायणीयके १०४
सर्वत्र सन्धिमत्विछत्वकारेत्वन्यशाखिनः
ता एतौ अंगशब्दस्य मंत्रे प्रकृति भावो न ब्राह्मणे १०५
उत्सादतो अंगादंगादिति वर्जम्
अयवथा शब्दोपर ओकारः प्रकृतिन्यान एकारः १०६
अज्वानामादिषु परेषु प्रकृतिभावः
उरोजुषाणो वृष्णिश्च असिशब्दे विवृत्तिर्न १०७
भवति गर्भभद्र --
छन्दोभिछादिता मर्त्या देवत्वं वै यतो गताः

यज्ञस्सर्वस्तु छन्दांसि तस्माद्वेद्यानि तानि तु १०८
अविदित्वात्तु यच्छब्दो यज्ञं जप्यं स्वरं तथा
कुरुते त आयतित वाग्वज्रश्शक्रशत्रुवत् १०९
वक्ष्यामि लक्षणं तेषां यजुषामादितस्त्विदम्
विद्वानेतान्विदित्वा तु सर्वत्रैव प्रकल्पयेत् ११०
एकाक्षरादि क्रमशो मा प्रमा प्रतिमा तथा
अस्त्री वयोक्षरपंक्तिर्गायत्र्युष्णिक्तिथैव च १११
अनुष्टुप्बृहती पङ्क्तिर्विराट् त्रिष्टुप् तथैव च
जगत्यतिजगती च शक्वर्यतिशक्वरी तथा ११२
अष्टिरत्यष्टी धृतिश्चातिधृतिश्चैव तथाकृतिः
प्रकृतिः चाकृतिश्चैव विकृतिः संकृतिस्तथा ११३
अतिकृतिः चोत्कृतिश्च षट्त्रिंशतिरनुक्रमात्
अत ऊर्ध्वमतिछन्दो यजुःष्वेतानि कल्पयेत् ११४
छन्दांसि ऋक्षु वक्ष्यामि पूरयेच्च यवैः पदम्
पादैश्चतुर्भिरार्चीयैर्भवन्त्येतानि सर्वदा
एकद्वित्रिचतुष्पादं पंक्त्याद्यंशवमेव च ११५
चतुरुत्तराणि सर्वाण्युत्कृतिः स्याच्चतूशतं
निमृदेकेन हीनेन भुरिक्स्यादधिकेन च ११६
विराट् द्वयो न हीनेन रेपेतितोन् स्वरा स्यादधिकेन च
विराट् द्वयो न हीनेन पंचकेनाथ पादेन भवेच्छंगुसतीतुसा
११७
नवाक्षराभ्यां षट्केन ऋङ्नागी सा प्रकीर्तिता

वाराही सा तथैव स्यात् षट्काभ्यां नवकेन च ११८
हीनाक्षरा मध्यापादे गायत्री वै त्रिपाद्यदि
पिपीलका तु सा ज्ञेया यवमध्याधिकेन च ११९
एतत्समानं सर्वेषां एकैकस्य ब्रवीम्यथ
षडक्षरा स्याद्गायत्री तथैवाष्टाक्षरैस्त्रिभिः १२०
उष्णिग्गर्भा तु सा ज्ञेया षट्सप्तैकादशाक्षरैः
अष्टद्वादशकाभ्यां तु विराण्णामद्विपादियम् १२१
दशाक्षरैस्त्रिभिः पादैस्तथैवैकादशाक्षरैः
अष्टद्वादशकाभ्यां तु । नवकायोस्तु मध्ये स्याजग १२२
नवकायोस्तु मध्ये स्याज्जगत्याः पदम् एव गु
नष्टरूपात्तु सा ज्ञेया गायत्र्यैव विराडियम्
सप्ताक्षरैस्त्रिभिः पादैः सैव पादनिचृद्भवेत् १२३
षट्कं द्वस्य मध्ये स्याद्भवेदतिन्द् अनृमृत्तु सा वर्धमानातु
सा ज्ञेया षट्सप्तावाक्षरैस्त्रिभिः १२४
एतैरेव विपर्यैस्तैः प्रतिष्टा सा प्रकीर्तिता
उष्णिक्सप्ताक्षरा ज्ञेया एकश्चेद्द्वादशाक्षरः १२५
चेद्द्वादशाक्षराः
आदिमध्यावसानेषु भवेदष्टाकयोर्यदि
पुरःककुं परा पूर्वा उष्णिगेव प्रकीर्तिता १२६
उष्णिग्गर्भा तु सा ज्ञेया पंचकेनाष्टकैस्त्रिभिः
एकादशद्वादशकौ चतुष्कश्चैव एव तु १२७
उष्णिगेव त्रिभिः पादैः ककुब्द्र्याङ्कुशिरास्तथा

तत्र शिरात्तु सा ज्ञेया द्वौ यत्रैकादशाक्षरौ १२८
षडक्षरस्तृतीयः स्यादेवमुष्णिगुदाहृता
अष्टाक्षरात्वनुष्टुप्स्यादेकस्त्वष्टाक्षरो यदि १२९
द्वादशाक्षरयोस्तु स्यादादौमुख्ये तथांततः
पुरः ककुप्परा पूर्वा ज्ञेया सानुष्टुभेव तु १३०
द्वौ तु द्वादशकौ स्यातामष्टकश्चकृतिस्तु सा
अनुष्टुबेका गायत्र्यात्रि च आनुष्टुबस्तु सः १३१
अनुष्टुभ्मुखो वा क्वचित्प्रगावः स प्रकीर्तितः
नवाक्षरास्याद्बृहती त्वष्टकानां भवेद्यदि १३२
पुरः पथ्यो परिष्टा स्यात्पूर्ववद्द्वादशाक्षराः
पुरस्तान्न्यङ्कुसारिण्युपरिष्टादतः पूर्विका संज्ञा विकल्पिता
कैश्चित्स्कन्धोग्रीवीचमध्यमा १३३
सतः पूर्वा तु सा ज्ञेया त्रिभिर्वै द्वादशाक्षरैः
अष्टकौ दशकौ चैव विष्टाराद्या तु सा स्मृता १३४
अष्टका चैव चत्वारो जगतिश्च महाधिका
त्रयोष्टका द्वादशकौ महासतस्तु पूर्विका १३५
नवकश्चाष्टकश्चैका दशका चाष्टकस्तथा
बृहती विषमपदा प्रोक्ता सा वेदवादिभिः बृहती १३६
गतो बृहत्या प्रगाथो --
न स्मृतः ककुप्सतो बृहत्यौ तु प्रगाथाः काकुभाः स्मृताः
बृहतीगतौ बृहत्यौ महापूर्वे उभे यदि १३७
पङ्क्तिर्दशाक्षरा ज्ञेया पंचपंचाक्षरा अपि

दशाक्षरैश्चतुर्भिस्तु विराडुक्ता तथैव च १३८
स्यातां द्वादशकौ यत्र पादयोरष्टवर्णयोः
युग्मतो युग्मतो वाह्य आदौ मध्ये तथा तु तः १३९
सतो सतश्च संस्तारः प्रस्तारश्च तथैव च
विष्टारस्तारपूर्वा सा पंक्तिर्ज्ञेया तु षट्विधा १४०
चत्वारः पंच वा द्वौ वा पंक्तिः पूर्वाक्षरा तु सा
चतुष्केनाथ षट्केन त्रिभिः पंचाक्षरैस्तथा १४१
पदपंक्तिस्तु ज्ञेया पंचपंचाक्षरा तथा
चत्वारः पंचकाष्षट्कं महापूर्वा तथैव सा १४२
अष्टका सप्तकः षट्को दशको नवकस्तथा
दशपंक्तिमहापूर्वा छन्दोविद्भिरुदाहृता १४३
पंक्त्या पंक्तिस्तु सा ज्ञेया पंचैवाष्टाक्षरा यदि
षट्भिरष्टाक्षरैर्ज्ञेया पंक्तिविष्टारपूर्विका १४४
विराड्रूपा तु दशकावष्टकौ पंचकस्त्रयः
अष्टाक्षरस्तु चत्वारपश्चाच्चिद्द्वादशाक्षरः १४५
त्रिष्टुभेव तु सा ज्ञेया शुद्धा चैकादशाक्षरा
दशकौ द्वादशकौ चैवोच्यते साभिसारिणी १४६
नवकौ दशकौ स्वश्च विराट्स्थाना तु या भृता
अष्टाक्षरत्रयः पश्चाद्द्वादशाक्षरयोर्यदि १४७
जगत्येव तु सा ज्ञेया शुद्धा सा द्वादशाक्षरा
जगत्यास्त्रिष्टुभश्चादौ मध्ये चान्तेष्टकौ यदि
ज्योतिष्मत्यान्ततो विद्यात्पुरस्तादधिपूर्विका १४८

चतुष्पदान्येवै सर्वाण्यत्कृत्यान्तानि चैव हि
चतुराक्षरवृद्धान्येन्यतिछन्दस्ततः परम् १४६
गायत्र्याद्यानि सप्तैव छन्दांसि स्युः प्रजायते
चतुराक्षरवृद्धानि क्रमाक्षरात्परं पदम् १५०
यजुषामेकवृद्धानि षट्स्युः प्रभृतिभिः
क्रमात् हीनाभ्यधिकवर्णानि प्रोक्तानि दश पंच वै १५१
एकादिकान्येकविवर्धितानि दैव्यानि सप्तैव यथा क्रमेण
तथैव मत्स्यो यजुषा क्रमेण हानिं विदध्यादसुराणां तथैव
१५२
धातुक्रमेण वृद्धानि चतुर्भिरेव साम्नां द्वाभ्यां द्वादशानि
विद्यात्
अष्टादशाद्यानि ऋचां क्रमेण त्रिभिर्वृद्धानि तथैव विद्यात्
१५३
चतुर्विं शत्याद्यानि चतुर्भिरार्षं तथा ब्राह्मं षट्त्रिंशच्चापि
षट्भिः
अग्निसोमस्सविता बृहस्पतिर्मित्रावरुणाविन्द्रो विश्वेदेवाः
१५४
सप्तानां दैवतमादित्याः पुंसां ब्रह्मविराट्स्वेकपदां तु
नित्यम् १५५
वायुर्विच्छन्दवायुर्वै छन्दसोन्ये धाता शुक्लं सांगंकं कृष्णं
रोहितम्
नीलं स्वर्णं शौचसप्तानावर्णाः स्युः पृश्नयो वभ्रुः नकुलाः

विरा १५६
ट्स्वेकपदाः शावन्यन्यानि छन्दसामेतत्प्रजायतेरार्षम्
देवश्छन्नामृत्युभीता
यस्तैः दुर्मृत्युदेशं नामछन्दोविसृतिस्तृतीया १५७
मन्त्रस्वरूपं मननादथैतेत्रायंते ते विधिवद्यशोक्ताः
यथोपदिष्टान्विधिवत्सयगन्
युक्तीश्च ब्राह्मणाश्चाप्यर्थवादान् १५८
पापरायसिद्धिं पदवाक्यसारक्रमेण वक्ष्ये द्विविधा यथोक्ताः
१५९
द्रव्यं संस्कारकास्तु केचिद्बहुशो दैवतस्याभिधाक्षयकाः
विष्णुर्मनस्येत्यग्निर्भवेति
च यथा क्रममीदृशा वेदितव्याः ते तु त्रिविधाः परोक्षेण
कृताः प्रत्यक्षेण तथाप्यात्मिकाश्चाल्पाः १६०
आख्यातस्य प्रथमपुरुषेण सर्वाभिर्नामविभक्तिभिर्युक्ताः सूर्य
आत्मा दृशे विश्वाय सूर्यं यतते सूर्येण पयस्सूर्याय १६१
यो वस्सूर्याश्च रश्मे यस्सूर्यस्य प्रियस्सूर्य इति
परोक्षकृतः मध्यमपुरुषयुक्ताः त्वमिति सर्वनाम्ना १६२
प्रत्यक्षकृता वद्याः
यथा त्वमयो अजय इत्येवमुत्तमपुरुषेण त्वाध्यात्मिकाः
अहमित्येतेन सर्वनाम्ना यथा अहमपस्तत्त्वत्रापि १६३
इत्येदमाद्याः चतुर्विधास्तु पर्यायात्प्रवादोग्रेयत्तु
वाक्यसमाप्तिश्चर्यञ्चतिवेद्याः १६४

राज्ञसीति पर्यायश्चिदसीतिपूर्वादौग्रे यत्ते वाक्यसमाप्तिः
स्वछन्दोछन्दश्छन्दो द्विविधैकद्वित्रिचतुष्पंचाषट्पाद्याः १६५
द्व्यवसाना स्त्र्यवसानः समं तास्सच्छन्दां
विषमाक्षराविच्छन्दाः
ताः प्रसिद्धाः पंचविधाः सौम्या मूढाश्चतुर्होतारश्चान्तास्स्वप्
यवदानेति १६६
घोराघोरतराश्च सौम्याग्नि आयाहीत्याद्या मूढश्चतुर्होतारश्चातुस्
तृप्तवदाशीति
घोराघोरतमस्तुकीमीत्याद्या आभिचारिका १६७
एव एकाशीतिस्तेषामिमेभिधेया अधिब्रह्माधियज्ञश्
चाधिदैवतमप्यात्मस्तु
तिराशीश्च शपथो अभिशापोभिचारश्च विधिः शांतिः
अचिख्यासा १६८
निर्वचनं विभागः प्रश्नोत्तरा व्याख्यानं प्रैसाक्रोशो
अन्वारोहणं स्वाध्याय
प्रशंसा निन्दा प्रशंसे परिवादेनाचकत्थना
शुद्धिर्विकल्पसंकल्पौ संख्यानुबन्धः कर्माह्वानं याच्ञा
संवादः प्रसवस्समुच्चयश्च परिवारो व्रीडः १६९
आमन्त्रणं च संशयप्रलायः प्रवह्लिकश्च नियोगः
नियोगावुपधावणं च क्षणस्पृहा संलापो विलापः १७०
प्रतिषेधो पदेशात्मश्लाघानमस्कारस्सज्वरः प्रमोदा विस्मयो
विसर्जनमभिप्लवः १७१

संविदुपप्रैषश्च प्रत्याख्यानं स्वकर्मकथनं प्रतिराधश्च
अपह्नवश्चाहनस्यं भद्रं चाचार्थे पसमृद्धिश्चालंकारश्च मे १७२
उपमार्थयकं दीपकं चैव यमकं च समर्थौ दशमे लिंगत्रयं
च त्रिविधश्च
कालः पदं चतुर्विधं चैवम् ईकाशीतिस्ते द्वात्रिंशदेषां १७३
निर्वक्तुं युक्तयस्त्वधिकरणं योगपः पदार्थश्च हेत्वर्थ उद्देशो
निर्देशश्चैवोपदेशोप्यपदेशप्रदेशश्च अतिदेशोपवर्गो १७४
वाक्यशेषोर्थापत्तिः प्रसंग एकान्तश्च अनेकान्तः पूर्वपक्षो
निर्णयो विपर्ययो तिक्तां ता वेक्षणं च अनागर्ता वेक्षणं
विधानं च संशयो १७५
व्याख्यानमनुमतां च स्वं संज्ञानिर्वचनं दृष्टान्तिश्च नियोगो
विकल्पः
समुच्चयो ह्यहम् १७६
आसांद्वावुपायौ नैरुक्तो तु तौ गीतमार्षोर्तिकं चार्थसिद्धये
पुरुगौरित्युत्पत्तिकं सर्वं  दशधा गीतं गौणौ नैमित्तित्तिकाः
१७७
भक्तास्संवादः कान्नकस्तशोपवारश्च सस्बन्धः
क्रव्यश्च सो योगिकश्चैच्छिकश्चैतेषां षट्प्रमाणानि सिद्धये
ज्ञेयानि प्रत्यक्षमनुमानं स्मृतिं चोपमानमर्थापत्तिरुपमा चैव
अतिस्मृति १७८
प्रतिभाषं संभवश्च भावोर्थापत्तिरुपमानं चेष्टा अष्टावन्ये
दशचान्येन्यधान्ये

चत्वार्ये वेमह श्रुतिचोदितानि स्मृतिः प्रत्यक्षमैतिः
पह्यर्थमनुमाने चतुष्टयमिति श्रुतिरेषामनुस्वरूपं चतुर्थी १७९
वदज्ञाने सर्व एते उपायावक्ष्याम्यथोदाहरणानि तेषाम्
दीप्तब्राह्मं प्रत्यक्षं च परोक्षं च लिंगमात्रं द्वैधं ब्रह्मजज्ञानं च
१८०
ऋषितमानामेकपदेनैव बहुदेवत्यख्यातं ब्रह्मादेवानां
ऋषिगणानां प्रवलिहितं यन्त्रामविभक्तियुक्तं पृछामि १८१
त्वामृषिपुत्राणां नियतबहुलं नैगमावर्तयेदेवमादिमिश्राणां
भूतभव्यभवज्ञानं पूर्वे वाजन्येषां स्वाभिप्रयन्तु १८२
अग्निर्ब्रह्मसावित्रीव्याहृतयोधियज्ञ उक्ताः पुरुषसूक्ते
अधिदैव्यं हंसो
वल्यश्चाध्यात्मं स्तुती रुद्रा आशीर्यजमानं शपथं
सन्यसि दरानावृष्टं च योनो द्वेष्टीभ्यभिशापाभिचारौ
विधेर्देवस्यतेनांति स्वस्ति नो न तं वेदथेत्यादिख्यामैवं
यदधौ
निर्वचनं तथोविभागः पृच्छामीयमिति प्रश्नोतुरव्याख्याने
इमां प्रैष इमिता मा क्रोशो माता च त इमा नारीः
अन्वारोहाणां पत्नी स्व
रोहावपावमानी स्वाध्यायप्रशंसा नता
अर्वेत्यस्यानिन्दा प्रशंसेन नूनमस्तीति परिदेवना
कनूसृना बन्धीवृत्तमित्याद्यैवं शुद्धिर्द्रुपदा विकल्पौ
देवोवास्सत्याशीसंकल्पः संख्या इमा मेयन्ते

यमित्येवमनुबन्धः कर्मेन्द्रौदधिचोग्न आयाहीचात्वाह्वानं
याच्ञा प्रजयाजन्म इत्याद्यास्संवादस्तु कया आभीयं सूक्तं
प्रशवस्तवप्रयाज इत्याद्याः सोमं राजानमिति समुच्चयं केतुं
कृण्वन्तीति १८३
परीवादः व्रीडे यत्किन्देदं कामयंतु वा
आमंत्रणमग्नेसहस्राक्षः संशयः किंस्वित्व
नमवस्विश्च प्रलापोच्चैको अद्य प्रवल्लिका वियोग इमं
मन्त्रं उत्तमे पादे नियोग इदं ब्रवीत्यादिकः
कदाचनोपधावनं कस्य स्त्यस्पृहात्वाभूरुरेतिस्वदेवोवा
विलापं नदस्यमित्यादिसंज्ञायो
पश्यन्तौ यो यमे तथा प्रतिथधोपसंदेशावादित्यङ्गार्भ
आत्मश्लाघाशिरोमेवीनां वानमस्तेकृद्रेत्येषनसहताहं ज्वरो
न विजानामीत्येव वेद्यः प्रमुदोमयो गृह्णामि हन्ताहं वतो
वेभातिविस्मयकौ को अद्धाविसर्जनं परि उदेवागातु
त्रमस्व इत्येवमभिप्लवस्तु
संविदहं च त्वं चेति विज्ञेया त्विन्द्रा भरेत्यपप्रैषस्तथैव
प्रत्याख्यानमाघातेति न ते वै वेद्यं स्वकर्मकथनं
किंतवामस्तु प्रतिराधो भुगिति माख्यमपह्नवो महो
नाल्पाहनस्यमीभद्रं भद्धो रूपसम्पदे वायुरुपमा
हीवासमादोत्तुमां चतनुत्यजे वतस्करेतिहीना सोमो
देवो न सूर्या इति समा पर्जन्य एव उत न दुत्कृष्टा
ब्राह्मणा व्रणचारिणस्त्वलुप्ता सांगविधविधोपमार्थं रूपैकं

तु वेदिदेश्लक्ष्णान्तश्च १८४
दीपकं यमकं बह्वर्थे महरूपकमभ्यस्तकं च सचित्र
स्त्रीपुंनपुंसकलिंगजयं
तु भूतं भवद्भविष्यदितिकालाः यज्ञेनयज्ञमिति भूतं
भवत् गां नीयते आघातागच्छन्तित्येवमेते नामाख्यातो
निपातोपसर्जं पदं तु तद्द्विविधं केवलं समस्तं च द्रव्यस्य
शब्दस्त्वभिधायको यो योग्यस्तथैवाष्टाविभक्तिकार्येभ्
यो लिंगेषु भिन्नो वचनेषु चैव तत्रामवेद्यं नमनाग्यथावत्
प्रारम्भपर्यन्त आगता तु यस्मात्प्रतीयते शब्दरूपात्क्रियैव
पौरुषे लिंगतश्चापाभिन्नतदाख्या दाश्योतत्कालतश्चापि
भिन्नम् १८५
स्वभावतस्त्वर्थयुक्तास्तयोस्तेद्योतयन्त्यर्थं प्रादयो विशिष्टम्
१८६
उपसर्गश्चादयो वै नियाताः समुच्चयादौ पादपूरणाश्चेचतुर्विधं
निर्वचनं तदर्थमुक्तार्थं परिषेध्ये निरुक्तम्
व्यंजनोपनयतस्सिद्धमुक्तार्थं वीभुसूर्यवन्तथा मनियम्यम्
१८७
व्यवहितमेकं शुनचिछेपो निरुक्तं कारणेन तस्मादापः
व्यंजनोपनयस्त्विन्द्रतारादृणातिददाति ख्येवं तु ख्येवेद्यम्
१८८
धैर्यं तु दैत्यम् निघत्वादिस्त्वतिर्वरोक्षवृत्तिः परोक्षतामाया
द्याथप्रत्यक्षं तु वाचो विघणटन्निगंतु तिनिगमो

दशधानवगतं नैगमम् पदजात्यत्व इत्यभिधेयेन सितमिते
वने न चायं स्वरात् १८९
संस्कारेणेन्मान्यसः ककुडती गुणनं मोहेनेति विभागेन
क्रमेणोपरमध्वं
विक्षेपेणं द्यावा नः पृथिवीत्येतत्रनस्तु अव्यहारेण वायुः
पूषो मेत्येतद्व्यवधानाः द्व्यात्वादिशेषः प्रोक्तमादिलोपो स्तो
जग्मुरुपाधायालोपे त्वन्तालोपे गतं भवेद्वै १९०
उपधाधिकारिराजेति यामि लुप्तेक्षरत्यचोद्विवर्णलोपे
ज्योतिरादिविपर्यये च
स्तोकाद्यन्तविपर्यये गुर्व्यापन्यौघः
पुरुषानदनायेत्येकस्माद्वेचका नगर्भामिति द्वयोरेकम्
नामवदाख्यानं विभक्ष्यमरणाविभक्तिविपर्ययो हत्स्वश्लोकैः
१९१
उदाहरणं पंचमी समाप्तमिति

इति लौगाक्षि शिक्षा समाप्ता

Aithal, K.P., *Veda-Lakṣaṇa: Vedic Ancillary Literature, a descriptive bibliography*, (Delhi: Motilal Banarsidass Publishers, 1993), #1068 Laugākṣi Śikṣā, found in the following three manuscripts:

Bhandarkar Oriental Research Institute 21 of 1875-76 (colophon is on page 24b)
IIO Stein Collection, Oxford, 141. 47 folios, Sharada script, copied in 1894.
IIO Stein Collection, Oxford, 62. 98 folios (first half), copied in 1894.

# आपिशलिशिक्षा

अथ शिक्षां प्रवक्ष्यामि मतामापिशलेर्मुनेः
गुरुलघ्वादिविज्ञानं नास्यारम्भप्रयोजकम्
उक्तं तत् सर्वमङ्गेषु शिक्षाव्याकरणेषु यत् १
विकल्पभाजां शास्त्राणामपि दृष्टानुवर्तिनाम्
तत्तच्छाखाविशेषेषु व्यवस्थार्थमिदं स्मृतम् २
संहिता तत्पदाध्यायः क्रमाध्याय इति त्रिधा
प्रसिद्धोऽस्य समाम्नायो विषयो वक्ष्यते ततः ३
व्यवस्थितेषु कार्येषु तद्वत् त्रिष्विह केषुचित्
कार्यान्तराणां तन्मूलाद् व्यवस्था सुगमा भवेत् ४
तस्मात् तत्तत्समाम्नाये प्रातिशाख्याविरोधतः
कार्यं सर्वं व्यवस्थाप्यं शिक्षाव्याकरणोदितम् ५
स्वराः स्पर्शास्तथान्तस्था ऊष्माणश्चाथ दर्शिताः
विसर्गानुस्वारळाश्चानुनासिक्याः पञ्च चोदिताः ६
ह्रस्वदीर्घप्लुतावर्णेवर्णोवर्णा ऋ ॠ लृ च
एदैदोदौदिति ज्ञेयाः षोडशेहादितः स्वराः ७
क खौ ग घौ ङ च छ जा झ ञौ ट ठ ड ढा ण तौ
थ दौ ध नौ प फ ब भा मः स्पर्शाः पञ्चविंशतिः ८
य रौ ल वौ चतस्रोऽन्तस्थाश्चः क श ष सः प हाः
षडूष्माणो विसर्गोऽनुस्वारो ळो नास्यपञ्चकम् ९
अन्यत्राविद्यमानस्तु यो वर्णः श्रूयतेऽधिकः
आगम्यमानतुल्यत्वात् स आगम इति स्मृतः १०
प्रकृतिस्थस्य शब्दस्य स्थाने यस्यापरो भवेत्
स्वगुणान्तरं नापेतः स विकारीह तत्समः ११
प्रकृतिस्थस्तु यः शब्दः संहितायां न दृश्यते

तत्स्थाने च न शब्दोऽन्यः स लोपी नश्वरोपमः १२
स्नादिसिद्धः परो ह्रस्वादसंयोगपरस्तु यः
अनुस्वारो द्विमात्रोऽसावन्यः सर्वोऽपि मात्रिकः १३
ह्रस्वात् परो वसनस्थः पदाध्यायेऽनुनासिकः
द्विमात्रिको मात्रिकस्त्वन्यः संहितायां तथाखिलः १४
स्वरितग्राह्यनुस्वारो द्विमात्रो मात्रिकात् परः
दीर्घादध्यर्धमात्रः स्याद् वैरूप्ये मात्रिकं परम् १५
द्विमात्र उत्तमो ह्रस्वादध्यर्धो व्यञ्जनान्तरः
दीर्घादनन्तरस्तद्वन्मात्रिको व्यञ्जनान्तरः १६
द्विमात्रा य व ला ह्रस्वादध्यर्धा व्यञ्जनान्तराः
दीर्घपूर्वात् परो रेफो मात्रिका इति निर्णयः १७
स्वरितग्राह्यनुस्वारस्तथा पूर्वाङ्ग उत्तमः
तयोर्द्वित्वे परं रूपं पूर्वाङ्गश्चेत् तदेव तु १८
तथा पूर्वाङ्गभूताश्च ल य वा रेफपूर्वकाः
ह्रस्वादनन्तरास्त्वेते यद्यन्तस्था परास्तथा १९

आकाशवायुप्रभवः शरीरात् समुच्चरन् वक्त्रमुपैति नादः
स्थानान्तरेषु प्रविभज्यमानो वर्णत्वमागच्छति यः स शब्दः
१
तमक्षरं ब्रह्म परं पवित्रं गुहाशयं सम्यगुशन्ति विप्राः
स श्रेयसा चाभ्युदयेन चैव सम्यक् प्रयुक्तः पुरुषं युनक्ति २
स्थानमिदं करणमिदं प्रयत्न एष द्विधानिल स्थानम्
पीडयति वृत्तिकारः प्रक्रम एषोऽथ नाभितलात् ३
तत्र स्थानकरणप्रयत्नेभ्यो वर्णास्त्रिषष्टिः ४

तत्र वर्णानां केषां किं स्थानं किं करणं प्रयत्नश्च कः केषामित्युच्यते ५
तत्र स्थानं तावत् ६
अकुहविसर्जनीयाः कण्ठ्याः ७
हविसर्जनीयावुरस्यावेकेषाम् ८
जिह्वामूलीयो जिह्व्यः ९
कवर्गावर्णानुस्वारजिह्वामूलीया जिह्व्या एकेषाम् १०
सर्वमुखस्थानमवर्णमेके ११
इचुयशास्तालव्याः १२
ऋटुरषा मूर्धन्याः १३
रो दन्तमूलस्थानमेकेषाम् १४
लृतुलसा दन्त्याः १५
वकारो दन्तोष्ठ्यः १६
सृक्वस्थानमेके १७
उपूपध्मानीया ओष्ठ्याः १८
अनुस्वारयमा नासिक्याः १९
कण्ठनासिक्यमनुस्वारमेके २०
यमाश्च नासिक्यजिह्वामूलीया एकेषाम् २१
एदैतौ कण्ठतालव्यौ २२
ओदौतौ कण्ठोष्ट्यौ २३
ञमङणनाः स्वस्थाना नासिकास्थानाश्च २४
द्विवर्णानि संध्यक्षराणि २५
सरेफ ऋवर्णः २६
एवमेतानि स्थानानि २७

२
करणमपि १
जिह्व्यतालव्यमूर्धन्यदन्त्यानां जिह्वा करणम् २
कथमिति ३
जिह्वामूलेन जिह्व्यानाम् ४
जिह्वामध्येन तालव्यानाम् ५
जिह्वोपाग्रेण मूर्धन्यानाम् ६
जिह्वाग्राधःकरणं वा ७
जिह्वाग्रेण दन्त्यानाम् ८
शेषाः स्वस्थानकरणाः ९
इत्येतत् करणम् १०

३
प्रयत्नो द्विविधः १
आभ्यन्तरो बाह्यश्च २
आभ्यन्तरस्तावत् ३
स्पृष्टकरणा स्पर्शाः ४
ईषत्स्पृष्टकरणा अन्तस्थाः ५
ईषद्विवृतकरणा ऊष्माणः ६
विवृतकरणाः स्वराः ७
तेभ्य ए ओ विवृततरौ ८
ताभ्यामै औ ९
ताभ्यामप्याकारः १०

संवृतोऽकारः ११
इत्येषोऽन्तः प्रयत्नः १२

४
अथ बाह्यः १
वर्गाणां प्रथमद्वितीयाः शषसविसर्जनीयजिह्वामूलीयोपध्मानीया यमौ च प्रथमद्वितीयौ विवृतकण्ठाः श्वासानुप्रदाना अघोषाः २
वर्गयमानां प्रथमेऽल्पप्राणा इतरे सर्वे महाप्राणाः ३
वर्गाणां तृतीयचतुर्था अन्तस्था हकारानुस्वारौ यमौ च तृतीयचतुर्थौ संवृतकण्ठा नादानुप्रदाना घोषवन्तः ४
वर्गयमानां तृतीया अन्तस्थाश्चाल्पप्राणा इतरे सर्वे महाप्राणाः ५
यथा तृतीयास्तथा पञ्चमाः ६
आनुनासिक्यमेषामधिको गुणः ७
शादय ऊष्माणः ८
सस्थानेन द्वितीयाः ९
हकारेण चतुर्थाः १०
एष बाह्यः प्रयत्नः ११

५
तत्र स्पर्शयमवर्णकारो वायुरयः पिण्डवत् स्थानमभिपीडयति १
अन्तस्थवर्णकारो वायुर्दारुपिण्डवत् २

ऊष्मस्वरवर्णकारो वायुरूर्णापिराडवत् ३

६
एवं व्याख्याने वृत्तिकाराः पठन्ति
अष्टादशप्रभेदमवर्णकुलमिति १
अत्र
ह्रस्वदीर्घप्लुतत्वाच्च त्रैस्वर्योपनयेन च
अनुनासिकभेदाच्च संख्यातोऽष्टादशात्मकः
इति २
एवमिवर्णादयः ३
लृवर्णस्य दीर्घा न सन्ति ४
तं द्वादशप्रभेदमाचक्षते ५
यदृच्छाशक्तिजानुकरणा वा यदा स्युर्दीर्घास्तदा
तमप्यष्टादशप्रभेदं ब्रुवते ६
संध्यक्षराणां ह्रस्वा न सन्ति ७
तान्यपि द्वादशप्रभेदानि ८
छन्दोगानां सात्यमुग्रिराणायनीयानां ह्रस्वानि पठन्ति ९
तेषामप्यष्टादशप्रभेदानि १०
अन्तस्था द्विप्रभेदा रेफवर्जिताः ११
सानुनासिका निरनुनासिकाश्च १२
रेफोष्मणां सवर्णा न सन्ति १३
वर्ग्यो वर्ग्येण सवर्णः १४

७

एष क्रमो वर्णानाम् १
तत्रैषां स्थानकरणप्रयत्नानां व्याकरणप्रसिद्धिरुच्यते २
इह यत्र स्थाने वर्णा उपलभ्यन्ते तत्स्थानम् ३
येन निर्वर्त्यन्ते तत् करणम् ४
प्रयतनं प्रयत्नः ५

८

तत्र नाभिप्रदेशात् प्रयत्नप्रेरितः प्राणो नाम वायुरूर्ध्वमाक्रामन्नुरः प्रभृतीनां स्थानानामन्यतमस्मिन् स्थाने प्रयत्नेन विधार्यते
स विधार्यमाणो वायु स्थानमभिहन्ति
तस्मात् स्थानाभिघाताद् ध्वनिरुत्पद्यते
आकाशे सा वर्णश्रुतिः
स वर्णस्यात्मलाभः १
ध्वनावुत्पद्यमाने यदा स्थानकरणप्रयत्नोः परस्परं स्पृशन्ति सा स्पृष्टता २
यदेषत् स्पृशन्ति तदेषत्स्पृष्टता ३
दूरेण यदा स्पृशन्ति सा विवृतता ४
सामीप्येन यदा स्पृशन्ति सा संवृतता ५
इत्येषोऽन्तः प्रयत्नः ६
स इदानीं प्राणो नाम वायुरूर्ध्वमाक्रामन् मूर्ध्नि प्रतिहतो निवृत्तो यदा
कोष्ठमभिहन्ति तदा कोष्ठेऽभिहन्यमाने गलबिलस्य संवृतत्वात् संवारो जायते विवृतत्वाद्विवारः ७
तौ संवारविवारौ ८

तत्र यदा कण्ठबिलं संवृतं भवति तदा नादो जायते ९
विवृते तु कण्ठबिले श्वासो जायते १०
तौ श्वासनादौ ११
अनुप्रदानमिति आचक्षते
अन्ये तु ब्रुवते अनुप्रदानमनुस्वानो घण्टानिर्ह्लादवत् १२
तत्र यदा स्थानाभिघातजे ध्वनौ नादोऽनुप्रदीयते तदा नादध्वनिसंसर्गाद्
घोषो जायते १३
यदा श्वासोऽनुप्रदीयते तदा श्वासध्वनिसंसर्गादघोषः १४
सा घोषवदघोषता १५
महति वायौ महाप्राणः १६
अल्पे वायावल्पप्राणः १७
साल्पप्राणमहाप्राणता १८
महाप्राणत्वादूष्मत्वम् १९
यदा सर्वाङ्गानुसारी प्रयत्नस्तीव्रो भवति तदा गात्रस्य निग्रहः कण्ठबिलस्य
चाणुत्वं स्वरस्य च वायोस्तीव्रगतित्वाद् रौक्ष्यं भवति तमुदात्तमाचक्षते २०
यदा तु मन्दः प्रयत्नो भवति तदा गात्रस्य स्रंसनं कण्ठबिलस्य महत्त्वं
स्वरस्य च वायोर्मन्दगतित्वात् स्निग्धता भवति तमनुदात्तमाचक्षते २१
उदात्तानुदात्तस्वरसंनिपातात् स्वरितः २२
इत्येवं प्रयत्नोऽभिनिर्वृत्तः कृत्स्नः प्रयत्नो भवति २३

अष्टौ स्थानानि वर्णानामुरः कण्ठः शिरस्तथा
जिह्वामूलं च दन्ताश्च नासिकोष्ठौ च तालु च २४
स्पृष्टत्वमीषत्स्पृष्टत्वं संवृतत्वं तथैव च
विवृतत्वं च वर्णानामन्तःकरणमुच्यते २५
कालो विवारसंवारौ श्वासनादावघोषता
घोषोऽल्पप्राणता चैव महाप्राणः स्वरास्त्रयः
बाह्यं करणमाहुस्तान् वर्णानां वर्णवेदिनः २६

इत्यापिशलिशिक्षा समाप्ता

B.A. van Nooten, with an English translation and a study: "The Structure of Sanskrit Phonetic Treatise" in Tartu Oriental Studies II, 2, Tartu (Konks-Numerkund-Mäll) 1973, pp. 408-437.

*Sanskrit Texts on Phonetics, A Collection of Śikṣā Texts*, reproduced by Lokesh Chandra from the papers of the late Prof. Raghu Vira, Satapitaka Series--Indo-Asian Literatures Volume 282, New Delhi, 1981, pp. 346-369.

# कालनिर्णयशिक्षा

प्रातिशाख्यादिशास्त्राणि मया वीक्ष्य यथामति
वेदतत्त्वावबोधार्थमिह कालो निरूप्यते
अखण्डवर्णविषयो वर्णांशविषयोऽपि च
विरामविषयश्चेति त्रिविधः काल उच्यते
स्वरवर्णविरामाणां भिन्नवाग्वृत्तिवर्तिनाम्
ऐकरूप्येण कालस्य कथनं नोपपद्यते
मध्यमां वृत्तिमाश्रित्य मया चेयं कृतिः कृता
प्रातिशाख्ये निषिध्यान्ये यस्मात्सैकैव बोध्यते
व्यञ्जनस्वरभक्तीनां कालः स्यादर्धमात्रिकः
ऋकारल्कारयोर्मध्ये तथा रेफलकारयोः
एकारौकारयोरादावकारोऽप्यर्धमात्रिकः
इवर्णोवर्णयोश्शेषौ स्यातामध्यर्धमात्रिकौ
व्यक्तावेकपदे वर्णावन्तरे स्थितसन्धितः
परोऽप्योष्ठ्यस्वरान्तश्च संयोगादिर्यदिस्थितः
अनुस्वारो द्विरुक्तोऽन्त्यपञ्चमश्च द्विमात्रिकः
ह्रस्वात्परः प्लुताद्दीर्घात्केवलादेकमात्रिकः
व्यक्तिमध्यस्थनासिक्यः सपादो मात्रिकः स्मृतः
व्यक्तिरेषादितत्काला भवेदिति विनिश्चितम्
ऋकारपूर्वः प्रथमो हल्परस्त्वेकमात्रिकः
ऋकारात्प्रथमस्यापि द्वित्वं न स्यात्कदा चन
अवसाने लकारस्य त्रिपादत्वं सदा भवेत्
चतुर्थसप्तमाद्यानां स्वराणामेकमात्रता
ऐकारौकारयोरादावकारोऽप्येकमात्रिकः
इवर्णोवर्णयोः शेषौ भवेतामर्धमात्रिकौ

पदान्तविषयव्यक्तेः पवर्गप्रणवावपि
अन्तरानेकरूपस्य वाक्यस्यान्तस्तथेङ्ग्ययोः
अवग्रहाणामन्ते चाप्यृकारल्कारयोरपि
वाक्यप्रतीकयजुषामपदेऽध्यर्धमात्रता
एतेषां तु पदाध्याये विरामः स्यद्द्विमात्रिकः
एकादशस्वरे तद्वद्द्वितीयाष्टमपञ्चमे
सन्ध्यक्षराणां वेदं च प्रणवं चान्तरा तथा
पदान्ते च तथा कम्पा अन्ततो निहताणुकाः
शेषस्योदात्तता वा स्यात्स्वारता च व्यवस्थया
तृतीयषष्ठनवमस्वरेष्वन्तेप्यृगर्धयोः
त्रिमात्रत्वं प्रयोगे तु त्रिषु सन्ध्यक्षरेष्वपि
स्वाध्यायारम्भशेषस्य प्रणवस्य स्वरस्य च
अध्यायस्यानुवाकस्यान्ते स्यादर्धतृतीयता
ऋगन्तस्य च सन्धानेऽवसाने मात्रिको विदुः
समकाले तु वेदस्थप्रणवस्य द्विमात्रता
स्वरमात्रद्विमात्रत्वं व्यञ्जनं त्वणुमात्रकम्
तस्तरीकरणादौ तु स्वरमात्रस्य दीर्घता
ध्यानार्थस्यावसाने तु भवेन्नादोऽर्धमात्रकः
दीर्घप्लुता यदा राङ्गाः स्युस्तदेतेष्वयं विधिः
एकार्धमात्रशेषाः स्युर्हृदये मूर्ध्नि नासिके
पञ्चरङ्गप्लुता दीर्घाश्चत्वारस्तैत्तिरीयकाः
ऊष्मरेफस्वरेभ्यः प्रागनुस्वारोऽस्ति नान्यथा
काण्डप्रश्नानुवाकानां समाप्तौ काल इष्यते
दशाष्टपञ्चमात्राः स्युस्तन्त्राणां तु त्र्यहं भवेत्

विश्रमो न समासस्य मध्ये कार्यः पदस्य वा
नित्यं प्राक्पदसंबन्धं चादिं प्राक्पदमन्तरा
परेण नित्यसंबन्धं प्रादिं परपदं तथा
एकस्वराणां चादीनां प्रादीनामिति तद्द्वयम्
यो यो विरामकालः प्रागृगादौ समुदीरितः
अङ्गीकृतस्यार्धमात्रं तु न सोऽधिक इष्यते
इति कालनिर्णयशिक्षा सम्पूर्णा

*Sanskrit Texts on Phonetics, A Collection of Śikṣā Texts*, reproduced by Lokesh Chandra from the papers of the late Prof. Raghu Vira, Satapitaka Series--Indo-Asian Literatures Volume 282, New Delhi, 1981, pp. 267-279.

# सिद्धान्तशिक्षा

संप्रणम्य सकलैक कारणं
ब्रह्मरुद्रमुखमौलि भूषणम् १
लक्षणं श्रुतिगिरां विलक्षणं
श्रीनिवासमखिना प्रणीयते २
भूमिनिन्दाप्रशंसासु नित्ययोगो तिशायन्ते
संसर्गव्यक्ति भावे च भवन्ति मतुबादयः इति ३
पूर्वशिक्षाः परामृश्य प्रातिशाख्यं च सर्वशः
सिद्धान्तशिक्षां वक्ष्यामि वेदभाष्यानुसारिणीम् ४
अकारादि पदानां स्यादहोदाहरणं क्रमः
आदिमध्यान्ततस्तत्र यावद्वेदं निरुप्यते ५
अवातमानीतपूर्वं स्यादिदं प्रागत्तु नो हविः
नहेन्द्रं वृत्रमहत परस्मै च ददाशतः ६
वृत्रं नेदं ति नुदते चेष्यसे पूर्ववान्नति
अस्याः परो प्रतिष्ठाया अभिदवैः सधेत्यपि ७
लभतेऽरण्यमंशूनां माप्रजाभिर्हेतिपूर्ववान्
महिमानं च पूर्वश्चेदकारादिपेत्ययम् ८
सं चस्करस्य भूयात्तु शं नोवातो त्र वेःपरः
अससर्जादसंस्पर्श्य चमसंचोदकं परः ९
नर्मायचेदकारान्तश्चात्सन्धुश्चयुताद्यवम्
वारयात्पूर्ववरणोऽप्यपिप्रयमधिब्रुवन् १०
अन्तोदान्तेऽप्यनिङ्ग्ये च परशौनङ्परेऽपि च
अर्चन्दूमाच जुहवां वेः परं द्रवणे परम् ११

वराहपूर्वमिहतं देवेऽप्यायामयान्ति च
अन्तोदात्तमतिङ्ग्यं चेदकारान्तं स्तुतं भवेत् १२
सदनं च ऋतस्थास्थवितस्तं च परार्धतः
मान्ते मृत्यः वपैतं स्यात्तदन्तीस्यादिहाहितः १३
अथप्रवक्ष्याम्यादादीनाहरावद्यपूर्वकान्
प्रयासायेमतो न स्मिन्नाङ्पूर्वस्तपते भवेत् १४
आरण्ये प्राण आयाति भवाम्येत्य वदानके
स्खलयाचापदे पादायासंश्रवसि पाउके १५
अनवर्णा चतस्रोहः परतो नित्यमाहिता
एवशब्दस्तु दीर्घान्तः निषेभिः परिपूर्वकः १६
इष्ट्यै यज्ञस्यसंपूर्वो नाधमानाः परास्तवते
इधे न बर्हिर्यातेऽग्ने छन्दांस्युपपरे भवेत् १७
रेफाद्व्यञ्जनपूर्वाच्चेदिकारः क्वचिदुत्तरः
भवेदकपदे ह्रस्वो यकारे परतः स्थिते १८
लक्ष्मीयादिपदानां तु यणादेशो न विद्यते
तत्र भिन्नपदत्वेऽपि त्रियम्बकमिति स्थितिः १९
भर्त्र्यो य त्र्योरात्र्यपित्र्यमामन्त्र्यापि च काठके २०
पल्न्यस्वधिष्ण्य तन्वां च स्युर्यणादेशसंयुताः
संज्ञानमपि लोकोऽसि तुभ्यं भद्रं सहेति च
पञ्चैते पूर्विकैः प्रोक्ताः काठका इत्युदीरिताः २१
अष्टौ काठकसंज्ञाः स्युः
होत्री नप्त्री शताद्रुद्रीवर्यसीति द्विरूपकाः २२

क्रिष्टिध्रीस्त्री च दीर्घान्ताः पदैक ह्रस्वगाः परे
छिन्नं प्रतिसतां शिक्यः शम्यो गोष्वभिलिप्य च २३
पृश्छिदं त्रिस्थ सु मति तँहजीर्णं पराजिह
मनीषाण मनिष्ये च स्वपित्यनितिवारिति २४
याचितः क्षिप्रमजिरमजिरासस्तरित्रतः
प्रथयित्वाजमजयद् ध्वनयिच्चजिनोजिना २५
स्तनिहिश्रद्धय पय शयिता च शयिष्यते
विराजमेवतैः पूर्वं दिशितस्मिन् प्रपाठके २६
संवत्सरो ष्ट--पूर्वे न वाशिरिष्यति मोक्षणीः
भरन्त्येतावतीहगौ रुजन्ति परि ये प्रियाः २७
सुमृडीका ऋतेन त्वं नक्तं पूर्वसरस्वती
मानो मित्र उदस्थं सीत् जोषोनाचः प्रजवक्षर २८
अग्निर्वाव च देवावै केशवापावधायकः
रक्षाँसीत्यनु वाकेषु स्यादप्येतिरिकारवान् २९
सरस्वति प्रियेभ्यो हि शुचिके तो हिरण्ययोः
ज्योतिष्कृणोति यन्म त सृमृद्धेति षोडशी ३०
ईत्वं स्यादियुरीषायां द्वितीयं निहितावपि
प्रेरते वीक्षमाणायाप्यप्रतीक्षं प्रतीक्षते ३१
एव पूर्वोऽग्निहोत्रीस्यादप्लीद्वीपिसमावति
मयपूर्वश्च दधती प्ररोहन्ति महिष्यपि ३२
धावतेः प्रगुकारादिः इष्टकायाः परोऽप्युप
पृथिवीमन्नमेषायां व्रतं धत्ते श्वमुतरः ३३

उनत्त्युनत्तुत्रेरुद्धिमुपुष्टैरुन्नवाशिनः
ह्रस्वोऽत एकमच्छिद्रे स्यादृच्छां तु सदं परः ३४
युध्मो युवां सत्युग्रोहनुद्यमानोऽप्यनूरुधम्
कुरीरा रुरुचुः शुद्धाः प्रसुतेन सुशुक्वनिः ३५
वत्सशब्दात्परो नो चे दकारोतौ परे प्युप
द्रुगास्थाणवासिप्पसिषु श्रितयामं शयेषु च ३६
नृमुणन्तु परस्सुप्त यातुजूनां सुपद्यपि
कुलुञ्चानां कुलुङ्गोऽस्नुक् सुजिह्व च विबन्धुषु ३७
दिद्युतुर्बभ्लुकरुणं बाहूरु सुषुवुर्मदम्
शुतुद्रिगौरुवितं च गुगुप्सेत् तृप्णुतर्भुवः ३८
पुपूपौ त्रिषु पूर्वेषु शषहेषु परेषु च
रेफादुकार एवस्यात्स्वरभक्तिर्न विद्यते ३९
भाग्यं परस्तनू मो षू चर्मो धो न्द्रतमूदिमः
अग्ना विष्णू क्रतूस्यातामूर्जो भागं शतक्रतू ४०
ऋकारादि वृषास्यंशौ यस्यायमृषभः परम्
क्वलैरूर्ध्वमृतानि स्यात्सृप्यदृश्यायति तृचम् ४१
बिभृहिस्यात्पिपृहि च त्रपत्त्रिपलचक्रुषुः
चकाराकारयोः पूर्वे ऋकारं चतुर्होतृणाम् ४२
एकारादिस्तु तत्रैतं एतत् श्रेणैत्य नेषि च
मृत्युं यजे प्रयत्यह्ने ते यज्ञे श्रेष्ट वत्सरे ४३
चित्र किर्मीरकल्माषशबलैताश्च कर्बुरे
सोमैन्द्रास्त्रैविदो दैति प्रैरयन्नप्युपैष्यथ ४४

असुगागमगम्भीर सोमे सोम्या इ तीयते
पूतुद्रौधां परे प्रौक्षतान् केन पुरुषं परः ४५
औहन्त पौर्णमासस्स्यादन्तोदात्तश्च केवलः
इति प्रथमोऽध्यायः
ककारादिः कमिष्यन्ते स्यादमुं लोकमुत्तरः
कटधातोः कडित्याहुरश्विभ्यां परितः कृतम् ४६
आशातिकार्भका कार नमो वृत्तिसुवृक्तयः
सिक्त्वा नारा जकस्या सृक् पूतिक विविक्तयः ४७
निषक्तपरिवृत्त्युक्ता सूत्वा कृण तृणत्ति च
प्रदिश्यृतस्य सुधुरा नेमिषा मड्टगित्यपि ४८
खादिर्निरिर्यान्यखनन् षखं खादा खुरा खरे
आखो वैखानसनखाः खाताखातसुखादि तान् ४९
मित्रगर्त श्रुतं गार्तगनीं गन्ती ऋषेगद
निगुतो गुप्यते गर्दानवगद्गामयेति च ५०
जगारपलितः प्राक् चेदाजगन्धविदीग यः
मैनागे राजगान् रुग्णफलिङ्गं वंस गोध्वगत् ५१
कुलुङ्गस्सानगो जीगस्तल्पगोऽनागसोगथाः
अध रागभिगुर्युग्भिर्गमन्तासैलगोदगाः ५२
मघवाघविषा तंघ यद्वघ्नाघां घारिजंघनत्
घणेन घातुका वा घाद् घासैश्चाघमघुक्षताम् ५३
त्वङ्गाह्यर्वाङ् ततो विष्वङ्ङितर्यङ्नानाङ्नतौ सदा
शिङ्ते वृङ्ते स्म मङ्तां च युङ्ध्वं वृङ् धृङ्ङिधङास्तथा

५४

इतः प्रतीच्यापि च हविचित्या प्रति चाहरत्
उचथाय च वाचो गायदचिध्वं समञ्चनम् ५५
दैव्याः पशोर्वैकस्त्वा च च्छयतिर्वर्गद्वितीयभाक्
जयाति जीयते जित्य जरता पजितिं जषः ५६
जुह्वो जरित्रे जेहाज तु जये रुजदज्यते
षजौ रजिष्ठौ चोपाञ्ज्यात् प्राञ्जस्तित्या जवा जया ५७
वाजञ्भावर्यया चन्ता ज्ञि मराटतुराटौ कठोदळाः
उपर्यद्धिर्वोदवे पर्णाराणमा बराणमा नमृन्मय ५८
सह द्व्यानट्सतिगृहे मनुते प्रियमुत्तरः
तकारस्समधत्तात्रक् यतीच्छायति पायति ५९
तमयित्वा जुषेतान्ते यतिवेति ततोह तत्
विश्वसृज्जीवरिषिते दित्सन्तं हृतसूवति ६०
ऋृजुथा सप्तथा साथामथो कोपयथास्यथ
व्यथनीथ च बाधेथा मीथेथो ञ्चोनिषङ्गथिः ६१
अ्रदो यद्ब्रह्मरदितं निदहन्नाददेददो
त्रादे दन्द विदत्यं च रदेमा शोदनविभीदकः ६२
प्रधमाधोधिराधन्तां परिधेहि धवःप्रध
सुवन् कव्यन् प्रनक्षत्र ऋृजीषे न्यत्पुनर्णवः ६३
पिपादीर्घः पकारः स्यात् पिपते च नसंपरः
सौपर्णं पिपतो च्छिद्र अ्रपप्ला प्रत्यपेक्षते ६४
प्रणीतामक्षरं नापो यक्ष्मप्रपत संसृपौ

विर फिशन् विल बं षं ब सा बृणीहितु लम्बती ६५
वैशम्भल्या प्रमा भाहि भर्मा भर्न न्नभिप्रियम्
अभिपाशो भिधा शीभं रेभं च शरभं सिभा ६६
आद्युदात्तो मिमानः स्याज्जीवां मो मन्मभिस्तमः
समना समने द्वे द्वे पुटाद्यास शतान्तभूः
ब्रह्मेत्येतेषु परतो मयडन्ता हिरण्मयः ६७
यज्यु इज्यु भये ज्यायास्सकध्यार्थौ स्वरितान्तिमौ
त्यज्यमित्या न्यजुंभ्ये च रूण्माम्रयसोमया ६८
सार्ष्टिसर्जतिवर्गाद्ध्ह्लादोरुकं प्रयं प्रति
यज्ञे करिक्रदसरदनिवत्स्यावयन्त्रितम् ६९
ज्लप्लक्षयदक्ष्णोण्द्वभ्लुशह्लादमल्मला
अनवस्तवते श्वं च प्रपेदे वद वञ्जना ७०
त्वदृष्पधावत्वे देवा अवृण्वत तव त्वमा
वकारवन्तो वक्राम अवचुश्चोत चाववै ७१
शुच वेश्यसमाश्वश्वो मष्मषारण्यकेर्षति
मेषि सं च समं संहविधेस्त्वं तस्य संप्रजाः ७२
हीडिते महिसाहीति छिन्नाः केचन संज्ञयाः
अनन्तसंशयाञ्छेत्तुमनन्तः परमेश्वरः ७३
श्रीनिवासाध्वरीन्द्रेण चतुष्कुलसुधांशुना
श्लोकाः सिद्धान्तशिक्षायां चतुःसप्ततिरीरिताः ७४

इति सिद्धान्तशिक्षा समाप्ता

Aithal, K.P., *Veda-Lakṣaṇa: Vedic Ancillary Literature, a descriptive bibliography*, (Delhi: Motilal Banarsidass Publishers, 1993), #1493 Siddhānta Śikṣā.
*Sanskrit Texts on Phonetics, A Collection of Śikṣā Texts*, reproduced by Lokesh Chandra from the papers of the late Prof. Raghu Vira, Satapitaka Series--Indo-Asian Literatures Volume 282, New Delhi, 1981, pp. 580-625.

# वररुचिशिक्षा

वररुचिशिक्षा मूलप्रारंभः
गजाननं च वरदं प्रणम्य गिरिजासुतम्
शिक्षामथ प्रवक्ष्यामि वेदानामादिकारणम् १
मात्रिका वत्सानुसृतिस्तथा वत्सानुसारिणी
पादोना स्यात्पाकवती पादमात्रापिपीलिका २
ह्रस्वादिर्वत्सानुसृतिरंते वत्सानुसारिणी
पाकवत्युभयोर्ह्रस्वा दीर्घाभयापिपीलिका ३
न प्लुतप्रग्रहौ चेति सन्धिकार्यं प्रयुज्यते
एकमात्रं तु तत्कालं पादाधिक्यं तथापरे ४
दिक् शब्दादभिनिहितो ब्राह्मणे तूच्चमिष्यते
मसलोपनिषेधौ च वैपरीत्यौ वदेद्बुधः ५
इकारपूर्वो विसर्गस्तु कृत्पदे परतस्थिते
अप्राप्तं प्राप्यते तत्र प्राप्तं न प्राप्यते तथा ६
छाषस्तु वदतो मात्रः द्विमात्रो वायसोपि च
शिखी त्रिमात्रिका चैव निस्तृतो नात्र संशयः ७
स्वरास्तु ब्राह्मणा ज्ञेया वर्गाणां प्रथमाश्च ये
द्वितीयाश्च तृतीयाश्च चतुर्थक्षत्रियास्तथा ८
वर्गाणामुत्तमा वैश्या अंतस्थाश्च तथैव च
अनुस्वारो विसर्गश्च शूद्रा ऊष्माण एव च ९
कथं वर्णास्तु वर्णानां ब्राह्मणक्षत्रियादयः
स्वकालात्पाद एव स्याद्ब्राह्मणानां च कथ्यते १०
तदर्धं क्षत्रियादीनां शास्त्रा दृष्ट्यानुवर्तते
केचित्पदस्तु सर्वेषां व्यञ्जनानां च कथ्यते ११
पितृमेधे सहाध्याये चोपनिषादिनारायणे तथा

न हेमेनी पूर्वौ डकारश्च दुःस्पृष्टभजते ध्रुवम् १२
तत्स शब्दविशिष्टं तु यदि त्वं कथ्यते बुधैः
उत्कार्यमुत्सृजेदुत्के स्वरितत्वं भवेद्ध्रुवम् १३
न रेफे वा हकारे वा द्विर्भावो जायते क्वचित्
न च वर्गे द्वितीये तु न चतुर्थे कदाचन १४
तृतीयेन चतुर्थस्य प्रथमेन परस्य च
आद्यंतश्च न मध्यं च स्वाक्षरेणैव पीडयेत् १५
अवसाने तवर्गीया वाद्यन्तौ दन्तमूलजौ
अर्धपादौ नकारस्तु संयोगे यस्सवर्गतः १६
अवग्रहे तु द्विविधो नकारस्संप्रकीर्तितः
जिह्वाग्रं मध्यमे च स्यादेतावतौ द्विविधा मताः १७
अनुष्टुभौ पदादौ च संयोगावग्रहेषु च
यः शब्द इति विज्ञेयो योऽन्यः स य इति स्मृतः १८
अवग्रहात्परं यत्र स्वरितस्स्यादनंतरम्
तिरो विरामं तद्विद्यादुक्तो यद्यदवग्रहः १९
करेणुः कर्विणी चैव हरिणी हारितेति च
हंसपदेति विज्ञेयाः पंचैताः स्वरभक्तयः २०
करेणू रहयोर्योगे कर्विणी लहकारयोः
हरिणी रशसानां च हारिता लशकारयोः २१
या तु हंसपदा नाम सा तु रेफषकारयोः
एवं पंचविधाभक्तिरुच्यते २२
स्वरभक्तिः प्रयुंजानस्त्रिदोषान् परिवर्जयेत्
इकारश्चाप्युकारश्च ग्रस्तदोषस्तथैव च २३
ऋग्विरामस्वरभक्तिस्वप्रधानाः प्रकीर्तिता

ऋतस्य धूरुषदं चैव स्वतंत्राभक्तिरुच्यते २४
स्वराद्दीर्घात्पदांतस्थात्स्वरितस्तु या भवेत्
सा तु पूर्वस्वरांगस्याद्दोषावस्तोर्हविष्मते २५
स्वराद्ध्रस्वात्पराभक्तिं प्रचयत्पन्नयेद्बुधः
वायुभेदात्स्वरभेदाद्रूपभेदादनेकदा २६
वासश्शब्दाच्च नासिक्यं पूर्वस्स्वप्राप्यते कठे
स्वरभक्तिः स्वन्त्रा वा काठके परिकीर्तिता २७
एकश्रुतिः क्वचिद्विद्यात्क्वचिच्च विदितस्स्वरः
स्वरभक्तिस्स्वतन्त्रा वा व्यंजनस्यांगमस्तथा २८
वर्णान्यो वा स्वरान्यो वा पंच प्रंश्नेषु विद्यते
आरण्यादौ द्वयोश्चान्ते त्रिषु चैवं विधीयते २९
एकश्रुतिरवसान उदात्तस्वरितोऽपि वा
प्रकृतिर्वा संहिता वा सर्वमेव श्रुतिर्भवेत् ३०
अन्त्यात्पूर्वस्य वर्णस्य नीचत्वं कथ्यते बुधैः
क्वचित्तद्रूपमेव स्यात्क्वचिदादौ च मध्यमे ३१
अग्निश्च जातवेदाश्च सहोजा अजिरा प्रभुः
यस्मिंनस्य काले सर्वा आहुतीर्हुता भवेयुः
भक्तिं तत्र विजानीयादिकारो नात्र संशयः ३२
शकारस्य नकारस्य संयोगो यत्र वक्ष्यते
तत्स्थाने यो इकारस्य तैत्तिरीयेषु पठ्यते ३३
काठकानां तु पञ्चानां मथत्र निषदां तथा
तावद्विहिततां चैषां नान्यत्रैतत्प्रवर्तते ३४
कवर्गे प्रथमागमः काठके च यथा विधिः
लोपोकारस्थयोर्मध्ये स्वरात्पूर्वं न कंपितम् ३५

पुपूहे त्रिषु पूर्वेषु शषहेषु परेषु च
रेफ उकार एवास्ति तस्माद्भक्तिर्न विद्यते ३६
उवर्णाच्च षसैस्सार्धं रेफोकारश्च तिष्टतः
उकारश्चात्र सद्भावाद्भक्तिर्नैष्यत्यसंशयः ३७
तिस्रो वृत्तीरुपदिशन्ति वाचो विलम्बितां मध्यमां च द्रुतां च
वृत्यन्तरे कर्मविशेषमाहुर्मात्रा विशेषः परिवृत्तिमेति ३८
छिद्रं परं च तत्र स्यात्पदयोरंतरागमः
चकारस्तत्र जानीयात् काठके परिकीर्तितः ३९
ह्रस्वस्य च एकारस्य संधौ पूर्वागमस्तथा
छकारस्तत्र जानीयात्पदमध्ये तु पठ्यते ४०
अनुनासिकात्परन्तोजात्ककारो मध्यमागमः
गकारश्च ककारश्च थकारश्च यथा क्रमः ४१
स्वरात्परस्य वर्णस्य क्वचिद्द्वित्वं न कथ्यते
द्वितीयस्य चतुर्थस्य पूर्वौ मध्ये तथागमः ४२
तवर्गात्तु द्वितीयस्य जिह्वाग्रं कथ्यते बुधैः
षकारस्तेन संबंधादल्पप्राण इति स्मृतः ४३
टपूर्वस्य द्वितीयस्य जिह्वाग्रं कथ्यते बुधैः
शषसंबंध एव स्यादल्पप्राण इति स्मृतः ४४
आद्यं तयोश्चवर्गाणां द्वितीयाच्च षसीषु च
तेषामल्पतरो वायुः कथ्यते नात्र संशयः ४५
तवर्गे च वक्ष्यमाणे तु पदादौ वर्तते यदि
चनापि वै च मध्यै च जिह्वाग्रं करणं स्मृतम् ४६
नीनं भागस्पर्शानां तु स तु स्पर्शैस्स योगो भवस्मिथः
पूर्वस्य संधृतिर्वक्त्रे न नु तस्येष्यते श्रुतिः ४७

शषसादीव नासिक्याः प्राप्यन्ति मंदवायुना
नेष्यते श्रुत्रिती तस्य सम्यग्धारणमेव तु ४८
तेन शब्दात्परः पृक्तः पूर्वं न प्राप्यते कठे
ऊष्मणापृक्तस्संयोगे निषेधस्तत्र नेष्यते ४९
आदेशाद्भक्तिरेव स्यात्पूर्वां गत्वं विधीयते
लकारे यस्य भक्तिस्तु तैत्तिरीये तु पठ्यते ५०
यस्य प्रयत्नकार्येषु सर्वधा यज्ञमेव तु
नान्यत्र कुरुते यत्नमोमः कंठादय स्मृतः ५१
प्रयत्नश्च पृथग्भावः कैश्चित्सर्वत्र नेष्यते
सर्वदा यत्न एव स्याद्वर्णमात्रस्वरादिषु ५२
ऋकारात्प्रथमस्यैव द्वित्वं न स्यात्कथं चन
पदस्यायनस्थानाच्च पदाध्ययनवर्जिताः ५३
तेषां विरामं षट्पादं भजते नात्र संशयः
ईच्यैः पद्यैश्च संयोगे विरामो मात्रिकस्मृतः ५४
द्विरूपो वा त्रिरूपो वा प्राप्यते वाक्यमेव तु
तेषु तेष्ववकाशेषु मात्रा मात्रैव कथ्यते ५५
न रेफे वा तकारे वा कवर्गे यत्र दृश्यते
पर्वयोर्गुणसंबंधकथ्यते नात्र संशयः ५६
मनसा हस्तशास्त्रोक्तं स्मरन्नुच्चारयेद्बुधः
तस्माद्धस्तेन निर्देशं वर्जयेद्बुद्धिमान्नरः ५७
न वायुं हमसंयोगे नासिकाभ्यां समुत्सृजेत्
न वदेदुरसानादं तथा यरलवेषु च ५८
औरस्यं पदकालेऽस्ति संहितायां न दृश्यते ५९
संहितायांस्तेन सद्भावे विभागौ नास्ति चेद्बुधः

तत्र तत्र प्रयोगो वा अत्यंतं तं वदेद्बुधः ६०
अन्यथापि यथा शास्त्रं वक्तव्यश्च यथाविधि
अनन्त्यं च भवेत्पूर्वमन्त्यश्च परतो यदि ६१
तत्र मध्ये यमस्तिष्ठन्नासिकास्थानमुच्यते
स्पर्शानां पंचमैर्योगे भवन्ति हि यमा स्मृताः ६२
अयतुल्यस्तु गळबंधाः प्रकीर्तिताः
नादस्तु श्रूयते चेद्वा विरामद्व्युत्क्रमस्तथा ६३
अनुनासिकोथ नासिक्यं जायते वर्णरूपतः
वर्गान्ताच्च षसैस्सार्धं अंतस्थैर्वापि संयुतम् ६४
दृष्ट्वा यमानि वर्ते ते अत्यंतं सूक्ष्ममाचरेत्
सप्तस्वरानतिक्रम्य स्वरितो वर्तते क्वचित् ६५
अल्पवायुस्तु तस्य स्यात्पादवृत्तिस्त्विति स्मृतः
मन्द्रादीनां तृतीयस्स्यान्नितांतं कथ्यते बुधैः ६६
एवं शास्त्रांतरे दृष्टे तस्मात्तीव्रं प्रवर्तते
अन्तस्थाद्युदये पूर्वं पंचमस्तु द्विरुच्यते ६७
इतरादौ परे तत्र स न चेति स्मृतो बुधैः
अवसान उदात्तस्य संधौ नीचत्वमिष्यते ६८
आरण्यादौ द्वयोश्चान्ते तथा दृष्टं तथैतत्
स्वरितोदात्तयोश्चैव स्वारपृच्छादयोस्तथा ६९
प्रचयादनुदात्तस्य तेषां कार्यं तु कथ्यते
पूर्वस्तीव्रं ततो वायुस्तीव्रमेव परस्य तु ७०
परस्य मंदवायुस्स्यात्प्रयोक्तव्यं यथा क्रमम्
हकारस्य विसर्गेण संयोगो यत्र दृश्यते ७१
प्रयत्नस्तत्र जानीयाद्यथा वर्गे तथा भवेत्

अध्याये तैत्तिरीयाणामार्षये पाठ इष्यते ७२
अनुवाकादनुवाकस्य वदेदादौ पदद्वयम्
प्रश्न्यात्प्रश्न्य च न ब्रूयाद्धेतुसंबन्धनो न चेत् ७३
अध्याये तैत्तिरीयाणां पदवाक्यांतरादिषु
गणितास्ते प्रयोक्तव्यस्तेन गच्छंति ते गतिम् ७४
प्राप्तिस्वरानतिक्रम्य मयेष्टं वर्तते स्वरः
उपनिषद्विशेषेण षष्टानां मार्ग एव तु ७५
ओष्ठ्य स्वरेषु कार्येषु प्रथमेनाहरद्वयम्
पठयोरोष्ठ्ययोश्चैव कार्यं न स्यात्कथं चन ७६
ओष्ठ्ययोस्स्वरयोर्मध्ये दृश्यते च तयोर्यदि
पृथग्भावस्तयोर्न स्यात्कालेनास्ति तयोरपि ७७
ओष्ठ्ययोस्स्वरयोर्मध्ये पकारो यत्र दृश्यते
पृथग्भावस्तयोर्न स्याद्भिन्नरूपस्वरो यदि ७८
वर्गोत्तमैस्स्वराणां तु संयोगो यत्र दृश्यते
अनुनासिकसंबंधमैकारस्य न विद्यते ७९
अनार्षे ये तु यत्कार्यं तच्च साधारणं भवेत्
विशेषस्तत्र नेष्यंते विना मंत्रादयस्मृताः ८०
अष्टा वेवावसानानि गौर्य आग्नेय एव तु
समाप्याकार्षं तत्र उदात्ते परतः पदे ८१
सूर्यश्चेति विशेषश्च अकार्षं मनसा तथा
देवपाठं पुरस्कृत्य देवसंबंधनस्तथा ८२
तेन त्यजंत्युदात्तादीन् नान्यानपि परित्यजेत्
माहिशब्दादिश्चानेन वेदेष्वग्निर्विवक्षिता ८३
तमुस्तोतारशब्दश्च दूर्वा दुःस्वप्न एव च

तमु पूर्वसकारश्च षत्वमाप्नोति संहितात् ८४
ज्योतिरायुर्विसर्गश्च वृदुर्धर्षत्वमेष्यते
ह्रस्वस्य रूपं विज्ञेयं चतुर्भिस्तथा ८५
दीर्घस्य द्विगुणं विंद्यात्त्रिगुणं तत्प्लुतस्य च
रंगवर्णप्रयोक्तव्यो न ग्रसेत्पूर्वमक्षरम् ८६
दीर्घस्वरं प्रयुंजीत पश्चान्नासिक्यमाचरेत्
हृदयादुत्थितं चंगं कांस्य ध्वनि समस्मृतम् ८७
द्विमात्रं च त्रिमात्रं च प्राप्यते सानुनासिकम्
वर्गोत्तमानां वर्णानां नादसंज्ञाः प्रकीर्तिताः ८८
नादश्वासो हकारश्च वर्णानां ते गुणास्स्मृताः
प्रणवस्पर्शसंबंधः प्रयत्नस्तत्र नेष्यते ८९
मात्रा तत्र वकारश्च प्राप्यते नात्र संशयः
आर्षे ये तद्विभागे च प्रणवो ग्रे प्रयुज्यते ९०
प्रातःकाले तृतीयांशे द्विभागे नांतरा भवेत्
ब्रह्मणः प्रणवं कुर्यादादावंते च सर्वदा ९१
स्रवत्यनोकृतः पूर्वं परस्ताच्च विशीर्यते
प्रणवाद्यास्तथा वेदाः प्रणवे पर्यवस्थिताः ९२
वाच्मयं प्रणवं सर्वं तस्मात्प्रणवमभ्यसेत्
यथा दधि सर्पि स्यात्कंठस्थो यथा नः ९३
प्रयत्नेनोपलभ्येत तद्वत्स्वरगताश्रुतः
स्वरात्स्वरसमं क्रम्य तस्य संधिमनुल्बणम् ९४
सविच्छिंनसमं कुर्यात्सूक्ष्मच्छाया तपोपमम्
एवकारपरो पृक्तः प्रकृतेस्तत्र नेष्यते ९५
गुणं प्राप्तं विजानीयात्काठके परिकीर्तितः

एष शब्दात्परोपृक्तो निषेधस्तत्र नेष्यते ९६
प्राप्तं तत्र विजानीयाद्यथा कर्म प्रवर्तते
मंद्रादीनां तृतीयस्य नितांतं कथ्यते बुधैः ९७
एवं शास्त्रांतरे दृष्टस्तस्मात्तीव्रं प्रवर्तते
प्रग्रहस्योपसर्गस्य समासस्य तथैव च ९८
मध्य आदेश यवयोरिकारौकार आगमौ
रात्र्या मंत्र्य पित्र्यो भत्र्यौ धिष्ण्यात्काठके परिकीर्ततः ९९
आपः पूर्वो ह्यनुस्वारो न क्वचिद्वेद भाषिणः
ऋत्यैष सांहितो दृष्टं तेन शब्दात्परस्समः १००
अध्याये तैत्तिरीयाणां दिवा कीर्ति च संभवेत्
आग्रेन प्रयोक्तव्यं स्वाध्यायत्वरितो भवेत् १०१
तीव्रेण वायुना चैव स्वरितं चोच्चरेद्बुधः
नवमं वायुकर्णस्य जायते नात्र संशयः १०२
अग्र एकश्रुतिर्भाति पश्चान्नास्ति परंपरा
परं नास्ति श्रुतिश्चैव व्रतं चैव श्रुतिर्भवेत् १०३
ऊष्माणा पृक्तसंयोगे निषेधस्तत्र नेष्यते
भक्तिं तत्र विजानीयात्पूर्वां गत्वं विधीयते १०४
रेफस्तत्र द्विमात्रस्यादृकारादर्धमात्रकम्
यदार्धं च विसर्गस्य मात्राद्बुद्धिः प्रकीर्तिता १०५
अध्यापने त्रिमात्रास्स्युः अध्यापने तच्च मात्रिका
रेफपूर्वो नकारो यः पदांतो यत्र दृश्यते १०६
विशेषं तत्र जानीयाद्द्वित्वमित्यभिधीयते
मार्जालः पुत्रमास्येन पिडयेन च बाधतः १०७
एवं वर्णप्रयोगेण ब्रह्मलोके महीयते

मार्जालं पुत्रमास्येन पीडयेदंतकैर्न च १०८
वर्णावळीं न यो ब्रूयान्मार्जालस्तस्य कारणः
यथा व्याघ्रो हरेत्पुत्रं दंष्ट्राभ्यां न च पीडयेत् १०९
भीता पतनभेदाभ्यां तद्वद्वर्णान्प्रयोजयेत्
द्विमात्रं तस्य जानीयात्त्रिमात्रं न कथं चन ११०
पशोर्नान्ते पूर्वशास्त्रोक्तं न वक्तव्यं कथं चन
स्वाध्यायत्वरितं चैव तस्मात्तं परिवर्णयेत् १११
अस्वरव्यंजनं नित्यं अणुमात्रं प्रयुज्यते
संसर्गाः केति बाहुळ्यान्मात्रा बुद्धिः प्रकीर्तिता ११२
स्वाहाकारश्च सर्वत्रोदात्तस्वरित एव तु
निहतोदात्त एव स्यात्सूर्योग्निश्चानुवाकयोः ११३
काठके वक्ष्यमाणा तु समं मध्ये विधीयते
लोपोकारस्तु कर्तव्यः सुवृष्टं वर्ज एवतु ११४
प्रसादो वेद एव स्याद्दीर्घमात्र इति स्मृतः
अनुस्वारस्तु विज्ञेयः वृंजनं त्वर्धमात्रकम् ११५
अंगलोपो विकारश्च वैपरीत्याद्यदा तदा
साक्षैव बलमित्यत्र विशेषश्चेन्न संशयः ११६
शीक्षा च प्रातिशाख्यं च विरुध्येतौ यदा भवेत्
प्रातिशाख्यं बलिर्य स्याद्दकारो न चेत्सदा ११७
विशेषं तं तु यद्रूपं दशसंख्यापरं यदि
विशेषामेव तद्ग्राह्यामविशेषेण इष्यते ११८
भूरादिषु वाक्यादिषु पंचवाक्यात्स्वरो न च
कटुश्च हकारपरस्स्यात्संधि न कुर्यात्सुविनृणमुपूर्वे ११९
विकार एव पूर्वोपरशस्वरौ यत्र पूर्वा ऊष्मा संज्ञे परे स्थिते

पूर्वस्वरस्य सङ्हारस्स्यात्स्वरभक्ति प्रकीर्तिता १२०
नादस्तु श्रूयते घोषाद्विरामाद्द्वित्वकस्तथा
अनासिकोऽथ नासिक्यो जायते वर्णरूपतः १२१
परस्परं तु संयोगे स्पर्शानां संभवेद्यदि
तत्पूर्वस्य श्रुतिर्नास्ति विरामव्यंजनस्य च १२२
व्यक्तिमध्यस्थनासिक्य स्वकालात्पाद इष्यते
तत्काला हि तथा व्यक्तिः प्राप्यते नात्र संशयः १२३
अखण्डपदपर इति वर्णा विषयो वर्णां शविषयोपि च
विरामविषयश्चेति त्रिविधः काल उच्यते १२४
अभ्यासार्थे द्रुतां वृत्तिं प्रयोगार्थे तु मध्यमाम्
शिष्याणामुपदेशार्थे कुर्याद्वृत्तिं विलंबिताम् १२५
क्रमविक्रमसंपन्नामद्रुतामपि लंबिताम्
नीचोच्चस्वारसंपन्नां वदेद्द्रुतवतीन्समामिति १२६
गुरुत्वं लघुता साम्य ह्रस्वदीर्घप्लुता न च
लोपागमविकाराश्च प्रकृतिर्विक्रमः क्रमः १२७
स्वरितोदात्तनीचत्वं श्वासो नादोंगमेव च
एतत्सर्वं तु विज्ञेयं छन्दोभाषामधीयत १२८
नाति व्यक्तं न चाव्यक्तं एवं वर्णानुदीरयेत्
पयः पूर्णमिवामृत्वं हरन् धीरो यथा मति १२९
इति वररुचिशिक्षा समाप्ता

Aithal, K.P., *Veda-Lakṣaṇa: Vedic Ancillary Literature, a descriptive bibliography*, (Delhi: Motilal Banarsidass Publishers, 1993), #1069 Vararuci Śikṣā.
Descriptive Catalogue of Sanskrit Manuscripts in the Oriental Research Institute, University of Mysore, Mysore, Oriental Research Institute, Volume 2: (Vedāṅgam, etc.) 1978, xvi, 391, 285pp.: 3730-1 (B 601/1) Kannada script, 13 folios. Extract No. 262-3.

# श्यामायनीयाशिक्षा

नमोऽन्नपूर्णायै

यस्याः प्रसादात्म तु ना शब्दशास्त्रमिदं ततः
सरस्वत्त्युः सरे भानि कल्पयत्तु सा नः पातु नः सरस्वति १
प्रणिपत्य हृषीकेशं शिवं कमललोचनं
धर्मानामनुपूर्व्यैण साधयिष्ये सुनिश्चितम् २
पूर्वमेवे तु ते सिद्धाः सांप्रतत्तु विभक्तिभिः
चूणुनेव यथाशर्मा शिष्यान्यहितकाम्यया ३

अथ वर्णाः अ आ इ ई उ ऊ ऋ ॠ ऌ ॡ ए ऐ ओ औ
अं अः कखगघङ च छ ज झ ञ ट ठ ड ढ ण त थ
द ध न प फ ब भ म य र ल व श ष स ह ळं क्ष ज्ञः
विसर्जनीयः जिह्वामूलीहोयोपध्मानीयानुनासिकानुस्वाराः
इत्यादियमाश्चेति वर्ण इति वर्णाः वृणोति वर्णाः ४

अकारात्प्रभृतिचतुर्दशवर्णाः स्वार्यन्त इति स्वराः ५
षड्जमध्यमपञ्चमाद्ये च ते निषदान्ताः स्वाराः ६
अनुसरतीति वा स्वराः ७
अथवा नामशेषाणि व्यञ्जनानि ८
तत्स्थे वा व्यञ्जयन्तीति व्यञ्जनानि ९
आदौ दशमाः समानं मानं येषां ते समानमानाः अथवा
समानाः १०
एभ्यः पराश्चत्वारोऽस्यादिवर्णात्यन्तं
यस्मिन् संप्रयुञ्ज्यन्ते द्वति समानाः ११
अतः परदशपात्राणि त्यक्त्वा सप्तमखण्डादूर्ध्वलिख्यते १२

उदात्तश्चानुदात्तश्च स्वरितश्च स्वरास्त्रयः
ह्रस्वदीर्घप्लुत इति कालतो नियमा अचि १३
हकारं पञ्चमैर्युक्तमन्तस्थैश्चाभिसंयुक्तं
औरस्यं तं विजानीयात्कण्ठ्यमाहुरसंयुक्तं १४
जातीश्वरचतुर्थस्तुरित्येतत्परः
उस्थानमेषां वक्ष्यामि पतनं च सुनिश्चितम् १५
अदातपूर्वकं सस्य मातृकस्य विधीयते
निमेषमात्रं कुर्वीत पर्णमश्वत्थमेव वा १६
उदात्तपूर्वस्य रूपस्य चित्रकस्य विशेषतः
उत्थान्नमरणं कुर्यात् उदात्तमर्णवं तथा १७
द्विवेणुकं परश्चातु चणूचमृथोचमादिशेत् १८
नैचस्थानस्यद्विमात्रस्य विशेषतः तिस्रोऽणुकंपुरस्तात्तु
त्रिभिस्स्वस्थानमादिशेत् यावत्सूवर्द्धमात्राविनिर्दिशेत् १९
कपः स्वरेणैवजातिः कदाचिदपिजातिः
सर्वस्मिन्पातयेद्धस्तस्युथानेगहितत्परः २०
स्वरिताद्विपरिप्रापनित्यं हस्तसुधार्यते
नागट्टत्तनुदात्तस्तु तावज्ञानिविधीयते २१
नैवपूर्वस्य सर्वस्य स्वरितस्य विधिं शृणु
पराङ्गापरयोर्मध्ये उदीरणमिहेष्यते २२
ह्रस्वलघुरसंयुक्ते नित्यं त्रैस्वर्यमादिशेत्
अन्तराव्यंजनं नास्ति एतत्त्रैस्वर्यलक्षणम् २३
उत्स्थानं पतनं चैव स्वरितं कपितं तथा
उदात्तस्य विशेषेण वेदमैत्रायणीके वेदोमैत्राणि २४

इति श्यामायनीया शिक्षा समाप्ता

Aithal, K.P., *Veda-Lakṣaṇa: Vedic Ancillary Literature, a descriptive bibliography*, (Delhi: Motilal Banarsidass Publishers, 1993), #1332 Śyāmāyanīyā Śikṣā.

Verzeichnis der Orientalischen Handschriften in Deutschland, herausgegeben von Wolfgang Voigt, Stuttgart (Weisbaden) Franz Steiner Verlag, Volume 2 Part 8, (1987) Indische Handschriften/ von Narasimhan Poti (ed. by Klaus L. Janert). Ms.or.folio 3083, Staatsbibliothek, Marburg; on folio 17 of original pagination.

# Table of Contents

1. Śamāna Śikṣā 1
2. Śaunaka Śikṣā 10
3. Svaravyañjana Śikṣā 17
4. Śaiśirīya Śikṣā 21
5. Vāsiṣṭha Śikṣā 38
6. Pāṇinīya Śikṣā 48
7. Lakṣmīkānta Śikṣā 54
8. Kauhalīya Śikṣā 58
9. Śambhu Śikṣā 66
10. Pārāśarī Śikṣā 71
11. Amareśa Śikṣā 86
12. Kātyāyana Śikṣā 107
13. Laghumādhyandinīyā Śikṣā 109
14. Yājñavalkya Śikṣā 112
15. Keśava Padyātmikā Śikṣā 138
16. Amoghānandinī Śikṣā 141
17. Kauśikī Śikṣā 154
18. Māṇḍavya Śikṣā 160
19. Māṇḍūkī Śikṣā 166
20. Nāradīyā Śikṣā 185
21. Gautamī Śikṣā 210
22. Lomaśī Śikṣā 218
23. Ātreya Śikṣā 227
24. Pāri Śikṣā 260
25. Vyāsa Śikṣā 279
26. Bhāradvāja Śikṣā 305
27. Cārāyaṇīya Śikṣā 320
28. Kauṇḍinya Śikṣā (Hyderabad) 352
29. Kauṇḍinya Śikṣā (Mysore) 361
30. Āraṇya Śikṣā 369
31. Laugākṣi Śikṣā 381
32. Āpiśali Śikṣā 404
33. Kālanirṇaya Śikṣā 413
34. Siddhānta Śikṣā 416
35. Vararuci Śikṣā 422
36. Śyāmāyanīyā Śikṣā 433

# Index

Amareśa Śikṣā 86
Amoghānandinī Śikṣā 141
Āpiśali Śikṣā 404
Āraṇya Śikṣā 369
Ātreya Śikṣā 227
Bhāradvāja Śikṣā 305
Cārāyaṇīya Śikṣā 320
Gautamī Śikṣā 210
Kālanirṇaya Śikṣā 413
Kātyāyana Śikṣā 107
Kauhalīya Śikṣā 58
Kauṇḍinya Śikṣā (Hyderabad) 352
Kauṇḍinya Śikṣā (Mysore) 361
Kauśikī Śikṣā 154
Keśava Padyātmikā Śikṣā 138
Laghumādhyandinīyā Śikṣā 109
Lakṣmīkānta Śikṣā 54
Laugākṣi Śikṣā 381
Lomaśī Śikṣā 218
Māṇḍavya Śikṣā 160
Māṇḍūkī Śikṣā 166
Nāradīyā Śikṣā 185
Pāṇinīya Śikṣā 48
Pārāśarī Śikṣā 71
Pāri Śikṣā 260
Śaiśirīya Śikṣā 21
Śamāna Śikṣā 1
Śambhu Śikṣā 66
Śaunaka Śikṣā 10
Siddhānta Śikṣā 416
Svaravyañjana Śikṣā 17
Śyāmāyanīyā Śikṣā 435
Vararuci Śikṣā 424
Vāsiṣṭha Śikṣā 38
Vyāsa Śikṣā 279
Yājñavalkya Śikṣā 112